पञ्चविवेक पञ्चदीप·पञ्चानन्दा-वयवात्मिका

पञ्चदशी।

श्रीमद्भारतीतीर्थविद्यारण्यमुनीश्वरकृता।

श्रीरामकृष्णविरचितटीकासहिता।

बि, ए उपाधिधारिणा

श्रीजीवानन्द विद्यासागर भट्टाचार्य्येण

संस्कृता प्रकाशिता च

कलिकाता राजधान्याम्।

सरस्वती यन्त्रे

मुद्रिता।

ई १८८२

पञ्चदशी ।

तत्त्वविवेको नाम
प्रथमपरिच्छेदः ।

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहग्राहग्रासैककर्मणे ॥ १ ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्काररूपं मङ्गलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति अर्थाद्विषयप्रयोजने सूचयति नम-इत्यादिना । शं सुखं करोतीति शङ्करः सकलजगदानन्दकरः परमात्मा, एष ह्येवानन्दयतीति श्रुतेः, आनन्दः निरतिशयप्रेमास्पदत्वेन परमानन्दरूपः प्रत्यगात्मा शङ्करश्चासावानन्दश्चेति शङ्करानन्दः प्रत्यगभिन्नः परमात्मा स एव गुरुः, परिपक्वमलोपेतानुत्पादनहेतुशक्तिपातेन योजयति परे तत्त्वे सर्वाचार्यमूर्त्तिश्च इत्यागमात् श्रीमांश्चासौ शङ्करानन्दगुरुश्चेति गन्धदीप इत्यादिवत् समासः अनेन श्रीगुरोरणिमाद्यैश्वर्यसम्पन्नत्वं सूचितम् । यद्वा श्रिया विभूत्या शङ्करोतीति श्रीशङ्करः रातिर्दातुः परायणमिति श्रुतेः, अनेन श्रीगुरोर्भक्तेष्वस्य दाने सामर्थ्यं सूचितं भवति, तस्य गुरोः पादाम्बुजन्मनी कमले ताभ्यां नमः प्रह्वीभावोऽस्तु, किं विधाय सविलासमहामोहग्राहग्रासैककर्मणे विलासः कार्यवर्गः

तत्पादाम्बुरुहद्वन्द्वसेवानिर्म्मलचेतसाम् ।
सुखबोधाय तत्त्वस्य विवेकोऽयं विधीयते ॥ २ ॥
शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक् ।
ततो विभक्ता तत्संविदैकरूप्यान्न भिद्यते ॥ ३ ॥

तेन सह वर्त्तते इति सविलासः एवंविधो यो महामोहो मूलाज्ञानं स एव ग्राहो मकरादिवत् स्ववशं प्राप्तस्यातीव दुःखहेतुत्वात् तस्य ग्रासो ग्रसनं निवर्त्तनं स एव एकं मुख्यं कर्म्म व्यापारो यस्य तत्तथा तस्मै इत्यर्थः । अत्र च शङ्करानन्दपदद्वयसामानाधिकरण्येन जीवब्रह्मणोरेकत्वलक्षणो विषयः सूचितः, जीवस्य भूमब्रह्मरूपतयाऽपरिच्छिन्नसुखाविर्भावलक्षणं प्रयोजनञ्च सूचितम् । सविलासेत्यादिना निःशेषानर्थनिवृत्तिलक्षणं प्रयोजनं स्फुटत एवाभिहितम् ॥ १ ॥

इदानीमवान्तरप्रयोजनकथनपुरःसरं ग्रन्थारम्भं प्रतिजानीते तदिति । तस्य गुरोः पादावेवाम्बुरुहे कमले तयोर्द्वन्द्वं तस्य सेवया परिचर्य्यया स्तुतिनमस्कारादिलक्षणया निर्म्मलं रागादिरहितं चेतोऽन्तःकरणं येषां ते तथोक्ताः तेषां सुखबोधाय अनायासेन तत्त्वज्ञानोत्पादनाय अयं वक्ष्यमाणप्रकारः तत्त्वस्यानारोपितस्वरूपस्य अखण्डसच्चिदानन्दं परं ब्रह्मैव लभ्यते इति वक्ष्यमाणस्य विवेकः आरोपितात् पञ्चकोषादिलक्षणात् जगतो विवेचनं विधीयते क्रियते इत्यर्थः ॥ २ ॥

जीवब्रह्मणोरेकत्वलक्षणविषयसम्भावनाय जीवस्य सत्यज्ञानादिरूपतां दिदर्शयिषुरादौ ज्ञानस्याभेदप्रतिपादनेन नित्यत्वं साधयति शब्दस्पर्शादय इत्यादिना श्लोकचतुष्टयेन । तत्र तावत् विश्वव्यवहारवति जागरे ज्ञानस्याभेदं साधयति शब्देति । जागरे इन्द्रियैरुपलब्धिर्जागरितमिति लक्षणे अवस्थाविशेषे वेद्याः संवेदनविषयभूताः शब्दस्पर्शादयः च शब्दात् दृश्यत्वेन प्रसिद्धाः तदाधारत्वेन प्रसिद्धा आकाशादयश्च वैचित्र्यात् परस्परं मधुराम्लादिवत् वैलक्षण्यसंयोगित्वात् पृथक् परस्परं

तथा स्वप्नेऽत्र वेद्यन्तु न स्थिरं जागरे स्थिरम् ।
तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ॥ ४ ॥
सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत् स्मृतिः ।
सा चावबुद्धविषयावबुद्धं तत्तदा तमः ॥ ५ ॥

भिद्यन्ते । ततस्तेभ्यो विभक्ता बुद्ध्या विवेचिता तत्संवित्तेषां शब्दादीनां संविज्ज्ञानम् ऐकरूप्यात् संवित् संविदित्येकाकारेणावभासमानत्वात् गगनमिव न भिद्यते । अत्रायं प्रयोगः विवादाध्यासिता संवित् स्वाभाविकभेदशून्या उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वात् गगनवत् । शब्दसंवित् स्पर्शसंविदो न भिद्यते संवित्त्वात् स्पर्शसंविद्वदिति एकस्या एव संविदो गगनस्येव औपाधिकभेदेनापि भिन्नव्यवहारोपपत्तौ वास्तवभेदकल्पनायां गौरवं बाधकमुन्नेयम् ॥ ३ ॥

उक्तन्यायं स्वप्नेऽप्यतिदिशति तथा स्वप्न इति । यथा जागरणे वैलक्षण्यात् विषयाणां भेदः ऐकरूप्यात् संविदोऽभेदश्च तथा तेनैव प्रकारेण स्वप्ने करणेषूपसंहृतेषु जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्न इत्युक्तलक्षणायां स्वप्नावस्थायामपि विषया एव भिन्ना न संविदिति । ननु यदि स्वप्नजागरयोरेकाकारता विषयतत्संविदोर्भेदाभेदाभ्यां तर्हि स्वप्नो जागरित इति भेदव्यवहारः किंनिमित्तक इत्याशङ्क्याह अत्र वेद्यन्त्विति । अत्र स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं न स्थायि प्रतीतिमात्रशरीरत्वात् जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्थायि कालान्तरेऽपि द्रष्टुं योग्यत्वात् अतः स्थिरास्थिरविषयत्वलक्षणवैलक्षण्यात् तद्भेदस्तयोः स्वप्नजागरयोर्भेद इत्यर्थः ननु स्वप्नजागरयोर्भेदवत्तत्संविदोरपि भेदः स्यात् इत्याशङ्क्याह तयोरिति । एकरूपेति हेतुगर्भविशेषणम् ॥ ४ ॥

एवमवस्थाद्वये ज्ञानस्यैकत्वं प्रसाध्य सुषुप्तिकालीनस्यापि तस्य तेनैकत्वसाधनाय तत्र तावज्ज्ञानं साधयति सुप्तोत्थितस्येति । पूर्वं

स्वबोधो विषयाद्भिन्नो न बोधात् स्वप्नबोधवत् ।
एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनान्तरे ॥ ६ ॥
मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषा स्वयम्प्रभा ॥ ७ ॥

सुप्तः पश्चादुत्थितः सुप्तोत्थितः सुप्तं सुषुप्तिस्थानादुत्थित इति वा तस्य सौषुप्ततमोबोधः सुषुप्तिकालीनस्य तमसोऽज्ञानस्य यो बोधो ज्ञानमस्ति न किञ्चिदवेदिषमिति सा स्मृतिरेव भवेत् नानुभवस्तत्कालेऽस्येन्द्रियसन्निकर्षव्याप्त्याद्यभावादिति भावः । ततः किं तत्राह सा चाववुद्धविषयेति । सा च स्मृतिरववुद्धविषयाऽववुद्धोऽनुभूतो विषयो यस्याः सा तथोक्ता या स्मृतिः सानुभवपूर्विकेति व्याप्तेर्लोके दृष्टेरिति भावः । ततोऽपि किं तत्राह अववुद्धं तत्तदा तम इति । ततस्तस्मात् कारणात् तत् सौषुप्तं तमः तदा सुषुप्तावववुद्धमनुभूतमित्यवगन्तव्यम् । अत्रायं प्रयोगः विमतं न किञ्चिदवेदिषमिति ज्ञानमनुभूतिपूर्वकं भवितुमर्हति स्मृतित्वात् सा मे माता इति स्मृतिवदिति ॥ ५ ॥

तस्यानुभवस्य स्वविषयात्तमसो भेदं बोधान्तरादभेदञ्चाह द्वाभ्यां स्वबोध इति । स्वबोधः सौषुप्ततमोऽनुभवः विषयात्तमसो भिन्नः पृथग् भवितुमर्हति बोधत्वात् घटबोधवत् । बोधान्तरात्तु न भिद्यते बोधत्वात् स्वप्नबोधवत् । फलितं कथयन् श्लोकाशयमन्यत्राप्यतिदिशति एवमित्यादिना । स्थानत्रयेऽपि एकदिनवर्तिजाग्रदाद्यवस्थात्रयेऽपि संविदेकैव सर्वं वाक्यं सावधारणमिति न्यायात् । तद्वद्दिनान्तर इति । यथैकस्मिन् दिवसेऽवस्थात्रयेऽपि ज्ञानस्याभेदः एवमन्यस्मिन्नपि दिवसे ॥ ६ ॥

अनेकधा अनेकप्रकारेण गतागम्येषु अतीतानागतेषु मासेषु चैत्रादिषु अब्देषु प्रभवादिषु युगेषु कृतादिषु कल्पेषु ब्राह्मादिषु च ज्ञानस्याभेद इत्यर्थः । संविदेकत्वसमर्थने फलमाह नोदेतीति । यतः संविदेकाऽतो नोदेति नोत्पद्यते नास्तमेति न विनश्यति

इयमात्मा परानन्दः परप्रेमास्पदं यतः।
मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते॥ ८॥

च अस्याः संविदः उत्पत्तिविनाशयोरसिद्धेः स्वोत्पत्तिविनाशयोस्तस्या एव संविदा एकोऽनुभवकत्वात् संविदन्तराभावाच्चेति भावः। ननु संविदन्तराभावे स्वस्य भावे तदभावे जगदान्ध्यं प्रसज्येत इत्यत आह एषा स्वयम्भाति। अत्रायं प्रयोगः संवित् स्वप्रकाशा भवितुमर्हति अवेद्यत्वे सति अपरोक्षत्वात् व्यतिरेके घटवत्। न चास्यां विषयता युक्ता किन्तु संविदः स्वसंवेद्यत्वे कर्मकर्तृत्वविरोधात् परवेद्यत्वेऽनवस्थानात्। अतः स्वप्रकाशत्वेन भासमानायाः संविदः सर्वभासकत्वसम्भवात् न जगदान्ध्यप्रसङ्ग इति भावः॥ ७॥

भवतु संविदो नित्यत्वं स्वप्रकाशत्वञ्च ततः किमित्यत आह इयमिति। अत्रायं प्रयोगः। इयं संवित् आत्मा भवितुमर्हति नित्यत्वे सति स्वप्रकाशत्वात् यन्नैवं तन्नैवं यथा घट इति। आत्मनो नित्यत्वोक्त्या सत्यत्वमपि सूचितं भवति नित्यत्वविरह-सदसत्त्वात्। "नित्यत्वं सत्यत्वं तद् यद्यपि तन्नित्यं सत्यम्" इति वाचस्पतिमिश्रैरुक्तत्वादिति भावः। आत्मनः आनन्दरूपत्वमाहेयमिति परानन्द इति आत्मेत्यनुषज्यते परश्चासावानन्दश्चेति परानन्दः निरतिशयसुखस्वरूप इत्यर्थः। तत्र हेतुमाह परेत्यादि। यतो यस्मात् कारणात् परस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः आस्पदं विषयत्वात्। अत्रेदमनुमानम् आत्मा परानन्दरूपः परप्रेमास्पदत्वात्। यः परानन्दरूपो न भवति नासौ परप्रेमास्पदमपि यथा घट इति तथा चायं घटः परप्रेमास्पदं न भवति तस्मात् परानन्दरूपो न भवतीति। ननु आत्मा न भिन्नः नाम इति हेतोरुपलभ्यमानत्वात् न स्वतःत्वमसिद्ध कुतः परप्रेमास्पदत्वम् इत्याशङ्क्य तत्र तु आदमेव न भवतं इत्यादिना प्रेम आत्मन्यनुभवसिद्धमित्याह

तत् प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि ।
अतस्तत् परमं तेन परमानन्दतात्मनः ॥ ९ ॥
इत्थं सच्चित्परानन्द आत्मा युक्त्या तथाविधम् ।
परं ब्रह्म तयोश्चैक्यं श्रुत्यन्तेषूपदिश्यते ॥ १० ॥

मिति परिहरति मा न भूवं हीति । हि यस्मात् कारणात् आत्मनि विषये मा न भूवमहं मा भूवमिति न ममाभावत्वं कदापि मा भूत् । किन्तु भूयासमेव सदा सत्त्वमेव मम भूयादित्येवं प्रेम आत्मनि ईक्ष्यते सर्वैरनुभूयते अतो नासिद्धिरित्यर्थः ॥ ८ ॥

ननु मा भूत् स्वरूपासिद्धिः प्रेम्णः परत्वे प्रमाणाभावाद् विशेषणासिद्धिर्हेतोरित्याशङ्क्याह तत्प्रेमात्मार्थमन्यत्रेति । अन्यत्र स्वातिरिक्ते पुत्रादौ यत् प्रेम तदात्मार्थं तेषामात्मशेषत्वनिमित्तकमेव न स्वाभाविकमेवमात्मनि विद्यमानं प्रेमान्यार्थं न आत्मनोऽन्यशेषत्वनिमित्तकं न भवति किन्तु आत्मनिमित्तकमेव अतो निरुपाधिकत्वात् परमं निरतिशयम् । फलितमाह तेनेति । तेन निरतिशयप्रेमास्पदत्वेनात्मनः परमानन्दता निरतिशयसुखस्वरूपत्वं सिद्धम् ॥ ९ ॥

एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थं सच्चित् परानन्द आत्मा युक्त्येति । शब्दस्पर्शादय इत्यादिना ज्ञानस्य नित्यत्वं प्रसाध्य तस्यैव ज्ञानस्यात्मत्वप्रसाधनेनात्मनः सच्चिद्रूपत्वं साधितम् । परानन्द इत्यादिना च परमानन्दरूपत्वं समर्थितम् । अत आत्मा महावाक्ये त्वंपदार्थः सच्चिदानन्दरूपः सिद्धः । तदुक्तलक्षणस्यात्मनो युक्त्यैवावगतत्वादुपनिषदां निर्विषयत्वेनाप्रामाण्यप्रसङ्ग इत्याशङ्क्याह तथाविधं परं ब्रह्म तयोश्चैक्यं श्रुत्यन्तेषूपदिश्यत इति । तथा तादृशो विधा प्रकारो यस्य तत् तथाविधं सच्चिदानन्दरूपं परं ब्रह्म तत्पदार्थः तयोस्तत्त्वंपदार्थयोरैक्यं अखण्डैकरसत्वञ्च श्रुत्यन्तेषु वेदान्तेषु उपदिश्यते प्रतिपाद्यते अतो वेदान्तानां न निर्विषयत्वमित्यर्थः ॥ १० ॥

अभाने न परं प्रेम भाने न विषये स्पृहा ।
अतोभानेऽप्यभातासौ परमानन्दतात्मनः ॥ ११ ॥
अध्येतृवर्गमध्यस्थ पुत्राध्ययनशब्दवत् ।
भानेऽप्यभान भानस्य प्रतिबन्धेन युज्यते ॥ १२ ॥

आत्मनः परमानन्दरूपत्वमाक्षिपति अभाने न परं प्रेम भाने न विषयस्पृहेति । परमानन्दरूपत्वं न भासते भासते वा । अभाने अप्रतीतौ न परं प्रेमात्मनि निरतिशयः स्नेहो न स्यात् विषयसौन्दर्यज्ञानजन्यत्वात् स्नेहस्य भाने प्रतीतौ तु विषये सुखसाधने स्रगादौ तज्जन्ये सुखे वा स्पृहा इच्छा न स्यात् फलप्राप्तौ सत्यां साधनेच्छानुपपत्तेः नित्यनिरतिशयानन्दभाने सति ऐहिके साधनपारतन्त्र्यादिदोषदूषिते वैषयिके सुखे स्पृहायोगाच्च । तस्मात् स्वानन्दरूपता आत्मन उपपन्नेति प्रकारान्तरस्यासम्भव [illegible]मिति परिहरति अतो भानेऽप्यभातासौ परमानन्दतात्मन इति । यतो भानाभानपक्षयोरुभयोरपि दोषोऽस्ति अतः कारणादात्मनोऽसौ परमानन्दता भानेऽपि प्रतीतावप्यभाता न प्रतीता भवति ॥ ११ ॥

ननु कथं युगपद्भानाभाने न युज्येते इत्याशङ्क्य किमिदमयुक्तत्वमदृष्टचरत्वमुपपत्तिरहितत्वं वा नाद्य इत्याह अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् भानेऽप्यभानमिति । अध्येतृणां वेदपाठकानां वर्गः समूहस्तस्य मध्ये तिष्ठतीति अध्येतृवर्गमध्यस्थः स चासौ पुत्रश्चेति तथा तस्याध्ययनं तत्कर्तृकपठनं तस्य शब्दो ध्वनिर्यथा पार्श्वस्थितस्य पितुर्भासमानोऽपि स सामान्यतो न भासते विशेषतः अयं मत्पुत्रध्वनिरिति तथानन्दस्य भानेऽप्यभानं भवतीत्यर्थः । द्वितीयं प्रत्याह भानस्य प्रतिबन्धेन युज्यत इति । भानेऽप्यभानमित्येतदत्राप्यनुषञ्जनीयं भानस्य स्फुरणस्य प्रतिबन्धेन तज्ज्ञानाभावलक्षणेन भानेऽप्यभानं सामान्यतः प्रतीतावपि विशेषाकारेणाप्रतीतिर्युज्यते उपपद्यत इत्यर्थः ॥ १२ ॥

प्रतिबन्धोऽस्ति भातीति व्यवहारार्हवस्तुनि ।
तं निरस्य विरुद्धस्य तस्योत्पादनमुच्यते ॥ १३ ॥
तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ ।
इहानादिरविद्यैव व्यामोहैकनिबन्धनम् ॥ १४ ॥
चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता ।
तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ॥ १५ ॥
सत्त्वशुद्ध्यविशुद्धिभ्यां मायाऽविद्ये च ते मते ।
मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः ॥ १६ ॥

कोऽसौ प्रतिबन्ध इत्यत आह प्रतिबन्धोऽस्तीति । अस्ति विद्यते भाति प्रकाशत इत्येवं प्रकारं व्यवहारमर्हतीत्यस्ति भातीति व्यवहारार्हं यच्च तद्वस्तु चेति तथा तस्मिन् तं पूर्वोक्तव्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न भातीत्येवंरूपस्य तस्य व्यवहारस्योत्पादनं जननं प्रतिबन्ध इत्युच्यते ॥ १३ ॥

उक्तलक्षणस्य प्रतिबन्धस्य कारणं दृष्टान्तदार्ष्टान्तिकयोः क्रमेण दर्शयति । पुत्रध्वनिश्रुतौ एकनाम्नामनेकपुत्राणां जननश्रवणे दृष्टान्ते तस्य प्रतिबन्धस्य हेतुः कारणं समानाभिहारः बहूनां सह पठनम् । इह दार्ष्टान्तिके व्यामोहैकनिबन्धनं व्यामोहानां विपरीतज्ञानानां एकनिबन्धनं मुख्यकारणम् अनादिरनादिसिद्धा अविद्या ब्रह्मात्मावरणा प्रतिबन्धहेतुरित्यर्थः ॥ १४ ॥

इदानीं प्रतिबन्धहेतुमविद्यां व्युत्पादयितुं तत्कारणीभूतां प्रकृतिं तावद्दर्शयति चिदानन्दमयेति । यच्चिदानन्दमयं ब्रह्म तस्य प्रतिबिम्बेन प्रतिच्छायया समन्विता युक्ता तमोरजःसत्त्वगुणा तमोरजःसत्त्वगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते, सा च द्विधा द्विप्रकारा भवति चकाराद् बहुप्रकारत्वं प्रकारान्तरं सूचयति ॥ १५ ॥

तद्द्वैविध्यमेव दर्शयति सत्त्वशुद्ध्यविशुद्धिभ्यामिति । सत्त्वस्य

अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा ।
सा कारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान् ॥ १७ ॥
तमः प्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया ।
वियत् पवनतेजोऽम्बुभुवो भूतानि जज्ञिरे ॥ १८ ॥

प्रकाशात्मकस्य सूर्यस्य शुद्धजलान्तरेणाकलुषीकृततया अविशुद्धजलान्तरेण कलुषीकृतत्वं ताभ्यां सत्त्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे मायाविद्ये मायेत्यविद्येति च मते सम्मते विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधाना अविद्या इत्यर्थः । यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति मायाबिम्बो वशीकृत्य तामिति । मायाबिम्बो मायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य स्वाधीनीकृत्य वर्त्तमानः सर्वज्ञत्वादिगुणक ईश्वरः स्यात् ॥ १६ ॥

अविद्यावशगस्त्वन्य इति । अविद्याया वशगोऽविद्यायां प्रतिबिम्बत्वेन स्थितः तस्मादन्यस्तु चिदात्माऽन्यो जीवः स्यात् स च तद्वैचित्र्यात् तस्या अविद्याया उपाधिभूताया वैचित्र्यादविशुद्धतारतम्यादनेकधा अनेकप्रकारो देवतिर्यङ्नरादिभेदेन विविधो भवतीत्यर्थः । यथा मुञ्जादिषीकेव आत्मा युक्त्या समुद्धृतः । शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते इति उत्तरत्र शरीरत्रितयात् विवेचितस्य जीवस्य परब्रह्मत्वं वक्ष्यति तत्र तानि कानि त्रीणि शरीराणि तदुपाधिको वा जीवः किंरूपो भवति इत्याकाङ्क्षायां तत् सर्वं क्रमेण व्युत्पादयति सा कारणशरीरं स्यादित्यादिना । सा अविद्या कारणशरीरं सूक्ष्मस्थूलशरीरादिकारणीभूतप्रकृत्यवस्थाविशेषत्वात् कारणत्वोपचारात् शीर्यते तत्त्वज्ञानेन नश्यतीति शरीरं स्यात्, तत्र कारणशरीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः प्रज्ञा अविनाशिस्वरूपा अनुभवरूपा यस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः एतन्नामकः स्यादित्यर्थः ॥ १७ ॥

क्रमप्राप्तं सूक्ष्मशरीरं तदुपाधिकं जीवञ्च व्युत्पादयितुं तत्का-

सत्त्वांशैः पञ्चभिस्तेषां क्रमाद्धीन्द्रियपञ्चकम् ।
श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते ॥ १९ ॥
तैरन्तःकरणं सर्वैर्वृत्तिभेदेन तत् द्विधा ।
मनोविमर्शरूपं स्यात् बुद्धिः स्यान्निश्चयात्मिका ॥ २० ॥

इत्याकाशादिसृष्टिमाह तमःप्रधानप्रकृतेरिति । तद्भोगाय तेषां प्राज्ञादीनां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्रकृतेः तमोगुणप्रधानायाः पूर्वोक्ताया उपादानकारणभूतायाः प्रकृतेः सकाशादीश्वराज्ञया ईशनादिशक्तियुक्तस्य जगदधिष्ठातुराज्ञया ईक्षापूर्वकसर्जनेच्छारूपया निमित्तकारणभूतया वियदादीनि पृथिव्यन्तानि पञ्च भूतानि जज्ञिरे उत्पन्नानीत्यर्थः ॥ १८ ॥

भूतसृष्टिमुक्त्वा भौतिकसृष्टिमभिदधान आदौ ज्ञानेन्द्रियसृष्टिमाह सत्त्वांशैः पञ्चभिस्तेषामिति । तेषां वियदादीनां पञ्चभिः सत्त्वांशैः सत्त्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यं धीन्द्रियपञ्चकं धीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पञ्चकं क्रमादुपजायते एकैकभूतसत्त्वांशादेकैकमिन्द्रियं जायत इत्यर्थः ॥ १९ ॥

सत्त्वांशानां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां साधारणकार्यमाह तैरन्तःकरणं सर्वैरिति । तैः सह सत्त्वांशैः सर्वैः सम्भूय वर्तमानैरन्तःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमुपजायते इत्यनुषङ्गः । तस्यावान्तरभेदं दर्शयितुमाह वृत्तिभेदेन तद्द्विधेति । तदन्तःकरणं वृत्तिभेदेन परिणामभेदेन द्विधा द्विप्रकारं भवति । वृत्तिभेदमेव दर्शयति मनोविमर्शरूपं स्याद् बुद्धिः स्यान्निश्चयात्मिका इति । विमर्शरूपं विमर्शः संशयात्मिका वृत्तिः सा रूपं यस्य तत् तथा तन्मनः स्यात् निश्चयात्मिका निश्चयोऽध्यवसायः स आत्मा स्वरूपं यस्याः सा निश्चयात्मिका वृत्तिर्बुद्धिः स्यादिति ॥ २० ॥

रजोंऽशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥ २१॥
तैः सर्वैः सहितैः प्राणो वृत्तिभेदात् स पञ्चधा।
प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः॥ २२॥
बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।
शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते॥ २३॥

क्रमप्राप्तानां रजोंऽशानां प्रत्येकमसाधारणकार्य्यमाह रजोंऽशैरित्यादि। तेषां वियदादीनामेव पञ्चभीरजोंऽशैरजोगुणभागैरुत्पादावभूतैर्वाक्पाणिपादपायूपस्थाभिधानानि एतन्नामकानि कर्मेन्द्रियाणि क्रियाजनकानि इन्द्रियाणि जज्ञिरे॥ २१॥

रजोंऽशानामेव साधारणकार्य्यमाह तैः सर्वैः सहितैः प्राण इति। सहितैः सम्भूय कारणतां गतैः प्राणो जायत इति शेषः। तस्यावान्तरभेदमाह वृत्तिभेदात् स पञ्चधेति। स प्राणो वृत्तिभेदात् प्राणनादिव्यापारभेदात् पञ्चधा पञ्चप्रकारो भवति। वृत्तिभेदानेव दर्शयति प्राणोऽपान इति। ते पुनस्ते तु भेदाः प्राणादिपञ्चनामका इत्यर्थः॥ २२॥

यदर्थमाकाशादिप्राणान्तानां सृष्टिरुक्ता तदिदानीं दर्शयति बुद्धिकर्मेन्द्रियेत्यादि। बुद्धेर्ज्ञानानि कर्माणि व्यापारास्तज्जनकानि इन्द्रियाणि बुद्धिकर्मेन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेत्यर्थः बुद्धिकर्मेन्द्रियाणि च प्राणाश्च बुद्धिकर्मेन्द्रियप्राणाः तेषां पञ्चकानि तैर्मनसा विमर्शात्मकेन धिया निश्चयरूपया बुद्ध्या च सह सप्तदशभिः सप्तदशसंख्याकैः सूक्ष्मं शरीरं भवति। तस्यैव संज्ञान्तरमाह तल्लिङ्गमुच्यत इति। उच्यते वेदान्तेष्वित्यर्थः॥ २३॥

प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते ।
हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता ॥ २४ ॥
समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात् ।
तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया ॥ २५ ॥
तद्भोगाय पुनर्भोग्यभोगायतनजन्मने ।
पञ्चीकरोति भगवान् प्रत्येकं वियदादिकम् ॥ २६ ॥

एवं सूक्ष्मशरीरमभिधाय तदभिमानप्रयुक्तं प्राज्ञेश्वरयोरवस्थान्तरं दर्शयति प्राज्ञस्तत्रेति । प्राज्ञो मलिनसत्त्वप्रधानाविद्योपाधिको जीवस्तत्र तेजःशब्दवाच्यान्तःकरणोपलक्षितलिङ्गशरीरेऽभिमानेन तादात्म्याभिमानेन तैजसत्वं तैजसनामकत्वं प्रपद्यते प्राप्नोति । ईशः विशुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वरः तत्र लिङ्गशरीरे अभिमानेन हिरण्यगर्भसंज्ञकत्वं प्रपद्यते इत्यनुषङ्गः । तैजसहिरण्यगर्भयोर्लिङ्गशरीराभिमानित्वे समाने सति तयोश्च परस्परं भेदः किन्निबन्धन इत्यत आह तयोर्व्यष्टिसमष्टितेति । तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वं समष्टित्वञ्च यतो भवति तत एव भेद इत्यर्थः ॥ २४ ॥

ईश्वरस्य समष्टिरूपत्वे जीवानां व्यष्टिरूपत्वे च कारणमाह समष्टिरीशः सर्वेषामिति । ईशः ईश्वरो हिरण्यगर्भः सर्वेषां लिङ्गशरीरोपाधिकानां तैजसानां स्वात्मतादात्म्यवेदनात् स्वात्मना तादात्म्यस्यैकत्वस्य वेदनात् ज्ञानात् समष्टिर्भवति ततः ईश्वरादन्ये जीवास्तु तदभावात् तस्य तादात्म्यवेदनस्याभावात् व्यष्टिसंज्ञया व्यष्टिशब्देन कथ्यन्ते ॥ २५ ॥

एवं लिङ्गशरीरं तदुपाधिकौ तैजसहिरण्यगर्भौ च दर्शयित्वा स्थूलशरीराद्युत्पत्तिसिद्धये पञ्चीकरणं निरूपयितुमाह तद्भोगायेति । भगवानैश्वर्यादिगुणषट्कसम्पन्नः परमेश्वरः पुनरपि तद्भोगाय तेषां जीवानां भोगायैव भोग्यभोगायतनजन्मने भोग्यस्यान्नपानादेर्भोगायतनस्य

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ २७ ॥
तैरण्डस्तत्र भुवनभोग्यभोगाश्रयोद्भवः ।
हिरण्यगर्भः स्थूलेऽस्मिन् देहे वैश्वानरो भवेत् ।
तैजसा विश्वतां जाता देवतिर्य्यङ्नरादयः ॥ २८ ॥

जरायुजादिचतुर्विधशरीरजातस्य च जन्मने उत्पत्तये वियदादिकमाकाशादिकं भूतपञ्चकं प्रत्येकमेकैकं पञ्चीकरोति अपञ्चात्मकं पञ्चात्मकं सम्पद्यमानं करोतीत्यर्थः ॥ २६ ॥

अथ कथमेकैकस्य पञ्चपञ्चात्मकत्वमित्यत आह द्विधा विधायेति । वियदादिकम् एकैकं द्विधा द्विधा तन्त्रेणोच्चारितो द्विधाशब्दः विधाय कृत्वा भागद्वयोपेतं कृत्वेत्यर्थः, पुनः पुनरपि प्रथमं भागं चतुर्द्धा भागचतुष्टयोपेतं विधायेत्यनुषज्यते, स्वस्वेतरद्वितीयांशैः स्वस्मात् स्वस्मादितरेषां चतुर्णां भूतानां यो यो द्वितीयः स्थूलभागस्तेन तेन सह प्रथमभागानां चतुर्णां चतुर्णामेकैकस्य योजनात् ते वियदादयः प्रत्येकं पञ्चपञ्चात्मकं भवन्ति ॥ २७ ॥

एवं पञ्चीकरणमभिधाय तैर्भूतैरुत्पाद्यं कार्य्यवर्गं दर्शयति तैरण्डस्तत्र भुवनेति । तैः पञ्चीकृतैर्भूतैरुपादानकारणभूतैरण्डो ब्रह्माण्डः उत्पद्यते तत्र ब्रह्माण्डान्तर्भुवनानि उपर्य्युपरिभागे वर्त्तमाना भूरादयः, भूमेरधः स्थितानि अतलादीनि सप्त पातालान्तानि तेषु च भुवनेषु तैस्तैः प्राणिभिर्भोक्तुं योग्यान्नपानादीनि तत्तल्लोकोचितशरीराणि च तैरेव पञ्चीकृतैर्भूतैरीश्वराज्ञया जायन्ते । एवं स्थूलशरीरोत्पत्तिमभिधाय तेषु स्थूलशरीरेष्वभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतां व्यष्टिरूपाणां तैजसानां विश्वसंज्ञकत्वञ्च भवतीत्याह हिरण्यगर्भ इति । अस्मिन् स्थूलशरीरे वर्त्तमानो हिरण्य-

ते पराग्दर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः ।
कुर्वते कर्म्म भोगाय कर्म्म कर्त्तुञ्च भुञ्जते ॥ २९ ॥
नद्यां कीटा इवावर्त्तादावर्त्तान्तरमाशु ते ।
व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम् ॥ ३० ॥
सत्कर्म्मपरिपाकात् ते करुणानिधिनोद्धृताः ।
प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम् ॥ ३१ ॥

गर्भो वैश्वानरो भवेत् तत्र वर्त्तमानास्तैजसा विश्वा भवन्ति । तेषामेवावान्तरभेदमाह देवतिर्य्यङ्नरादय इति ॥ २८ ॥

इदानीं तेषां विश्वसंज्ञाप्राप्तानां जीवानां तत्त्वज्ञानरहितत्वेन संसारापत्तिप्रकारं दृष्टान्तं श्लोकद्वयेनाह ते पराग्दर्शिन इति । ते देवादयः पराग्दर्शिनः बाह्यानेव शब्दादीन् पश्यन्तो न प्रत्यगात्मानं पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्निति श्रुतेः । ननु तार्किकादयो देहव्यतिरिक्तमात्मानं जानन्ति इत्याशङ्क्य यद्यप्यात्मानं ते जानन्ति तथापि श्रुतिसिद्धं तत्त्वं न जानन्तीत्याशयेनोक्तं प्रत्यक्तत्त्वबोधविवर्जिता इत्यादि लभन्ते नैव निर्वृतिमित्यन्तम् । अत एव भोगाय सुखाद्यनुभवाय मनुष्यादिशरीराण्यधिष्ठाय कर्म तच्छरीरोचितानि कर्माणि कुर्वते जातावेकवचनं पुनः कर्म कर्त्तुं देवादिशरीरैस्तत्फलं भुञ्जते च फलानुभवाभावे तत्तत्सजातीयेच्छानुपपत्त्या तत्तत्साधनानुष्ठानानुपपत्तेः ॥ २९ ॥

एवं वर्त्तमानास्ते जीवाः नद्यां निपतिताः कीटाः आवर्त्तादावर्त्तान्तरमाशु व्रजन्तो यथा निर्वृतिं सुखं न लभन्ते एवमाशु जन्मनो जन्म व्रजन्तः सुखं न लभन्त इत्यर्थः ॥ ३० ॥

एवं संसारापत्तिमभिधाय तन्निवृत्त्युपायं दर्शयितुं दृष्टान्तमाह सत्कर्मपरिपाक इति । ते कीटाः सत्कर्मपरिपाकात् पूर्वार्जितपुण्यकर्मपरिपाकात् कारुणिकेन केनचित् पुरुषेण उद्धृता नदीप्रवाहात् बहि-

उपदेशमवाप्यैवमाचार्यात् तत्त्वदर्शिनः ।
पञ्चकोषविवेकेन लभन्ते निर्वृतिं पराम् ॥ ३२ ॥
अन्नं प्राणो मनो बुद्धिरानन्दश्चेति पञ्च ते ।
कोषास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ॥ ३३ ॥
स्यात् पञ्चीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ।
लिङ्गे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह ॥ ३४ ॥

निःश्वासिताः सन्तः तीरतरुच्छायां प्राप्य सुखं यथा भवति तथा विश्राम्यन्ति ॥ ३१ ॥

इदानीं दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति उपदेशमवाप्येति। एवमुक्तेन प्रकारेण पूर्वोपार्जितपुण्यकर्मपरिपाकवशादेव तत्त्वदर्शिनः प्रत्यगभिन्नब्रह्मसाक्षात्कारवत आचार्यात् गुरोः सकाशादुपदेशं तत्त्वमस्यादिवाक्यं ध्यानसाधनमवश्यं वक्ष्यमाणमवाप्य सम्प्राप्य पञ्चकोषविवेकेनान्नमयादीनां पञ्चानां कोषाणां विवेकेन वक्ष्यमाणविवेचनेन परां निर्वृतिं मोक्षसुखं लभन्ते प्राप्नुवन्ति ॥ ३२ ॥

के ते अन्नादयः पञ्च कोषा इत्याकाङ्क्षायां तानुपदिशति अन्नमिति। अन्नं प्राणो मनो बुद्धिरानन्दश्चेति एते पञ्च कोषाः, बुद्धिर्विज्ञानम्। तेषामन्नादीनां कोषशब्दाभिधेयत्वे कारणमाह तैरावृत इति। तैः कोषैरावृत आच्छादितः स्वात्मा स्वस्वरूपभूत आत्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जननादिरूपं संसारं व्रजेत् कोषो यथा कोषकारकृमेरावरकत्वेन कोषहेतुरेवमन्नादयोऽप्यन्नाद्यानन्दान्ता आवरकत्वेनात्मनः कोषहेतुत्वात् कोषा इत्युच्यन्त इत्यर्थः ॥ ३३ ॥

तेषां कोषाणां स्वरूपाणि क्रमेण व्युत्पादयति स्यात् पञ्चीकृतेत्यादिना [illegible] श्लोकद्वयेन। पञ्चीकृतेभ्यो भूतेभ्यः उत्पन्नः स्थूलो देहोऽन्नसंज्ञकोऽन्नमयशब्दितः कोषः स्यात् प्राणस्तु प्राण-

सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः ।
तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥ ३५ ॥
कारणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः ।
तत्तत्कोषैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ॥ ३६ ॥

मयकोषस्तु लिङ्गे लिङ्गशरीरे वर्त्तमानै राजसैः रजोगुणकार्य्यभूतैः प्राणैः प्राणापानादिभिर्वायुभिः पञ्चभिर्वागादिभिः कर्म्मेन्द्रियैः सह दशभिः स्यात् ॥ ३४ ॥

विमर्शात्मा संशयात्मकं पञ्चभूतसत्त्वकार्य्यं यन्मन उक्तं तत् सात्त्विकैः प्रत्येकभूतसत्त्वकार्य्यभूतैर्धीन्द्रियैः श्रोत्रादिभिः पञ्चभिर्ज्ञानेन्द्रियैः साकं सहितं मनोमयः कोषः स्यात् इति पूर्व्वेण सम्बन्धः । निश्चयात्मिका धीस्तेषामेव सत्त्वकार्य्यरूपा बुद्धिस्तैरेव पूर्व्वोक्तैर्ज्ञानेन्द्रियैरेव साकं सहिता सती विज्ञानमयाख्यः कोषः स्यात् ॥ ३५ ॥

कारणे कारणशरीरभूतायामविद्यायां यन्मलिनसत्त्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यैरिष्टदर्शनलाभभोगजन्यैः सुखविशेषैः सहितमानन्दमयः आनन्दमयाख्यः कोषः स्यादिति । ननु स्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वं स वा एष पुरुषोऽन्नरसमयः इत्युपक्रम्य तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः अन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतत्वाद्युक्तम् आत्मनोऽन्नमयादिशब्दवाच्यत्वं कथमुच्यते इत्याशङ्क्य देहादीनामन्नमयादिविकारत्वेनान्नमयादिशब्दवाच्यत्वमात्मनस्तु तेन तेन कोषेण सह तादात्म्याभिमानात् इत्याह तत्तत्कोषैस्त्विति । आत्मा प्रत्यगात्मा तत्तत्कोषैस्तेन तेन कोषेण सह तादात्म्याभिमानात् तत्तन्मयस्तत्तत्कोषमयः स्यात् अहङ्कारकाले अन्नमयादिकोषप्राधान्यादन्नमयादिशब्दवाच्य इत्यर्थः । तुशब्द आत्मनः कोषेभ्यो वैलक्षण्यद्योतनार्थः ॥ ३६ ॥

अन्वयव्यतिरेकाभ्यां पञ्चकोशविवेकतः।
स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते ॥ ३७ ॥
अभाने स्थूलदेहस्य स्वप्ने यद्भानमात्मनः।
सोऽन्वयो व्यतिरेकस्तद्भानेऽन्यानवभासनम् ॥ ३८ ॥
लिङ्गाभाने सुषुप्तौ स्यादात्मनो भानमन्वयः।
व्यतिरेकस्तु तद्भाने लिङ्गस्याभानमुच्यते ॥ ३९ ॥

अथ तद्विविक्तस्यात्मनो ब्रह्मत्वं भवतीत्यत्र कोशेभ्यो विवेकाद्भवतीत्याह अन्वयव्यतिरेकाभ्यामिति। अन्वयव्यतिरेकाभ्यां वक्ष्यमाणाभ्यां पञ्चकोशविवेकतः पञ्चानां कोशानामन्नमयादीनां विवेकतः प्रत्यगात्मनो विवेचनेन पृथक्‌बोधेन, यद्वा पञ्चकोशेभ्योऽन्नमयादिभ्य आत्मनः पृथक्करणेन, स्वात्मानं प्रत्यगात्मानं ततस्तेभ्यः कोशेभ्यः उद्धृत्य बुद्ध्या निष्कृष्य चिदानन्दस्वरूपं निश्चित्य परं ब्रह्म पूर्वोक्तलक्षणं प्रपद्यते प्राप्नोति ब्रह्मैव भवतीत्यर्थः ॥ ३७ ॥

इदानीं विवेचनायान्वयव्यतिरेकौ दर्शयति अभाने स्थूलदेहस्येति। स्वप्ने स्वप्नावस्थायां स्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतौ सत्याम् आत्मनः प्रतीयमानं यद्भानं स्वप्नसाक्षित्वेन यत् स्फुरणमस्ति स आत्मनः अन्वयः। तस्यामेव स्वप्नावस्थायां तद्भाने तस्यात्मनः स्फुरणे सति अन्यानवभासनम् अन्यस्य स्थूलदेहस्यानवभासनं अप्रतीतिर्व्यतिरेकः स्थूलदेहस्येति शेषः। अस्मिन् प्रकरणे अन्वयव्यतिरेकशब्दाभ्याम् अनुवृत्तिव्यावृत्ती उच्येते ॥ ३८ ॥

एवं स्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिङ्गदेहस्य तथात्वावगमकौ तौ दर्शयति लिङ्गाभान इत्यादि। सुषुप्तौ सुषुप्तावस्थायां लिङ्गाभाने लिङ्गस्य सूक्ष्मदेहस्याभानेऽप्रतीतौ आत्मनो भानं तदवस्थासाक्षित्वेन स्फुरणम् आत्मनोऽन्वयः स्यात् तद्भाने आत्मभाने लिङ्गस्याभानं लिङ्गदेहस्य अस्फुरणं व्यतिरेक इत्युच्यते ॥ ३९ ॥

तद्विवेकाद्विविक्ताः स्युः कोशाः प्राणमनोधियः।
ते हि तत्र गुणावस्थाभेदमात्रात् पृथक् कृताः॥ ४०॥
सुषुप्त्यभाने भानन्तु समाधावात्मनोऽन्वयः।
व्यतिरेकस्त्वात्मभाने सुषुप्त्यनवभासनम्॥ ४१॥
यथा मुञ्जादिषीकैवमात्मा युक्त्या समुद्धृतः।
शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायते॥ ४२॥

ननु पञ्चकोशविवेचनमुपक्रम्य लिङ्गदेहविवेचनं प्रकृतासङ्गतमित्याशङ्क्य प्राणमयादिकोशत्रयस्य तत्रैवान्तर्भावाच्च प्रकृतासङ्गतिरित्याह तद्विवेकादिति। तस्य लिङ्गशरीरस्य विवेकात् विवेचनात् प्राणमनोधियः एतन्नामकाः कोशा विविक्ताः आत्मनः पृथक् कृताः स्युः। कुत इत्यत आह ते हीति। हि यस्मात् कारणात् ते प्राणमयादयः तत्र तस्मिन् लिङ्गशरीरे गुणावस्थाभेदमात्रात् गुणयोः सत्त्वरजसोरवस्थाभेदमात्रात् गुणप्रधानभावेनावस्थानविशेषादेव पृथक्कृताभेदेन निर्दिष्टा इत्यर्थः॥ ४०॥

इदानीमानन्दमयकोशत्वेन विवक्षितस्य कारणशरीरस्य विवेचनोपायमाह सुषुप्त्यभाने भानमिति। समाधौ वक्ष्यमाणलक्षणायां समाध्यवस्थायां सुषुप्त्यभाने सुषुप्त्युपलक्षितस्य कारणदेहरूपस्याज्ञानस्याप्रतीतौ आत्मनस्तु तुशब्दोऽवधारणे आत्मन एव भानं स्फुरणं यदस्ति स आत्मनोऽन्वयः आत्मभाने आत्मनः स्फूर्तौ सत्यां सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितकारणाज्ञानस्याप्रतीतिरेव व्यतिरेकस्तस्येति। अत्रायं प्रयोगः प्रत्यगात्मा अन्नमयादिभ्यो भिद्यते तेषु परस्परं व्यावर्त्यमानेष्वपि स्वयमनुवृत्तत्वात् यत् येषु व्यावर्त्यमानेष्वपि न व्यावर्तते तत् तेभ्यो भिद्यते यथा कुसुमेभ्यः सूत्रं यथा वा शावलेयादिव्यक्तिभ्यो गोत्वमिति॥ ४१॥

एवमन्वयव्यतिरेकाभ्यां कोशपञ्चकाद्विभक्तस्य आत्मनो ब्रह्मप्राप्तिर्भवतीत्युक्तम्। तत्प्रतिपादिकां अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मे-

परापरात्मनोरेवं युक्त्या सम्भाविते॑कता।
तत्त्वमस्यादिवाक्यैः सा भागत्यागेन लक्ष्यते ॥ ४३ ॥
जगतो यदुपादानं मायामादाय तामसीम्।
निमित्तं शुद्धसत्त्वां तामुच्यते ब्रह्म तद्गिरा ॥ ४४ ॥

त्वादिकां तं विद्याच्छुक्रममृतमित्यन्तां कठश्रुतिमर्थतः पठति यथा मुञ्जा-दिषीकैवमिति। यथा येन प्रकारेण मुञ्जादितृणात्मकात् तत्पर्णमध्यात् इषीका गर्भस्था कोमला तृणं युक्त्या वहिरावरकत्वेन स्थितानां स्थूल-पर्णानां विभजनलक्षणेनोपायेन समुद्ध्रियते एवमात्मापि युक्त्या अन्वय-व्यतिरेकलक्षणोपायेन शरीरत्रितयात् पृथक्कृतात् शरीरत्रयात् धीरैः ब्रह्मतयोदिता समस्पन्दैर्विकारैः समुद्धृतः पृथक्कृतश्चेत् स परं ब्रह्मैव जायते चिदानन्दरूपस्य लक्षणस्योभयोरपि शिष्टत्वादित्यभि-प्रायः ॥ ४२ ॥

एतावता पञ्चसन्दर्भेण सफलस्य तत्त्वज्ञानस्य निरूपितत्वात् उत्तर-ग्रन्थोऽनारम्भणीयः स्यादित्याशङ्क्य तदारम्भसिद्धये कृतानुकीर्तनपूर्वक-मुत्तरग्रन्थस्य तात्पर्यमाह परापरात्मनोरेवमिति। एवमुक्तेन प्रकारेण परापरात्मनोस्तत्त्वम्पदार्थयोः परमात्मजीवात्मनोरेकता अभिन्नता युक्त्या लक्षणस्य प्रदर्शनाद्युपायेन सम्भाविताङ्गीकारिता या एकता तत् त्वम-स्यादिवाक्यैः सा भागत्यागेन विरुद्धांशपरित्यागेन लक्ष्यते लक्षणा-वृत्त्या बोध्यते ॥ ४३ ॥

तत् त्वमसीति वाक्यार्थज्ञानस्य तत्पदादिपदार्थज्ञानपूर्वकत्वात् तत्पदस्य वाच्यमर्थं तावदाह जगतो यदुपादानमिति। यत् सच्चिदानन्दलक्षणं ब्रह्म तामसीं तमोगुणप्रधानां मायामादाय उपाधित्वेन स्वीकृत्य जगतः चराचरात्मकस्य कार्यवर्गस्योपादानम् अध्यासाधिष्ठानं शुद्धसत्त्वां विशुद्ध-सत्त्वप्रधानां तामुपाधित्वेन स्वीकृत्य निमित्तम् उपादानाद्यभिज्ञं

यदा मलिनसत्त्वां तां कामकर्म्मादिदूषिताम् ।
आदत्ते तत् परं ब्रह्म त्वं पदेन तदोच्यते ॥ ४५ ॥
त्रितयीमपि तां मुक्त्वा परस्परविरोधिनीम् ।
अखण्डं सच्चिदानन्दं महावाक्येन लक्ष्यते ॥ ४६ ॥
सोऽयमित्यादिवाक्येषु विरोधात् तदिदन्त्वयोः ।
त्यागेन भागयोरेक आश्रयो लक्ष्यते यथा ॥ ४७ ॥
मायाविद्ये विहायैवमुपाधी परजीवयोः ।
अखण्डं सच्चिदानन्दं परं ब्रह्मैव लक्ष्यते ॥ ४८ ॥

कर्तृ भवति तद् ब्रह्म निमित्तोपादानोभयरूपं ब्रह्म तद्गिरा तत् त्वमस्यादिवाक्यस्थेन तत्पदेनोच्यते इत्यर्थः ॥ ४४ ॥

त्वंपदवाच्यार्थमाह यदा मलिनसत्त्वामिति । तदेव ब्रह्म यदा यस्मादभ्यस्याद्यां मलिनसत्त्वामीषद्रजस्तमोभिमिश्रणेन मलिनसत्त्वप्रधानाम् अत एव कामकर्मादिदूषितां तामविद्याशब्दवाच्यां मायामादत्ते उपाधित्वेन स्वीकरोति तदा त्वंपदेनोच्यते ॥ ४५ ॥

एवं तत्त्वंपदार्थावभिधाय वाक्यार्थमाह त्रितयीमपि तां मुक्त्वेति । त्रितयीमपि त्रिप्रकारामपि तमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्वभेदेन उक्तामत एव परस्परविरोधिनीं तां मायां मुक्त्वा परित्यज्य अखण्डं भेदरहितं सच्चिदानन्दं ब्रह्म महावाक्येन लक्ष्यते इत्युक्तम् ॥ ४६ ॥

नन्वेवं लक्षणवृत्त्या वाक्यार्थबोधनं कुत्र दृष्टमित्याशङ्क्याह सोऽयमित्यादिवाक्येष्विति । सोऽयं देवदत्त इत्यादिवाक्येषु तदिदन्त्वयोः तदेतद्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तौ भागयोर्विरुद्धांशयोस्त्यागेनैकांशो देवदत्तस्वरूपमेकमेव यथा लक्ष्यते ॥ ४७ ॥

एवं दृष्टान्तमभिधाय दार्ष्टान्तिकमाह मायाविद्ये विहायैवमिति । एवं सोऽयं देवदत्त इति वाक्ये यथा तद्वत् परजीवयोरुपाधी उपाधिभूते

सविकल्पस्य लक्ष्यत्वे लक्ष्यस्य स्यादवस्तुता ।
निर्विकल्पस्य लक्ष्यत्वं न दृष्टं न च सम्भवि ॥ ४९ ॥
विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् ।
आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयादयः ॥ ५० ॥

कयाविरुद्धौ पदार्थौ विहायाखण्डं भेदरहितं सच्चिदानन्दं परं ब्रह्मैव महावाक्येन लक्ष्यते ॥ ४८ ॥

ननु महावाक्येन किं लक्ष्यं सविकल्पकमुत निर्विकल्पकमिति विकल्प्य प्रथमे पक्षे दोषमाह सविकल्पस्येति । सविकल्पस्य विशेषेण विपरीतत्वेन कल्पितेन नामजात्यादिना रूपेण सह वर्तते इति सविकल्पं तस्य लक्ष्यत्वे लक्षणया बोध्यते लक्ष्यस्य वाक्यार्थतया लक्ष्यस्यावस्तुता स्यात् मिथ्यात्वं स्यात् । द्वितीये दोषमाह निर्विकल्प-स्येति । निर्विकल्पस्य नामजात्यादिरहितस्य लक्ष्यत्वं न दृष्टं लोके न क्वापि दृष्टं न च सम्भवि उपपद्यमानमपि न भवति लक्ष्यत्वे सति निर्विकल्पकत्वव्याघातादिति यावत् ॥ ४९ ॥

सिद्धान्ती अत्यन्तत्वाभेदं बोद्धुमिति विकल्पपूर्वकं दोषमाह विकल्पो निर्विकल्पस्येति । सविकल्पस्य वा निर्विकल्पस्य वा लक्ष्यत्वमिति यो विकल्पस्त्वया कृतः स किं निर्विकल्पस्य उत सविकल्पस्य वा भवेत् आद्ये प्रथमे पक्षे व्याहतिस्त्वदुक्तौ व्याघात एव अन्यत्र द्वितीये पक्षे अनवस्थादयः । तथाहि सविकल्पस्य विकल्प इत्यत्र विकल्पेन सह वर्तते यः इत्यत्र तृतीयान्तविकल्पपदेन प्रथमान्तविकल्पपदेन च एक एव विकल्पोऽभिधीयते द्वौ वा एक एव चेत् स्वयमेव स्वविकल्पाश्रयविशेषणतया स्वाश्रयस्यादर्शितो विकल्पस्वेनात्माश्रयता, द्वौ चेत् तदा तृतीयान्त-निर्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात् तदाश्रयस्यापि सविकल्पकत्वात् तद्विशेषणीभूतो विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट एव विकल्पः ? उत ताभ्यामन्यः ? आद्ये अन्योऽन्याश्रयता, द्वितीयेऽपि धर्मिविशेषणीभूतो

इदं गुणक्रियाजातिद्रव्यसम्बन्धवस्तुषु ।
समन्तेन स्वरूपस्य सर्वमेतदितीष्यताम् ॥ ५१ ॥
विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि ।
विकल्पितत्वलक्ष्यत्वसम्बन्धाद्यास्तु कल्पिताः ॥ ५२ ॥

विकल्पः किं प्रथमान्तशब्दनिर्दिष्ट उत तेभ्योऽन्यः ? आद्ये चक्रकापत्तिः, द्वितीये तस्याप्यन्यस्तस्याप्यन्य इत्यनवस्थापात इति ॥ ५० ॥

न केवलमत्रैवेदं दूषणम् अपि तु सर्वत्रैवं विधिविकल्पपूर्वकं दूषणं प्रसरतीत्याह इदं गुणक्रियेति । इदं विकल्पदूषणजातं गुणक्रियाजातिद्रव्यसम्बन्धवस्तुषु येषु वस्तुषु गुणादिसम्बन्धान्तास्तेषु पञ्चसु वस्तुषु समम् । तथा हि गुणः किं निर्गुणे वर्तते अथवा गुणवति क्रियापि क्रियारहिते वर्त्तते क्रियावति वा ? आद्ये व्याघातः अन्योन्याश्रयादय इति सर्वत्र चैवमूह्यम् । नन्विदमसदुत्तरं चेत् किं सदुत्तरमित्याशङ्क्याह तेनेति । तेन एवंविधविकल्पस्यासङ्गतत्वेन एतद्गुणादिकं सर्वं स्वरूपस्येतीष्यतां गुणादयः सर्वे वस्तुस्वरूपे वर्तन्त इत्यभिप्रायः ॥ ५१ ॥

भवत्वेवमन्यत्र प्रकृते किमायातमित्यत आह विकल्पतदभावाभ्यामिति । विकल्पतदभावाभ्यां विकल्पेन विकल्पाभावेन चासंस्पृष्टात्मवस्तुनि संसर्गरहिते परमात्मवस्तुनि विकल्पितत्वलक्ष्यत्वसम्बन्धाद्याः कल्पिताः तत्र विकल्पितत्वं नाम सविकल्पस्य वा निर्विकल्पस्य वा इति पूर्वोक्तेन विषयीकृतत्वं लक्ष्यत्वं लक्षणावृत्त्या ज्ञाप्यत्वं सम्बन्धः संयोगादिः, आदिशब्देन द्रव्यादयो गृह्यन्ते, एवमन्येऽवधार्याः, तत्र द्रव्यं नाम गुणाश्रयो द्रव्यं समवायिकारणं द्रव्यमिति वा तार्किकैर्लक्षितं कर्मव्यतिरिक्तत्वे सति जातिमात्राश्रयो गुणः, नित्यमेकमनेकवृत्तिसामान्यमिति लक्षिता जातिः संयोगविभागयोरसमवायिकारणजातीयं कर्मेति लक्षिता क्रिया, एते सर्वे स्वरूपे कल्पिता इत्यर्थः ॥ ५२ ॥

इत्थं वाक्यैस्तदर्थानुसन्धानं श्रवणं भवेत् ।
युक्त्या सम्भावितत्वानुसन्धानं मननन्तु तत् ॥ ५३ ॥
ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत् ।
एकतानत्वमेतद्धि निदिध्यासनमुच्यते ॥ ५४ ॥
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् ।
निर्वातदीपवच्चित्तं समाधिरभिधीयते ॥ ५५ ॥

एतावता ग्रन्थसन्दर्भेण किमुक्तं भवतीत्याकाङ्क्षायां फलितमाह इत्थं वाक्यैरिति । इत्थं जगतो यदुपादानं इत्यादिग्रन्थजातोक्तप्रकारेण वाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसन्धानं तेषां वाक्यानामर्थस्य जीवब्रह्मैकत्वलक्षणस्यानुसन्धानं श्रवणं भवेत् । युक्त्या शब्द-स्पर्शादयो वेद्या इत्यादिना परापरात्मनोरेवं युक्त्या सम्भाविततैकता इत्यन्तेन ग्रन्थसन्दर्भेणोक्तप्रकारया युक्त्या सम्भावितत्वानुसन्धानं तस्यार्थस्य उपपद्यमानत्वानुसन्धानं यदस्ति तत् तु मननमुच्यते ॥ ५३ ॥

इदानीं निदिध्यासनमाह ताभ्यामिति । ताभ्यां श्रवणमननाभ्यां निर्विचिकित्से निर्गता विचिकित्सा संशयो यस्मात्सो निर्विचिकित्सः तस्मिन्नर्थे विषये स्थापितस्य धारणावतश्चेतसः देशबन्धश्चित्तस्य धार-णेति पतञ्जलिनोक्तत्वात् यदेकतानत्वं एकाकारवृत्तिप्रवाहवत्त्वम् एत-न्निदिध्यासनमुच्यते हि प्रसिद्धं योगशास्त्रे तत्प्रत्ययैकतानता ध्यान-मिति ॥ ५४ ॥

तस्यैव निदिध्यासनस्य परिपाकदशारूपं समाधिमाह ध्यातृध्याने इति । निदिध्यासने तावद्ध्याता ध्यानं ध्येयञ्च इति त्रितयं भासते तत्र यदा चित्तमभ्यासवशेन ध्यातृध्याने ध्यातारं ध्यानञ्च क्रमात् परि-त्यज्य ध्येयैकगोचरं ध्येयमेकमेव गोचरो विषयो यस्य तत् तथाविधं भवति तदा समाधिरित्युच्यते तत्र दृष्टान्तः निर्वातदीपवदिति वायु-रहिते प्रदेशे वर्त्तमानो दीपो यथा निश्चलो भवति तद्वदित्यर्थः ॥ ५५ ॥

वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः ।
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात् ॥ ५६ ॥
वृत्तीनामनुवृत्तिस्तु प्रयत्नात् प्रथमादपि ।
अदृष्टासकृदभ्याससंस्कार स चिराद्भवेत् ॥ ५७ ॥
यथा दीपो निवातस्थ इत्यादिभिरनेकधा ।
भगवानिममेवार्थमर्जुनाय न्यरूपयत् ॥ ५८ ॥

ननु समाधौ वृत्तीनामनुपलब्धौ ध्येयैकगोचरत्वमपि निश्चेतुं न शक्यते इत्याशङ्क्य वृत्तिसद्भावस्यानुमानगम्यत्वान्नैवमित्याह वृत्तयस्त्विति । आत्मगोचराः आत्मा गोचरो विषयो यासां ता वृत्तयस्तु तदानीं समाधिकाले अज्ञाताः अपि व्युत्थितस्य समाधेरुत्थितस्य समुत्थितादुत्पन्नात् स्मरणादेतावन्तं कालं समाहितोऽभूवमित्येवंरूपादनुमीयन्ते यद्यत् स्मर्य्यते तत्तदनुभूतमिति व्याप्तेर्लोकप्रसिद्धत्वादित्यर्थः ॥ ५६ ॥

ननु तदानीं वृत्त्युत्पादकप्रयत्नाभावात् कथं वृत्त्यनुवृत्तिरित्याशङ्क्य तात्कालिकप्रयत्नाभावेऽपि प्राथमिकादेव प्रयत्नात् अदृष्टादिसहकारिसचिवात् भवतीत्याह वृत्तीनामनुवृत्तिस्त्विति । ध्येयैकगोचराणां वृत्तीनाम् अनुवृत्तिस्तु प्रवाहरूपेणानुगतिस्तु प्रथमादपि प्रयत्नात् समाधिपूर्वकालीनादपि अदृष्टम् अपक्व कृष्णाकृष्णाख्यो यः पुण्यविशेषः कर्माशुक्लकृष्णं योगिनस्त्रिविधमितरेषामिति पतञ्जलिना सूत्रितत्वात् यथासकृदभ्याससंस्कारः पुनः पुनः समाध्यभ्यासेन जनितो भावनाख्यः संस्कारविशेषः ताभ्यां सहकारिकारणाभ्यां सह वर्त्तमानात् भवति ॥ ५७ ॥

नन्वयं समाधिः पूर्वाचार्य्यैर्न निरूपितोऽस्तीत्याशङ्क्य सर्वगुरुणा श्रीकृष्णेनैव निरूपितत्वान्नैवमित्याह यथा दीपो निवातस्थ इति । यथा दीपो निवातस्थो नेङ्गते इत्यादिश्लोकैरनेकधा नानाप्रकारैर्भगवान् सर्वैश्वर्यादिसम्पन्नः इममेव निर्विकल्पकसमाधिरूपमर्थमर्जुनाय शिष्याय न्यरूपयत् निरूपितवान् ॥ ५८ ॥

अनादाविह संसारे सञ्चिताः कर्मकोटयः ।
अनेन विलयं यान्ति शुद्धो धर्मो विवर्धते ॥५९॥
धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः ।
वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ॥ ६० ॥
अमुना वासनाजाले निःशेषं प्रविलापिते ।
समूलोन्मूलिते पुण्यपापाख्ये कर्मसञ्चये ।
वाक्यमप्रतिबद्धं सत् प्राक्परोक्षावभासिते ।
करामलकवद्बोधमपरोक्षं प्रसूयते ॥ ६१ ॥

अथ समाधेरवान्तरफलमाह अनादाविह संसार इति । अनादौ [illegible]दम्, इह अस्मिन् संसारे सञ्चिताः सम्पादिताः कर्मकोटयः कर्मणां पुण्यापुण्यलक्षणानां कोटय इत्युपलक्षणम् अपरिमितानि कर्माणीत्यर्थः अनेन समाधिना विलयं यान्ति विनश्यन्ति क्षीयन्ते चास्य कर्माणि, ज्ञानाग्निः सर्वकर्माणीत्यादि स्मृतेः अतएव शुद्धो धर्मः सविलासाविद्यानिवर्तकतत्त्वसाक्षात्कारसाधनभूतो धर्मो विवर्धते अत्यन्तम् ॥ ५९ ॥

ननु किं समाधिरयमत आह धर्ममेघमिममिति । योगवित्तमाः अतिशयेन योगज्ञाः ब्रह्मसाक्षात्कारवन्त इत्यर्थः इमं निर्विकल्पकसमाधिं धर्ममेघं प्राहुः अवदन् । तदुपपादयति वर्षत्येष इति । यतः कारणात् एष निर्विकल्पकसमाधिः धर्मामृतधाराः धर्मरूपाः अमृतधाराः सहस्रशो वर्षति अत्रैव ब्रह्म समश्नुत इति श्रुतेः अतो धर्ममेघं प्राहुरिति पूर्वेणान्वयः ॥ ६० ॥

इदानीं समाधेः परमप्रयोजनमाह अमुनेति । अमुना समाधिना वासनाजाले बहुप्रकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धे संस्काररूपे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्मसञ्चये समूलोन्मूलिते मूलसहितं यथा भवति तथोन्मूलिते

परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम्।
बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ ६२ ॥
अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकम्।
संसारकारणाज्ञानतमसश्चण्डभास्करः ॥ ६३ ॥
इत्थं तत्त्वविवेकं विधाय विधिवन्मनः समाधाय।
विगलितसंसृतिबन्धः प्राप्नोति परं पदं नरो न चिरात्॥६४॥

इति तत्त्वविवेकः समाप्तः।

च्छूते विनाशित इति यावत्। फलितमाह वाक्यमप्रतिबद्धमिति। वाक्यं तत्त्वमस्यादिवाक्यम् अप्रतिबद्धं सत् कर्मवासनाभ्यां प्रतिबन्धरहितं सत् प्राक् परोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तत्त्वे करामलकवत् करस्थितामलकगोचरमिव अपरोक्षम् अपरोक्षतया तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते जनयति ॥ ६१ ॥

इदानीं परोक्षज्ञानस्य फलमाह परोक्षं ब्रह्मविज्ञानमिति। देशिकपूर्वकं गुरुसकाशाल्लब्धं शाब्दं तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकृतं ज्ञानपूर्वकं यथा भवति तथा कृतं कृत्स्नं समस्तं पापं वह्निवद् दहति ॥ ६२ ॥

अपरोक्षज्ञानस्य फलमाह अपरोक्षात्मविज्ञानमिति। शाब्दं देशिकपूर्वकं व्याख्यातम् अपरोक्षात्मविज्ञानम् अपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितं यज्ज्ञानं तत् संसारकारणाज्ञानतमसः संसारकारणं यदज्ञानमस्ति तदेव तमस्तस्य चण्डभास्करो मध्याह्नकालीनः सूर्यः वाहृतमसश्चण्डभास्कर इवाज्ञानतमसो निवर्त्तकमित्यर्थः ॥६३॥

प्रन्थाभ्यासफलमाह इत्थं तत्त्वविवेकमिति। नरः इत्थमुक्तेन प्रकारेण तत्त्वविवेकं तत्त्वस्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं कोशपञ्चकाद् विवेचनं विधाय कृत्वा तस्मिंस्तत्त्वे विधिवत् शास्त्रोक्तप्रकारेण मनः

द्वितीयपरिच्छेदः।

भूतविवेकः।

सदद्वैतं श्रुतं यत् तत् पञ्चभूतविवेकतः।
बोद्धुं शक्यं ततो भूतपञ्चकं प्रविविच्यते ॥ १ ॥

शब्दस्पर्शौ रूपरसौ गन्धो भूतगुणा इमे।
एकद्वित्रिचतुःपञ्च गुणा व्योमादिषु क्रमात् ॥२॥

समाधाय स्थिरीकृत्य विगलितसंसृतिबन्धः अपरोक्षज्ञानेन विनिवृत्तसंसारबन्धः सन् परं पदं निरतिशयानन्दरूपं मोक्षं न चिरादचिरकालेन प्राप्नोति सत्यज्ञानानन्दलक्षणं ब्रह्मैव भवतीत्यर्थः ॥६४॥

इति तत्त्वविवेकव्याख्या समाप्ता।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ।
पञ्चभूतविवेकस्य व्याख्यानं क्रियते मया ॥

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुत्या जगदुत्पत्तेः पुरा यज्जगत्कारणं सद्रूपमद्वितीयं ब्रह्म श्रुतं तस्यावाङ्मनसगोचरत्वेन सतोऽवगन्तुमशक्यत्वात् तत्कार्य्यत्वेन तदुपाधिभूतस्य भूतपञ्चकस्य विवेकद्वारा तदवबोधनाय उपोद्घातत्वेन भूतपञ्चकविवेकं प्रतिजानीते सदद्वैतमिति ॥ १ ॥

तत्र तावदाकाशादीनां पञ्चानां भूतानां गुणतो भेदज्ञानाय तद्गुणानाह शब्दस्पर्शौ रूपरसाविति। नन्वेते गुणाः किं सर्वैकाश्रित एकैकस्य एकैको गुण इति विमर्शयत्रोभयथापि किन्तु तत्ताद्रात्म्यमस्तीत्यभिप्रायेणाह एकद्वित्रिचतुरिति ॥ २ ॥

प्रतिध्वनिर्वियच्छब्दो वायौ बीसीति शब्दनम् ।
अनुष्णाशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः ।
उष्णस्पर्शः प्रभारूपं जले बुलुबुलुध्वनिः ।
शीतस्पर्शः शुक्लरूपं रसो माधुर्य्यमीरितम् ।
भूमौ कड़कड़ाशब्दः काठिन्यं स्पर्श इष्यते ।
नीलादिकं चित्ररूपं मधुराम्लादिको रसः ।
सुरभीतरगन्धौ द्वौ गुणाः सम्यग् विवेचिताः ॥ ३॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणञ्चेन्द्रियपञ्चकम् ।
कर्णादिगोलकस्थं तच्छब्दादिग्राहकं क्रमात् ।
सौक्ष्म्यात् कार्य्यानुमेयं तत् प्रायो धावेद् बहिर्मुखम् ॥ ४॥

तदेव प्रकारान्तरं दर्शयति प्रतिध्वनिरिति । आकाशे तावत् शब्द एक एव गुणः स च प्रतिध्वनिरूपः, वायौ शब्दस्पर्शौ । तत्र वायोः शब्दमनुकरणेन दर्शयति बीसीति शब्दनमिति । एवमुत्तरत्राप्यनुकरणशब्दनं द्रष्टव्यम् । तस्य स्पर्शमाह अनुष्णाशीतस्पर्श इति । वह्नौ शब्दस्पर्शरूपाणीति त्रयो गुणाः ते क्रमेणाभिधीयन्ते वह्नौ भुगुभुगुध्वनिः उष्णस्पर्शः प्रभारूपमिति । जले शब्दादयो रसान्ताश्चत्वारो गुणास्तानाह जले बुलुबुलुध्वनिरिति । भूमौ शब्दादिगन्धान्ताः पञ्च गुणास्तानुदाहरति भूमौ कड़कड़ाशब्द इत्यादिना सुरभीतरगन्धौ द्वावित्यन्तेन । उक्तमर्थमुपसंहरति गुणाः सम्यग्विवेचिता इति ॥ ३ ॥

एवं गुणतो भेदमभिधाय कार्य्यतो भेदज्ञानाय तत्कार्य्याणि ज्ञानेन्द्रियाणि तावदाह श्रोत्रमिति । तेषां स्थानानि व्यापारांश्च दर्शयति कर्णादिगोलकस्थमिति । इन्द्रियसद्भावे किं प्रमाणमित्याकाङ्क्षायां कार्य्यलिङ्गकानुमानमित्याह सौक्ष्म्यात् कार्य्यानुमेयं तत्

कदाचित् पिहिते कर्णे श्रूयते शब्द आन्तरः ।
प्राणवायौ जाठराग्नौ जलपानेऽन्नभक्षणे ।
व्यज्यन्ते ह्यान्तरस्पर्शा मीलने चान्तरं तमः ।
उद्गारे रसगन्धौ चेत्यक्षाणामान्तरग्रहः ॥ ५ ॥
पञ्चोक्त्यादानगमनविसर्गानन्दकाः क्रियाः ।
कृषिवाणिज्यसेवाद्याः पञ्चस्वन्तर्भवन्ति हि ॥ ६ ॥

इति । तच्च रूपोपलब्धिः करणजन्या क्रियात्वात् छिदिक्रियावदिति द्रष्टव्यं, सौक्ष्म्यादपञ्चीकृतभूतकार्यत्वेन दुर्लक्ष्यत्वादित्यर्थः । तेषां स्वभावमाह पयो धावेद् बहिर्मुखमिति । पराञ्चि खानि व्यतृणत् स्वयम्भू-रिति श्रुतेरित्यर्थः ॥ ४ ॥

प्रायःशब्देन सूचितं क्वचित् करणानामान्तरविषयग्राहकत्वं दर्शयति कदाचिदिति द्वाभ्याम् । कदाचित् कर्णस्य पिधाने कृते सति प्राणवायौ जाठराग्नौ च विद्यमान आन्तरः शब्दः श्रूयते जलपानेऽन्नभक्षणे च आन्तरस्पर्शा अभिव्यज्यन्ते अभिव्यक्ता भवन्ति, नेत्रनिमीलने कृते आन्तरन्तम उपलभ्यते, उद्गारे जाते रसगन्धौ द्वौ गृह्येते इत्यनेन प्रकारेणाक्षाणामान्तरग्रहः, अक्षाणामिति कर्त्तरि षष्ठी आन्तरस्य विषयस्य ग्रहो ग्रहणं इन्द्रियकर्तृकमान्तरविषय-ग्रहणं भवतीत्यर्थः ॥ ५ ॥

एवं ज्ञानेन्द्रियव्यापारानभिधाय कर्मेन्द्रियाणां तत्त्ववादिनं प्रति तत्-सद्भावसमर्थनाय तत्तल्लिङ्गभूतांस्तत्तद्व्यापारानाह पञ्चोक्त्यादानेति । उक्तिश्चादानञ्च गमनञ्च विसर्गश्च आनन्दश्चेति द्वन्द्वः उक्त्यादानगमन-विसर्गानन्दाख्याः पञ्च क्रियाः प्रसिद्धा इति शेषः । ननु कृष्यादीनां क्रियान्तराणामपि सत्त्वात् कथं पञ्चेत्युक्तमित्याशङ्क्याह कृषिवाणिज्य-सेवाद्या इति ॥ ६ ॥

वाक्पाणिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः ।
मुखादिगोलकेष्वास्ते तत् कर्मेन्द्रियपञ्चकम् ॥ ७ ॥
मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् ।
तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद् विनेन्द्रियैः ॥ ८ ॥
अक्षेष्वर्थार्पितेष्वेतद् गुणदोषविचारकम् ।
सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः ॥ ९ ॥
वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः सत्त्वसम्भवाः ।

कानि तानि क्रियाजनकानि इन्द्रियाणीत्यत आह वाक्पाणीति । वागादिभिरक्षैस्तत्क्रियाजनिस्तासां क्रियाणामुत्पत्तिर्भवतीति शेषः अत्रा-युक्तिः करणपूर्विका क्रियात्वात् इत्यादिकार्य्यलिङ्गकमनुमानं द्रष्टव्यम् । तस्य कर्मेन्द्रियपञ्चकस्य स्थानान्याह मुखादीति । आदिशब्देन करचरणौ गुदशिश्नछिद्रे च गृह्येते ॥ ७ ॥

इदानीमुक्तदशेन्द्रियप्रेरकत्वेन प्रस्तुतस्य मनसः तत्त्वं स्थानञ्च दर्शयति मनो दशेन्द्रियाध्यक्षम् इति । तस्यान्तरिन्द्रियत्वं सनिमित्तकमाह तच्चान्तःकरणमिति ॥ ८ ॥

दशेन्द्रियाध्यक्षत्वमेव विशदयति अक्षेष्वर्थार्पितेष्विति । अक्षेषु इन्द्रियेषु अर्थार्पितेषु विषयेषु स्थापितेषु सत्सु एतन्मनो गुणदोषविचारकं समीचीनमिदमसमीचीनमिदमित्यादिविचारकारीत्यर्थः । अयं भावः आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारण्यात् चक्षुरादीनान्तु रूपादिज्ञानजननमात्रेण चरितार्थत्वात् गुणदोषविचारस्य उपलभ्यमानस्यान्यथानुपपत्त्या तत्कारणत्वेन मनोऽभ्युपगन्तव्यमिति । मनसो वैराग्यकामाद्यनेकविधवृत्तिमत्त्वदर्शनाय सत्त्वादिगुणवत्त्वं दर्शयति सत्त्वं रजस्तमश्चेति । तेषां तद्गुणत्वे कारणमाह विक्रियत इति । हि यतस्तैर्गुणैर्विक्रियते विकारं प्राप्नोतीत्यर्थः ॥ ९ ॥

कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः ।
आलस्यभ्रान्तितन्द्राद्या विकारास्तमसोत्थिताः ॥ १० ॥
सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः ।
तामसैर्नोभयं किन्तु वृथायुःक्षपणं भवेत् ।
अत्राहम्प्रत्ययी कर्त्तेत्येवं लोकव्यवस्थितिः ॥ ११ ॥
स्पष्टशब्दादियुक्तेषु भौतिकत्वमतिस्फुटम् ।
अक्षादावपि तच्छास्त्रयुक्तिभ्यामवधार्यताम् ॥ १२ ॥

गुणैस्तस्य विक्रियमाणत्वमेव प्रपञ्चयति वैराग्यमित्यादितमसोत्थिता इत्यन्तैरिति । स्पष्टत्वात् न व्याख्यायते ॥ १० ॥

वैराग्यादीनां कार्य्याणि विभज्य दर्शयति सात्त्विकैरिति । तामसैर्नोभयमिति । एतेषां बुद्धिस्थत्वात् अन्तःकरणादीनां सर्वेषां स्वामिनमाह अत्राहमिति । अहमिति प्रत्ययवान् कर्त्ता प्रभुरित्यर्थः लोकेऽपि कार्य्यकारी प्रभुरित्येवमुपदिश्यते ॥ ११ ॥

एवं जगतः स्थितिमभिधाय इदानीं तस्य भौतिकत्वज्ञानोपायमाह स्पष्टशब्दादीति । स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दस्पर्शादिगुणैः सहितेषु घटादिषु वस्तुषु भूतकार्य्यत्वं स्पष्टमेवावगम्यते । ननु इन्द्रियादिषु कथं भूतकार्य्यत्वनिश्चय इत्याशङ्क्यागमानुमानाभ्यामित्याह अक्षादावपि इति । अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादिशास्त्रम् । अनुमानञ्च विमतानि श्रोत्रादीनि भूतकार्य्याणि भवितुमर्हन्ति भूतान्वयव्यतिरेकानुविधायित्वात् यद्यद् यदन्वयव्यतिरेकानुविधायि तत् तत् कार्य्यं दृष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो मृत्कार्य्यो दृष्टः तथा च इमानि तस्मात् तथेति तदन्वयव्यतिरेकानुविधायित्वञ्च षोडशकलः सोम्य पुरुष इत्यादिना छान्दोग्यश्रुतौ मनसः श्रुतं तदन्यत्रापि द्रष्टव्यम् ॥ १२ ॥

एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते ।
यावत् किञ्चिद् भवेदेतदिदंशब्दोदितं जगत् ॥ १३ ॥
इदं सर्वं पुरा सृष्टेरेकमेवाद्वितीयकम् ।
सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः ॥ १४ ॥
वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः ।
वृक्षान्तरात् सजातीयो विजातीयः शिलादितः ॥ १५ ॥
तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्य्यते ।
ऐक्यावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ॥ १६ ॥

एवं भूतानि भौतिकानि च विविच्य दर्शयित्वा प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपादिकां श्रुतिं व्याचक्षाणस्तद्वाक्यस्थेदम्पदस्यार्थमाह एकादशेन्द्रियैरिति । प्रत्यक्षादिभिः सर्वैः प्रमाणैरपि शब्दादिमात्रात्मनैव यावत् किञ्चिज्जगदवगम्यते तत् सर्वं सदेव इत्यादिवाक्यस्थेन इदम्पदेनाभिहितमित्यर्थः ॥ १३ ॥

एवं इदंशब्दस्यार्थमभिधाय इदानीं तां श्रुतिं स्वयमर्थतः पठति इदं सर्वमिति । अरुणस्यापत्यमारुणिरुद्दालकस्तस्य वचनमित्यर्थः ॥ १४ ॥

एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगतादिभेदत्रयं प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद् दर्शयति वृक्षस्य स्वगतो भेद इति ॥ १५ ॥

एवमनात्मनि भेदत्रयं प्रदर्श्य सद्वस्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिपदत्रयेण निवारयतीत्याह तथा सद्वस्तुन इति । वस्तुत्वसामान्यादनात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वगतादिभेदत्रयमैक्यावधारणद्वैतप्रतिषेधाभिधायकैरेकमेवाद्वितीयमिति त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः ॥ १६ ॥

सतो नावयवाः शङ्क्यास्तदंशस्यानिरूपणात् ।
नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् ॥ १७ ॥
नामरूपोद्भवस्यैव सृष्टित्वात् सृष्टितः पुरा ।
न तयोरुद्भवस्तस्मात् सन्निरंशं यथा वियत् ॥ १८ ॥
सदन्तरं सजातीयं न वैलक्षण्यवर्जनात् ।
नामरूपोपाधिभेदं विना नैव सतो भिदा ॥ १९ ॥
विजातीयमसत् तत् तु न खल्वस्तीति गम्यते ।
नास्यातः प्रतियोगित्वं विजातीयाद् भिदा कुतः ॥२०॥

सद्वस्तुनस्तावत् न स्वगतभेदः शङ्कितुं शक्यते अस्य निरवयवत्वात् इत्याह सतो नावयवा इति । नामरूपयोः सदवयवत्वं किं न स्यादित्याशङ्क्य सृष्टेः पुरा तयोरभावान्न सदंशत्वमित्याह नामरूपे इति ॥ १७ ॥

कुतो नामरूपयोरभावः इत्याशङ्क्याह नामरूपोद्भवस्यैवेति न तयोरुद्भव इति । फलितमाह तस्मादिति । अत्रायं प्रयोग सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वात् गगनवदिति ॥ १८ ॥

माभूत् स्वगतभेदः सजातीयभेदः किं न स्यादित्याशङ्क्य नतु सजातीयं सदन्तरमिति वक्तव्यं तन्निरूपयितुं न शक्यते सतो वैलक्षण्याभावादित्याह सदन्तरमिति । ननु घटसत्ता पटसत्तेति सतो भेदः प्रतिभासत इत्याशङ्क्य घटाकाशमठाकाशवदौपाधिको भेदो न स्वतो भातीत्याह नामरूपोपाधिभेदमिति । अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्शमन्तरेणाविभाव्यमानभेदत्वात् गगनवदिति ॥१९॥

अस्तु तर्हि विजातीयाद् भेद इत्याशङ्क्य सतो विजातीयमसत् तस्यासत्त्वेनैव प्रतियोगित्वासम्भवेन तत्प्रतियोगिकोऽपि भेदो नास्तीत्याह विजातीयमिति ॥ २० ॥

एकमेवाद्वितीयं सत् सिद्धमत्र तु केचन ।
विह्वला असदेवेदं पुरासीदित्यवर्णयन् ॥ २१ ॥
मग्नस्याब्धौ यथाक्षाणि विह्वलानि तथास्य धीः ।
अखण्डैकरसं श्रुत्वा निष्प्रचारा बिभेत्यतः ॥२२॥
गौड़ाचार्य्या निर्विकल्पे समाधावन्ययोगिनाम् ।
साकारध्याननिष्ठानामत्यन्तं भयमूचिरे ॥ २३ ॥
अस्पर्शयोगो नामैषदुर्दर्शः सर्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥२४॥
भगवत्पूज्यपादाश्च शुष्कतर्कपटूनमून् ।
आहुर्माध्यमिकान् भ्रान्तानचिन्त्येऽस्मिन् सदात्मनि॥२५॥

फलितमाह एकमेवेति । इदानीं स्थूणानिखननन्यायेन सदद्वैतमेव द्रढयितुं पूर्वपक्षमाह अत्र तु केचन इत्यादि ॥ २१ ॥

विह्वलत्वे दृष्टान्तमाह मग्नस्याब्धाविति । दार्ष्टान्तिके योजयति तथास्य धीरिति । अस्यासद्वादिनः जातावेकवचनं धीरन्तःकरणम् अखण्डैकरसं वस्तु श्रुत्वा निष्प्रचारा साकारवस्तुनीवाखण्डैकरसे वस्तुनि प्रचाररहिता सती अतोऽस्माद्वस्तुनो बिभेति ॥ २२ ॥

उक्तार्थे आचार्य्यसम्मतिं दर्शयति गौड़ाचार्य्या इति ॥ २१ ॥

केन वाक्येन उक्तवन्त इत्याकाङ्क्षायां तदीयं वार्त्तिकमेव पठति अस्पर्शयोगो नामेति । योऽयमस्पर्शयोगाख्यो निर्विकल्पकः समाधिः एष सर्वयोगिभिः साकारध्याननिष्ठैर्दुर्दर्शः दुःखेन द्रष्टुं योग्यः दुष्प्राप्य इत्यर्थः । अत्रोपपत्तिमाह योगिनो बिभ्यतीति । हि यस्मात् कारणात् योगिनः पूर्वोक्ताद्वैतदर्शिनः अभये भयशून्ये समाधौ निर्जने देशे बाला इव भयदर्शिनो भयहेतुत्वं कल्पयन्तः अस्माद् योगात् भीतिं प्राप्नुवन्ति ॥ २४ ॥

श्रीमदाचार्य्यैरप्येतदभिहितमित्याह भगवत्पूज्यपादाश्चेति ॥२५॥

अनादृत्य श्रुतिं मौर्ख्यादिमे बौद्धास्तमस्विनः ।
आपेदिरे निरात्मत्वमनुमानैकचक्षुषः ॥ २६ ॥
शून्यमासीदिति ब्रूषे सद्योगं वा सदात्मताम् ।
शून्यस्य न तु तद्युक्तमुभयं व्याहतत्वतः ॥ २७ ॥
न युक्तस्तमसा सूर्यो नापि चासौ तमोमयः ।
सच्छून्ययोर्विरोधित्वात् शून्यमासीत् कथं वद ॥ २८ ॥
वियदादेर्नामरूपे मायया सति कल्पिते ।
शून्यस्य नामरूपे च तथा चेत् जीव्यतां चिरम् ॥ २९ ॥
सतोऽपि नामरूपे द्वे कल्पिते चेत् तदा वद ।
कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ॥३ ॥

तद्वार्त्तिकं पठति अनादृत्य श्रुतिं मौर्ख्यादिति ॥ २६ ॥

इदानीमसद्वादं विकल्प्य दूषयति शून्यमासीदित्यनेन वाक्येन शून्यस्य सत्ताजातियोगं वा सद्रूपतां वा ब्रूषे इति विकल्पार्थः तदुभयं सत्तासम्बन्धसद्रूपत्वलक्षणं शून्यस्य व्याहतत्वात् न युज्यते इत्यर्थः ॥ २७ ॥

व्याहतत्वमेव दृष्टान्तपूर्वकं द्रढयति न युक्तस्तमसेति ॥ २८ ॥

ननु भवन्मतेऽपि वियदादीनां निर्विकल्पे ब्रह्मणि सत्त्वं व्याहतमित्याशङ्क्याह वियदादेरिति । तर्हि शून्यस्यापि नामरूपे सद्वस्तुनि कल्पिते इति वदतो बौद्धस्यापसिद्धान्त इत्यभिप्रायेणाह शून्यस्य नामरूपे चेति ॥ २९ ॥

ननु तर्हि शून्यस्येव सद्वस्तुनोऽपि नामरूपे द्वे कल्पिते एवाङ्गीकर्त्तव्ये भवन्मते वास्तवयोर्नामरूपयोरभावादिति शङ्कते सतोऽपीति । विकल्पासहत्वादयं पक्ष एव अनुपपन्न इत्यभिप्रायेण परिहरति तदा वद कुत्रेतीति । अयमभिप्रायः सतो नामरूपे किं सति कल्पिते उता-

सदासीदिति शब्दार्थभेदे वैगुण्यमापतेत्।
अभेदे पुनरुक्तिः स्यात् मैव लोके तथेक्षणात् ॥२१॥
कर्त्तव्यं कुरुते वाक्यं ब्रूते धार्यस्य धारणम्।
इत्यादिवासनाविष्टं प्रत्यासीत् सदितीरणम् ॥२२॥
कालाभावे पुरेत्युक्तिः कालवासनया,युतम्।
शिष्यं प्रत्येव तेनात्र द्वितीयं न हि शङ्क्यते ॥२३॥

सति अथवा जगति। नाद्यः अन्यस्य रजतादेर्नामरूपयोरन्यत्र शुक्तिकाद्यावारोपितत्वदर्शनात् सतो नामरूपयोः सत्येव कल्पनायोगात् न द्वितीयः असतो निरात्मकस्य आधिष्ठानत्वायोगात् न तृतीयः सत उत्पन्नस्य जगतः सन्नामरूपकल्पनाधिष्ठानत्वानुपपत्तेरिति। मामूदधिष्ठानमनयोः कल्पना किं न स्यादित्याशङ्क्याह निरधिष्ठान इति ॥ २० ॥

ननु असदेवेदमग्र आसीदित्यत्र यथा व्याघात उक्तस्तथा सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोऽस्तीति शङ्कते सदासीदिति। तथाहि सदासीदिति शब्दभेदयोरर्थभेदोऽस्ति न वा अस्ति चेद्द्वैतहानिः नास्ति चेत् पुनरुक्तिः स्यात् अतः सदासीदित्यनुपपन्नमिति। द्वितीयं पक्षमादाय परिहरति नैवमिति। पुनरुक्तिदोषस्य कः परिहार इत्याशङ्क्याह लोक इति ॥ २१ ॥

लोके एवंविधेषु प्रयोगेषु पुनरुक्त्यभावः क्व दृष्ट इत्याशङ्क्याह कर्त्तव्यमिति। भवत्वेवं लोके श्रुतौ किमायातमित्यत आह इत्यादीति ॥ २२ ॥

नन्वद्वितीयवस्तुनि भूतकालाभावात् अग्र आसीदित्युक्तिरनुपपन्नेत्याशङ्क्याह कालाभावे पुरेत्युक्तिरिति। ननु जगदुत्पत्तेः पुरा जगदभावेन अद्वितीयत्वं मास्तु; इत्याशङ्क्य श्रुतिप्रवृत्तेः द्वैतवासनाविशिष्टशिष्यप्रबोधनार्थत्वात् नाभिशङ्कनीयम् इत्याह तेनेति ॥ २३ ॥

चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया ।
अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् ॥२४॥
अतस्तिमितगम्भीरं न तेजो न तमस्ततम् ।
अनाख्यमनभिव्यक्तं सत् किञ्चिदवशिष्यते ॥२५॥
ननु भूम्यादिकं माभूत् परमाण्वन्तनाशतः ।
कथन्ते वियतोऽसत्त्वं बुद्धिमारोहतीति चेत् ॥२६॥
अत्यन्तं निर्जगद्व्योम यथा ते बुद्धिमाश्रितम् ।
तथैव सन्निराकाशं कुतो नाश्रयते मतिम् ॥ २७ ॥
निर्जगद्व्योम दृष्टञ्चेत् प्रकाशतमसी विना ।
क्व दृष्टं किञ्च ते पक्षे न प्रत्यक्षं वियत् खलु ॥२८॥

इदानीं सिद्धान्तरहस्यमाह चोद्यं वेति । व्यवहारदशायां चोद्यादि कर्त्तव्यं परमार्थतस्त्वद्वैतमेव तत्त्वमित्यर्थः ॥ २४ ॥

परमार्थतो द्वैताभावे श्रुतिं प्रमाणयति अतस्तिमितेति । तिमितं निश्चलं गम्भीरं दुरवगाहं मनसा विषयीकर्त्तुमशक्यं न तेजस्तेजस्त्वानधिकरणं न तमस्तमसो विलक्षणमनावरणस्वभावं ततं व्याप्तम् अनाख्यमाख्यातुमशक्यम् अनभिव्यक्तं चक्षुरादिभिरप्यविषयीकृतं सत् शून्यविलक्षणम् अतएव किञ्चिदिदन्तया निर्द्देष्टुमशक्यम् अवशिष्यते द्वैतनिषेधावधित्वेनावतिष्ठत इत्यर्थः ॥ २५ ॥

ननु अनित्यत्वेनानित्यस्य भूम्यादेरसत्त्वमस्तु नित्यस्याकाशस्यासत्त्वं कथमङ्गीक्रियते इत्याशङ्कते ननु भूम्यादिकमिति ॥ २६ ॥

दृष्टान्तावष्टम्भेन परिहरति अत्यन्तं निर्ज्जगद्व्योमेति । अत्यन्तं निर्ज्जगज्जगन्मात्ररहितमित्यर्थः ॥ २७ ॥

न हि दृष्टेऽनुपपन्नमिति न्यायमाश्रित्य चोदयति निर्ज्जगद्व्यो-

सद्वस्तु सिद्धमस्माभिर्निश्चितैरनुभूयते ।
तूष्णीं स्थितौ न शून्यत्वं शून्यबुद्धेस्तु वर्जनात् ॥३९॥
सद्बुद्धिरपि चेन्नास्ति मास्त्वस्य स्वप्रभत्वतः ।
निर्मनस्कत्वसाक्षित्वात् सन्मात्रं सुगमं नृणाम् ॥४०॥
मनोजृम्भणराहित्ये यथा साक्षी निराकुलः ।
मायाजृम्भणतः पूर्वं सत्तथैव निराकुलम् ॥४१॥
निस्तत्त्वा कार्य्यगम्यास्य शक्तिर्मायाग्निशक्तिवत् ।
न हि शक्तिः क्वचित् कैश्चित् बुध्यते कार्य्यतः पुरा ॥४२॥

केति । दर्शनमेवासिद्धमिति परिहरति प्रकाशतमसौ विना क्व दृष्ट-मिति । अपसिद्धान्तोऽपि इत्याह किञ्चेति ॥ ३८ ॥

ननु दर्शनाभावः सद्वस्तुन्यपि समान इत्याशङ्क्य सतः सर्वानुभव-सिद्धत्वात् नैवमित्याह सद्वस्तु सिद्धमिति । ननु तूष्णीम्भावे शून्यमेव इतरस्य कस्यापि प्रतीत्यभावात् इत्याशङ्क्य शून्यस्यापि प्रतीत्यभावात् शून्यमपि न सम्भवतीत्याह न शून्यत्वमिति ॥ ३९ ॥

ननु तर्हि सद्बुद्ध्यभावात् सत्त्वमपि न घटत इति शङ्कते सद्बुद्धि-रपीति । तस्य स्वप्रकाशत्वात् न सद्बुद्ध्यभावोऽनिष्ट इति परिहरति मास्त्वस्येति । ननु स्वगोचरबुद्ध्यभावे कथं सद्वस्तु अवगन्तुं शक्यत इत्यत आह निर्मनस्कत्व इति ॥ ४० ॥

एवं निष्प्रपञ्चस्य साक्षिणस्तूष्णीं स्थितौ भानं प्रदर्श्य एतद्-दृष्टान्तबलेन सृष्टेः पुरापि सद्वस्तु तथावगन्तुं शक्यत इत्याह मनोजृ-म्भणराहित्ये इति ॥ ४१ ॥

मायायाः किं लक्षणमित्यत आह निस्तत्त्वेति । निस्तत्त्वा जगत्कारणभूतात् सद्वस्तुनः पृथक् सत्त्वरहिता कार्य्यगम्या वियदादि-कार्य्यलिङ्गगम्या अस्य सद्वस्तुनः शक्तिर्वियदादिकार्य्यजननसामर्थ्यं

न सद्वस्तु सतः शक्तिर्न हि वह्नेः स्वशक्तिता ।
सद्विलक्षणतायान्तु शक्तेः किं तत्त्वमुच्यताम् ॥४३॥
शून्यत्वमिति चेत् शून्यं मायाकार्य्यमितीरितम् ।
न शून्यं नापि सद्यादृक् तादृक् तत्त्वमिहेष्यताम् ॥४४॥
नासदासीन्नो सदासीत् तदानीं किन्त्वभूत् तमः ।
सद्योगात् तमसः सत्त्वं न स्वतस्तन्निषेधनात् ॥४५॥

मायेत्युच्यते । वस्तुस्वरूपातिरिक्तसद्भावे दृष्टान्तमाह अग्निशक्तिवदिति । यथा अग्न्यादिस्वरूपातिरिक्तं स्फोटादिकार्य्यलिङ्गगम्यं वह्न्यादिनिष्ठं सामर्थ्यमस्ति तद्वदित्यर्थः । शक्तेः कार्य्यलिङ्गगम्यत्वं व्यतिरेकमुखेन द्रढयति न हि शक्तिरिति ॥ ४२ ॥

एवं शक्तेः कार्य्यलिङ्गगम्यत्वमुपपाद्य निस्तत्त्वरूपतामुपपादयति न सद्वस्तु सतः शक्तिरिति । अयमभिप्रायः सद्वस्तुनः शक्तिः किं सती उतासती न तावत् सती तथात्वे सतोऽभिन्नत्वेन तच्छक्तित्वायोगात् । उक्तार्थे दृष्टान्तमाह न हि वह्नेः स्वशक्तितेति द्वितीयेऽपि किं नरविषाणतुल्या उत सद्विलक्षणेति विकल्पाभिप्रायेण पृच्छति सद्विलक्षणतायान्त्विति ॥ ४२ ॥

तत्राद्यपक्षमनूद्य दूषयति शून्यत्वमिति । शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरमित्यत्रेत्यर्थः । तस्मात् द्वितीयः पक्षः परिशिष्यत इत्याह न शून्यमिति । मायारूपं सत्त्वासत्त्वाभ्यां निर्वचनानर्हमित्यभिप्रायः ॥ ४४ ॥

अस्मिन्नर्थे श्रुतिं प्रमाणयति नासदासीदिति । तम आसीत् तमसा गूढमित्यादि श्रुतिः प्रमाणमित्यर्थः । तर्हि तम आसीदिति कथं सत्त्वमुच्यत इत्यत आह सद्योगादिति । कुत इत्यत आह तन्निषेधनादिति ॥ ४५ ॥

अतएव द्वितीयत्वं शून्यवन्नहि गण्यते।
न लोके चैत्रतच्छक्त्योर्जीवितं गण्यते पृथक्॥४६॥
शक्त्याधिक्ये जीवितञ्चेद् वर्द्धते तत्र वृद्धिकृत्।
न शक्तिः किन्तु तत्कार्य्यं युद्धकृष्यादिकन्तथा।
सर्व्वथा शक्तिमात्रस्य न पृथक् गणना क्वचित्।
शक्तिकार्य्यन्तु नैवास्ति द्वितीयं शङ्क्यते कथम्॥ ४७॥
न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्त्वेकदेशभाक्।
घटशक्तिर्यथा भूमौ स्निग्धमृद्येव वर्त्तते॥ ४८॥
पादोऽस्य विश्वा भूतानि त्रिपादस्ति स्वयं प्रभः।
इत्येकदेशवृत्तित्वं मायाया वदति श्रुतिः॥४९॥

फलितमाह अतएवेति। यतः अतः सत्त्वं मायाया नास्ति अतएव शून्यस्येव मायाया अपि द्वितीयत्वं नहि गण्यते नैवाद्रियत इत्यर्थः। अमतस्य द्वितीयत्वानङ्गीकारे दृष्टान्तमाह न लोक इति॥ ४६॥

ननु शक्त्याधिक्ये जीविताधिक्यं दृश्यते अतः शक्तेरपि पृथक् जीवितत्वमस्तीति शङ्कते शक्त्याधिक्य इति। न शक्तिर्जीवितवर्द्धने कारणम् अपि तु तत् कार्य्यं युद्धकृष्यादीति परिहरति तत्र वृद्धिकृदिति। दार्ष्टान्तिके योजयति तथा सर्व्वथेति। माभूत् शक्त्या सद्वितीयत्वं यतः अपि तु तत्कार्य्येण तत् भवत्येवेत्याशङ्क्य तस्य तदानीमसत्त्वात् तेनापि न सद्वितीयत्वमित्याह शक्तिकार्य्यमिति॥ ४७॥

ननु सच्छक्तिः सति ब्रह्मणि सर्व्वत्र वर्त्तते उतैकदेशे नाद्यः शक्तौ प्राप्यमाणाभावप्रसङ्गात् न द्वितीयः निरंशत्वविरोधित्वादित्याशङ्क्य आद्यानङ्गीकारात् द्वितीये परिहारो वक्ष्यते इत्यभिप्रायेणाह न कृत्स्नब्रह्मवृत्तिरिति। एकदेशवृत्तौ दृष्टान्तमाह घटशक्तिरिति॥ ४८॥

शक्तेरेकदेशवृत्तित्वे प्रमाणमाह पादोऽस्येति॥ ४९॥

विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।
इति कृष्णोऽर्जुनायाह जगतस्त्वेकदेशताम् ॥ ५० ॥
सभूमिं सर्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ।
विकारावर्त्ति चात्रास्ति श्रुतिसूत्रकृतोर्वचः ॥५१॥
निरंशेऽप्यंशमारोप्य कृत्स्नेऽंशे वेति पृच्छतः ।
तद्भाषयोत्तरं ब्रूते श्रुतिः श्रोतुर्हितैषिणी ॥ ५२ ॥
सत्तत्त्वमाश्रिता शक्तिः कल्पयेत् सति विक्रियाः ।
वर्णाभित्तिगताभित्तौ चित्रं नानाविधं यथा ॥५३॥
आद्यो विकार आकाशः सोऽवकाशस्वभाववान् ।
आकाशोऽस्तीति सत्तत्त्वमाकाशेऽप्यनुगच्छति ॥ ५४ ॥

न केवलं श्रुतिरेव स्मृतिरप्यस्तीत्याह विष्टभ्याहमिदमिति ॥ ५० ॥

इदानीं निर्मायस्वरूपसद्भावे प्रमाणमाह सभूमिमिति । विकारावर्त्ति च तथा हि स्थितमाहेति सूत्रकारवचनमित्यर्थः ॥ ५१ ॥

तर्हि निरंशत्वविरोध इत्यस्य कः परिहार इत्याशङ्क्य वास्तवनिरंशत्वाभ्युपगमान्न विरोध इत्यभिप्रायेणोदाहृतश्रुत्यभिप्रायमाह निरंशेऽप्यंशमिति ॥ ५२ ॥

यदर्थं ब्रह्मणि माया समर्थिता तदिदानीमाह सत्तत्त्वमिति । विक्रियाः विविधत्वेन क्रियन्ते इति विक्रियाः कार्य्यविशेषा इत्यर्थः । तत्र दृष्टान्तमाह वर्णा भित्तिगता इति । वर्णा रक्तपीतादयो धातुविशेषाः ॥ ५३ ॥

तत्र प्रथमं कार्य्यविशेषं दर्शयति आद्यो विकार इति । तत्स्वरूपमाह सोऽवकाशस्वभाववानिति । आकाशस्य ब्रह्मकार्य्यत्वे हेतुमाह आकाशोऽस्तीति सत्तत्त्वमाकाशेऽप्यनुगच्छतीति ॥ ५४ ॥

एकस्वभावं सत्तत्त्वमाकाशो द्विस्वभावकः ।
नावकाशः सति व्योम्नि स चैषोऽपि द्वयं स्थितम् ॥५५॥
यद्वा प्रतिध्वनिर्व्योम्नो गुणो नासौ सतीक्ष्यते ।
व्योम्नि द्वौ सद्ध्वनी तेन सदेकं द्विगुणं वियत् ॥५६॥
या शक्तिः कल्पयेद् व्योम सा सद्व्योम्नोरभिन्नताम् ।
आपाद्य धर्मधर्मित्वं व्यत्ययेनावकल्पयेत् ॥ ५७ ॥
सतो व्योमत्वमापन्नं व्योम्नः सत्त्वान्तु लौकिकाः ।
तार्किकाश्चावगच्छन्ति मायाया उचितं हि तत् ॥५८॥

ततः किमित्यत आह एकस्वभावमिति । उक्तमर्थं विशदयति नावकाश इति । सति सद्वस्तुन्यवकाशो नास्ति किन्तु सत्स्वभाव एक एव आकाशे तु स च सत्स्वभावः एषोऽप्यवकाशस्वभावोऽपीति द्वयं स्थितं विद्यत इत्यर्थः ॥ ५५ ॥

सदाकाशयोरेकद्विस्वभावत्वं प्रकारान्तरेण व्युत्पादयति यद्वा इति । प्रतिध्वनिर्व्योम्नो गुणः इत्युपपादितमधस्तात् असौ प्रतिध्वनिः सद्वस्तुनि नेक्ष्यते नोपलभ्यते व्योम्नि तु सद्ध्वनी सच्छब्दौ उभावप्युपलभ्येते तेन कारणेन सदेकं एकस्वभावं वियत् द्विगुणं द्विस्वभावकमित्यर्थः ॥ ५६ ॥

ननु आकाशस्य सद्ब्रह्मकार्यत्वे आकाशस्य सत्त्वेति सतः आकाशधर्मता कुतः प्रतिभातीत्याशङ्क्याह या शक्तिरिति । या माया सद्वस्तुनि आकाशं कल्पयति सा प्रथमतः सद् व्योम्नोरभेदं कल्पयति पश्चात् धर्मधर्मिभावन्तु वैपरीत्येन कल्पयति अत आकाशस्य सत्त्वेति भानमुपपद्यत इत्यर्थः ॥ ५७ ॥

मायया वैपरीत्यं कथं कृतम् इत्याशङ्क्याह सतो व्योमत्वमिति । वस्तुतत्त्वाविचारे क्रियमाणे मृदो घटरूपत्वमिव सतो व्योमत्वमापन्नं

यद् यथा वर्त्तते तस्य तथात्वं भाति मानतः।
अन्यथात्वं भ्रमेणेति न्यायोऽयं सार्वलौकिकः ॥५९॥
एवं श्रुतिविचारात् प्राक् यद् यथा वस्तु भासते।
विचारेण विपर्य्येति ततस्तच्चिन्त्यतां वियत् ॥६०॥
भिन्ने वियत्सती शब्दभेदाद् बुद्धेश्च भेदतः।
वाय्वादिष्वनुवृत्तं सत् नतु व्योमेति भेदधीः ॥६१॥

सद्वस्तुन आकाशरूपत्वं प्राप्तम्। लौकिकाः प्राणिनः शास्त्रीयेषु मध्ये तार्किकाश्च तद्वैपरीत्येन व्योम्नः गगनस्य धर्म्मिणः सत्त्वां सद्रूपत्वं धर्मं जातिं वा अवगच्छन्ति जानन्ति। ननु अन्यस्यान्यथा प्रतीतिरनुपपन्नेत्याशङ्क्याह मायाया उचितं हि तत् इति। तद्विपरीतदर्शनहेतुत्वं मायाया उचितमित्यर्थः ॥ ५८ ॥

मायाया विपरीतप्रतीतिहेतुत्वं लौकिकन्यायदर्शनेन स्पष्टीकरोति यद्यथेति। यच्छुक्त्यादि यथा येन शुक्तिकादिरूपेण वर्त्तते तस्य तथात्वं शुक्त्यादिरूपत्वं प्रमाणतः भाति स्फुरति अन्यथात्वं रजतादिरूपत्वं तद्भ्रमेण भ्रान्त्या प्रतिभातीत्ययं न्यायः सार्वलौकिकः सर्वलोकप्रसिद्ध इत्यर्थः ॥ ५९ ॥

एवं भ्रान्त्या विपरीतप्रतिभानं दर्शयित्वा तन्निवृत्त्युपायमाह एवं श्रुतिविचारादिति। एवमुक्तेन प्रकारेण श्रुतिविचारात् प्राक् श्रुत्यर्थविचारात् पूर्वं यद्वस्तु यत् सद्रूपं ब्रह्म भ्रान्त्या येन गगनादिरूपेण वर्त्तते तत् श्रुत्यर्थपर्य्यालोचनेन विपर्य्येति गगनादिभावं परित्यज्य सद्रूपं ब्रह्मैव भवति ततः श्रुतिविचारेण वस्तु याथात्म्यदर्शनसम्भवात् तद्वियच्चिन्त्यतां विचार्य्यतामित्यर्थः ॥ ६० ॥

विचारस्वरूपमेव दर्शयति भिन्ने वियत्सतीति। भिन्ने इति प्रतिज्ञातार्थे हेतुमाह शब्दभेदादिति। वियच्छब्दसच्छब्दयोरपर्य्याय-

सद्वस्त्वधिकवृत्तित्वात् धर्मि व्योम्नस्तु धर्मता।
धिया सतः पृथक्कारे ब्रूहि व्योम किमात्मकम्॥६२॥
अवकाशात्मकं तच्चेदसत् तदिति चिन्त्यताम्।
भिन्नं सतोऽसच्च नेति वच्मि चेद् व्याहतिस्तव॥६३॥
भातीति चेद्भातु नाम भूषणं मायिकस्य तत्।
यदसद्भासमानं तन्मिथ्या स्वप्नगजादिवत्॥६४॥

स्यादित्यर्थः। हेत्वन्तरमाह बुद्धेश्च भेदत इति। तमेव हेतुं विशदयति वाय्वादिष्विति। सद्वाय्वादिषु भूतेषु सद्वायुः सत् तेज इत्येवंप्रकारेणानुवृत्तं भासते व्योम तु नैवं भासते इति यज्ज्ञानं सा भेदधीर्भेदबुद्धिरित्यर्थः॥६१॥

एवं सदाकाशयोर्भेदं प्रसाध्य व्योम्नः सत्त्वेति भ्रान्त्या प्रतीतस्य धर्मिधर्मभावस्य विचारेण व्यत्ययं दर्शयति सद्वस्त्वधिकवृत्तित्वादिति। रूपरसादिष्वनुवृत्तस्य द्रव्यस्येवाकाशवाय्वादिष्वनुवृत्तस्य सतो धर्मित्वं रसादिभ्यो व्यावृत्तस्य रूपस्येव वाय्वादिभ्यो व्यावृत्तस्य नभसो धर्मत्वमित्यर्थः। ननु तर्हि घटाद्भिन्नस्य रूपस्य यथा वास्तवत्वं तथा सतो भिन्नस्य नभसोऽपि स्यादित्याशङ्क्य सद्व्यतिरिक्तस्य नभसो दुर्निरूपत्वात् नैवमित्याह धिया सत इति॥६२॥

दुर्निरूपत्वमसिद्धमिति यदुक्तं अवकाशात्मकमिति। तर्हि सतो विलक्षणत्वादसदेव स्यादिति परिहरति असत्तदितीति। सतो विलक्षणमसत्त्वं नास्तीति वदतो दोषमाह भिन्नमिति॥६३॥

असत्त्वे भानं न स्यादित्याशङ्क्य तुच्छविलक्षणत्वाद्भानं न विरुध्यते इत्याह भातीति चेदिति। अविरोधं दर्शयितुं मिथ्यावस्तुलक्षणं सदृष्टान्तमाह यदसद्भासमानमिति। यद्वस्तु स्वरूपेणाविद्यमानमपि भासते तत् स्वप्नगजादिवन्मिथ्या इत्यर्थः॥६४॥

जातिव्यक्ती देहिदेहौ गुणद्रव्ये यथा पृथक् ।
वियत्सतोस्तथैवास्तु पार्थक्यं कोऽत्र विस्मयः ॥६५॥
बुद्धोऽपि भेदो नो चित्ते निरूढिं याति चेत्तदा ।
अनैकाग्र्यात् संशयाद्वा रूढ्यभावोऽस्य ते वद ॥६६॥
अप्रमत्तो भव ध्यानादाद्येऽन्यस्मिन् विवेचनम् ।
कुरु प्रमाणयुक्तिभ्यां ततो रूढतमो भवेत् ॥ ६७ ॥
ध्यानान्मानाद् युक्तितोऽपि रूढे भेदे वियत्सतोः ।
न कदाचित् वियत् सत्यं सद्वस्तु छिद्रवन्न च ॥६८॥

ननु नियमेन सहोपलभ्यमानयोर्भेदो न दृष्टचर इत्याशङ्क्याह जातिव्यक्तीति ॥ ६५ ॥

भेदो यद्यपि बुध्यते तथापि निश्चितो न भवतीति शङ्कते । बुद्धोऽपीति । तत्परिहारं वक्तुं निश्चयाभावे कारणं पृच्छति अनैकाग्र्यादिति ॥ ६६ ॥

आद्ये परिहारमाह अप्रमत्तो भव ध्यानादाद्य इति । आद्ये प्रथमे विकल्पे ध्यानात् तत्र प्रत्ययैकतानता ध्यानमित्युक्तलक्षणादप्रमत्तो भव सावधानमना भवेति यावत् । द्वितीये परिहारमाह अन्यस्मिन् विवेचनं कुर्विति । ततश्च किम् इत्यत आह ततो रूढतमो भवेदिति ॥ ६५ ॥

ततोऽपि किम् इत्यत आह ध्यानादिति । ध्यानं पूर्वोक्तलक्षणं, मानं भिन्ने वियत्सती शब्दभेदात् बुद्धेश्च भेदत इत्युक्तं, युक्तिस्तु सद्वस्त्वधिकवृत्तित्वादित्यादावुक्ता, एतैर्ध्यानादिभिर्वियत्सतोर्भेदे चित्ते निरूढिं याते सति वियत् कदाचित् न सत्यं किन्तु सर्वदा मिथ्यैव भासते सद्वस्त्वपि छिद्रवदाकाशवच्च च नैव भवतीति शेषः ॥ ६८ ॥

तस्य भाति सदा व्योम निस्तत्त्वोल्लेखपूर्व्वकम् ।
सद्वस्त्वपि विभात्यस्य निश्छिद्रत्वपुरःसरम् ॥ ६९ ॥
वासनायां विवृद्धायां वियत्सत्यत्ववादिनम् ।
सम्भावनाबोधयुक्तञ्च दृष्ट्वा विस्मयते बुधः ॥ ७० ॥
एवमाकाशमिथ्यात्वे सत्सत्यत्वे च वासिते ।
न्यायेनानेन वाय्वादेः सद्वस्तु प्रविविच्यताम् ॥ ७१ ॥
सद्वस्तुन्येकदेशस्था माया तत्रैकदेशगम् ।
वियत्तत्राप्येकदेशगतो वायुः प्रकल्पितः ॥ ७२ ॥
शोषस्पर्शौ गतिर्वेगो वायुधर्म्मा इमे मताः ।
त्रयः स्वभावाः सन्मायाव्योम्नां ये तेऽपि वायुगाः ॥७३॥

वियत्सतोर्विवेचनफलमाह तस्य भातीति ॥ ६९ ॥

वियन्मिथ्यात्वं सतो वस्तुत्वञ्च सदा चिन्तयतः किं भवतीत्याह वासनायामिति । बुधो वियत्सतोस्तत्त्ववेत्ता गगनस्य सत्यत्वं ब्रुवाणं निरवकाशसद्वस्त्वबोधरहितं दृष्ट्वा विस्मयं प्राप्नोतीत्यर्थः ॥ ७० ॥

उक्तन्यायमन्यत्राप्यतिदिशति एवमाकाशमिथ्यात्वे इति ॥ ७१ ॥

नन्वाकाशकार्य्यस्य वायोरकारणभूतेन सद्वस्तुना तदात्म्यप्रतीत्ययोगात् सतो विवेचनमप्रयोजकमित्याशङ्क्य साक्षात् सम्बन्धाभावेऽपि परम्परया सम्बन्धोऽस्तीत्याह सद्वस्तुन्येकदेशस्थेति ॥ ७२ ॥

एवं सदादीनां सम्बन्धं प्रदर्श्य तयोर्धर्मतो भेदज्ञानाय वायौ प्रतीयमानान् धर्मानाह शोषस्पर्शौ गतिरिति । एवं प्रातिस्विकान् धर्मानभिधाय कारणतः प्राप्तान् तानाह त्रयः स्वभावा इति । सन्मायाव्योम्नां ये त्रयः स्वभावाः शीलविशेषास्तेऽपि वायुगाः वायौ विद्यन्त इत्यर्थः ॥ ७३ ॥

वायुरस्तीति सद्भावः सतो वायौ पृथक् कृते।
निस्तत्त्वरूपता मायास्वभावो व्योमगो ध्वनिः ॥७४॥
सतोऽनुवृत्तिः सर्व्वत्र व्योम्नो नेति पुरोदितम्।
व्योमानुवृत्तिरधुना कथं न व्याहतं वचः ॥ ७५ ॥
छिद्रानुवृत्तिर्नेतीति पूर्व्वोक्तिरधुना त्वियम्।
शब्दानुवृत्तिरेवोक्ता वचसो व्याहतिः कुतः ॥ ७६ ॥
ननु सद्वस्तुपार्थक्यादसत्त्वञ्चेत् तदा कथम्।
अव्यक्तमायावैषम्यादमायामयतापि नो ॥ ७७ ॥
निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका।

के ते धर्मा इत्यत आह वायुरस्तीति सद्भाव इति। वायुरस्तीति व्यवहारहेतुः सद्रूपत्वं सद्वस्तुनो धर्म एकः, वायौ सद्वस्तुनो विवेचिते सति यन्निस्तत्त्वरूपत्वं समायाधर्मो द्वितीयः, शब्दः व्योम्नः सकाशादागतस्तृतीय इत्यर्थः ॥ ७४ ॥

ननु व्योमविवेचनप्रस्तावे वाय्वादिष्वनुवृत्तं सत् न तु व्योमेति भेदधीरित्यत्र वाय्वादावाकाशानुवृत्तिर्निवारिता इदानीं व्योमानुवृत्तिरभिधीयते अतः पूर्वोत्तरविरोध इति शङ्कते सतोऽनुवृत्तिः सर्व्वत्रेति। व्योमानुवृत्तिरधुनोच्यते इति शेषः ॥ ७५ ॥

पूर्वमवकाशलक्षणानुवृत्तिर्निवारिता इदानीं धर्मानुवृत्तिरेवाभिधीयते न तु स्वरूपानुवृत्तिरतो न व्याहतिरिति परिहरति छिद्रानुवृत्तिरिति ॥ ७६ ॥

ननु वायोः सद्वस्तुविलक्षणत्वादसत्त्वलक्षणं मायामयत्वं यद्युच्यते तर्हि व्यक्तस्वरूपमायावैलक्षण्यादमायामयत्वमपि किं न स्यादिति चोदयति ननु सद्वस्तुपार्थक्यादिति ॥ ७७ ॥

सा शक्तिकार्ययोस्तुल्या व्यक्ताव्यक्तत्वभेदिनोः ॥ ७८ ॥
सदसत्त्वविवेकस्य प्रस्तुतत्वात् स चिन्त्यताम् ।
असतोऽवान्तरो भेद आस्तां तच्चिन्तयात्र किम् ॥ ७९ ॥
सद्वस्तु ब्रह्म शिष्टोंऽशो वायुर्मिथ्या यथा वियत् ।
वासयित्वा चिरं वायोर्मिथ्यात्वं मरुतं त्यजेत् ॥ ८० ॥
चिन्तयेद्वह्निमप्येवं मरुतो न्यूनवर्त्तिनम् ।
ब्रह्माण्डावरणेष्वेषां न्यूनाधिकविचारणा ॥ ८१ ॥
वायोर्दशांशतो न्यूनो वह्निर्वायौ प्रकल्पितः ।
पुराणोक्तं तारतम्यं दशांशैर्भूतपञ्चके ॥ ८२ ॥

नाव्यक्तत्वं मायामयत्वे प्रयोजकं किन्तु निस्तत्त्वरूपत्वं तत्तु मायायामिव शक्त्यादावप्यस्तीति न मायामयत्वहानिरिति परिहरति निस्तत्त्वरूपतैवेति ॥ ७८ ॥

ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायामविशिष्टायां व्यक्ताव्यक्तत्वलक्षणो भेदः कुत इत्याशङ्क्य तद्विचारः प्रकृतानुपयुक्त इति परिहरति सदसत्त्वविवेकस्येति । असतो मायातत्कार्यरूपस्यावान्तरभेदो व्यक्ताव्यक्तत्वरूप इत्यर्थः ॥ ७९ ॥

फलितमाह सद्वस्त्विति । वायौ यः सदंशस्तद्ब्रह्मरूपं शिष्टोंऽशो निस्तत्त्वरूपादिशब्दार्थः स्वरूपं स च वायुर्निस्तत्त्वरूपत्वादेवाकाशवन्मिथ्या इत्थं वायोर्मिथ्यात्वं चिरं वासयित्वा मरुतं त्यजेत् मरुत् सत्य इति बुद्धिं त्यजेदित्यर्थः ॥ ८० ॥

वायावुक्तविचारं तेजस्यतिदिशति चिन्तयेदग्निमिति । ननु सद्वस्त्वेकदेशस्था माया तत्रेत्यादिना वियदादीनां न्यूनाधिक्यभाव उक्तः स लोके न क्वापि दृष्ट इत्याशङ्क्याह ब्रह्माण्डावरणेष्विति ॥ ८१ ॥

ननु वायोः कियतांशेन न्यूनो वह्निरित्यत आह वायोर्दशांशतो

वह्निरुष्णप्रकाशात्मा पूर्व्वानुगतिरत्र च।
अस्ति वह्निः सनिस्तत्त्वः शब्दवान् स्पर्शवानपि ॥८३॥
सन्मायाव्योमवाय्वंशैर्युक्तस्याग्नेर्निजो गुणः।
रूपं तत्र सतः सर्वमन्यद् बुद्ध्या विविच्यताम् ॥ ८४ ॥
सतो विवेचिते वह्नौ मिथ्यात्वे सति वासिते।
आपो दशांशतो न्यूनाः कल्पिता इति चिन्तयेत् ॥८५॥
सन्त्यापोऽमूः शून्यतत्त्वाः सशब्दस्पर्शसंयुताः।
रूपवत्योऽन्यधर्म्मानुवृत्त्या स्वीयो रसो गुणः ॥ ८६ ॥

न इति। तस्य वास्तवत्वशङ्कां वारयति वायाविति। नन्वयं न्यूनाः-
त्कमायः स्वकपोलकल्पित इत्याशङ्क्याह पुराणोक्तमिति ॥ ८२ ॥

वह्नेः स्वरूपमाह वह्निरुष्ण इति। अत्रापि वायोरिव कारण-
र्मा अनुगता इत्याह पूर्वानुगतिरिति। के ते धर्मा इत्याकाङ्क्षायामाह
स्ति वह्निरिति ॥ ८३ ॥

एवमग्नौ कारणधर्मानुगत्यनुवादपूर्वकं स्वकीयधर्मं दर्शयति सन्मा-
ति। इत्थं सविशेषणं वह्निस्वरूपं व्युत्पाद्य इदानीं सद्वस्तुनो
क्तं विविनक्ति तत्र सत इति। तत्र तेषु मध्ये सतः सद् वस्तुनो-
यत् सर्वं धर्मजातं मिथ्येति बुद्ध्या विविच्यतां पृथक् क्रियता-
मित्यर्थः ॥ ८४ ॥

एवं वह्नेर्मिथ्यात्वनिश्चयानन्तरमपां मिथ्यात्वं चिन्तयेदित्याह
तो विवेचिते वह्नाविति ॥ ८५ ॥

अप्स्वपि कारणधर्मान् स्वधर्मांश्च विभज्य दर्शयति सन्त्याप इति।
देन सह वर्त्तमानः सशब्दः सशब्दश्चासौ स्पर्शश्चेति सशब्दस्पर्श-
न युक्ता इत्यर्थः ॥ ८६ ॥

सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते ।
भूमिर्दशांशतो न्यूना कल्पिताप्स्विति चिन्तयेत् ॥ ८७॥
अस्ति भूस्तत्त्वशून्यास्याः शब्दस्पर्शौ स्वरूपकौ ।
रसश्च परतो नैजो गन्धः सत्ता विविच्यताम् ॥८८॥
पृथक्कृतायां सत्तायां भूमिर्म्मिथ्यावशिष्यते ।
भूमेर्दशांशतो न्यूनं ब्रह्माण्डं भूमिमध्यगम ॥८९॥
ब्रह्माण्डमध्ये तिष्ठन्ति भुवनानि चतुर्द्दश ।
भुवनेषु वसन्त्येषु प्राणिदेहा यथायथम् ॥९०॥
ब्रह्माण्डलोकदेहेषु सद्वस्तुनि पृथक् कृते ।
असन्तोऽण्डादयो भान्तु तद्भानेऽपीह का क्षतिः ॥९१॥
भूतभौतिकमायानामसत्त्वेऽत्यन्तवासिते ।
सद्वस्त्वद्वैतमित्येषा धीर्व्विपर्य्येति न क्वचित् ॥९२॥

विवेकध्यानाभ्याम् अपां मिथ्यात्वं निश्चित्यानन्तरं भूमेर्मिथ्यात्वं चिन्तनीयमित्याह सतो विवेचितास्विति ॥ ८७ ॥

तस्या मिथ्यात्वचिन्तनाय तद्धर्मानपि विभजते अस्ति भूस्तत्त्व-शून्येति । तेभ्यः सत्तामात्रं पृथक् कर्त्तव्यमित्याह सत्ता विविच्यतामिति ॥ ८८ ॥

सत्तापृथक्करणे फलमाह पृथक्कृतायामिति इदानीं भौतिकेभ्यो ब्रह्माण्डादिभ्यः सतो विवेचनाय तदवस्थानप्रकारं दर्शयति भूमेर्दशांशतो न्यूनमित्यादि यथायथमित्यन्तेन सार्द्धेन ॥ ८९ ॥ ९० ॥

तेषु सद्विवेचने फलमाह ब्रह्माण्डलोकदेहेष्विति ॥ ९१ ॥

तद्भाने का क्षतिरित्युक्तमेवार्थं स्पष्टीकरोति भूतभौतिकमाया-नामिति । भूतानामाकाशादीनां भौतिकानां ब्रह्माण्डादीनां माया-

सदद्वैतात् पृथग्भूते द्वैते भूम्यादिरूपिणि ।
तत्तदर्थक्रिया लोके यथा दृष्टा तथैव सा ॥९३॥
सांख्यकाणादबौद्धाद्यैर्जगद्भेदो यथा यथा ।
उत्प्रेक्ष्यतेऽनेकयुक्त्या भवत्वेष तथा तथा ॥९४॥
अवज्ञातं सदद्वैतं निःशङ्कैरन्यवादिभिः ।
एवं का क्षतिरस्माकं तद्द्वैतमवजानताम् ॥९५॥
द्वैतावज्ञा सुस्थिता चेदद्वैते धीः स्थिरा भवेत् ।
स्थैर्ये तस्याः पुमानेष जीवन्मुक्त इतीर्यते ॥९६॥
एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति ।

याश्च तत्कारणभूताया मिथ्यात्वे विवेकध्यानाभ्यां चित्ते दृढं वासिते सति सद्वस्तुनोऽद्वैतत्वबुद्धिः कदाचिन्न विहन्येत इत्यर्थः ॥ ९२ ॥

ननु भूम्यादीनां असत्त्वे विदुषां व्यवहारलोपः प्रसज्येत इत्याशङ्क्य विवेकेन मिथ्यात्वनिश्चयेऽपि भूम्यादेः स्वरूपमर्दनाभावान्न व्यवहारो लुप्येतेत्याह सदद्वैतादिति ॥ ९३ ॥

ननु तत्त्वस्याद्वैतरूपत्वे सांख्यादिभिरभिधीयमानस्य भेदस्य कुतो न निरासः क्रियत इत्याशङ्क्य व्यावहारिकभेदस्य अस्माभिरभ्युपगतत्वान्न निरासाय प्रयत्यत इत्याह सांख्यकाणादबौद्धाद्यैरिति ॥९४॥

ननु प्रमाणसिद्धस्य सतत्त्वभेदस्यावज्ञानुपपन्ना इत्याशङ्क्याह अवज्ञातमिति । यथा अन्यवादिभिः सांख्यादिभिर्निःशङ्कैः श्रुत्यादिसिद्धस्यापि सदद्वैतस्यावज्ञा क्रियते तथा श्रुतियुक्त्यनुभवावष्टम्भेनास्माकं तदीयद्वैतानादरणे किं हीयते इत्यर्थः ॥ ९५ ॥

ननु निष्प्रयोजनेयं द्वैतावज्ञेत्याशङ्क्य जीवन्मुक्तिलक्षणप्रयोजन-सद्भावान्नैवमित्याह द्वैतावज्ञेति ॥ ९६ ॥

स्थित्वास्यामन्तकालेऽपि ब्रह्म निर्व्वाणमृच्छति ॥९७॥
सदद्वैतेऽनृतद्वैते यदन्योन्यैक्यवीक्षणम्।
तस्यान्तकालस्तद्भेदबुद्धिरेव न चेतरः ॥९८॥
यद्वान्तकालः प्राणस्य वियोगोऽस्तु प्रसिद्धितः।
तस्मिन् कालेऽपि न भ्रान्तेर्गतायाः पुनरागमः ॥९९॥
नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि।
मूर्च्छितो वा त्यजेदेष प्राणान् भ्रान्तिर्न सर्व्वथा ॥१००॥
दिने दिने स्वप्नसुप्त्योरधीते विस्मृतेऽप्ययम्।
परेद्युर्नानधीतः स्यात् तत्त्वविद्या न नश्यति ॥१०१॥

न केवलं जीवन्मुक्तिरेव प्रयोजनम् अपि तु विदेहमुक्तिरपि इत्यभिप्रायेण श्लोकशेषमुदाहरति एषा ब्राह्मी स्थितिः पार्थेति ॥९७॥

अन्तकालशब्देन वर्त्तमानदेहपातोऽभिधीयते इत्याशङ्कां वारयितुं विवक्षितमर्थमाह सदद्वैते इति। सद्रूपेऽद्वैते अनृतरूपे द्वैते च यदन्योन्याध्यासलक्षणमैक्यज्ञानमस्ति तस्यैक्यभ्रमस्यान्तकालो नाम तयोरद्वैतद्वैतयोः स्वस्वरूपेण भेदबुद्धिरेव नापरो वर्त्तमानदेहपात इत्यर्थः ॥९८॥

इदानीं लोकप्रसिद्धार्थस्वीकारेऽपि न दोष इत्यभिप्रायेणाह यद्वान्तकाल इति ॥९९॥

तमेवार्थं प्रपञ्चयति नीरोग इति ॥१००॥

ननु प्राणवियोगकाले मूर्च्छादिना ज्ञाननाशे भ्रान्तिः स्यादित्याशङ्क्य ज्ञाननाशाभावे दृष्टान्तमाह दिने दिने इति। यथा प्रत्यहमधीते वेदे स्वप्नसुषुप्त्यवस्थायां विस्मृतेऽपि पठितुरनधीतवेदत्वं नास्ति तथा मरणकाले तत्त्वानुसन्धानाभावेऽपि ज्ञाननाशाभाव इत्यर्थः ॥१०१॥

प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति न वेदान्तात् प्रबलं मानमीक्ष्यते ॥१०२॥
तस्माद् वेदान्तसंसिद्धं सदद्वैतं न बाध्यते ।
अन्तकालेऽप्यतो भूतविवेकान्निर्वृतिः स्थिता ॥१०३॥

इति भूतविवेकः समाप्तः ।

तृतीयपरिच्छेदः ।

पञ्चकोषविवेकः ।

गुहाहितं ब्रह्म यत् तत् पञ्चकोषविवेकतः ।
बोद्धुं शक्यं ततः कोषपञ्चकं प्रविविच्यते ॥ १ ॥

ज्ञाननाशाभावमेवोपपादयति प्रमाणोत्पादितेति ॥ १०२ ॥
उपपादितमर्थमुपसंहरति तस्मात् वेदान्तसंसिद्धमिति ॥ १०२ ॥

इति भूतविवेकव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
पञ्चकोषविवेकस्य कुर्वे व्याख्यां समासतः ॥

तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं पञ्चकोषविवेकाख्यं प्रकरणमारभमाण आचार्यस्तत्र श्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयं सूचयन् चिकीर्षितं ग्रन्थं प्रतिजानीते गुहाहितमिति । यो वेद निहितं गुहायां परमे व्योमन्नित्यादिश्रुत्या गुहाहितत्वेनाभिहितं यद् ब्रह्मास्ति तद्गुहाशब्दवाच्यान्नमयादिकोषपञ्चकविवेकेन ज्ञातुं शक्यते यतः ततस्तेषां कोषाणां पञ्चकं प्रकर्षेण प्रत्यगात्मनः सकाशात् विभज्य प्रदर्श्यत इत्यर्थः ॥ १ ॥

देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः।
ततः कर्त्ता ततो भोक्ता गुहा सेयं परम्परा ॥ २ ॥
पितृभुक्तान्नजाद् वीर्य्याज्जातोऽन्नेनैव वर्द्धते।
देहः सोऽन्नमयो नात्मा प्राक् चोर्द्ध्वं तदभावतः ॥ ३ ॥
पूर्व्वजन्मन्यसत्त्वे तज्जन्म सम्पादयेत् कथम्।
भाविजन्मन्यसत् कर्म्म न भुञ्जीतेह सञ्चितम् ॥ ४ ॥

ननु केयं गुहा यस्यां निहितं ब्रह्म कोशपञ्चकविवेकेनावबुध्यत इत्याशङ्क्य गुहाशब्देन विवक्षितमर्थमाह देहादभ्यन्तरः प्राण इति। देहादन्नमयात् प्राणः प्राणमयः अभ्यन्तरः आन्तरः। प्राणात् प्राणमयात् मनः मनोमयः अभ्यन्तरः आन्तरः। ततो मनोमयात् कर्त्ता विज्ञानमयः आन्तरः इत्यनुषज्यते। ततो विज्ञानमयात् भोक्ता आनन्दमयः सोऽपि ततोऽप्यान्तर इत्यर्थः। सैवमन्नमयाद्यानन्दमयान्तानां परम्परा गुहाशब्देनोच्यत इत्यर्थः ॥ २ ॥

इदानीमन्नमयस्य स्वरूपं तदनात्मत्वञ्च दर्शयति पितृभुक्तान्नजादिति। पितृभुक्तात् मातापितृभ्यां भुक्तात् व्रीह्यादेर्लक्षणादन्नाज्जायमानं यद् वीर्य्यं तस्माद् वीर्य्याद् यो देहो जातः यश्च जननानन्तरं क्षीराद्यन्नेनैव वर्द्धते सदन्नोऽन्नमयोऽन्नस्य विकारः स आत्मा न भवति कुतः इत्यत आह प्राक् चोर्द्ध्वमिति। जन्मनः प्राक् मरणादूर्द्ध्वञ्च तदभावतस्तस्य देहस्याभावादित्यर्थः। विवादाध्यासितो देह आत्मा न भवति कार्य्यत्वात् घटादिवदिति भावः ॥ ३ ॥

हेतुस्तु साध्यं मा भूत् विपक्षे बाधकाभावादप्रयोजकोऽयं हेतुरित्याशङ्क्याकृताभ्यागमकृतनाशरूपबाधकसद्भावान्नैवमिति परिहरति पूर्वजन्मनीति। एतद्देहजन्यस्यात्मनः पूर्वस्मिन् जन्मन्यसत्त्वात् एतज्जन्महेत्वदृष्टस्याभावेऽपि अस्य जन्मनोऽङ्गीक्रियमाणत्वादकृताभ्यागमः

पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्त्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ॥ ५ ॥
अहन्तां ममतां देहे गेहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥ ६ ॥
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥ ७ ॥

प्रसज्येत तथा भाविजन्मन्यपि अस्य देहरूपस्यात्मनोऽसत्त्वाद्भाविदिहानुष्ठितयोः पुण्यपापयोः फलभोक्तुरभावेन भोगमन्तरेणापि कर्मक्षयः प्रसज्येतायं कृतनाश एवम् अकृताभ्यागमकृतनाशरूपदोषप्रसङ्गावादात्मनः कार्य्यत्वं नाङ्गीकर्त्तव्यमिति भावः ॥ ४ ॥

एवमन्नमयकोषस्यानात्मत्वं प्रदर्श्य प्राणमयकोषस्वरूपं तदनात्मत्वञ्च दर्शयति पूर्णो देहे बलमिति । यो वायुः देहे पूर्णः पादादिमस्तकपर्य्यन्तं व्याप्तः सन् बलं यच्छन् व्यानरूपेण सामर्थ्यं प्रयच्छन्नक्षाणां चक्षुरादीनामिन्द्रियाणां प्रवर्त्तकः प्रेरको वर्त्तते स वायुः प्राणमय इत्युच्यते । असावप्यात्मा न भवति । तत्र हेतुमाह चैतन्यवर्जनादिति । चिदाध्यासितः प्राण आत्मा न भवति जड़त्वात् घटवदिति भावः ॥ ५ ॥

इदानीं मनोमयस्वरूपप्रदर्शनपूर्वकं तस्याप्यनात्मत्वमाह अहन्तां ममतामिति । देहे अहन्ताम् अहम्भावं गेहादौ ममतां मदीयत्वाभिमानं च यः करोति असौ मनोमय आत्मा न भवति । कुत इत्यत आह कामाद्यवस्थया भ्रान्त इति हेतुगर्भितं विशेषणं, कामक्रोधादिवृत्तिमत्त्वेनानियतस्वभावत्वादित्यर्थः । तथा च मनोमय आत्मा न भवति विकारित्वाद् देहवदिति भावः ॥ ६ ॥

अनन्तरं कर्तृशब्दवाच्यस्य विज्ञानमयस्य स्वरूपं प्रदर्शयन्

कर्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम् ।
विज्ञानमनसी अन्तर्वहिश्चैते परस्परम् ॥ ८ ॥
काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥ ९ ॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् ।

तदनात्मत्वं दर्शयति लीना सुप्ताविति । या चिच्छायोपेता धीः चिदाभासयुक्ता बुद्धिः सुप्तौ सुषुप्तिकाले लीना विलीना सती बोधे जागरणकाले आनखाग्रमा नखाग्रपर्य्यन्तं वर्त्तमाना सती वपुः शरीरं व्याप्नुयात् व्याप्य वर्त्तते सा विज्ञानमयशब्दभाक् विज्ञानमयशब्देनोच्यमाना असावप्यात्मा न भवति विलयाद्यवस्थावत्त्वात् घटादिवदित्यर्थः ॥ ७ ॥

ननु मनोबुद्ध्योरन्तःकरणत्वाविशेषात् मनोमयविज्ञानमयसञ्ज्ञयोः कोशद्वयकल्पनानुपपन्ना इत्याशङ्क्य कर्तृत्वकरणत्वाभ्यां भेदसद्भावात् घटत एव मनोमयत्वादि इत्याह कर्तृत्वकरणत्वाभ्यामिति । अन्तरिन्द्रियम् अन्तःकरणं कर्तृत्वकरणत्वाभ्यां कर्तृरूपेण करणरूपेण च विक्रियेत परिणमेत इत्यर्थः । एते कर्तृकरणे विज्ञानमनसी विज्ञानमनःशब्दवाच्ये भवतः । एते च परस्परमन्तर्बहिर्भावेन वर्त्तेते अतः कोशद्वयव्यपदेश इत्यर्थः । ८ ॥

इदानीं भोक्तृशब्दवाच्यस्यानन्दमयस्यानात्मत्वं दर्शयितुं तस्य स्वरूपमाह काचिदन्तर्मुखा वृत्तिरिति । पुण्यभोगे पुण्यकर्मफलानुभवकाले काचिदन्तर्मुखा सती आनन्दप्रतिबिम्बभाक् आत्मस्वरूपस्य आनन्दस्य प्रतिबिम्बं भजते सैव भोगशान्तौ पुण्यकर्मफलभोगोपरमे सति निद्रारूपेण लीयते विलीना भवति सा वृत्तिरानन्दमय इत्यभिप्रायः ॥ ९ ॥

बिम्बभूतो य आनन्द आत्मासौ सर्वदा स्थितेः ॥ १० ॥
ननु देहमुपक्रम्य निद्रानन्दान्तवस्तुषु ।
माभूदात्मत्वमन्यस्तु न कश्चिदनुभूयते ॥११॥
बाढं निद्रादयः सर्वेऽनुभूयन्ते न चेतरः ।
तथाप्येतेऽनुभूयन्ते येन तं को निवारयेत् ॥ १२ ॥
स्वयमेवानुभूतित्वात् विद्यते नानुभाव्यता ।

तस्यानात्मत्वमाह कादाचित्कत्वत इति । अयमानन्दमयोऽपि कादाचित्कत्वात् आत्मा न स्यात् अन्नादिपदार्थवत् इत्यर्थः । ननु विद्यमानानामानन्दमयादीनां सर्वेषाम् आत्मत्वनिरासे नैरात्म्यं प्रसज्येत इत्याशङ्क्याह बिम्बभूतो य इति । बुद्ध्यादौ प्रतिबिम्बतया अवस्थितस्य प्रियादिशब्दवाच्यस्यानन्दमयस्य बिम्बभूतः कारणभूतो य आनन्दः असावेवात्मा भवति । कुत इत्यत आह सर्वदा स्थितेरिति । नित्यत्वादित्यर्थः । विवादाध्यासित आनन्द आत्मा भवितुमर्हति नित्यत्वात् य आत्मा न भवति नासौ नित्यो यथा देहादिः । गगनादेरुत्पत्तिमत्त्वेनानित्यत्वात् नैकान्तिकतेति भावः ॥ १० ॥

चोदयति ननु देहमुपक्रम्येति । अन्नमयाद्यानन्दमयान्तानां कोषाणामुक्तैर्हेतुभिरात्मत्वं न घटते चेत् मा घटिष्ट । अन्यस्त्वात्माऽनुपलभ्यमानत्वान्नैव सम्भवतीत्यर्थः ॥ ११ ॥

परिहरति बाढं निद्रादय इति । अत्र निद्राशब्देन निद्रानन्दो लक्ष्यते निद्रादयो देहान्ता उपलभ्यन्ते अन्यो नानुभूयते इति यदुक्तं तत् सत्यम् । कथं तर्हि तदतिरिक्तस्यात्मनोऽङ्गीकार इत्यत आह तथाप्येतेऽनुभूयन्ते इति । अन्यस्यानुपलभ्यमानत्वेऽपि यद्बलादेतेषामानन्दमयादीनामुपलभ्यमानता भवति सोऽनुभवः कथं नाङ्गीक्रियत इत्यर्थः ॥ १२ ॥

ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया ॥ १३ ॥
माधुर्यादिस्वभावानामन्यत्र स्वगुणार्पिणाम् ।
अस्मिंस्तदर्पणापेक्षा नो न चास्त्यन्यदर्पकम् ॥ १४ ॥
अर्पकान्तरराहित्येऽप्यस्ति येषां तत्स्वभावता ।
मा भूत् तथानुभाव्यत्वं बोधात्मा तु न हीयते ॥ १५ ॥

ननूक्तेभ्यः कोशेभ्योऽन्य आत्मा यदि विद्यते तर्ह्युपलभ्येत नोपलभ्यते ततो नास्तीत्याशङ्क्याह स्वयमेवानुभूतित्वादिति । आनन्दमयादीनां साक्षिणोऽनुभवस्वरूपत्वादेवानुभाव्यत्वं नास्तीति । ननु अनुभवस्वरूपत्वेऽप्यनुभाव्यत्वं कुतो न स्यादित्याशङ्क्याह ज्ञातृज्ञानान्तराभावादिति । ज्ञाता च ज्ञानञ्च ज्ञातृज्ञाने अन्ये ज्ञातृज्ञाने ज्ञातृज्ञानान्तरे तयोरभावः तस्मादज्ञेयः ज्ञानविषयो न भवति इति । ज्ञात्राद्यभावाद् वा न ज्ञायते स्वस्यैवासत्त्वात् वा किमत्र विनिगमने कारणमित्यत आह नत्वसत्तयेति । निद्रानन्दादिसाक्षित्वेनासत्त्वस्य पूर्वमेव निराकृतत्वादिति भावः ॥ १३ ॥

अनुभवरूपस्यात्मनोऽनुभाव्यत्वाभावे दृष्टान्तमाह माधुर्यादिस्वभावानामिति । आदिशब्देनाम्लादयो गृह्यन्ते माधुर्यादयः स्वभावाः सहजाधर्मविशेषा येषां ते माधुर्यादिस्वभावा गुडादयः तेषामन्यत्र स्वसंसृष्टपदार्थेषु पायसादिषु स्वगुणार्पिणां स्वगुणान् माधुर्यादीनर्पयन्तीति स्वगुणार्पिणः तेषां अस्मिन् स्वस्वरूपे गुडादिलक्षणे तदर्पणापेक्षा तेषां माधुर्यादीनामर्पणे संपादने अपेक्षा आकाङ्क्षा माधुर्यादिकं केनचित् अस्मादर्पणीयमित्येवंरूपा नैव विद्यते कश्चिदन्यदर्पकं नास्ति गुडादीनां माधुर्यादिप्रदं वस्त्वन्तरं नास्ति इत्यर्थः ॥ १४ ॥

दृष्टान्तफलितमाह अर्पकान्तरराहित्येऽपीति । माधुर्यादिसमर्पकवस्त्वन्तराभावेऽपि येषां गुडादीनां माधुर्यादिस्वभावता यथा

स्वयंज्योतिर्भवत्येष पुरोऽस्मात् भासतेऽखिलात्।
तमेव भान्तमन्वेति तद्भासा भासते जगत् ॥ १६ ॥
येनेदं जानते सर्वं तं केनान्येन जानताम्।
विज्ञातारं केन विद्यात् शक्तं वेद्ये तु साधनम् ॥ १७ ॥
स वेत्ति वेद्यं तत् सर्वं नान्यस्तस्यास्ति वेदिता।
विदिताविदिताभ्यां तत् पृथक् बोधस्वरूपकम् ॥ १८ ॥

विद्यते एवमात्मनोऽप्यनुभवविषयत्वं माभूत् अनुभवरूपता च भवत्येव इत्यर्थः ॥ १५ ॥

उक्तार्थे प्रमाणमाह स्वयं ज्योतिरिति। अत्रायं पुरुषः स्वयं ज्योतिर्भवति, अस्मात् सर्वस्मात् पुरतः सुविभातं तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इत्याद्याः श्रुतयः आत्मनः स्वप्रकाशत्वं बोधयन्तीत्यर्थः ॥ १६ ॥

येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयात् इति वाक्यमर्थतः पठति येनेदं जानते सर्वमिति। येन साक्षिचैतन्यरूपेणात्मना इदं सर्वं दृश्यजातं जानते प्राणिनस्तं साक्षिणमात्मानमन्येन केन साक्ष्यभूतेन जड़ेन जानतामवगच्छेयुः पुमांसः। अस्यैव वाक्यस्य तात्पर्यमाह विज्ञातारमिति। दृश्यजातस्य विज्ञातारं केन दृश्यभूतेन विद्यात् विजानीयात् न केनापि जानातीत्यर्थः। ननु मनसा ज्ञास्यतीत्याशङ्क्याह शक्तं वेद्ये तु साधनमिति। साधनन्तु ज्ञानसाधनन्तु मनोवेद्ये ज्ञातव्ये विषये शक्तं समर्थं न तु ज्ञातर्य्यात्मनि नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा इत्यादि-श्रुतेः तस्यापि ज्ञेयत्वे कर्मकर्तृत्वविरोधाच्चेति भावः ॥ १७ ॥

आत्मनः स्वप्रकाशत्वे सच स वेत्ति वेद्यं न च तस्यास्ति वेत्ता, अन्यदेव तद्विदितादथो अविदितादधीति वाक्यद्वयमपि प्रमाणमिति

बोधेऽप्यनुभवो यस्य न कथञ्चन जायते ।
तं कथं बोधयेत् शास्त्रं लोष्टं नरसमाकृतिम् ॥ १९ ॥
जिह्वा मेऽस्ति न वेत्युक्तिर्लज्जायै केवलं यथा ।
न बुध्यते मया बोधो बोध्यव्य इति तादृशी ॥ २० ॥
यस्मिन् यस्मिन्नस्ति लोके बोधस्तत्तदुपेक्षणे ।
यद्बोधमात्रं तद् ब्रह्मेत्येवं धीर्ब्रह्मनिश्चयः ॥ २१ ॥

अन्यानमहावाक्यद्वयमर्थतः पठति स वेत्ति वेद्यमिति । स आत्मा यद्यद्वेद्यं तत् सर्वं वेत्ति तस्यात्मनो वेदिता ज्ञाता अन्यो नास्ति तद्बोधस्वरूपकं ब्रह्म विदिताविदिताभ्यां विदितं ज्ञातं ज्ञानेन विषयीकृतम् अविदितं अज्ञातमज्ञानेनावृतं ताभ्यां पृथग् विलक्षणं बोधस्वरूपत्वादेवेत्यर्थः ॥१८॥

ननु विदिताविदितातिरिक्तो बोधो नानुभूयत इत्याशङ्क्य विदितविशेषणस्य वेदनस्यैव बोधरूपत्वात् तदनुभवाभावे विदितस्याप्यनुभवाभावप्रसङ्गात् बोधानुभवोऽवश्यमङ्गीकर्त्तव्य इति सोपहासमाह बोधेऽप्यनुभवो यस्येति । यस्य मन्दस्य बोधेऽपि घटादिस्फुरणरूपेऽप्यनुभवः साक्षात्कारः कथञ्चन कथमपि न जायते नोत्पद्यते तत् नरसमाकृतिं नरसमाकारं लोष्टं लोष्टरूपं मनुष्यं शास्त्रं कथम्बोधयेत् न कथमपि बोधयेदित्यर्थः ॥ १९ ॥

बोधो न बुध्यत इति उक्तिरेव व्याहतेति सदृष्टान्तमाह जिह्वा मेऽस्तीति । जिह्वा मेऽस्ति न वेत्युक्तिर्भाषणं यथा लज्जायै केवलं लज्जाजननायैव भवति न बुद्धिमत्त्वख्यापनाय जिह्वया विना भाषणानुपपत्तेः । एवं मया बोधो न बुध्यते इतः परं बोध्यव्य इत्युक्तिरपि तादृशी लज्जाजनिकैव बोधेन विना तद्व्यवहारासिद्धेरित्यर्थः ॥ २० ॥

भवत्वेवंविधः स बोधस्तथापि प्रकृते ब्रह्मावबोधे किमायातमित्याशङ्क्याह यस्मिन् यस्मिन्नस्तीति । लोके यस्मिन् यस्मिन् घटादि-

पञ्चकोषपरित्यागे साक्षिबोधावशेषतः ।
स्वस्वरूपं स एव स्यात् शून्यत्वं तस्य दुर्घटम् ॥ २२ ॥
अस्ति तावत् स्वयं नाम विवादाविषयत्वतः ।
स्वस्मिन्नपि विवादश्चेत् प्रतिवाद्यत्र को भवेत् ॥ २३ ॥

लक्षणे विषये बोधो ज्ञानमस्ति तत्तदुपेक्षणे तस्य तस्य घटादिविषयस्योपेक्षणे अनादरणे कृते सति यद्बोधमात्रं घटादिषु सर्वत्रानुस्यूतं यत् स्फुरणमस्ति तदेव ब्रह्मेत्येवंरूपा धीर्बुद्धिः ब्रह्मनिश्चयः ब्रह्मावगतिरित्यर्थः ॥ २१ ॥

ननु घटादिविषयोपेक्षया तदर्थानुभवरूपं ब्रह्मावगम्यते चेत् तर्हि कोषपञ्चकविवेको निष्प्रयोजनः स्यादित्याशङ्क्य ब्रह्मणः प्रत्यग्रूपताज्ञानेन विना संसारानिवृत्तेस्तथात्वावबोधोपयोगित्वात् न तस्यापि वैयर्थ्यमित्याह पञ्चकोषपरित्याग इति । पञ्चानां कोषाणाम् अन्नमयादीनां परित्यागे बुद्ध्या अनात्मत्वनिश्चये कृते तत्साक्षिरूपस्य बोधस्यावशेषणात् स साक्षिरूपो बोध एव स्वस्वरूपं स्वं निजं रूपं ब्रह्मैव स्यात् । ननु अन्नमयादीनाम् अनुभवसिद्धानां त्यागे शून्यत्वपरिशेषः स्यादित्याशङ्क्याह शून्यत्वं तस्य दुर्घटमिति । तस्य साक्षिबोधस्य शून्यत्वं दुर्घटं दुःसम्पन्नमित्यर्थः ॥ २२ ॥

दुर्घटत्वमेवोपपादयति अस्ति तावदिति । स्वयंशब्दवाच्यं स्वस्वरूपं लौकिकानां वैदिकानाञ्च मते तावदस्त्येव कुत इत्यत आह विवादाविषयत्वत इति । स्वस्वरूपस्य विप्रतिपत्तिविषयत्वाभावादित्यर्थः । विपक्षे बाधकमाह स्वस्मिन्नपि विवादश्चेदिति । स्वात्मन्यपि विप्रतिपत्तौ सत्त्वासत्त्वाभ्यां विप्रतिपत्तौ कः प्रतिवादी स्यात् न कोऽपीत्यर्थः ॥ २३ ॥

स्वासत्त्वं तु न कस्मैचिद्रोचते विभ्रमं विना ।
अतएव श्रुतिर्बाधं ब्रूते चासत्त्ववादिनः ॥ २४ ॥
असद् ब्रह्मेति चेद् वेद स्वयमेव भवेदसन् ।
अतोऽस्य माभूद्वेद्यत्वं स्वसत्त्वन्त्वभ्युपेयताम् ॥ २५ ॥
कीदृक्तर्हीति चेत् पृच्छेदीदृक्ता नास्ति तत्र हि ।
यदनीदृगतादृक् च तत् स्वरूपं विनिश्चिनु ॥ २६ ॥
अक्षाणां विषयस्त्वीदृक् परोक्षस्तादृगुच्यते ।
विषयी नाक्षविषयः स्वत्वान्नास्य परोक्षता ॥ २७ ॥

ननु स्वासत्त्ववाद्येव प्रतिवादी भविष्यतीत्याशङ्क्य तथाविधः कोऽपि नास्तीत्याह स्वासत्त्वमिति । भ्रान्तिमेकां विहायान्यस्यां दशायां स्वस्याभावः केनापि नाङ्गीक्रियत इत्यर्थः । कुत एवं निश्चीयत इत्याशङ्क्याह अतएवेति । यतः कस्मैचिन्न रोचते अतएव श्रुतिरप्यसत्त्ववादिनो बाधं ब्रूते ॥ २४ ॥

केयं श्रुतिरित्याकाङ्क्षायाम् असन्नेवेत्यादि मन्त्रमेवं ततो विदुरित्यन्ता श्रुतिमर्थतः पठति असद् ब्रह्मेति चेदिति । यदि ब्रह्मासदिति वेद जानीयात् तर्हि स्वयमेव ब्रह्मणोऽसत्त्वज्ञानी असन् भवेत् असदेव ब्रह्मरूपत्वादित्यर्थः । फलितमाह अतोऽस्येति ॥ २५ ॥

इदानीमात्मनः स्वप्रकाशत्वं वक्तुकामस्तस्य वेद्यत्वाभावे कीदृक् स्वरूपमिति प्रश्नमुत्थापयति कीदृक् तर्हीति चेदिति । अयमभिप्रायः आत्मन ईदृक्त्वादिना केनापि रूपेण वैशिष्ट्याङ्गीकारे तेनैव रूपेण वेद्यत्वं स्यात् तदनङ्गीकारे शून्यत्वमिति । सत्यमीदृक्त्वाद्यङ्गीकारे तथैव वेद्यत्वं स्यात् स नाङ्गीक्रियत इत्याह ईदृक्ता नास्तीति । उपलक्षणमेतत् तादृक्त्वस्यापि । उभयाभावमेवाह यदनीदृगतादृक् चेति ॥२६॥

नन्विह प्रतिज्ञामात्रमेवार्थसिद्धिरित्याशङ्क्य ईदृक्तादृक्शब्दयो-

अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम्।
सत्यं ज्ञानमनन्तञ्चेत्यस्तीह ब्रह्मलक्षणम्॥ २८॥
सत्त्वं बाधराहित्यं जगद्बाधैकसाक्षिणः।
बाधः किंसाक्षिको ब्रूहि न त्वसाक्षिक इष्यते॥ २९॥

इदंमभिधानतद्वाच्यत्वमुपपादयति अत्यक्षमिति। प्रत्यक्षस्यैव घटादेरीदृक्शब्दवाच्यत्वं दृष्टं परोक्षस्यैव धर्माधर्मादेस्तादृक्शब्दवाच्यत्वं दृष्टम्। द्रष्टुरात्मनस्तु इन्द्रियजन्यज्ञानविषयत्वाभावादीदृक्त्वं स्वस्य नैव परोक्षत्वाभावात् न तादृक्त्वमित्यर्थः॥ २७॥

तर्हि शून्यत्वमिति द्वितीयं पक्षं फलप्रदर्शनव्याजेन परिहरति अवेद्योऽपीति। इन्द्रियजन्यज्ञानविषयत्वाभावेऽप्यपरोक्षत्वात् स्वप्रकाश इत्यर्थः। अत्रायं प्रयोगः आत्मा स्वप्रकाशः संवित्कर्मतामन्तरेणापरोक्षत्वात्संवेदनवदिति। न च विशेषणासिद्धो हेतुः आत्मनः संवित्कर्मत्वे कर्मकर्तृभावविरोधप्रसङ्गात्। स्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यविरोध इति चेन्न गमनक्रियायामप्येकस्यैव स्वरूपेणैव कर्तृत्वं विशिष्टरूपेणैव कर्मत्वमित्यतिप्रसङ्गात्। न च साधनविकलो दृष्टान्तः संवेदनस्य संवेदनान्तरापेक्षायामनवस्थानादिति। ननु, आत्मनः स्वप्रकाशत्वे सिद्धेऽपि ब्रह्मणो लक्षणाभावान्न ब्रह्मत्वसिद्धिरित्याशङ्क्य लक्षणं तत्र योजयति सत्यं ज्ञानमिति। सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या यद्ब्रह्मणो लक्षणमुक्तं तदिहात्मनि विद्यत इत्यर्थः॥ २८॥

आत्मनः सत्यत्वोपपादनाय तावत् सत्यस्य लक्षणमाह सत्यत्वं बाधराहित्यमिति। बाधशून्यत्वं सत्यत्वं सत्यमबाध्यं बाध्यं मिथ्या इति तद्विवेकस्य पूर्वाचार्यैरुक्तत्वात्। अस्तु प्रकृते किमायातमित्यत आह जगद्बाधैकसाक्षिण इति। जगतः स्थूलसूक्ष्मशरीरादिलक्षणस्य यो बाधः सुषुप्तिमूर्च्छासमाधिषु अविद्यमानता तत्साक्षिणैव वर्त्तमानस्यात्मनो बाधः किंसाक्षिकः कः साक्षी यस्य बाधस्यासौ किंसाक्षिकः

अपनीतेषु मूर्त्तेषु ह्यमूर्त्तं शिष्यते वियत् ।
शक्येषु बाधितेष्वन्ते शिष्यते यत् तदेव तत् ॥ ३० ॥
सर्वबाधे न किञ्चिच्चेत् यन्न किञ्चित् तदेव तत् ।
भाषा एवात्र भिद्यन्ते निर्बाधं तावदस्ति हि ॥ ३१ ॥

न कोऽपि साक्षी विद्यते इत्यर्थः । असाक्षिकोऽप्यात्मबाधः किं न स्यादित्याशङ्क्याह नत्वसाक्षिक इति । साक्षिरहितो बाधो नाभ्युपगन्तव्योऽन्यथातिप्रसङ्गादिति भावः ॥ २९ ॥

उक्तमर्थं दृष्टान्तेन स्पष्टयति अपनीतेष्विति । मूर्त्तेषु गृहादिगतेषु घटादिष्वपनीतेषु गृहादिभ्यो निःसारितेषु सत्सु यथापनेतुमशक्यं नभ एवावशिष्यते एवं स्वव्यतिरिक्तेषु मूर्त्तामूर्त्तेषु देहेन्द्रियादिषु निराकर्त्तुं शक्येषु नेति नेति इत्यादिश्रुत्या निराकृतेषु सत्सु अन्तेऽवसाने सर्वनिराकरणसाक्षित्वेन यो बोधोऽवशिष्यते स एव बाधरहित आत्मेत्यर्थः ॥ ३० ॥

ननु प्रतीयमानस्य सर्वस्यापि निषेधे किञ्चिन्नावशिष्यते अतः कथं शिष्यते यत् तदेव तदित्यवशिष्टस्यात्मत्वमुच्यत इति शङ्कते सर्वबाधे न किञ्चिच्चेदिति । न किञ्चिदवशिष्यत इति वदतापि त्वया प्रयोगसिद्धये सर्वाभावविषयकं ज्ञानमवश्यमभ्युपेतव्यमतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परिहरति यन्न किञ्चिदिति । न किञ्चिदिति शब्देन यच्चैतन्यमुच्यते तदेव ब्रह्म इत्यर्थः । ननु न किञ्चिदित्यभाववाचकेन न किञ्चिच्छब्देन कथं चैतन्यमुच्यत इत्याशङ्क्य वाच्यार्थस्त्वयाऽवश्यमभ्युपेयत्वात् अभिधायकशब्दस्यैव विप्रतिपत्तिर्नाभिधेये इति परिहरति भाषा एवात्र भिद्यन्त इति । अत्र बाधस्य साक्षिणि प्रत्यगात्मनि भाषा एव न किञ्चित् साक्षीत्यादिशब्दा एव भिद्यन्ते निर्बाधं बाधरहितं साक्षिचैतन्यन्तु विद्यत एवेत्यर्थः ॥ ३१ ॥

अत एव श्रुतिर्बाध्यं बाधित्वा शेषयत्यदः।
स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः ॥ ३२ ॥
इदं रूपन्तु यद् यावत् तत् त्यक्तुं शक्यतेऽखिलम्।
अशक्यो ह्यनिदं रूपः स आत्मा बाधवर्जितः ॥ ३३ ॥
सिद्धं ब्रह्मणि सत्यत्वं ज्ञानत्वन्तु पुरोदितम्।
स्वयमेवानुभूतित्वादित्यादिवचनैः स्फुटम् ॥ ३४ ॥

उक्तमर्थं श्रुत्या दृढं करोति अतएव श्रुतिर्बाध्यमिति। यतः स्वचैतन्यमबाध्यम् अतएव नेति नेत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतोऽनात्मपदार्थनिराकरणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्मवस्तुजातं बाधित्वा निराकृत्य अदो निराकर्तुमशक्यं प्रत्यक्स्वरूपं शेषयति अवशेषयतीत्यर्थः ॥ ३२ ॥

नेति नेति इति श्रुतिर्बाध्ययोग्यं बाधित्वा बाधितुमशक्यम् अवशेषयतीत्युक्तं तत्र कीदृशमशक्यमिति विवक्षायां तदुभयं विभज्य दर्शयति इदं रूपन्त्विति। इदमित्येवं रूपं दृश्यत्वेनानुभूयमानं स्वरूपं यस्य देहादेस्तदिदंरूपं तुशब्दोऽवधारणे यद् यावदिति पदद्वयं सर्वदृश्योपसंग्रहार्थम् एवञ्च सति यद् दृश्यं तदखिलं त्यक्तुं शक्यते एवेत्यर्थः। अनिदं रूपः प्रत्यक्त्वेन इदन्तयावगन्तुमयोग्यः साक्षी अशक्यस्त्यक्तुमित्यर्थः। हीति निपातेन प्रसिद्धिद्योतकेन त्यक्तुः स्वरूपत्वेन त्यागायोग्यतां सूचयति। फलितमाह स आत्मा बाधवर्जित इति। यो बाधरहितः साक्षी स एवात्मा नाहङ्कारादिदृश्य इत्यर्थः ॥ ३३ ॥

भवत्वात्मनोऽबाध्यत्वं प्रकृते किमायातमित्यत आह सिद्धं ब्रह्मणीति। ब्रह्मणि ब्रह्मलक्षणे यत् सत्यत्वमभिहितं तदात्मनि सिद्धम्। भवतु सत्यत्वं ज्ञानत्वं कथमित्याशङ्कायां तत् पूर्वमेव उपपादितमित्याह ज्ञानत्वन्तु पुरोदितमिति। स्वयमेवानुभूतित्वात् विद्यते नानुभाव्यतेत्यादिवचनैः ज्ञानरूपत्वं पूर्वमेवाभिहितमित्यर्थः ॥ ३४ ॥

न व्यापित्वाद् देशतोऽन्तो नित्यत्वान्नापि कालतः ।
न वस्तुतोऽपि सार्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥ ३५ ॥
देशकालान्यवस्तूनां कल्पितत्वाच्च मायया ।
न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं स्फुटन्ततः ॥ ३६ ॥
सत्यं ज्ञानमनन्तं यत् ब्रह्म तद् वस्तु तस्य तत् ।
ईश्वरत्वन्तु जीवत्वमुपाधिद्वयकल्पितम् ॥ ३७ ॥

ननु सत्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेऽप्यानन्त्यं न घटते ब्रह्मण्यपि तस्यासिद्धेः, इत्याशङ्क्य ब्रह्मणि तावत् तत् साधयति न व्यापित्वादिति नित्यं विभुं सर्वगतं सुसूक्ष्मम् आकाशवत् सर्वगतश्च नित्यः नित्योऽनित्यानां चेतनश्चेतनानाम् इदं सर्वं यदयमात्मा, सर्वं ह्येतद्ब्रह्म, ब्रह्मैवेदं सर्वम्, इत्यादिश्रुतिषु व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनात् ब्रह्मणस्त्रिविधमप्यानन्त्यं देशकालवस्तुकृतपरिच्छेदराहित्यम् अभ्युपेतव्यमित्यर्थः ॥ ३५ ॥

न केवलं श्रुतितः किन्तु युक्तितोऽपीत्याह देशकालान्यवस्तूनामिति। परिच्छेदहेतूनां देशकालान्यवस्तूनां मायाकल्पितत्वाच्च। गन्धर्वनगरादिभिरिवासद्भिर्न देशादिभिः कृतः पारमार्थिकः परिच्छेदो ब्रह्मणि सम्भवति यत अतो ब्रह्मण्यानन्त्यं तावद् व्यक्तमेव। तदेतत् सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येवाविचिकित्स्यमिति ओं सत्यम् आत्मैव नृसिंहः देवो ब्रह्म भवति अयमात्मा ब्रह्म इत्यादिभिरात्मनो ब्रह्माभेदप्रतिपादनात् तस्याप्यानन्त्यं सिद्धमिति तात्पर्यम् ॥ ३६ ॥

ननु जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावेऽपि चेतनयोर्जीवेश्वरयोस्तदसम्भवात् तद्कृतपरिच्छेदवत्त्वेनानन्त्यं ब्रह्मणो न संभवतीत्याशङ्क्य तयोरप्यौपाधिकरूपत्वेन पारमार्थिकत्वाभावात् न तयोरपि वास्तवपरिच्छेदहेतुत्वम् इत्यभिप्रायेणाह सत्यं ज्ञानमनन्तमिति। यत् सत्यादिरूपं ब्रह्म तद्धि वस्तु तदेव पारमार्थिकं

शक्तिरस्त्यैश्वरी काचित् सर्ववस्तुनियामिका ।
आनन्दमयमारभ्य गूढ़ा सर्वेषु वस्तुषु ॥ ३८ ॥
वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा ।
अन्योन्यधर्मसाङ्कर्यात् विप्लवेत जगत् खलु ॥ ३९ ॥
चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा ।
तच्छक्त्युपाधिसंयोगात् ब्रह्मैवेश्वरतां व्रजेत् ॥ ४० ॥

तस्य ब्रह्मणो यल्लोकप्रसिद्धमीश्वरत्वं जीवत्वञ्च तद् वक्ष्यमाणोपाधिद्वयेन कल्पितम् अतः कल्पितत्वादेव जड़वत् जीवेश्वरयोरपि तत् परिच्छेदकत्वाभाव इति भावः ॥ ३७ ॥

किं तदुपाधिद्वयमित्याकाङ्क्षायां तदुभयं क्रमेण दिदर्शयिषुरादावीश्वरोपाधिभूतां शक्तिं निरूपयति शक्तिरस्त्यैश्वरी काचिदिति । ऐश्वरी ईश्वरोपाधितया ईश्वरसम्बन्धिनी काचित् सदसत्त्वादिभीरूपैर्निर्वक्तुमशक्या सर्ववस्तुनियामिका सर्वेषामन्तर्यामिब्राह्मणोक्तानां पृथिव्यादीनां नियम्यवस्तूनां नियमनकर्त्री शक्तिरस्ति । सा कुत्र तिष्ठति कुतो वा नोपलभ्यते इत्याशङ्क्याह आनन्दमयमिति । आनन्दमयादिषु ब्रह्माण्डान्तेषु वस्तुषु गूढ़ा वर्त्तते अतो नोपलभ्यत इत्यर्थः ॥ ३८ ॥

नियमेनानुपलभ्यमानायास्तस्याः असत्त्वमेव किं न स्यादित्याशङ्क्य जगन्नियमनान्यथानुपपत्त्या सावश्यमभ्युपेया इत्याह वस्तुधर्मा इति । वस्तूनां पृथिव्यादीनां धर्माः काठिन्यद्रवत्वादयो यदा शक्त्या न व्यवस्थाप्यन्ते तदा तेषां धर्माणां साङ्कर्यात् विमिश्रणेनैकत्वावस्थानात् जगद्विप्लवेतानियतव्यवहारविषयतां प्राप्नुयादित्यर्थः खल्विति प्रसिद्धिं द्योतयति ॥ ३९ ॥

ननु जड़ायाः अस्या जगन्नियामकत्वं न युज्यते इत्याशङ्क्याह चिच्छायावेशत इति । सा शक्तिश्चिच्छायावेशतः चिदाभासप्रवेशाच्चेतनमेव चेतनत्वमापन्नेव विभाति प्रतीयते अतोऽस्या नियामकत्वं घटत

कोषोपाधिविवक्षायां याति ब्रह्मैव जीवताम्।
पिता पितामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥ ४१ ॥
पुत्रादेरविवक्षायां न पिता न पितामहः।
तद्वन्नेशो नापि जीवः शक्तिकोषाविवक्षणे ॥ ४२ ॥
य एवं ब्रह्म वेदैष ब्रह्मैव भवति स्वयम्।
ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥ ४३ ॥
इति पञ्चकोषविवेकः समाप्तः।

इति भाव। अस्तु तत्र किमायातमित्यत आह तच्छक्तीति। सा चासौ शक्तिश्चेति कर्मधारयः सैवोपाधिस्तेन संयोगः सम्बन्धः तस्मात् ब्रह्मैव सत्यादिलक्षणमीश्वरता सर्वज्ञत्वादिधर्मयोगितां व्रजेत् प्राप्नुयादित्यर्थः ॥ ४० ॥

जीवस्योपाधिभूतानां कोषाणां प्रागेवाभिहितत्वात् तन्निमित्तकं जीवभेदमाह कोषोपाधीति। कोष एवोपाधिः कोषोपाधिः तद्विवक्षाया पर्यालोचनया क्रियमाणायां ब्रह्मैव सत्यादिलक्षणमेव जीवता जीवत्वरूपविषयतां गच्छति। ननु एकस्यैव विरुद्धधर्मद्वयदर्शनं युगपत् न क्वापि दृष्टमित्याशङ्क्याह पिता पितामहश्चैक इति। यथा एक एव देवदत्तः एकदैव पुत्रं प्रति पिता भवति पौत्रं प्रति पितामहः एवं ब्रह्म कोषोपाधिविवक्षायां जीवो भवति शक्त्युपाधिविवक्षायामीश्वरो भवतीत्यर्थः ॥ ४१ ॥

वस्तुतस्तु जीवत्वमीश्वरत्वं वा ब्रह्मणो नास्त्येवेतत् सदृष्टान्तमाह पुत्रादेरिति ॥ ४२ ॥

इदानीमुक्तस्य ज्ञानस्य फलमाह य एवमिति। यः साधनसम्पन्नः एवमुक्तप्रकारेण पञ्चकोषविवेकपुरःसरं ब्रह्म प्रत्यगभिन्नं सत्यादिलक्षणं वेद साक्षात् करोति सः स्वयं ब्रह्मैव भवति, स चेह चैतत्

चतुर्थपरिच्छेदः ।

द्वैतविवेकः ।

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते ।
विवेके सति जीवेन हेयो बन्धः स्फुटीभवेत् ॥ १ ॥

परं ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मविदाप्नोति परमित्यादि श्रुतिभ्यः । ततोऽपि किमित्यत आह ब्रह्मणो नास्तीति । न जायते म्रियते वा विपश्चिदित्यादि श्रुतेर्ब्रह्मणस्तावज्जन्म नास्ति अतएव विद्वानपि स्वात्मन-स्तद्रूपत्वावगमात् नैव जायते न स पुनरावर्त्तते इति श्रुतेरिति सिद्धम् ॥ ४२ ॥

इति पञ्चकोषविवेकव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
मया द्वैतविवेकस्य क्रियते पदयोजना ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवतात-त्त्वानुस्मरणलक्षणं मङ्गलमाचरन् अस्य वेदान्तप्रकरणत्वात् शास्त्रीय-मेवानुबन्धचतुष्टयं सिद्धवत् कृत्य ग्रन्थारम्भं प्रतिजानीते ईश्वरेणा-पीति । ईश्वरेण कारणोपाधिकेनान्तर्यामिना जीवेनापि कार्य्योपाधि-नाहं प्रत्ययिना च सृष्टमुत्पादितं द्वैतं जगत् विविच्यते विभज्य प्रद-र्श्यते । अस्य द्वैतविवेचनस्य काकदन्तपरीक्षावत् निष्प्रयोजनत्वं वार-यति विवेक इतीति । विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने कृते सति जीवेन पूर्वोक्तेन हेयः परित्याज्यो बन्धो बन्धहेतुः द्वैतं स्फुटीभवेत् स्फुटतां गच्छेत् एतावत् जीवेन हेयमिति निश्चीयत इत्यर्थः ॥ १ ॥

मायान्तु प्रकृतिं विद्यात् मायिनन्तु महेश्वरम् ।
स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः ॥ २ ॥
आत्मा वा इदमग्रेऽभूत् स ऐक्षत सृजा इति ।
सङ्कल्पेनासृजल्लोकान् स एतानिति बह्वृचाः ॥ ३ ॥
खवाय्वग्निजलोर्व्योषध्यन्नदेहाः क्रमादमी ।
सम्भूता ब्रह्मणस्तस्मादेतस्मादात्मनोऽखिलाः ॥ ४ ॥
बहु स्यामहमेवातः प्रजायेयेति कामतः ।
तपस्तप्त्वाऽसृजत् सर्वं जगदित्याह तित्तिरिः ॥ ५ ॥

ननु अदृष्टद्वारा जीवानामेव जगद्धेतुत्वं वादिनो वर्णयन्ति अतः कथमीश्वरसृष्टत्वं जगत उच्यते इत्याशङ्क्य बहुश्रुतिविरोधाच्चेदं चोद्यमत्यापरिहर्तुमर्हतीत्यभिप्रायेण श्वेताश्वतरवाक्यन्तावदर्थतः पठति मायान्त्विति । मायोपाधिकमीश्वरं प्रस्तुत्य अस्मान्मायी सृजते विश्वमेतदिति तस्यैवेश्वरस्य जगत्स्रष्टृत्वं श्वेताश्वतरशाखिनो वर्णयन्तीत्यर्थः ॥ २ ॥

ऐतरेयोपनिषद्वाक्यमर्थतोऽनुसंक्रामति आत्मा वा इति । आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् स ईक्षत लोकान्नु सृजा इति स इमान् लोकानसृजतेत्यनेन वाक्येनाद्वितीयस्य परमात्मन एव जगतः स्रष्टृत्वं बह्वृचा ऋक्शाखाध्यायिनः प्राहुः ॥ ३ ॥

ईश्वरस्य जगत्कारणत्वे तैत्तिरीयश्रुतिरपि प्रमाणम् इत्यभिप्रेत्य तद्वाक्यार्थतः पठति खमिति श्लोकद्वयेन ॥ ४ ॥

बहु स्यामिति । नित्यं ज्ञानमनन्तं ब्रह्म इत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिना अन्नात् पुरुष इत्यन्तेन वाक्येन गुहाहितत्वेन प्रत्यगभिन्नात् ब्रह्मणः आकाशादिदेहपर्य्यन्तं जगदुत्पन्नम् इत्यभिधाय तदुपरिष्टादपि सोऽकामयत बहु स्यां प्रजाये-

इदमग्रे स देवासीद् बहुत्वाय तदैक्षत ।
तेजोऽबन्नाण्डजादीनि ससर्जेति च सामगाः ॥ ६ ॥
विस्फुलिङ्गा यथा वह्नेर्जायन्तेऽक्षरतस्तथा ।
विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः ॥ ७ ॥
जगदव्याकृतं पूर्वमासीद् व्याक्रियतेऽधुना ।
दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटाः ।
विराण्मनुर्नरा गावः खराश्वाजावयस्तथा ।
पिपीलिकावधि द्वन्द्वमिति वाजासनेयिनः ॥ ८ ॥

येति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्चेति वाक्येन तस्यैव ब्रह्मणो जगत्सर्जनेच्छापूर्वकपर्य्यालोचनेन जगत्स्रष्टृत्वं तैत्तिरिराहुरित्यर्थः ॥ ५ ॥

छान्दोग्येऽपि जगत्स्रष्टृत्वं ब्रह्मण एव श्रुतमित्याह इदमग्र इति । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सद्रूपमद्वितीयं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत इत्यादिना तस्यैवेक्षणपूर्वकं तेजोऽबन्नस्रष्टृत्वम् अभिधाय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमित्यादिना आण्डजादिशरीरनिर्मातृत्वञ्च सामगा वर्णयन्तीत्यर्थः ॥ ६ ॥

मुण्डकोपनिषदापि तदेतत् सत्यं यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपास्तथाक्षरात् विविधाः सोम्य ! भावाः प्रजायन्ते तत्र चैवापि यन्तीत्यक्षरशब्दवाच्याद् ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह विस्फुलिङ्गा यथेति ॥ ७ ॥

एवं बृहदारण्यकेऽप्यव्याकृतशब्दवाच्याद् ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतमित्याह जगदव्याकृतमिति । तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदं रूपमिति वाक्येन

कृत्वा रूपान्तरं जैवं देहे प्राविशदीश्वरः।
इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात्॥ ९॥
चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः।
चिच्छाया लिङ्गदेहस्था तत्संघो जीव उच्यते॥ १०॥
माहेश्वरी तु या माया तस्या निर्माणशक्तिवत्।
विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ॥ ११॥

सृष्टेः पुरा अस्पष्टनामरूपत्वेनाव्याकृतशब्दवाच्यात् मायोपाधिकात् ब्रह्मणो नामरूपस्पष्टीकरणलक्षणा सृष्टिरुक्ता तयोर्नामरूपयोर्विराडादिषु स्थूलकार्येषु स्पष्टता च तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदंरूप इति वाक्येनाभिहिता ते च विराडादयः आत्मैवेदमग्र आसीत् पुरुषविध इत्यादिना एवमेव यदिदं किञ्च मिथुनमापिपीलिकाभ्यस्तत् सर्वमसृजतेत्यन्तेन दर्शिता इत्यर्थः॥ ८॥

उदाहृताभिः श्रुतिभिरेतत्सृष्ट्यभिधानानन्तरं ब्रह्मणो जीवरूपेण तत्र प्रवेशोऽप्यभिहित इत्याह कृत्वा रूपान्तरम् इति। जैवं जीवसम्बन्धि रूपान्तरमविक्रियात् ब्रह्मणो विलक्षणं विकारि रूपमित्यर्थः, देहे देहजाते। जीवत्वं कुत इत्यत आह जीवत्वमिति। प्राणादीनां स्वामित्वेन प्रेरकत्वं प्राणधारणं तस्मात् जैवं रूपं कृत्वा प्राविशदित्युक्तम्॥ ९॥

किन्तदित्यपेक्षायामाह चैतन्यं यदधिष्ठानमिति। अधिष्ठानं लिङ्गदेहस्याधारभूतं यच्चैतन्यमस्ति यश्च तत्र कल्पितो लिङ्गदेहो यश्च तस्मिन् लिङ्गदेहे विद्यमानश्चिदाभासः तत्सङ्घस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्यर्थः॥ १०॥

नन्वीश्वरस्यैव जीवरूपेण प्रविष्टत्वे तस्यापि सुखदुःखित्वादिविरुद्धधर्मवत्त्वं कुत इत्याशङ्क्याह माहेश्वरी तु या मायेति। माहेश्वरी मायिनन्तु महेश्वरमिति श्रुत्युक्ता महेश्वरसम्बन्धिनी या मायास्ति तस्या

मोहादनीशतां प्राप्य मग्नो वपुषि शोचति।
ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः ॥ १२ ॥
सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपञ्चितम्।
अन्नानि सप्त ज्ञानेन कर्मणा जनयत् पिता ॥ १३ ॥
मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकम्।
अन्नत्रितयमात्मार्थमन्नानां विनियोजनम् ॥ १४ ॥

निर्माणशक्तिवत् जगदुत्पादनसामर्थ्यवत् मोहशक्तिश्च मोहनसामर्थ्यमस्ति तदेतच्छक्तं मोहात्मकमिति श्रुतेः। ततः किमित्यत आह तमिति। असौ मोहनशक्तिः तं पूर्वोक्तं जीवं मोहयति चिदानन्दादिस्वरूपज्ञानरहितं करोति ॥ ११ ॥

ततोऽपि किमित्यत आह मोहादनीशतामिति। मोहात् पूर्वोक्तात् अनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसमर्थत्वं प्राप्य वपुषि मग्नः शरीरे तादात्म्याभिमानं गतः शोचति दुःखित्वाद्यभिमानं करोति समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्यर्थः। वक्ष्यमाणसाङ्कर्यपरिहाराय वृत्तं निगमयति ईशसृष्टमिति। समासतः सङ्क्षेपेणेत्यर्थः ॥ १२ ॥

ननु जीवस्य द्वैतस्रष्टृत्वे किं मानमित्याशङ्क्याह सप्तान्नेति। कथं तत्र प्रपञ्चितमित्याशङ्क्य सप्तान्नशब्दवाच्यद्वैतसृष्टिप्रतिपादकं यत् सप्तान्नानि मेधया तपसाऽजनयत् पितेति वाक्यमर्थतः संगृह्णाति अन्नानीति। पिता अदृष्टद्वारा जगदुत्पादनेन सर्वलोकपालको जीव इत्यर्थः ॥ १३ ॥

नन्वन्नसप्तकसर्जनं किमर्थमित्याशङ्क्य तद्विनियोगोऽप्येकमस्य साधारणं द्वे देवानभाजयत् त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् इति वाक्येनोक्त इत्याह मर्त्यान्नमेकमिति। विनियोजनमुक्तमिति शेषः ॥ १४ ॥

व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः।
वाक् प्राणश्चेति सप्तत्वमन्नानामवगम्यताम् ॥१५॥
ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः।
तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नताम् ॥१६॥
ईशकार्य्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितम्।
पितृजन्या भर्तृभोग्या यथा योषित् तथेष्यताम् ॥१७॥
मायावृत्त्यात्मको हीशसङ्कल्पः साधनं जनौ।
मनोवृत्त्यात्मको जीवसङ्कल्पो भोगसाधनम् ॥१८॥

तानि च सप्तान्नानि एकमस्य साधारणमितीदमेवास्य तत् साधारणमन्नं यदिदमद्यत इत्यादिना अयमात्मा वाङ्मयो मनोमयः प्राणमय इत्यन्तेन वाक्यसन्दर्भेण बृहदारण्यकाद्यवयवरूपेण दर्शितानीत्याह व्रीह्यादिकमिति ॥ १५ ॥

ननु सप्तान्नानाम् जगदन्तःपातित्वेनेश्वरनिर्मितत्वात् जीवनिर्मितत्वाभिधानमयुक्तमित्याशङ्क्य तत्स्वरूपस्य ईश्वरनिर्मितत्वेऽपि भोग्यत्वाकारस्य जीवनिर्मितत्वात् नैवमित्याह ईशेन यद्यप्येतानीति। ज्ञानकर्मभ्यां ज्ञानं विहितं प्रतिषिद्धञ्च देवतापरयोषिदादिविषयं ध्यानं कर्म च विहितं यागादिरूपं प्रतिषिद्धं हिंसादिरूपं ताभ्यामित्यर्थः। तदन्नतां तेषां व्रीह्यादिसप्तान्नानां स्वभोगोपकरणत्वमित्यर्थः ॥ १६ ॥

एतावता किमुक्तं भवति तत्राह ईशकार्य्यमिति। जगत् सप्तान्नत्वेनोक्तं व्रीह्यादिरूपमीशकार्य्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां सम्बद्धमित्यर्थः। एतदुभयसम्बन्धे दृष्टान्तमाह पितृजन्येति ॥ १७ ॥

ईशजीवयोर्जगज्जनने किं साधनमित्यत आह मायावृत्त्यात्मको हीति ॥ १८ ॥

ईशनिर्म्मितमण्यादौ वस्तुन्येकविधे स्थिते ।
भोक्तृधीवृत्तिनानात्वात् तद्भोगो बहुधेष्यते ॥१९॥
हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः ।
पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति ॥२०॥
प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः ।
सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु ॥२१॥
भार्य्या स्नुषा ननान्दा च याता मातेत्यनेकधा ।
प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः ॥२२॥

नन्वीश्वरसृष्टवस्तुस्वरूपातिरिक्तो भोग्यत्वाकार एव नास्ति को जीवेन सृज्यते इत्याशङ्क्याह ईशनिर्मितेति । एकस्मिन्नेव विषये बहुविधो भोग उपलभ्यमानस्तत्प्रयोजकं भोग्याकारभेदं गमयतीत्यर्थः ॥ १९ ॥

ननु सति भोगभेदे भोग्यभेदः कल्प्येत स एव नास्तीत्याशङ्क्य दृश्यमानत्वान्नैवमित्याह हृष्यत्येक इति । एको मण्यर्थी तं लब्ध्वा हृष्यति अन्यस्तथाविधस्तदलाभात् क्रुध्यति अत्र मणिविषये विरक्तः तं मणिं पश्यत्येव लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः ॥ २० ॥

के ते भोगभेदोपरक्ता जीवसृष्टा आकारभेदा इत्यत आह प्रियोऽप्रिय इति । मणिस्था प्रियत्वाप्रियत्वोपेक्ष्यत्वलक्षणा आकारभेदा जीवैः सृष्टाः त्रिष्वपि साधारणमनुस्यूतं यन्मणिरूपं तदीश्वरनिर्मितमित्यर्थः ॥ २१ ॥

उक्तं जीवसृष्टाकारभेदमुदाहरणान्तरेण स्पष्टयति भार्य्येति । ननान्दा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्वशुरादिलक्षणप्रतियोगिगोचरया बुद्ध्या तत्तदपेक्षया इत्यर्थः ॥ २२ ॥

ननु योषिद्विषयाणि भार्य्यास्नुषेत्यादिज्ञानान्येव भिन्नानि नत-

ननु ज्ञानानि भिद्यन्तामाकारस्तु न भिद्यते ।
योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः ॥२३॥
मैवं मांसमयी योषित् काचिदन्या मनोमयी ।
मांसमय्या अभेदेऽपि भिद्यतेऽत्र मनोमयी ॥२४॥
भ्रान्तिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयम् ।
जाग्रन्मानेन मेयस्य न मनोमयतेति चेत् ॥२५॥
बाढं माने तु मेयेन योगात् स्यात् विषयाकृतिः ।
भाष्यवार्त्तिककाराभ्यामयमर्थ उदाहृतः ॥२६॥
मृपासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥२७॥

ज्ञानभेदे न तु तद्विषयभूताया योषितः स्वरूपभेदो दृश्यते अतः प्रतियोगिनिष्ठा योषिद्भेदा इत्युक्तमयुक्तमिति शङ्कते ननु ज्ञानानि भिद्यन्तामिति ॥ २३ ॥

ज्ञानवैलक्षण्यस्य ज्ञेयवैलक्षण्याविनाभूतत्वात् ज्ञेयाकारभेदोऽङ्गीकर्तव्य एवेत्यभिप्रायेण परिहरति मैवं मांसमयी योषिदिति ॥ २४ ॥

ननु भ्रान्त्यादिस्थले बाह्यविषयाभावात् तत्रत्यं वस्तु मनोमयमस्तु प्रमितिस्थले तु तदनुपपन्नं बाह्यवस्तुनः सत्त्वादिति शङ्कते भ्रान्तिस्वप्नेति । मानेन प्रत्यक्षादिप्रमाणेन मेयस्य प्रमेयस्येत्यर्थः ॥ २५ ॥

प्रमितिस्थले बाह्यविषयसत्त्वमङ्गीकरोति बाढमिति । कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह मानेत्विति । माने विषयाकृतिस्तु तस्य मेयेन योगात् सम्बन्धात् स्यात् । नन्विदं स्वकपोलकल्पितमित्याशङ्क्याह भाष्यवार्त्तिककाराभ्यामिति ॥ २६ ॥

तत्र तावत् भाष्यकारवचनमुदाहरति मूषासिक्तमिति । यथा द्रुतं ताम्रं मूषायां सिक्तं तन्निभं जायते तन्मूषाकारवद्भवति तथा

व्यञ्जको वा यथा लोको व्यङ्ग्यस्याकारतामियात् ।
सर्व्वार्थव्यञ्जकत्वाद्धीरर्थाकारा प्रदृश्यते ॥२८॥
मातुर्म्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् ।
मेयाभिसङ्गतं तच्च मेयाभत्वं प्रपद्यते ॥२९॥
सत्येवं विषयौ द्वौ स्तो घटौ मृण्मयधीमयौ ।
मृण्मयो मानमयः स्यात् साक्षिभास्यस्तु धीमयः ॥३०॥

रूपादीन् विषयान् व्याप्नुवत् विषयीकुर्वत् चित्तं मुखमवस्थं तद्विभं दृश्यते उपलभ्यत इत्यर्थः ॥ २७ ॥

ननु ताम्रादेरग्निसम्पर्कात् द्रुतस्य मूषानिषिक्तस्य कठिनमूषाभिघातेन शैत्यापत्तौ मूषाकारापत्तावपि बुद्धेरमूर्त्तायास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशङ्क्य दृष्टान्तान्तरमाह व्यञ्जको वेति । यथा व्यञ्जकः प्रकाशकः आलोकः आतपादिः व्यङ्ग्यस्य प्रकाश्यस्य घटादेराकारतामाकारवत्तामियात् प्राप्नुयात् एवं धीरपि सर्वार्थस्य व्यञ्जकत्वात् सकलपदार्थप्रकाशकत्वादर्थस्याकार इवाकारो यस्याः सा तथा प्रदृश्यते प्रकर्षेणोपलभ्यत इत्यर्थः ॥ २८ ॥

इदानीं वार्त्तिककारवचनमाह मातुर्मानाभिनिष्पत्तिरिति । मातुः साधिष्ठानबुद्धिस्थचिदाभासरूपात् प्रमातुर्मानाभिनिष्पत्तिर्मानस्य साभासान्तःकरणवृत्तिरूपस्याभिनिष्पत्तिरुत्पत्तिर्भवतीति शेषः । निष्पन्नमुत्पन्नं तन्मानं मेयं प्रमेयं घटादिरूपमेति प्राप्नोति किञ्च तन्मानं मेयाभिसङ्गतं प्रमेयेण सम्बद्धं सन्मेयाभत्वं मेयस्येवाभा यस्य तस्य भावस्तत्त्वं मेयसमानकारतां प्रपद्यते प्राप्नोतीत्यर्थः ॥ २९ ॥

भवत्वेवं प्रकृते किमायातम् इत्यत आह सत्येवमिति । ननु मृण्मयघटस्येव मनोमयघटस्य तेनैव मनसा ग्रहीतुमशक्यत्वात् ग्राहकान्तराभावाच्चासिद्धिरित्याशङ्क्य ग्राहकान्तराभावोऽसिद्ध इत्याह

अन्वयव्यतिरेकाभ्यां धीमयो जीवबन्धकृत् ।
सत्यस्मिन् सुखदुःखे स्तस्तस्मिन्नसति न द्वयम् ॥२१॥
असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः ।
समाधिसुप्तिमूर्च्छासु सत्यप्यस्मिन् न बध्यते ॥२२॥
दूरदेशं गते पुत्रे जीवत्येवात्र तत् पिता ।
विप्रलम्भकवाक्येन मृतं मत्वा प्ररोदिति ॥२३॥

मृण्मय इति । यथा मृण्मयो मानमेयः साभासान्तःकरणवृत्तिभाव्यस्तथा धीमयः साक्षिभाव्य इत्यर्थः ॥ २० ॥

भवत्वेवं द्विविधं द्वैतमत्र कस्य हेयत्वं कस्य वा नेति न ज्ञायत इत्याशङ्क्य जीवकृतस्यैव हेयत्वमित्यभिप्रेत्य तस्य बन्धहेतुत्वं दर्शयति अन्वयव्यतिरेकाभ्यामिति । अन्वयव्यतिरेकावेव दर्शयति सत्यस्मिन्निति । अस्मिन् जीवकृते मानसप्रपञ्चे सति विद्यमाने सुखदुःखे स्तः असतः अवर्तमाने तु तस्मिन् न द्वयं सुखं दुःखञ्च नास्तीत्यर्थः ॥२१॥

ननु कारणव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह असत्यपीति । नरो मनुष्यः एतदुपलक्षणमन्येषामपि, स्वप्नादौ स्वप्नावस्थादिकाले बाह्यार्थे स्रक्चन्दनवनितादौ प्रतिकूले व्याघ्रादौ च प्रातिभासिके विषयेऽसत्यविद्यमानेऽपि बध्यते सुखदुःखाभ्यां युज्यते । समाध्यादिषु तस्मिन् बाह्यार्थे सत्यपि न बध्यते न सुखदुःखादिभाग् भवति अतस्तादृशावन्वयव्यतिरेकौ न स्त इत्यर्थः ॥ २२ ॥

मनोमयप्रपञ्चस्य बन्धकत्वमन्वयव्यतिरेकोदाहरणेन स्पष्टयति दूरेत्यादिना । देशान्तरं प्राप्ते पुत्रे तत्र जीवति सति तदत्रस्थस्तस्य पिता विप्रलम्भकस्य मिथ्यावचनैः परवञ्चकस्य पुरुषस्य पुत्रो मृत इत्येवं रूपेण वाक्येन स्वपुत्रं मृतं कल्पयित्वा प्रकर्षेण रोदिति ॥ २३ ॥

मृतेऽपि तस्मिन् वार्त्तायामश्रुतायां न रोदिति ।
अतः सर्व्वस्य जीवस्य बन्धकृन्मानसं जगत् ॥३४॥
विज्ञानवादो बाह्यार्थवैयर्थ्यात् स्यादिहेति चेत् ।
न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः ॥ ३५ ॥
वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे ।
प्रयोजनमपेक्षन्ते न मानानीति हि स्थितिः ॥ ३६ ॥
बन्धश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति ।
अभ्यसेद् योगमेवातो ब्रह्मज्ञानेन किं वद ॥ ३७ ॥

तस्मिन्नेव पुत्रे मृतेऽपि तन्मृतिवार्त्तायामश्रुतायां रोदनं न करोति । फलितमाहातः सर्व्वस्येति ॥ ३४ ॥

धीमयस्यैव जगतो बन्धहेतुत्वाङ्गीकारे बाह्यार्थापलापादपसिद्धान्तापत्तिः स्यादिति शङ्कते विज्ञानवाद इति । परिहरति न हृद्याकारमिति । यद्यपि मानसप्रपञ्चस्यैव बन्धहेतुत्वं तथापि तद्धेतुत्वेन बाह्यार्थस्यापि स्वीकारात् न विज्ञानवादप्रसङ्ग इति भावः ॥ ३५ ॥

ननु हृद्याकारसमर्पणाय बाह्यार्थो नापेक्षणीयः पूर्व्वपूर्व्वमानसप्रपञ्चसंस्कारस्यैव उत्तरोत्तरमानसप्रपञ्चहेतुत्वोपपत्तेरित्याशङ्क्य प्रौढ़िवादेन तदङ्गीकरोति वैयर्थ्यमस्तु वेति । तर्हि विज्ञानवादात् को भेद इत्यत आह बाह्यमिति । विज्ञानवादिनो बाह्यार्थमेव लुम्पन्ति वयं न तथेत्ययमेव भेद इत्यर्थः । प्रयोजनशून्यस्याभ्युपगमोऽप्ययुक्त एवेत्याशङ्क्याह प्रयोजनमिति । मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेणासत्त्वस्य लौकिकैर्वादिभिर्वानभ्युपगमादिति भावः ॥ ३६ ॥

मानसद्वैतस्यैव बन्धहेतुत्वे तस्य मनोनिरोधात्मकेन योगेनैव निवर्त्तितत्वात् न ब्रह्मज्ञानस्य बन्धनिवर्त्तकत्वाभ्युपगमो विरुध्येतेति शङ्कते बन्धश्चेन्मानसं द्वैतमिति ॥ ३७ ॥

तात्कालिकद्वैतशान्तावप्यागामिजनिक्षयः ।
ब्रह्मज्ञानं विना न स्यादिति वेदान्तडिण्डिमः ॥ ३८ ॥
अनिवृत्तेऽपीशसृष्टे द्वैते तस्य मृषात्मताम् ।
बुद्ध्वा ब्रह्माद्वयं बोद्धुं शक्यं वस्त्वैक्यवादिना ॥ ३९ ॥
प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः ।
विरोधिद्वैताभावेऽपि न शक्यं बोद्धुमद्वयम् ॥ ४० ॥
अबाधकं साधकञ्च द्वैतमीश्वरनिर्मितम् ।
अपनेतुमशक्यञ्चेत्यास्तां तद्द्विष्यते कुतः ॥ ४१ ॥

योगेन किं द्वैतोपशमः तात्कालिक उच्यते आत्यन्तिको वेति विकल्प्याद्यमङ्गीकृत्य द्वितीयं दूषयति तात्कालिकद्वैतशान्ताविति । ज्ञात्वा देवं मुच्यते सर्वपाशैः, ज्ञात्वा शिवं शान्तिमत्यन्तमेति यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीत्यादिश्रुत्यन्वयव्यतिरेकाभ्यां ब्रह्मज्ञानादेव बन्धनिवृत्तिरभिधीयत इति भावः ॥ ३८ ॥

ननु ईशाद्वैतानिवारणमन्तरेणाद्वितीयब्रह्मज्ञानमेव नोदीयादित्याशङ्क्य तन्निवारणाभावेऽपि तस्य मिथ्यात्वज्ञानादेव पारमार्थिकमद्वैतं बोद्धुं शक्यत इत्याह अनिवृत्तेऽपीति ॥ ३९ ॥

न द्वैतस्मरणात्मज्ञानम् अद्वैतज्ञानप्रयोजकमपि तु तन्निवारणमेवेत्यभिनिवेशेन न भाव्यमित्याह प्रलय इति । प्रलये प्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यान्तु विरोधिद्वैताभावेऽप्यद्वैतज्ञानविरोधित्वेन भेदाभिमतस्य द्वैतस्य निवारणे सत्यपि गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य ज्ञानसाधनस्याभावाद्धेतोः अद्वयं वस्तु बोद्धुं शक्यं न भवति अतस्तन्निवारणमप्रयोजकमिति भावः ॥ ४० ॥

तथापि बाधकं द्वैतं कथमद्वैतज्ञानमित्याशङ्क्याह अबाधकमिति ।

जीवद्वैतन्तु शास्त्रीयमशास्त्रीयमिति द्विधा ।
उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात् ॥ ४२ ॥
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत् ।
बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनम् ॥ ४३ ॥
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः ।
परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ॥ ४४ ॥
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेत् ग्रन्थमशेषतः ॥ ४५ ॥

ईश्वरनिर्मितद्वैतमबाधकं तन्न, आत्मज्ञानेनैवाद्वैतज्ञानोत्पत्तेरुक्तत्वात् साधकञ्च गुरुशास्त्रादिरूपस्य तस्य ज्ञानसाधनत्वात् आकाशादिरूपं द्वैतमस्माभिरपनेतुमशक्यञ्चेति हेतोस्तद्वैतमास्तां कुतः कारणात् द्विष्यत इत्यर्थः ॥ ४१ ॥

इदानीं जीवसृष्टं द्वैतं विभजते जीवद्वैतन्त्विति । किं द्विविधमपि सदा हेयमेव ? न इत्याह उपाददीतेति । आतत्त्वस्यावबोधनात् तत्त्वस्यावबोधनपर्य्यन्तम् इति यावत् ॥ ४२ ॥

किं तत् शास्त्रीयं द्वैतमित्याकाङ्क्षायामाह आत्मब्रह्मविचाराख्यमिति । प्रत्यगूपस्य ब्रह्मणो विचाराख्यं यत् श्रवणादिकं तत् शास्त्रीयं मानसं जगदित्यर्थः । ननु आतत्त्वस्यावबोधनादित्युक्तमनुपपन्नम् आसुप्तेरामृतेः कालं नयेत् वेदान्तवार्त्तया इत्युक्तत्वात् इत्याशङ्क्याह बुद्धे तत्त्व इति । तत्त्वे ब्रह्मात्मैक्यलक्षणे साक्षात्कृते सतीत्यर्थः । तर्हि आसुप्तेरिति वाक्यस्य का गतिरिति चेत् दद्यान्नावसरं किञ्चित् कामादीनां मनागपीति पूर्वार्द्धे कामाद्यवसरप्रदानस्य निषिद्धत्वात् तत्परतैवेति वदामः अतो न काप्यनुपपत्तिरिति भावः ॥ ४२ ॥

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥ ४६ ॥
तमेवैकं विजानीत ह्यन्या वाचो विमुञ्चथ ।
यच्छेद् वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः ॥ ४७ ॥
अशास्त्रीयमपि द्वैतं तीव्रं मन्दमिति द्विधा ।
कामक्रोधादिकं तीव्रं मनो राज्यं तथेतरत् ॥ ४८ ॥
उभयं तत्त्वबोधात् प्राक् निवार्य्यं बोधसिद्धये ।
शमः समाहितत्वञ्च साधनेषु श्रुतं यतः ॥ ४९ ॥
बोधादूर्द्धञ्च तद्धेयं जीवन्मुक्तिप्रसिद्धये ।
कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता ॥ ५० ॥

तत्त्वबोधोत्तरकालं तर्हि तत्त्वप्रतिपादनपराः श्रुतीरुदाहरति शास्त्रा-
स्वाध्यायेऽपि इत्याद्याः श्रुतयः स्फुटा इत्यन्तमिति । तमेवैकं विजा-
नीत इत्यनेन तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृत-
स्यैष सेतुरिति श्रुतिरर्थतः पठिता ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥

अशास्त्रीयस्यापि द्वैतस्यावान्तरभेदमाह अशास्त्रीयमपि । तद्
द्विविधमपि क्रमेणोदाहरति कामक्रोधादिकमिति । इतरत् मन्द-
मित्यर्थः ॥ ४८ ॥

द्विविधयोः अशास्त्रीयद्वैतयोः तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह
उभयमिति । प्राक् निवार्य्यं किमर्थमित्यत आह बोधसिद्धये इति ।
तत्र हेतुमाह शम इति । यतस्तत्त्वबोधात् प्राक् तयोर्हेयत्वं तत
एव विद्याधिकारिविशेषणेषु ब्रह्मज्ञानसाधनेषु मध्ये शान्तः समा-
हित इति पदद्वयं शान्तिसमाधी श्रूयेते इत्यर्थः ॥ ४९ ॥

ननु तत्त्वबोधात् प्राक् निवार्य्यमित्यभिधानात् तदुत्तरकालमस्तु
कामादिकमित्याशङ्क्याह बोधादूर्द्ध्वं चेति । उक्तमर्थं व्यतिरेक-

जीवन्मुक्तिरियं माभूत् जन्माभावे त्वहं कृती।
तर्हि जन्मापि तेऽस्त्वेव स्वर्गमात्रात् कृती भवान् ॥५१॥
क्षयातिशयदोषेण स्वर्गो हेयो यदा तदा।
स्वयं दोषतमात्मायं कामादिः किं न हीयते ॥ ५२ ॥
तत्त्वं बुद्ध्वापि कामादीन् निःशेषं न जहासि चेत्।
यथेष्टाचरणं ते स्यात् कर्मशास्त्रातिलङ्घिनः ॥ ५३ ॥
बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि।
शुनां तत्त्वदृशाञ्चैव कोभेदोऽशुचिभक्षणे ॥ ५४ ॥

सुखेन दूरयति कामादीति। कामादिरूपो यः क्लेशः स एव बन्धः तेन युक्तस्य बद्धस्य मुक्तता जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः ॥५०॥

ननु जन्मादिसंसारादुद्विग्नस्यात्यन्तिकपुरुषार्थरूपया विदेहमुक्त्यैवालं किमनया आपातिकया जीवन्मुक्त्येति शङ्कते जीवन्मुक्तिरियमिति। ऐहिकभोगनिवृत्तिभयात् जीवन्मुक्तित्यागे आमुष्मिकभोगनिवृत्तिभयात् विदेहमुक्तिरपि त्याज्या स्यादिति प्रतिबन्द्या परिहरति तर्हि जन्मापीति ॥ ५१ ॥

प्रतिबन्दिमोचनं शङ्कते क्षयातिशयदोषेणेति। दोषयुक्तत्वेन स्वर्गादेस्त्याज्यत्वे सकलपुरुषार्थविघातकत्वेनातीव दोषरूपस्य कामादेः सुतरां त्याज्यत्वमित्याह तदा स्वयं दोषतमेति ॥ ५२ ॥

ननु वैराग्यादिसम्पादनेनात्यन्तानर्थहेतोः कामादेस्त्यक्तत्वात् ऐहिकभोगमात्रोपयोगिकामाद्यभ्युपगमे को दोष इत्याशङ्क्याह तत्त्वं बुद्ध्वापीति। तत्त्ववित्त्वाभिमानेन विधिनिषेधशास्त्रमतिक्रम्य कामाद्यधीनतया वर्त्तमानस्य तव यथेष्टाचरणं स्यादित्यर्थः ॥ ५३ ॥

अस्तु को दोष इत्याशङ्क्य तदनिष्टप्रतिपादनपरं सुरेश्वराचार्य्यवचनमुदाहरति बुद्धाद्वैतसतत्त्वस्येति। बुद्धमद्वैतसतत्त्वमद्वैतस्वरूपं यस्य

बोधात् पुरा मनोदोषमात्रात् क्लिष्टोऽस्यथाधुना ।
अशेषलोकनिन्दा चेत्यहो ते बोधवैभवम् ॥ ५५ ॥
विड्वराहादितुल्यत्वं माकाङ्क्षीस्तत्त्वविद् भवान् ।
सर्वधीदोषसंत्यागात् लोकैः पूज्यस्व देववत् ॥ ५६ ॥
काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव ॥ ५७ ॥
त्यज्यतामेष कामादिर्मनोराज्ये तु का क्षतिः ।
अशेषदोषबीजत्वात् क्षतिर्भगवतेरिता ॥ ५८ ॥

ज्ञेन च बुद्धाद्वैततत्त्वस्यापि यथेष्टाचरणं यदि स्यात् तर्हि अशुचि-भक्षणादिकमपि स्यात् तथा सति शुनां तत्त्वदृशाञ्चैव न कोऽपि विशेषः स्यादित्यर्थः ॥ ५४ ॥

एतावता किमनिष्टं कामादित्यागस्त्वित्याशङ्क्य सोपहासमुत्तरमाह बोधात् पुरेति । तत्त्वज्ञानोदयात् प्राक् कामक्रोधादिचित्तदोषैस्त्वं क्लिष्टोऽभूत् इदानीन्तु सर्वलोकनिन्दामपि सहसे इति क्लेशद्वैगुण्यमिति भावः ॥ ५५ ॥

तर्हि किं कर्त्तव्यमित्यत आह विड्वराहादितुल्यत्वमिति । यतस्त्वं तत्त्वज्ञानवानसि अतः कामादित्यागासमर्थत्वेन स्वबोधस्य विड्वराहादि-तुल्यत्वम् माकाङ्क्षीः किन्तु कामादिसकलमनोदोषहानेन सर्वजनै-र्देववत् पूज्यस्व पूज्यो भवेत्यर्थः ॥ ५६ ॥

तत्त्यागोपायमाह काम्यादीति । काम्याः कामनाविषयाः स्रगा-दयः आदयो येषां इष्टादीनां ते काम्यादयः तेषां ये दोषाः अनित्यत्व-दुःखमिश्रत्वादयस्तेषां दृष्टिरवलोकनमाद्यं येषां कामस्वरूपविचारादीनां ते तथोक्ताः । तेषां कामादित्यागहेतुत्वे प्रमाणमाह प्रसिद्धा इति । अतस्त्वं विचारात्तानन्विष्यत आह तानन्विष्येति ॥ ५७ ॥

ननु कामादीनाम् अनर्थहेतुत्वात् त्याज्यत्वमस्तु मनोराज्यस्य तु

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते।
क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ ५९ ॥
शक्यं जेतुं मनोराज्यं निर्विकल्पसमाधितः।
सुसम्पादः क्रमात् सोऽपि सविकल्पसमाधिना ॥ ६० ॥
बुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना।
दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥ ६१ ॥
जिते तस्मिन् वृत्तिशून्यं मनस्तिष्ठति मूकवत्।
एतत् पदं वशिष्ठेन रामाय बहुधेरितम् ॥ ६२ ॥

तथात्वाभावात् तत्त्यागो नापेक्षित इति शङ्कते त्यज्यतामेव इति। साक्षादनर्थहेतुत्वाभावेऽपि परम्परया तद्धेतुत्वात् त्यज्यमेवेत्यभिप्रेत्य परिहरति अशेषदोषबीजत्वादिति ॥ ५८ ॥

परम्परया अनर्थहेतुत्वप्रदर्शनपरं भगवद्वाक्यमुदाहरति ध्यायतो विषयानिति ॥ ५९ ॥

तर्ह्यस्य मनोराज्यस्य कः परिहारोपाय इत्यत आह शक्यं जेतुमिति। सोऽपि कुतः सिध्यतीत्यत आह। सुसम्पादः क्रमात् सोऽपीति ॥ ६० ॥

नन्वष्टाङ्गयोगयुक्तस्य तथास्तु तद्रहितस्य का गतिरित्यत आह बुद्धतत्त्वेनेति। बुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्त्वस्तेन कामक्रोधादिबुद्धिदोषरहितेन एकान्तवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घं षड्द्वादशादिमात्रोपेतं प्रणवमोङ्कारमुच्चार्य मनोराज्यं विजीयते निवार्यत इत्यर्थः ॥ ६१ ॥

मनोराज्यविजये किं भवतीत्यत आह जिते तस्मिन्निति। यथा

द्वैतं नास्तीति बोधेन मनसो द्वैतमार्जनम् ।
सम्यगभ्यस्येत् तदोत्पन्ना परा निर्वाणनिर्वृतिः ।
विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः ।
सन्त्यक्तवासनान्मौनादृते नास्त्युत्तमं पदम् ॥ ६३ ॥
विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना ।
पुनः समाहिता सा स्यात् तदैवाभ्यासपाटवात् ॥ ६४ ॥
विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते ।
ब्रह्मैवायमिति प्राहुर्मुनयः पारदर्शिनः ॥ ६५ ॥

अतः सकलवागव्यापाररहितः तिष्ठति मनोऽपि सर्वव्यापाररहितमवतिष्ठत इत्यर्थः । अद्वैतिकमनोऽवस्थानस्य पुरुषार्थत्वे प्रमाणमाह एतत् पदमिति । एतत् पदमेव दृष्टमित्यर्थः ॥ ६२ ॥

सांप्रतं श्लोकद्वयमुदाहरति द्वैतमिति । नेह नानास्तीत्यादिश्रुत्या द्वितीयवस्तुनिरसनात् अभावज्ञानेन मनसः सकाशात् द्वैतनिवारणं सम्यक् यदि तर्हि निरतिशयमोक्षसुखं निष्पन्नमिति जानीयादित्यर्थः । शास्त्रमनर्थं विचारितं तथा मिथः परस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं प्रत्यायितश्च एवं कृत्वा किं निश्चितमित्यत आह सन्त्यक्तवासनादिति । सम्यक् परित्यक्तकामादिवासनान्मौनतस्तूष्णींभावादृतेऽधिकः पुरुषार्थो नास्तीति निश्चितमित्यर्थः ॥ ६३ ॥

एवं निर्विकल्पस्य चित्तस्य प्रारब्धकर्मणा विक्षेपे सति तत्प्रतीकारोपायः क इत्यपेक्षायामाह विक्षिप्यत इति । भोगप्रदेन प्रारब्धकर्मणा बुद्धिः कदाचिद्विक्षिप्यते चेत् तर्हि सा बुद्धिरभ्यासपाटवादभ्यासदार्ढ्यात् तदैव पुनरपि समाहिता स्यादित्यर्थः ॥ ६४ ॥

यदा चित्तविक्षेपरहितस्य ब्रह्मवित्त्वमपि औपचारिकमित्याह विक्षेपो यस्येति । पारदर्शिनः वेदान्तपारं गता इत्यर्थः ॥ ६५ ॥

दर्शनादर्शने हित्वा स्वयं केवलरूपतः ।
यस्तिष्ठति स तु ब्रह्मन् ! ब्रह्म न ब्रह्मवित् स्वयम् ॥६६॥

जीवन्मुक्तेः परा काष्ठा जीवद्वैतविवर्जनात् ।
लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्विवेचितम् ॥ ६७ ॥

इति द्वैतविवेकः समाप्तः ।

पञ्चमपरिच्छेदः ।

महावाक्यविवेकः ।

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च ।
स्वाद्वस्वादु विजानाति तत् प्रज्ञानमुदीरितम् ॥ १ ॥

अत्रापि वसिष्ठवाक्यमुदाहरति दर्शनादर्शने हित्वा इति । यो ब्रह्म जानामि न जानामि इति व्यवहारद्वयं परित्यज्य स्वयमद्वितीयचैतन्यमात्ररूपेणावतिष्ठते सः स्वयं ब्रह्म न तु ब्रह्मविदित्यर्थः ॥ ६६ ॥

सफलद्वैतविवेचनमुपसंहरति जीवन्मुक्तेः परा काष्ठा इति । यथोक्तप्रकारा जीवन्मुक्तेः परा काष्ठा निरतिशयपर्य्यवसानभूमिः जीवद्वैतस्य मनोमयप्रपञ्चस्य विवर्ज्जनात् परित्यागात् लभ्यते प्राप्यते अतः कारणादिदं जीवद्वैतमीश्वरसृष्टात् द्वैतात् विवेचितं विविच्य प्रदर्शितमित्यर्थः ॥ ६७ ॥

इति द्वैतविवेकव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः ॥

मुमुक्षोर्मोक्षसाधनब्रह्मात्मैक्यावगतिसिद्धये प्रसिद्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरूपयन् परमकृपालुराचार्य्य आदौ तावदैतरेया-

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु।
चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि॥ २॥
परिपूर्णः परात्मास्मिन् देहे विद्याधिकारिणि।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥ ३॥

ऐतरेयकगतप्रज्ञानं ब्रह्म इति महावाक्यस्थप्रज्ञानशब्दस्यार्थमाह येनेक्षते शृणोतीति। येन चक्षुर्द्वारा निर्गतान्तःकरणवृत्त्युपहितचैतन्येन इदं दर्शनयोग्यं रूपजातम् ईक्षते पश्यति पुरुषः तथा श्रोत्रद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन येन शब्दजातं शृणोति तथैव घ्राणद्वारा निर्गतान्तःकरणवृत्त्युपहितेन औपाधिकेन येन गन्धजातं जिघ्रति येन वागिन्द्रियावच्छिन्नेन व्याकरोति शब्दजातं व्याहरति येन रसनेन्द्रियद्वारा निर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादु रसौ विजानाति अनुभवतश्चयार्थं च शब्दः तथा च श्रुत्युक्तैः सकलेन्द्रियैरन्तःकरणवृत्तिभेदैरुपलक्षितं यच्चैतन्यमस्ति तदेवात्र प्रज्ञानमित्युच्यते इत्यर्थः। अनेन येन वा रूपं पश्यतीत्यादिः, सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि इत्यन्तश्रौतान्तरवाक्यसन्दर्भस्यार्थः संक्षिप्य प्रदर्शितः॥ १॥

एवं प्रज्ञानशब्दस्यार्थमभिधाय ब्रह्मशब्दस्यार्थमाह चतुर्मुखेन्द्रदेवेष्विति। उत्तमेषु देवादिषु मध्यमेषु मनुष्यादिषु अधमेषु गवाश्वादिषु वृक्षादिषु आकाशादिभूतेषु च जगज्जन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः। अनेन च एष ब्रह्मैष इन्द्र इत्यादिप्रतिष्ठेत्यन्तस्य वाक्यस्यार्थः संक्षिप्य दर्शितः। इत्थं पदार्थमभिधाय वाक्यार्थमाह अतः प्रज्ञानं ब्रह्म मय्यपीति। यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्म ततो मय्यपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानत्वाविशेषादित्यर्थः॥ २॥

एवं ऋक्शाखागतं महावाक्यार्थं निरूप्य यजुःशाखासु मध्ये बृहदारण्यकोपनिषद्गतस्य अहं ब्रह्मास्मीति महावाक्यस्यार्थाविष्करणायाहंशब्दार्थमाह परिपूर्ण इति। परिपूर्णः स्वभावतो देशकाल-

स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः ।
अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम् ॥ ४ ॥
एकमेवाद्वितीयं सत् नामरूपविवर्जितम् ।
सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्य्यते ॥ ५ ॥
श्रोतुर्देहेन्द्रियातीतं वस्त्वत्र त्वंपदेरितम् ।
एकता ग्राह्यतेऽसीति तदैक्यमनुभूयताम् ॥ ६ ॥

वस्तुभिरपरिच्छिन्नः परमात्मा अस्मिन् मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसम्पन्नत्वेन विद्यासम्पादनयोग्येऽस्मिन् श्रवणाद्यनुष्ठानवति देहे मनुष्यादिशरीरे बुद्धेर्बुद्ध्युपलक्षितस्य सूक्ष्मशरीरस्य साक्षितया अविकारित्वेनावभासकतया स्थित्वावस्थाय स्फुरन् प्रकाशमानोऽहमितीर्य्यते लक्षणया अहं पदेनोच्यत इत्यर्थः ॥ ३ ॥

ब्रह्मशब्दार्थमाह स्वतः पूर्ण इति । स्वतः परिपूर्णः स्वभावतो देशकालाद्यनवच्छिन्नः पूर्वोक्तः परमात्मा अत्रास्मिन्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्यनेन पदेन वर्णितः लक्षणयोक्त इत्यर्थः । एतद्वाक्यगतेनास्मीति पदेन पदद्वयसामानाधिकरण्यलभ्यं जीवब्रह्मणोरैक्यं परामृश्यत इत्याह अस्मीत्यैक्यपरामर्श इति । फलितमाह तेन ब्रह्म भवाम्यहमिति ॥ ४ ॥

इदानीं छान्दोग्यश्रुतिगतस्य तत्त्वमसीति वाक्यस्यार्थप्रदर्शनाय तत्पदलक्ष्यार्थमाह एकमेवाद्वितीयमिति । सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयमिति वाक्येन सृष्टेः पुरा स्वगतादिभेदशून्यं नामरूपरहितं यत् सद्वस्तु प्रतिपादितम् अस्य सद्वस्तुनोऽधुनापि सृष्ट्युत्तरकालेऽपि तादृक्त्वं विचारदृष्ट्या तथात्वं तदिति पदेनेर्य्यते उच्यते इत्यर्थः ॥ ५ ॥

त्वं पदलक्ष्यार्थमाह श्रोतुर्देहेन्द्रियातीतं वस्त्वत्रेति । श्रोतुः श्रवणाद्यनुष्ठानेन वाक्यार्थप्रतिपत्तुर्देहेन्द्रियातीतं देहेन्द्रियोपलक्षितं

स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतम् ।
अहङ्कारादिदेहान्तात् प्रत्यगात्मेति गीयते ॥ ७ ॥
दृश्यमानस्य सर्व्वस्य जगतस्तत्त्वमीर्य्यते ।
ब्रह्मशब्देन तद् ब्रह्म स्वप्रकाशात्मरूपकम् ॥ ८ ॥

इति महावाक्यविवेकः समाप्तः ।

स्थूलादिशरीरत्रयसाक्षितया तद्विलक्षणं सद्वस्तु तदेव त्वं पदेरितं वाक्यगतेन त्वमिति पदेन कथितमित्यर्थः । एतद्वाक्यस्थेन असीतिपदेन तत्त्वं पदसामानाधिकरण्यलब्धं जीवपरैक्यं विस्पष्टं प्रत्याय्यते इत्याह एकता ग्राह्यतेऽसीति । सिद्धमर्थमाह तदैक्यमनुभूयतामिति । तयो-स्तत्त्वं पदार्थयोरैक्यं प्रमाणसिद्धमेकत्वमनुभूयतां मुमुक्षुभिरित्यर्थः ॥ ६ ॥

क्रमप्राप्तस्याथर्वणवेदगतस्य अयमात्मा ब्रह्मेति वाक्यस्यार्थं व्याचिख्यासुरादावयमात्मेति पदद्वयविवक्षितमर्थं क्रमेण दर्शयति स्वप्रकाशापरोक्षत्वमिति । अयमित्युक्तितोऽयमिति शब्देन स्वप्रकाशापरोक्षत्वं स्वयं प्रकाशत्वेनापरोक्षत्वं मतमभिमतम् अत्रशादित्वनित्यपरोक्षत्वं घटादिवत् स्वत्वस्य व्यावर्त्तयितुं विशेषणद्वयमिति बोद्धव्यम् । देहादिष्वप्यात्मशब्दप्रयोगदर्शनात् अत्रात्मशब्देन किं विवक्षितमित्याकाङ्क्षायामाह अहङ्कारादीति । अहङ्कार आदिर्यस्य प्राणमन इन्द्रियदेहस्य तस्य योऽहङ्कारादिः तथा देहोऽन्तो यस्य तस्य संघातस्य स देहान्तः अहङ्कारादिश्चासौ देहान्तश्चेति तथा तस्मात् प्रत्यगधिष्ठानतया साक्षितया च आन्तर आत्मेति गीयते अस्मिन् वाक्ये इत्यर्थः ॥ ७ ॥

आकाशवाय्वादिष्वपि ब्रह्मशब्दस्य प्रयोगदर्शनात् तद्व्यावर्त्तनायाम विवक्षितमर्थमाह दृश्यमानस्येति । दृश्यत्वेन मिथ्याभूतस्य सर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतया तद्बाधावधित्वेन च पारमार्थिकं सच्चिदानन्दलक्षणं वस्तु यदस्ति तत् ब्रह्मशब्देनेर्यते इत्यर्थः । वाक्यार्थमाह

षष्ठपरिच्छेदः ।

चित्रदीपः ।

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम् ।
परमात्मनि विज्ञेयं तथावस्थाचतुष्टयम् ॥ १ ॥
यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
चिदन्तर्य्यामि सूत्राणि विराट् चात्मा तथेर्य्यते ॥ २ ॥

तत्त्वमिति । तदुक्तलक्षणं ब्रह्म स्वप्रकाशात्मा रूपं स्वरूपं यस्य तत् स्वप्रकाशात्मरूपकं स एवेत्यर्थः ॥ ८ ॥

इति महावाक्यविवेकव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते चित्रदीपस्य व्याख्या तात्पर्य्यबोधिनी ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति परेणेष्टदेवतातत्त्वानुसन्धानलक्षणं मङ्गलमाचरन् अस्य ग्रन्थस्य वेदान्तप्रकरणत्वात् तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधाय अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टान्तं प्रतिजानीते यथा चित्रपटे इति । चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्टयं तथैव परमात्मन्यपि वक्ष्यमाणमवस्थाचतुष्टयं ज्ञेयमिति ॥ १ ॥

किन्तदित्याकाङ्क्षायां दृष्टान्तदार्ष्टान्तिकयोरुभयोरप्यवस्थाचतुष्टयं क्रमेणोदाहरति यथा धौत इति । धौतो घट्टितो लाञ्छितो रञ्जित

स्वतः शुभ्रोऽत्र धौतः स्यात् घट्टितोऽन्न विलेपनात् ।
मस्याकारैर्लाञ्छितः स्यात् रञ्जितो वर्णपूरणात् ॥ ३ ॥
स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः ।
सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः ॥ ४ ॥
ब्रह्माद्याःस्तम्बपर्य्यन्ताः प्राणिनोऽत्र जड़ा अपि ।
उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् ॥ ५ ॥
चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक् ।
चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः ॥ ६ ॥

एवं चत्वारोऽवस्थाः यथा चित्रपटे उपलभ्यन्ते तथा परमात्मन्यपि चिदन्तर्यामी सूत्रात्मा विराट् च इत्यवस्थाचतुष्टयं बोद्धव्यमित्यर्थः ॥ २ ॥

इदानीमुक्तानामवस्थानां स्वरूपं क्रमेण व्युत्पादयति स्वतः शुभ्र इति । आसामवस्थानां मध्ये स्वतो द्रव्यान्तरसम्बन्धं विना शुभ्रो धौत इत्युच्यते अन्नेन लिप्तो घट्टितः मषीमयैराकारैर्युक्तो लाञ्छितः यथायोग्यवर्णैः पूरितो रञ्जितः स्यात् ॥ ३ ॥

दार्ष्टान्तिके ताः व्युत्पादयति स्वतश्चिदन्तर्यामीत्विति । परः परमात्मा स्वतः मायातत्कार्य्यरहितश्चिदित्युच्यते मायायोगादन्तर्यामी अपञ्चीकृतभूतकार्य्यसमष्टिसूक्ष्मशरीरयोगात् सूत्रात्मा पञ्चीकृतभूतकार्य्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ॥ ४ ॥

ननु परमात्मनः चित्रपटस्थानीयत्वे तदर्पितानि चित्राणि कानीत्याह ब्रह्माद्या इति । अत्र परमात्मनि उत्तमाधमभावेन वर्त्तमानं ब्रह्मादिस्तम्बपर्य्यन्तं चेतनात्मकं गिरिनद्यादिजड़जातञ्च चित्रस्थानीयमित्यर्थः ॥ ५ ॥

ब्रह्मादिष्वचेतनत्वे कारणं वक्तुं दृष्टान्तमाह चित्रार्पित-

पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनाम् ।
कल्प्यन्ते जीवनामानो बहुधा संसरन्त्यमी ॥ ७ ॥
वस्त्राभासस्थितान् वर्णान् यद्वदाधारवस्त्रगान् ।
वदन्त्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः ॥ ८ ॥
चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते ।
सृष्टिस्थमृत्तिकादीनां चिदाभासास्तथा न हि ॥ ९ ॥
संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि ।
इति भ्रान्तिरविद्या स्यात् विद्ययैषा निवर्त्तते ॥ १० ॥

मनुष्याणामिति । यथा चित्रलिखितानां मनुष्यादिशरीराणामेव नानावर्णोपेता वस्त्रविशेषा लिख्यन्ते ते च शीतार्त्तिनिवारकत्वात् वस्त्राभासा एव ॥ ६ ॥

दार्ष्टान्तिकमाह पृथक् पृथगिति । एवं परमात्मन्यारोपितानां देवादीनां शरीराणामेव जीवनामानश्चिदाभासाः प्रत्येकं कल्प्यन्ते न पर्वतादीनाम् । तेषां तत्कल्पने कारणमाह बहुधेति । अमी जीवाः देवतिर्य्यङ्मनुष्यादिशरीरप्राप्त्या बहुधा संसरन्ति न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः ॥ ७ ॥

ननु सर्वे वादिनो लौकिकात्मन एव संसार इति वदन्ति तत्र किं कारणमित्याशङ्क्याज्ञानमेव कारणमिति सदृष्टान्तमाह वस्त्राभासस्थितानिति स्पष्टम् ॥ ८ ॥

गिरिमृदादीनान्तु चिदाभासकल्पनाभावं दृष्टान्तपुरःसरमाह चित्रस्थपर्वतादीनामिति । प्रयोजनाभावादिति भावः ॥ ९ ॥

एवमात्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्त्यत्वसिद्धये तन्मूलभूतामविद्यामाह संसार इति ॥ १० ॥

आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ।
इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात् ॥ ११ ॥
सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ।
जीवभावजगद्भावबाधे स्वात्मैव शिष्यते ॥ १२ ॥
नाप्रतीतिस्तयोर्बाधः किन्तु मिथ्यात्वनिश्चयः ।
नो चेत् सुषुप्तिमूर्च्छादौ मुच्येतायत्नतो जनः ॥ १३ ॥
परमात्मावशेषोऽपि तत् सत्यत्वविनिश्चयः ।
न जगद् विस्मृतिर्नो चेत् जीवन्मुक्तिर्न सम्भवेत् ॥ १४ ॥
परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा ।
तत्रापरोक्ष विद्याप्तौ विचारोऽयं समाप्यते ॥ १५ ॥

केयं विद्या तल्लाभोपायश्च क इत्याकाङ्क्षायां विद्यास्वरूपं तल्लाभोपायञ्च दर्शयति आत्माभासस्येति । चिदाभासस्येत्यर्थः ॥ ११ ॥

विचाराल्लभ्यते विद्या इत्युक्तं कस्य विचारादित्याशङ्क्याह सदा विचारयेदिति । ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्विचारः क्वोपयुज्यते इत्याशङ्क्य तयोरपवादेन परमात्मावशेषत्वे उपयुज्यत इत्याह जीवभावेति ॥ १२ ॥

ननु विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येत इत्याशङ्क्य बाधशब्दस्य विवक्षितमर्थं विवेचयन्नाह नाप्रतीति-स्तयोर्बाध इति । सुषुप्तिमूर्च्छादौ स्वत एव द्वैतप्रतीत्यभावात् तत्त्वज्ञानं विनापि मुक्तः स्यादित्यर्थः ॥ १३ ॥

आत्मैव शिष्यत इत्यनेनापि परमात्मनः सत्यत्वज्ञानं विवक्ष्यते न तद्व्यतिरिक्तजगद्विस्मृतिः जीवन्मुक्त्यभावप्रसङ्गात् इत्याह परमात्मा-वशेषोऽपीति ॥ १४ ॥

सदा विचारयेदित्युक्त्या देहपातपर्यन्तं विचारप्रसक्तौ सत्यां तदवधिमाह परोक्षा चेति ॥ १५ ॥

अस्ति ब्रह्मेति चेत् वेद परोक्षज्ञानमेव तत् ।
अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ १६ ॥

तत् साक्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते ।
येनायं सर्वसंसारात् सद्य एव विमुच्यते ॥ १७ ॥

कूटस्थो ब्रह्मजीवेशावित्येवं चिच्चतुर्विधा ।
घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ॥ १८ ॥

घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः ।
साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते ॥ १९ ॥

महाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते ।
प्रतिबिम्बतया तत्र मेघाकाशो जले स्थितः ॥ २० ॥

विचारजन्या विद्या परोक्षत्वापरोक्षत्वभेदेन द्विधेत्युक्तम् । तयोरुभयोः स्वरूपं क्रमेण दर्शयति अस्तीति ॥ १६ ॥

एवंविधात्मसाक्षात्कारासाधारणकारणमात्मतत्त्वविवेचनं प्रतिजानीते तत्साक्षात्कारेति । येन साक्षात्कारेण पुमान् सद्य एव विमुच्यते तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः ॥ १७ ॥

चिदात्मनः पारमार्थिकमेकत्वं सिद्धेतु व्यवहारदशायां प्रतीयमानं चैतन्यभेदमुपदिशति कूटस्थ इति । एकस्याश्चितेश्चातुर्विध्ये दृष्टान्तमाह घटाकाशेति ॥ १८ ॥

घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य महाकाशस्य च प्रसिद्धत्वात् तौ विहाय अप्रसिद्धं जलाकाशं व्युत्पादयति घटावच्छिन्नेति । घटावच्छिन्ने आकाशे यदुदकमस्ति तत्र जले प्रतिबिम्बितोऽभ्रनक्षत्रसहित आकाशो जलाकाश इत्युच्यते ॥ १९ ॥

अभ्राकाशं व्युत्पादयति महाकाशस्येति । तत्र मेघमण्डले यज्जलं तस्मिन्नित्यर्थः ॥ २० ॥

मेघांशरूपमुदकं तुषाराकारसंस्थितम् ।
तत्र खप्रतिबिम्बोऽयं नीरत्वादनुमीयते ॥ २१ ॥
अधिष्ठानतया देहद्वयावच्छिन्नचेतनः ।
कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ॥ २२ ॥
कूटस्थे कल्पिता बुद्धिस्तत्र चित् प्रतिबिम्बकः ।
प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥ २३ ॥
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः ।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते ॥ २४ ॥

ननु मेघे जलस्याप्रतीयमानत्वात् नभसस्तत्र कथं प्रतिबिम्बितत्वज्ञानमित्याशङ्क्याह मेघांशरूपमिति । मेघस्थस्य जलस्य प्रत्यक्षेणानुपलम्भेऽपि वृष्ट्याख्यकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीति अनुमीयते उदकत्वेनैव लिङ्गेन विमतं जलम् आकाशप्रतिबिम्बवत् भवितुमर्हति जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपे जलेऽप्याकाशप्रतिबिम्बसद्भावोऽवगम्यते इत्यर्थः ॥ २१ ॥

एवं दृष्टान्तभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टान्तिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति अधिष्ठानतयेति । पञ्चीकृतापञ्चीकृतभूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्त्तमानत्वेन ताभ्यामवच्छिन्न आत्मा कूटस्थ इत्युच्यते । तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह कूटवदिति ॥ २२ ॥

एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे कल्पितबुद्धिप्रतिबिम्बितत्वेन तदनुप्राणितत्वात् तं व्युत्पादयति कूटस्थ इति । तस्य जीवशब्दाभिधेयत्वे निमित्तमाह प्राणानामिति । कूटस्थातिरिक्तजीवकल्पनप्रयोजनमित्याशङ्क्य अविकारिणः कूटस्थस्य संसाराभावात् तन्निर्वाहार्थं सोऽङ्गीकर्त्तव्य इत्याह संसारेणेति ॥ २३ ॥

ननु जीवातिरिक्तकूटस्थोऽस्ति चेत् किमिति न प्रतिभासते इत्या-

अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम् ॥ २५ ॥
विक्षेपावृतिरूपाभ्यां द्विधाविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः ॥ २६ ॥
अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि ॥ २७ ॥
स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः।
इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ ॥ २८ ॥

शङ्क्य जीवेन तिरोहितत्वात् इति सदृष्टान्तमाह जलव्योम्नेति। नन्वेतत् तिरोधानं न क्वापि शास्त्रे प्रतिपादितमित्याशङ्क्य तस्यान्योऽन्याध्यासशब्देनाभिधानात् नैवमित्याह सोऽन्योऽन्याध्यास इति। भाष्यादिष्विति शेषः ॥ २४ ॥

नन्वयमेवाध्यासश्चेदस्य कारणरूपाविद्या वक्तव्या इत्याशङ्क्य जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविद्येत्याह अयमिति स्पष्टम् ॥ २५ ॥

पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वस्पष्टीकरणाय अविद्यां विभजते विक्षेपावृतिरूपाभ्यामिति। विक्षेपस्य हेतुत्वेनाभ्यर्हितत्वात् आवृतिं प्रथमं लक्षयति न भातीति। कूटस्थो न भाति न प्रकाशते नास्ति चेति व्यवहारहेतुरावरणमित्यर्थः ॥ २६ ॥

नन्वविद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशङ्क्य लोकानुभव एवेत्याह अज्ञानीति। विदुषा कूटस्थं किं जानासीति पृष्टः अज्ञानी न जानामीति अज्ञानमनुभूय वक्ति अयमविद्यानुभवः न केवलमज्ञानानुभवमेव वक्ति अपि तु नास्ति न भाति कूटस्थ इति कूटस्थाभावाभाने च अनुभूय वदति अयमावरणानुभवः अत उभयत्रानुभवः प्रमाणमिति भावः ॥ २७ ॥

ननु भवन्मते आत्मनः स्वप्रकाशत्वात् तस्मिन्नविद्या नोपपद्यते

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः ।
कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् ॥ २९ ॥
बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति ।
स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम् ॥ ३० ॥
स्वानुभूतिरविद्यायामावृतौ च प्रदर्शिता ।
अतः कूटस्थचैतन्यमविरोधीति तर्क्यताम् ॥ ३१ ॥
तच्चेद्विरोधि केनेयमावृतिर्ह्यनुभूयताम् ।
विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यताम् ॥ ३२ ॥

धर्मधर्मिणोरिव विरुद्धस्वभावत्वेन तयोः सम्बन्धानुपपत्तेः अविद्या-भावे च तत्कृततमआवरणस्य दुर्निरूप्यं स्यात् तदभावे च तत्कृतकस्य विक्षेपस्याप्यभावः विक्षेपाभावे च भावनिवर्तकस्यान्वेष्टव्याभावात् शास्त्र-वैयर्थ्यं तत्तत्प्रतिपादकशास्त्रमप्रमाणं स्यात् इत्याशङ्क्य एतत् सर्वं पूर्वोक्तानुभवबाधितमित्याह अप्रह्नाय इति । न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः ॥ २८ ॥

अननुभवस्य शुष्कतर्कविरोधेनाभावत्वात् न तेन तत्त्वनिश्चय इत्या-शङ्क्य अनुभवस्याभासत्वाभ्युपगमे केवलतर्कस्यानिश्चायकत्वस्य चोक्तत्वाभ्यु-पगतत्वात् न तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह स्वानुभूता-विति ॥ २९ ॥

ननु वस्त्वनुभवकारणत्वनिश्चायक एव तथाप्यनुभवगानस्य अर्थस्य बुद्ध्यारोहणाय तर्कोऽप्यपेक्षित इत्याशङ्क्याभ्युपेत्य तर्ह्यनुभवानु-सारेण तर्को वर्णनीयो न तद्विरोधेन इत्याह बुद्ध्यारोहायेति ॥ ३० ॥

कोऽसावनुभवो यदनुकूलतर्को वर्णनीय इत्याशङ्क्यायां पूर्वोक्त-मविद्यादिगोचरमनुभवं स्मारयति स्वानुभूतिरिति । फलितमाह अतः कूटस्थचैतन्यमिति ॥ ३१ ॥

तमेव तर्कप्रकारं दर्शयति तच्चेद्विरोधीति । अविद्यावरण-

अविद्यावृतकूटस्थे देहद्वययुता चितिः ।
शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ॥ २३ ॥
इदमंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते ।
स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगम् ॥ २४ ॥
नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितम् ।
असङ्गानन्दताद्येवं कूटस्थेऽपि तिरोहितम् ॥ २५ ॥
आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा ।
कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ॥ २६ ॥

साधकचैतन्यस्यैव तद्विरोधित्वे अविद्याप्रतीतिरेव न स्यादिति भावः तर्ह्यविद्यायाः को विरोधीत्यत आह विवेकस्त्विति । विवेक उपनिषद्विचारजन्यं ज्ञानम् । विवेकस्याविद्याविरोधित्वं क्व दृष्टमित्यत आह तत्त्वज्ञानिनीति ॥ २२ ॥

एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह अविद्यावृतेति । पूर्वोक्ताविद्यावरणवति कूटस्थे प्रत्यगात्मनि आरोपितस्थूलसूक्ष्मशरीरसहितचिदाभासो विक्षेपाध्यास इत्यर्थः ॥ २२ ॥

अथ विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्याससाम्यं दर्शयति इदमंशस्येति । शुक्तिकायां स्थितं पुरोदेशादिसम्बन्धित्वमबाध्यत्वञ्च यथारोपिते रजते भासते एवं स्वयंत्वं वस्तुत्वञ्च कूटस्थनिष्ठमारोपिते चिदाभासेऽवभासत इत्यर्थः ॥ २४ ॥

एवं सामान्यांशप्रतीतिसाम्यं प्रदर्श्य विशेषांशाप्रतीतिसाम्यं दर्शयति नीलपृष्ठत्रिकोणत्वमिति ॥ २५ ॥

साम्यान्तरं दर्शयति आरोपितस्येति । दृष्टान्ते शुक्तिस्थले आरोपितपदार्थस्य रूप्यं नाम यथा एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्य पूर्वोक्तस्याहमिति नामेत्यर्थः ॥ २६ ॥

इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते ।
तथा स्वञ्च स्वतः पश्यन्नहमित्यभिमन्यते ॥ ३७ ॥
इदन्त्वरूप्यते भिन्ने स्वत्वाहन्ते तथेक्षताम् ।
सामान्यञ्च विशेषश्चेत्युभयत्रापि गम्यते ॥ ३८ ॥
देवदत्तः स्वयं गच्छेत् त्वं वीक्षस्व स्वयन्तथा ।
अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ॥ ३९ ॥
इदं रूप्यमिदं वस्त्रमिति यद्वदिदन्तथा ।
असौ त्वमहमित्येषु स्वयमित्यभिमन्यते ॥ ४० ॥

ननु दृष्टान्ते पुरोवर्तिनि शुक्तिसकले इन्द्रियसंप्रयोगे जाते सति रूप्यमिदमिति तदतिरिक्तरजताभिमानः उपपद्यते नैवं दार्ष्टान्तिके चिदात्मातिरिक्ताहन्त्वाभिमानम् इत्याशङ्क्य अत्रापि स्वप्रकाशतया चिदात्मन्यवभासमाने तदतिरिक्ताहमित्यभिमान उपलभ्यते अतो न वैषम्यमित्यभिप्रायेणाह इदमंशमिति ॥ ३७ ॥

ननु स्वयमहंशब्दयोरैकार्थ्यात् कथं दृष्टान्तदार्ष्टान्तिकयोः साम्यमित्याशङ्क्य इदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपोभयत्र साम्यमेवेत्याह इदन्त्वरूप्यते भिन्ने इति ॥ ३८ ॥

स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकप्रयोगं दर्शयति देवदत्त इति ॥ ३९ ॥

अस्मिन् प्रयोगे लोके कथमेतावता स्वयंशब्दार्थस्य सामान्यरूपत्वमित्याशङ्क्य इदं शब्दार्थवदित्याह इदं रूप्यमिति । यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात् तदर्थस्य सामान्यरूपत्वं तथाऽसौ त्वमहमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात् तदर्थस्यापि सामान्यरूपत्वमवगन्तव्यमित्यर्थः ॥ ४० ॥

अहन्त्वात् भिद्यतां स्वत्वं कूटस्थे तेन किं तव।
स्वयं शब्दार्थ एवैष कूटस्थ इति मे भवेत्॥ ४१॥
अन्यत्ववारकं स्वत्वमिति चेदन्यवारणम्।
कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद् भवेत्॥ ४२॥
स्वयमात्मेति पर्य्यायस्तेन लोके तयोः सह।
प्रयोगो नास्त्यतः स्वत्वमात्मत्वञ्चान्यवारकम्॥ ४२॥
घटः स्वयं न जानातीत्येवं स्वत्वं घटादिषु।
अचेतनेषु दृष्टञ्चेद् दृश्यतामात्मसत्त्वतः॥ ४४॥

भवतु स्वयमहंशब्दार्थयोर्लोके भेदः एतावता कूटस्थात्मनि किमायातमिति पृच्छति अहन्त्वादिति। सामान्यरूपः स्वयंशब्दार्थ एव कूटस्थ इतीदमायातमित्याह स्वयंशब्दार्थ इति॥ ४१॥

ननु स्वत्वरूपो धर्मोऽन्यत्वं निवारयति न कूटस्थं बोधयतीति शङ्कते अन्यत्ववारकमिति। स्वयंशब्दार्थस्य कूटस्थस्यैवात्मत्वात् स्वत्वेनान्यत्ववारणमिष्टमेवेति परिहरति अन्यवारणं कूटस्थस्येति॥ ४२॥

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवार्थैक्याभावात् कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमित्याशङ्क्य हस्तकरादिशब्दवदेकार्थत्वोपपत्तेर्नैवमिति परिहरति स्वयमात्मेति पर्य्याय इति। पर्य्यायत्वे सहप्रयोगाभावहेतुमाह तेन लोक इति। फलितमाह अतः स्वत्वमिति॥ ४२॥

ननु घटादिष्वचेतनेष्वपि स्वयंशब्दस्य प्रयोगदर्शनात् स्वयन्त्वात्मत्वयोरेकत्वं न घटत इति शङ्कते घटं स्वयमिति। घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्त्वात् तेष्वपि स्वयंशब्दस्य प्रयोगो न विरुध्यत इत्याह दृश्यतामिति॥ ४४॥

चेतनाचेतनभिदा कूटस्थात्मकृता न हि ।
किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम् ॥ ४५ ॥
यथा चेतन आभासः कूटस्थे भ्रान्तिकल्पितः ।
अचेतनो घटादिश्च तथा तत्रैव कल्पितः ॥ ४६ ॥
तत्त्वेदन्ते अपि स्वत्वमिव त्वमहमादिषु ।
सर्वत्रानुगते तेन तयोरप्यात्मतेति चेत् ॥ ४७ ॥
ते आत्मत्वेऽप्यनुगते तत्त्वेदन्ते ततस्तयोः ।
आत्मत्वं नैव सम्भाव्यं सम्यक्त्वादेर्यथा तथा ॥ ४८ ॥

ननु घटादिष्वपि आत्मचैतन्यसत्त्वे चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशङ्क्य चिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावात् सनिमित्त एवेत्याह चेतनाचेतनभिदेति ॥ ४५ ॥

ननु चेतने बुद्ध्यादावाभासस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमेऽचेतनत्वाभ्युपगमो निष्प्रयोजनः स्यादित्याशङ्क्य चेतनाचेतनविभागं प्रदर्श्य कूटस्थानभ्युपगमत्वं ऽप्यचेतनयत्नानां ... कूटस्थोऽभ्युपगन्तव्य इत्यभिप्रायेण घटादिस्तत्र कल्पितत्वे दृष्टान्तमाह यथा चेतन आभास इति ॥ ४६ ॥

आत्मत्वयोरेकत्वं शङ्कते तत्त्वेदन्ते अपीति । त्वमहमादिषु सर्वत्रानुगतस्य स्वत्वस्य सर्वत्रानुगतत्वात् तत्त्वेदन्तयोरप्यात्मत्वप्रसक्तिः किं न स्यादिति भावः ॥ ४७ ॥

तत्त्वेदन्तयोरात्मत्वापत्तिं परिहरन् आत्मत्वं न सम्भवतीत्याह ते आत्मत्वेऽपीति । तत्त्वेदन्ते स्वत्वमिव यद्यपि त्वमहमादिषु अनुगते तथापि तैरनुवर्तमाने आत्मत्वेऽप्यनुगते तदात्मत्वमिदमात्मत्वमित्यादि-व्यवहाराभावात् आत्मत्वयोरात्मत्वादर्शनात् तदात्मरूपता न सम्भाव्यते । तत्र दृष्टान्तः सम्यक्त्वादेरिति । आत्मत्व सम्यक्त्वमहत्त्व-

तत्त्वेदन्ते स्वतान्यत्वे त्वन्ताहन्ते परस्परम्।
प्रतिद्वन्द्वितया लोके प्रसिद्धे नास्ति संशयः॥ ४९॥
अन्यतायाः प्रतिद्वन्द्वी स्वयं कूटस्थ इष्यताम्।
त्वन्तायाः प्रतियोग्येषोऽहमित्यात्मनि कल्पितः॥ ५०॥
अहन्तास्वत्वयोर्भेदे रूप्यतदन्तयोरिव।
स्पष्टेऽपि मोहमापन्ना एकत्वं प्रतिपेदिरे॥ ५१॥
तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः।
अविद्यायां निवृत्तायां तत्कार्यं विनिवर्त्तते॥ ५२॥

मिति व्यवहारवशादात्मन्यप्यनुवर्त्तमानयोः सम्यक्त्वासम्यक्त्वयोरित्यर्थः॥ ४८॥

एवं प्रासङ्गिकं परिसमाप्य फलितप्रदर्शनाय लोकव्यवहारसिद्धार्थमनुवदति तत्त्वेदन्ते इति। तत्त्वप्रतियोगित्वम् इदन्तायास्तदिदमिति स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति त्वन्ताप्रतियोगित्वमहन्तायास्त्वमहमिति लोके प्रतिद्वन्द्वित्वेन प्रयोगदर्शनात् प्रसिद्धमिति भावः॥ ४९॥

भवत्वेवं लोके प्रकृते किमायातमित्यत आह अन्यताया इति। अन्यत्वप्रतियोगी स्वयंशब्दार्थः कूटस्थः त्वन्ताप्रतियोग्यहंशब्दार्थश्चिदाभासः कूटस्थे कल्पित इत्यर्थः॥ ५०॥

नन्वुक्तप्रकारेण जीवकूटस्थयोर्भेदे सत्यपि सर्वे इत्थं किमिति न जानन्तीत्याशङ्क्याह अहन्तास्वत्वयोर्भेद इति। बुद्धिसाक्षिणः कूटस्थस्य बुद्ध्या प्रत्यक्षीकर्तुमशक्यत्वादहं स्वयमिति प्रतिभासमानयोर्जीवकूटस्थयोर्भ्रान्त्यैकत्वं प्रतिपन्ना इत्यर्थः॥ ५१॥

नन्वस्य जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह तादात्म्येति। अत्रास्मिन् पक्षेऽनादिरविवेकोऽयमित्युक्तयाऽविद्ययेत्यर्थः। यतोऽविद्याकार्यत्वमध्यासस्य अतोऽविद्यानिवर्त्तकतत्त्वज्ञानेनैव तन्निवृत्तिरित्यत आह अविद्यायामिति॥ ५२॥

अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः ।
विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥ ५३ ॥
उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्ष्यते ।
इत्याहुस्तार्किकास्तद्वदस्माकं किं न सम्भवेत् ॥ ५४ ॥
तन्तूनां दिनसंख्यानां तैस्तादृक् क्षण ईरितः ।
भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यताम् ॥ ५५ ॥
विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते ।
श्रुतियुक्त्यनुभूतिभ्यो वदतां किन्नु दुःशकम् ॥ ५६ ॥

नन्वध्यासस्याविद्याकार्यत्वात् तन्निवृत्त्या निवृत्तिरित्येतदनुपपन्नं ब्रह्मात्मैकत्वविद्यायामुत्पन्नायामविद्याकार्यस्य देहादेरप्युपलभ्यमानत्वात् इत्यत आह अविद्यावृतितादात्म्य इति। अविद्यैककारणयोरावृतितादात्म्ययोर्विद्ययैव निवृत्तिः कर्मसहिताविद्याजन्यस्य तु विक्षेपस्वरूपस्य कर्मावसानपर्य्यन्तमवस्थानमित्यविरोध इति भावः ॥ ५३ ॥

ननु प्रारब्धकर्मणो निमित्तमात्रत्वात् तत्सद्भावमात्रेण उपादाने विनष्टेऽपि कथं कार्य्यानुवृत्तिरित्याशङ्क्य शास्त्रान्तरसिद्धदृष्टान्तेन तदनुवृत्तिं सम्भावयति उपादाने विनष्टेऽपीति ॥ ५४ ॥

ननु तार्किकैः क्षणमात्रं कार्य्यस्यावस्थानमङ्गीकृतं न चिरकालमित्याशङ्क्याह तन्तूनामिति। संसारस्यानादिकालमारभ्यानुवृत्तत्वात् तत्संस्कारवशेन कुलालचक्रभ्रमिवच्चिरकालानुवृत्तिर्न विरुध्यत इति भावः ॥ ५५ ॥

ननु तार्किकैर्यथा अयुक्तमभिहितं तद्वद् भवतापि इत्याशङ्क्योक्तौ ततो वैषम्यं दर्शयति विना क्षोदक्षममिति। क्षोदक्षमं विचारसहं मानं विना प्रमाणमन्तरेणेत्यर्थः। तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये इति श्रुतिः कुलालचक्रादिदृष्टान्तो युक्तिः। अनुभूतिर्विद्वदनुभवः एताभ्यः प्रमाणेभ्यः किं नु अशक्यमित्यभिप्रायः ॥ ५६ ॥

आस्तां दुस्तार्किकैः सार्द्धं विवादः प्रकृतं ब्रुवे ।
स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥ ५७ ॥
भ्राम्यन्ते पण्डितम्मन्याः सर्वे लौकिकतार्किकाः ।
अनादृत्य श्रुतिं मौर्ख्यात् केवलां युक्तिमाश्रिताः ॥ ५८ ॥
पूर्व्वापरपरामर्शविकलास्तत्र केचन ।
वाक्याभासान् स्वस्वपक्षे योजयन्त्यप्यलज्जया ॥ ५९ ॥
कूटस्थादिशरीरान्तसंघातस्यात्मतां जगुः ।
लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ॥ ६० ॥
श्रौतीकर्त्तुं स्वपक्षन्ते कोषमन्नमयन्तथा ।
विरोचनस्य सिद्धान्तं प्रमाणं प्रतिजज्ञिरे ॥ ६१ ॥

प्रकृतमनुसरति आस्तामिति । स्वअहंशब्दार्थयोः कूटस्थपरिणामिनोः एकत्वं भ्रान्त्या सिद्धम् ॥ ५७ ॥

ननु कूटस्थजीवयोरेकत्वं भ्रान्तिसिद्धञ्चेत् इदं भ्रान्तमिति केऽपि कुतो न जानन्तीत्याशङ्क्य श्रुतितात्पर्य्यपर्य्यालोचनशून्यत्वादित्याह भ्राम्यन्ते पण्डितम्मन्या इति ॥ ५८ ॥

ननु श्रुत्यर्थापलापकारोऽपि कैश्चिदित्थं कुतो न जानन्तीत्याशङ्क्य तेषां साकल्येन श्रुत्यर्थपर्य्यालोचनाभावात् इत्याह पूर्वापरपरामर्शविकला इति ॥ ५९ ॥

तत्र तावत् प्रत्यक्षैकप्रमाणाभ्युपगमेनातिस्थूलत्वात् लोकायतादिपक्षं प्रथमतोऽनुभाषते कूटस्थादीति । प्रत्यक्षसिद्धत्वे देहादेरात्मत्वं पारमार्थिकं स्यादित्याशङ्क्य उक्तं प्रत्यक्षाभासमिति ॥ ६० ॥

ते प्रत्यक्षैकप्रमाणवादिनोऽपि परव्यामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरन्तीत्याह श्रौतीकर्त्तुमिति । कोषमन्नमयमिति शब्देनान्नमयकोषप्रतिपादकं स वा एष पुरुषोऽन्नरसमय इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धान्तमिति तत्सिद्धान्तप्रतिपादकं

जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात् ।
देहातिरिक्त एवात्मेत्याहुर्लौकायताः परे ॥ ६२ ॥
प्रत्यक्त्वेनाभिमताहन्धीर्देहातिरेकिणम् ।
गमयेदिन्द्रियात्मानं वच्मीत्यादिप्रयोगतः ॥ ६३ ॥
वागादीनामिन्द्रियाणां कलहः श्रुतिषु श्रुतः ।
तेन चैतन्यमेतेषामात्मत्वं तत एव हि ॥ ६४ ॥
हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे ।
चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति ॥ ६५ ॥
प्राणो जागर्त्ति सुप्तेषु प्राणश्रैष्ठ्यादिकं श्रुतम् ।
कोषः प्राणमयः सम्यक् विस्तरेण प्रपञ्चितः ॥ ६६ ॥

आत्मेत्यादिवाक्यं अस्यते एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानते एव न तूपपादयितुं क्षमाः प्रकरणविरोधादिति भावः ॥ ६१ ॥

अस्मिन् मते दोषप्रदर्शनपुरःसरं मतान्तरमुत्थापयति जीवात्मनिर्गम इति ॥ ६२ ॥

कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यते इत्याकाङ्क्षायामाह प्रत्यक्त्वेनेति अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनात् देहातिरिक्ताहंबुद्धिगम्यानीन्द्रियाण्यात्मेत्यर्थः ॥ ६३ ॥

ननु इन्द्रियाणामचेतनानां कथमात्मत्वमित्याशङ्क्य श्रुतिष्विन्द्रियसंवादश्रवणाच्चेतनत्वमवगम्यत इत्याह वागादीनामिति । चेतनत्वस्यैवात्मलक्षणत्वात् चेतनानामिन्द्रियाणामात्मत्वमुचितमित्याह आत्मत्वं तत एवेति ॥ ६४ ॥

मतान्तरमुत्थापयति हैरण्यगर्भा इति ॥ ६५ ॥

प्राणस्यात्मत्वे श्रौतलिङ्गानि दर्शयति प्राणो जागर्त्तीति । प्राणाग्नय एवैतस्मिन् पुरे जाग्रतीत्यादिना प्राणजागरणं श्रूयते तद्प्राणे

मन आत्मेति मन्यन्त उपासनपरा जनाः।
प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः॥ ६७॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
श्रुतौ मनोमयः कोषस्तेनात्मेतीरितं मनः॥ ६८॥
विज्ञानमात्मेति पर आहुः क्षणिकवादिनः।
यतोविज्ञानमूलत्वं मनसो गम्यते स्फुटम्॥ ६९॥
अहं वृत्तिरिदं वृत्तिरित्यन्तःकरणं द्विधा।
विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत्॥ ७०॥
अहंप्रत्ययवीजत्वमिदंवृत्तेरतिस्फुटम्।
अविदित्वा स्वमात्मानं वाह्यं वेद न तु क्वचित्॥ ७१॥

प्रयत्ने तत उदतिष्ठत् तदुक्थमभवत् तदेतदुक्थमिति प्राणमैत्र्यादिकं श्रूयते अन्योऽन्तर आत्मा प्राणमय इत्यादिना प्राणमयः कोषः प्रपञ्चितः आदिशब्देन प्राणसंवादप्रवेशादिकं ग्राह्यम्॥ ६६॥

प्राणादप्यान्तरस्य मनस आत्मत्ववादिनो मतं दर्शयति मन आत्मेतीति। प्राणस्यानात्मत्वे युक्तिमाह प्राणस्याभोक्तृतेति॥ ६७॥

मनस आत्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह मन एवेति। तस्माद्वा एतस्मात् प्राणमयादन्योऽन्तर आत्मा मनोमय इति श्रुत्यन्तरं दर्शयति श्रुत इति। फलितमाह तेनेति॥ ६८॥

मनसोऽप्यान्तरस्य विज्ञानस्यात्मत्ववादिनो बौद्धस्य मतं दर्शयति विज्ञानमिति। विज्ञानस्यान्तरत्वे युक्तिमाह यत इति॥ ६९॥

विज्ञानमनःशब्दवाच्ययोरन्तःकरणस्यैकत्वात् कथं मनोमयविज्ञानमययोः कार्य्यकारणभाव इत्याशङ्क्य तदुपपादयितुं तयोर्भेदं तावद्दर्शयति अहंवृत्तिरिति॥ ७०॥

तयोः कार्य्यकारणमाह अहंप्रत्ययेति। तदेवोपपादयति अवि-

क्षणे क्षणे जन्मनाशवदहंवृत्तिर्मितो यतः ।
विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः ॥ ७२ ॥
विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः ।
सर्वसंसार एतस्य जन्मनाशसुखादिकः ॥ ७३ ॥
विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् ।
अन्यस्यानुपलब्धत्वात् शून्यं माध्यमिका जगुः ॥ ७४ ॥
असदेवेदमित्यादाविदमेव श्रुतन्ततः ।
ज्ञानज्ञेयात्मकं सर्वं जगद् भ्रान्तिप्रकल्पितम् ॥ ७५ ॥
निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता ।
शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ॥ ७६ ॥

दिति । अहंवृत्त्युदयाभावे इदंवृत्त्युदयादनयोः कार्य्यकारणभाव इत्यर्थः ॥ ७१ ॥

तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति क्षणे क्षणे इति । क्षणिकत्वप्रसङ्गाद्वा स्वप्रकाशत्वमुपपादयति स्वप्रकाशं स्वतो मितेरिति । स्वेनैव प्रमितत्वादित्यर्थः ॥ ७२ ॥

विज्ञानस्यात्मत्वे श्रुतिं प्रमाणमित्याह विज्ञानमयकोशोऽयमित्यादि । तस्माद्वा एतस्मान्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः । विज्ञानं यज्ञं तनुते इत्यादि वाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः ॥ ७३ ॥

बौद्धान्तरभेदस्य शून्यवादिनो मतं दर्शयति विज्ञानमिति ॥ ७४ ॥

तत्र श्रुतिमाह असदेवेदमित्यादाविति । शून्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह ज्ञानज्ञेयात्मकमिति ॥ ७५ ॥

मतमेतद्दूषयति निरधिष्ठानविभ्रान्तेरिति । निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगात् निरधिष्ठानस्य भ्रमस्यानुपपत्तेरात्मनोऽस्तित्वं सि-

अन्यो विज्ञानमयत आनन्दमय आन्तरः ।
अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनम् ॥ ७७ ॥
अणुर्महान् मध्यमो वेत्येवं तत्रापि वादिनः ।
बहुधा विवदन्ते हि श्रुतियुक्तिसमाश्रयात् ॥ ७८ ॥
अणुं वदन्त्यान्तरालाः सूक्ष्मनाडीप्रचारतः ।
रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययम् ॥ ७९ ॥
अणोरणीयानेषोऽणुः सूक्ष्मात् सूक्ष्मतरन्त्विति ।
अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ॥ ८० ॥

ष्टानस्यात्मनः सत्ताभ्युपगन्तव्या किन्तु शून्यवादिनोऽपि शून्यसाक्षित्वेनावश्यम् आत्माभ्युपगन्तव्यः अन्यथा तस्यानभ्युपगमे अस्य शून्यस्योक्तिः शून्यमित्यभिधानं ते बौद्धस्य तव मते न सिध्येदिति भावः ॥ ७६ ॥

कस्तर्ह्यात्मा इत्यत आह अन्यो विज्ञानमयत इति । तस्माद्वा एतस्माद् विज्ञानमयादन्योऽन्तर आत्मानन्दमय इति अस्तीत्येवोपलब्धव्यस्तत्त्वभावेनेति च श्रुतिसद्भावादानन्दमय आत्मा अभ्युपगन्तव्य इति वैदिकदर्शनं वैदिकसिद्धान्तः ॥ ७७ ॥

एवमात्मस्वरूपे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणविशेषेऽपि वादिविप्रतिपत्तिं दर्शयति अणुर्महानिति ॥ ७८ ॥

तत्राणुत्ववादिनस्तावन्मतं दर्शयति अणुं वदन्तीति । अणुत्वाभिधाने हेतुमाह सूक्ष्मनाडीति । तदुपपादयति रोम्ण इति । नाडीष्विति शेषः सूक्ष्मासु नाडीषु सञ्चारोऽणुत्वमन्तरेण न घटत इत्यभिप्रायः ॥ ७९ ॥

अणुत्वे किं प्रमाणमित्यत आह अणोरणीयानेषोऽणुरिति ।

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेय इति चाहापरा श्रुतिः ॥ ८१ ॥
दिगम्बरा मध्यमत्वमाहुरापादमस्तकम् ।
चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ॥ ८२ ॥
सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् ।
स्थूलदेहस्य हस्ताभ्यां कञ्चुकप्रतिमोकवत् ॥ ८३ ॥
न्यूनाधिकशरीरेषु प्रवेशोऽपि गमागमैः ।
आत्मांशानां भवेत् तेन मध्यमत्वं सुनिश्चितम् ॥ ८४ ॥
सांशस्य घटवन्नाशो भवत्येव तथा सति ।

अणोरणीयान् महतो महीयान् एषोऽणुरात्मा चेतसा वेदितव्यः, सूक्ष्मात् सूक्ष्मतरं नित्यमित्यादि श्रुतय इत्यर्थः ॥ ८० ॥

श्रुत्यन्तरमुदाहरति बालाग्रशतभागस्येति ॥ ८१ ॥

मध्यमपरिमाणवादिनो मतं दर्शयति दिगम्बरा मध्यमत्वमिति । तत्रोपपत्तिमाह आपादेति । स एष इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह आनखाग्रेति ॥ ८२ ॥

ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशङ्क्याह सूक्ष्मनाडीप्रचारस्त्विति । यथा देहावयवयोर्हस्तयोः कञ्चुकप्रवेशेन देहस्य कञ्चुकप्रवेशः तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोऽपि प्रचार उपपद्यत इत्यर्थः ॥ ८३ ॥

ननु आत्मनो नियतमध्यमपरिमाणत्वे कर्मवशात् न्यूनाधिकशरीरप्रवेशो न घटत इत्याशङ्क्य अवयवोपगमापगमाभ्यां आत्मनो नियतमध्यमपरिमाणत्वात् देहवत् उभयं न विरुध्यत इत्याह न्यूनाधिकशरीरेष्विति । फलितमाह तेनेति ॥ ८४ ॥

कृतनाशाकृताभ्यागमयोः को वारको भवेत् ॥ ८५ ॥
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः ।
आकाशवत् सर्वगतो निरंशः श्रुतिसम्मतः ॥ ८६ ॥
इत्युक्त्वा तद्विशेषेऽपि बहुधा कलहं ययुः ।
अचिद्रूपोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि ॥ ८७ ॥
प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मताम् ।
आकाशवत् द्रव्यमात्मा शब्दवत् तद्गुणश्चितिः ॥ ८८ ॥
इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे ।

आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसङ्गेनैतद् दूषयति सांशश्च घटवदिति । भवतु को दोषस्तत्राह तथा सतीति कृतयोः पुण्यपापयोर्भोगमन्तरेण नाशः कृतनाशः अकृतयोरकस्मात् फलभोक्तृत्वमकृताभ्यागम एतद्दोषद्वयमात्मनो नित्यत्वाभ्युपगमे भवेदिति भावः ॥८५॥

अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह तस्मादात्मा महानेव नैवाणुर्नापि मध्यम इति । तत्र प्रमाणमाह आकाशवदिति । आकाशवत् सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्याद्यागमः प्रमाणमित्यर्थः ॥ ८६ ॥

एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निर्णेतुं तावत् वादिविप्रतिपत्तिं दर्शयति इत्युक्त्वा तद्विशेषेऽपीति ॥ ८७ ॥

अचिद्रूपत्ववादिनो मतं दर्शयति प्राभाकरा इति । तत्प्रक्रियामनुभाषते आकाशवद् द्रव्यमिति । आत्मा द्रव्यं भवितुमर्हति गुणवत्त्वादाकाशवदित्यनुमानं सूचितम् । आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति शब्दवदिति । आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात् यत् पृथिव्यादिभ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादि इत्यनुमानं द्रष्टव्यम् ॥ ८८ ॥

तत्संस्कारश्च तस्यैते गुणाश्चितिवदीरिताः ॥ ८९ ॥
आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः।
जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात् ॥ ९० ॥
चितिमत्त्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान्।
स्याद्धर्माधर्मयोः कर्त्ता भोक्ता दुःखादिमत्त्वतः ॥ ९१ ॥
यथात्र कर्मवशतः कादाचित्कं सुखादिकम्।
तथा लोकान्तरे देहे कर्मणेच्छादि जन्यते ॥ ९२ ॥
एवञ्च सर्वगस्यापि सम्भवेतां गमागमौ।
कर्मकाण्डः समग्रोऽत्र प्रमाणमिति तेऽवदन् ॥ ९३ ॥

तस्यैव चिदेकगुणाक्षराण्याह इच्छाद्वेषप्रयत्नाश्चेति। तत्संस्कारा भावना ॥ ८९ ॥

एषां गुणानामुत्पत्तिविनाशकारणमाह आत्मनो मनसा योग इति। स्वादृष्टवशत आत्मनो मनसा योग इत्यन्वयः ॥ ९० ॥

आत्मनोऽचिद्रूपत्वे कथं चेतनाभ्युपगम इत्याशङ्क्य चितिमत्त्वादित्याह चितिमत्त्वाच्चेतनोऽयमिति। आत्मनश्चेतनत्वे हेत्वन्तरमाह इच्छेति। तस्यैव संसारित्वमाह स्याद्धर्माधर्मयोरिति ॥ ९१ ॥

नन्वात्मनो विभुत्वे लोकान्तरगमनादिकं कथं घटत इत्याशङ्क्याऽस्मिन् देहे कर्मवशादिच्छोत्पत्तौ सत्यामेवात्मनोऽवस्थानादिव्यवहार एव कर्मवशात् लोकान्तरदेहान्तरोत्पत्तौ तदवच्छिन्नात्मप्रदेशे सुखाद्यनुभवसत्त्वात् तस्यात्मनो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनागमनादिकमित्यभिप्रेत्याह यथात्र कर्मवशत इति सार्द्धेन ॥ ९२ ॥

आत्मनः कर्तृत्वादिधर्मवत्त्वे किं प्रमाणमित्यत आह कर्मकाण्डः समग्रोऽत्रेति ॥ ९३ ॥

आनन्दमयकोषो यः सुषुप्तौ परिशिष्यते।
अस्पष्टचित् स आत्मैषां पूर्वकोषोऽस्य ते गुणाः ॥ ९४ ॥
गूढं चैतन्यमुत्प्रेक्ष्य बोधाबोधस्वरूपताम्।
आत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ॥ ९५ ॥
जडो भूत्वा तदास्वाप्समिति जाड्यस्मृतिस्तदा।
विना जाड्यानुभूतिं न कथञ्चिदुपपद्यते ॥ ९६ ॥
द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततस्त्वयम्।
अप्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ॥ ९७ ॥

ननु अन्नो विज्ञानमयात आनन्दमय इत्यत्र आनन्दमयस्यात्मत्वमुक्तम् इदानीमस्यादिमानन्यः प्रतिपद्यते अतः पूर्वोत्तरविरोध इत्याशङ्क्याह आनन्दमयकोषो य इति। सुषुप्तावस्पष्टचित् य आनन्दमयः कोषः परिशिष्यते स पूर्वकोषः श्रौतेषु पञ्चकोषेषु प्रथमः एषां प्राभाकरादीनां आत्मा अस्यात्मनस्ते पूर्वोक्ताज्ञानादयो गुणा इत्यर्थः ॥ ९४ ॥

तस्यैवात्मनश्चिदचिद्रूपत्वं भाट्टा वर्णयन्तीत्याह गूढं चैतन्यमिति। भाट्टा आत्मनो गूढमस्पष्टं चैतन्यमुत्प्रेक्ष्य ऊहित्वा चिज्जडोभयात्मकतां वर्णयन्तीत्यर्थः। चैतन्योत्प्रेक्षायां कारणमाह चिदुत्प्रेक्षोत्थितस्मृतेरिति। उत्थितस्मृतेश्चिदुत्प्रेक्षा भवतीति योजना। सुषुप्तेरुत्थितस्य जायमानात् स्मरणात् सौषुप्तचैतन्योत्प्रेक्षा भवतीत्यर्थः ॥ ९५ ॥

चिदुत्प्रेक्षाप्रकारमेव स्पष्टयति जडो भूत्वेति। तदा सुषुप्तिकाले जडो भूत्वाऽस्वाप्समित्येवंरूपा जाड्यस्मृतिरुत्थितस्य पुरुषस्य जायमाना सुषुप्तिकालीनजाड्यानुभवमन्तरेणानुपपद्यमाना तदानीन्तनजाड्यानुभवं कल्पयतीति भावः ॥ ९६ ॥

सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह द्रष्टुर्दृष्टेरिति। न हि

निरंशस्योभयात्मत्वं न कथञ्चिद् घटिष्यते ।
तेन चिद्रूप एवात्मेत्याहुः सांख्या विवेकिनः ॥ ९८ ॥
जाड्यांशः प्रकृतेरूपं विकारि त्रिगुणञ्च तत् ।
चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्त्तते ॥ ९९ ॥
असङ्गायाश्चितेर्बन्धमोक्षौ भेदाग्रहान्मतौ ।
बन्धमोक्षव्यवस्थार्थं पूर्वेषामिव चिद्भिदा ॥ १०० ॥
महतः परमव्यक्तमिति प्रकृतिरुच्यते ।
श्रुतावसङ्गता तद्वदसङ्गो हीत्यतः स्फुटा ॥ १०१ ॥
चित्सन्निधौ प्रवृत्तायाः प्रकृतेर्हि नियामकम् ।
ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः ॥ १०२ ॥

द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुतौ सुषुप्तौ चैतन्यलोपाभावः श्रूयते ततः कारणादयमात्मा खद्योतवत् स्फुरणास्फुरणाभ्यां युक्तो भवतीत्यर्थः ॥ ९७ ॥

अथ स्वमतं दूषणाभिधानपुरःसरं सांख्यमतमुत्थापयति निरंशस्येति ॥ ९८ ॥

जाड्यांशस्तर्हि का गतिरित्याशङ्क्याह जाड्यांश इति । तत् प्रकृतिरूपं सत्त्वरजस्तमोगुणात्मकम् । प्रकृतिकल्पनायां प्रयोजनमाह चित इति । चितः पुरुषस्येति यावत् ॥ ९९ ॥

ननु चितोऽसङ्गत्वेन प्रकृतिपुरुषयोरत्यन्तविभिन्नत्वात् प्रकृतिगतस्य कथं पुरुषस्य भोगापवर्गावित्याशङ्क्य तयोर्विवेकस्याग्रहणात् पुरुषे भोगापवर्गौ व्यवह्रियेते इत्याह असङ्गाया इति । तार्किकादिभिरिव सांख्यैरात्मभेदोऽङ्गीक्रियते इत्याह बन्धेति ॥ १०० ॥

प्रकृतिसद्भावे पुरुषस्यासङ्गत्वे च श्रुतिमुदाहरति महत इति ॥ १०१ ॥

एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्य ईश्वरविषयां तां प्रदर्श-

प्रधानक्षेत्रज्ञपतिर्गुणेश इति हि श्रुतिः ।
आरण्यके सम्भ्रमेण ह्यन्तर्याम्युपपादितः ॥ १०३ ॥
अत्रापि कलहायन्ते वादिनः स्वस्वयुक्तिभिः ।
वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि ॥ १०४ ॥
क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः ।
पुंविशेषो भवेदीशो जीववत् सोऽप्यसङ्गचित् ॥ १०५ ॥
तथापि पुंविशेषत्वात् घटतेऽस्य नियन्तृता ।
अव्यवस्थौ बन्धमोक्षावापतेतामिहान्यथा ॥ १०६ ॥

यितुमीश्वरस्वरूपं तावत् स्थापयति चित्सन्निधानादिति । ननु प्रकृतिपुरुषातिरिक्तेश्वरकल्पनमप्रमाणमित्याशङ्क्याह स जीवेभ्य इति ॥ १०२ ॥

तामेवेश्वरप्रतिपादिकां श्रुतिं पठति प्रधानेति । प्रधानं गुणत्रयसाम्यावस्थारूपं क्षेत्रज्ञो जीवस्तयोः पतिः गुणाः सत्त्वादयस्तेषामीशो नियामक इत्यर्थः । न केवलमियमेव श्रुतिरीश्वरप्रतिपादिका अन्तर्यामिब्राह्मणवाक्यमपीत्याह आरण्यक इति ॥ १०२ ॥

तस्मिन्नर्थे वादिविप्रतिपत्तिं प्रतिजानीते अत्रापीति । प्रज्ञामनतिक्रम्य यथाप्रज्ञम् ॥ १०४ ॥

इदानीं पतञ्जलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत् सूत्रमर्थतः पठति क्लेशेति । क्लेशा अविद्यादयः अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च कर्माणि कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रोक्तानि सन्ति मूले तद्विपाका जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषाः, तदाशयास्तेषां संस्काराः तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति सोऽपि जीववदसङ्गचिद्रूप इत्यर्थः ॥ १०५ ॥

नन्वसङ्गचिद्रूपत्वे कथं नियन्तृत्वमित्यत आह तथापीति । ईश्वरस्य नियन्तृत्वानभ्युपगमे दोषमाह अव्यवस्थाविति ॥ १०६ ॥

भीषास्मादित्येवमादावसङ्गस्य परात्मनः ।
श्रुतं तद्युक्तमप्यस्य क्रोधकर्म्माद्यसङ्गमात् ॥ १०७ ॥
जीवानामप्यसङ्गत्वात् क्रोधादि न ह्यथापि च ।
विवेकाग्रहतः क्रोधकर्म्मादि प्रागुदीरितम् ॥ १०८ ॥
नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते ।
असङ्गस्य नियन्तृत्वमयुक्तमिति तार्किकाः ॥ १०९ ॥
पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा ।
सत्यकामः सत्यसङ्कल्प इत्यादिश्रुतिर्जगौ ॥ ११० ॥
नित्यज्ञानादिमत्त्वेऽस्य सृष्टिरेव सदा भवेत् ।
हिरण्यगर्भ ईशोऽतो लिङ्गदेहेन संयुतः ॥ १११ ॥

असङ्गस्येश्वरस्य नियन्तृत्वं निःप्रमाणकमित्याशङ्क्याह भीषेति । तन्नियन्तृत्वं श्रुतम् । ननु पाषाणाः प्लवन्ते इति वत् श्रुतमप्ययुक्तं कथमङ्गीक्रियत इत्यत आह युक्तमपीति । जीवधर्मस्य क्रोधादेरभावादुपपन्नमित्यर्थः ॥ १०७ ॥

ननु जीवा अपि असङ्गचिद्रूपाः क्रोधादिरहिता एव तथा चेश्वरे को विशेष इत्याशङ्क्य जीवानां स्वतः क्रोधादिरहितत्वेऽपि बुद्ध्या सह विवेकाग्रहात् क्रोधादिरस्तीति पूर्वोक्तं स्मारयति जीवानामिति ॥ १०८ ॥

तार्किकास्त्वसङ्गस्य नियामकत्वमसहमाना जीवविलक्षणत्वात् ज्ञानादिगुणमस्य नित्यमङ्गीकुर्वन्त इत्याह नित्यज्ञानेति ॥ १०९ ॥

नन्विच्छादिगुणकत्वे तस्य कथं जीवाद्वैलक्षण्यमित्याशङ्क्य गुणानां नित्यत्वादेवेति परिहरति पुंविशेषत्वमिति । गुणानां नित्यत्वे प्रमाणमाह सत्येति ॥ ११० ॥

तथापि दोषसद्भावात् पक्षान्तरमाह नित्येति । तत्र हिरण्य-

उद्गीथब्राह्मणे तस्य माहात्म्यमतिविस्तृतम्।
लिङ्गसत्त्वेऽपि जीवत्वं नास्य कर्म्माद्यभावतः॥ ११२॥
स्थूलदेहं विना लिङ्गदेहो न क्वापि दृश्यते।
वैराजो देह ईशोऽतः सर्व्वतो मस्तकादिमान्॥ ११३॥
सहस्रशीर्षेत्येवं हि विश्वतश्चक्षुरित्यपि।
श्रुतमित्याहुरनिशं विश्वरूपस्य चिन्तकाः॥ ११४॥
सर्व्वतः पाणिपादत्वे क्रिम्यादेरपि चेशता।
ततश्चतुर्म्मुखो देव एवेशो नेतरः पुमान्॥ ११५॥
पुत्रार्थं तमुपासीना एवमाहुः प्रजापतिः।
प्रजा असृजतेत्यादिश्रुतीश्चोदाहरन्त्यमी॥ ११६॥
विष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः।

गर्भस्य किं रूपमित्यत आह लिङ्गदेहेनेति। मायोपाधिकः परमात्मा लिङ्गशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते इत्यर्थः॥ १११॥

हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह उद्गीथेति। ननु लिङ्गशरीरयोगे जीवः स्यादित्याशङ्क्याविद्याकामकर्म्माभावान्न जीव इत्याह लिङ्गसत्त्वेऽपीति॥ ११२॥

केवललिङ्गशरीरस्य स्थूलशरीरं विहायानुपलभ्यमानत्वात् स्थूलशरीरसमष्ट्यभिमानी विराडीश्वर इत्याह स्थूलदेहं विनेति॥ ११३॥

तस्येश्वरत्वे प्रमाणमाह सहस्रशीर्षेति। श्रुतं वाक्यमिति शेषः, विश्वरूपस्य चिन्तकाः विराडुपासकाः॥ ११४॥

अत्रापि दोषदृष्ट्या देवतान्तरमाश्रयन्त इत्याह सर्व्वत इति॥ ११५॥

एवं कैरुच्यते इत्यत आह पुत्रार्थमिति। प्रजापतिः प्रजा असृजतेत्यादिवाक्यं तत्र प्रमाणमित्याहुरित्याह प्रजापतिरिति॥ ११६॥

विष्णुरेवेश इत्याहुर्लोके भागवता जनाः ॥ ११७ ॥
शिवस्य पादावन्वेष्टुं शार्ङ्ग्यशक्तस्ततः शिवः ।
ईशो न विष्णुरित्याहुः शैवा आगममानिनः ॥ ११८ ॥
पुरत्रयं साधयितुं विघ्नेशं सोऽप्यपूजयत् ।
विनायकं प्राहुरीशं गाणपत्यमते रताः ॥ ११९ ॥
एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा ।
मन्त्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे ॥ १२० ॥
अन्तर्यामिणमारभ्य स्थावरान्तेशवादिनः ।
सन्त्यश्वत्थार्कवंशादेः कुलदैवत्वदर्शनात् ॥ १२१ ॥
तत्त्वनिश्चयकामेन न्यायागमविचारिणाम् ।
एकैव प्रतिपत्तिः स्यात् साप्यत्र स्फुटमुच्यते ॥ १२२ ॥

भागवतमतमाह विष्णोरिति । भागवता भगवदुपासका इत्यर्थः ॥ ११७ ॥

शैवानां मतमाह शिवस्येति । शैवाः शिवोपासकाः ॥ ११८ ॥

गाणपत्यमतमाह पुरत्रयमिति । विघ्नेशं गणपतिम् ॥ ११९ ॥

उक्तन्यायमन्यत्राप्यतिदिशति एवमिति । अन्ये भैरवभैरवाद्युपासकाः । अन्यथान्यथाभिमाने कारणमाह स्वस्वेति । तत्र तत्र प्रमाणानि सन्तीति दर्शयन्ति मन्त्रेति ॥ १२० ॥

एवं सर्वमतानीश्वरविषयाण्युक्त्वेदानीमाह अन्तर्यामिणमिति । स्थावरेशवादो न क्वापि दृष्टचर इत्याशङ्क्याह अश्वत्थार्केति ॥ १२१ ॥

तर्ह्येवं मतभेदे कस्योपादेयत्वं कस्य वा हेयत्वमित्याकाङ्क्षायामाह तत्त्वनिश्चयेति । तत्त्वनिश्चयकामेन तत्त्वनिश्चयेच्छया न्यायागमयोर्विचारशीलानां पुरुषाणां प्रतिपत्तिरेकैव स्यात् । सा कीदृशी इत्यत आह साप्यत्रेति ॥ १२२ ॥

मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
अस्यावयवभूतैस्तु व्याप्तं सर्व्वमिदं जगत् ॥ १२३ ॥
इतिश्रुत्यनुसारेण न्याय्यो निर्णय ईश्वरे ।
तथा सत्यविरोधः स्यात् स्थावरान्तेशवादिनाम् ॥१२४॥
माया चेयं तमोरूपा तापनीये तदीरणात् ।
अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयम् ॥ १२५ ॥
जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः ।
आबालगोपं स्पष्टत्वादानन्त्यं तस्य साब्रवीत् ॥ १२६ ॥

तामेव प्रतिपत्तिं दर्शयितुं तदनुकूलां श्रुतिं पठति मायान्त्विति । मायामेव प्रकृतिं जगदुपादानकारणं विद्यात् जानीयात् मायिनन्तु मायोपाधिकम् अन्तर्यामिणम् एव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात् । अस्य मायिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद् व्याप्तमित्यस्याः श्रुतेरर्थः ॥ १२३ ॥

एतत्श्रुत्यनुसारेण ईश्वरविषयनिर्णयो युक्त इत्याह इतीति । कुतो युक्त इत्याशङ्क्य सर्वेषामविरुद्धत्वादित्याह तथेति । सर्वस्यापीश्वरत्वाभ्युपगमात् केनापि विरोध इति भावः ॥ १२४ ॥

ननु जगत्प्रकृतिभूतायाः मायायाः किं रूपम् इत्यत आह मायेयमिति । कुत इत्यत आह तापनीय इति । माया च तमोरूपेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानात् इत्यर्थः । मायायास्तमोरूपत्वे किं प्रमाणमित्याकाङ्क्षायाम् अनुभूतेरिति श्रुतिरेवात्मानुभवः प्रमाणमिति प्रतिजानीत इत्याह अनुभूतिमिति ॥ १२५ ॥

तत्र मायायास्तमोरूपत्वे कोऽसावनुभव इत्याकाङ्क्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्मानुभवं स्पष्टयति इत्याह जडमिति । अनन्तमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यत इत्याह आबालेति ॥ १२६ ॥

अचिदात्मघटादीनां यत् स्वरूपं जडं हि तत् ।
यत्र कुण्ठीभवेत् बुद्धिः स मोह इति लौकिकाः ॥१२७॥
इत्थं लौकिकदृष्ट्यैतत् सर्वैरप्यनुभूयते ।
युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदितिश्रुतेः ॥ १२८ ॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः ॥ १२९ ॥
तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ॥१३०॥
अस्य सत्त्वमसत्त्वञ्च जगतो दर्शयत्यसौ ।
प्रसारणाच्च सङ्कोचात् यथा चित्रपटस्तथा ॥ १३१ ॥

जडशब्दस्यार्थमाह अचिदात्मेति । मोहशब्दार्थमाह यत्रेति ॥१२७॥

उक्तप्रकारेण सर्वानुभवसिद्धत्वलक्षणमानन्त्यं सिद्धमित्याह इत्थमिति । एतच्च तमोऽहमत्र तमोरूपत्वम् । नन्वेवं मायायाः सर्वानुभवसिद्धत्वे घटादिवत् सत्त्वेनानिर्वाच्यत्वं न स्यादित्याशङ्क्याह युक्तीति । तुशब्दः शङ्काव्यावृत्त्यर्थः । अनिर्वाच्यं सत्त्वेनासत्त्वेन सदसत्त्वेन वा निर्वक्तुमशक्यम् । तत्र किं प्रमाणमित्यत आह नासदिति ॥ १२८ ॥

अस्याः श्रुतेरभिप्रायमाह नासदिति । बाधनाद्धेतोः नासीत् किन्त्विति श्रुत्या निषेधनादित्यर्थः । सदसद्रूपत्वं विरुद्धत्वादयुक्तम् इति श्रुत्याभिमतम् । एवं युक्तिदृष्ट्यानिर्वचनीयत्वं प्रदर्श्य तुच्छमिदं रूपमस्तीति श्रुतिविद्वदनुभवेन तस्याः तुच्छत्वं दर्शयतीत्याह विद्येति । तुच्छत्वे हेतुमाह तस्येति ॥ १२९ ॥

उपपादितमर्थमुपसंहरति तुच्छेति । श्रौतबोधेन तुच्छा कालत्रयेऽप्यसती यौक्तिकबोधेनानिर्वचनीया लौकिकबोधेन वास्तवी च इत्येवं त्रिधा माया ज्ञेयेत्यर्थः ॥ १३० ॥

अस्य सत्त्वमसत्त्वञ्च दर्शयतीति श्रुतेरर्थमुक्तमाह अस्येति ।

अस्वतन्त्रा हि माया स्यादप्रतीतेर्विना चितिम् ।
स्वतन्त्रापि तथैव स्यादसङ्गस्यान्यथाकृतेः ॥ १३२ ॥
कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा ।
चिदाभासस्वरूपेण जीवेशावपि निर्ममे ॥ १३३ ॥
कूटस्थमनपाकृत्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ॥ १३४ ॥
द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि ।
मायाया दुर्घटत्वञ्च स्वतः सिध्यति नान्यथा ॥ १३५ ॥

उक्तया एव मायाया जगत्स्वासत्वप्रदर्शकत्वे दृष्टान्तमाह प्रसारणादिति ॥ १३१ ॥

स्वतन्त्रास्वतन्त्रत्वेनेति श्रुत्या मायायाः स्वातन्त्र्यास्वातन्त्र्ये दर्शिते तयोभयस्योपपत्तिमाह अस्वतन्त्रेति । स्वभासकं चैतन्यं विहाय न प्रकाशत इत्यस्वतन्त्रा असङ्गस्यात्मनोऽन्यथाकरणात् स्वतन्त्रापीत्यर्थः ॥ १३२ ॥

अन्यथाकरणमेव स्पष्टयति कूटस्थासङ्गमिति । जीवेशावाभासेन करोतीति श्रुत्युक्तं जीवेश्वरविभागञ्च करोतीत्याह चिदाभासेति ॥ १३३ ॥

नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशङ्क्याह कूटस्थमिति । ननु कूटस्थत्वाविरोधेन जगदादिस्वरूपत्वापादानं दुर्घटमित्याशङ्क्य मायाया दुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह दुर्घटैकेति । अन्यथा मायात्वमेव भज्येतेति भावः ॥ १३४ ॥

मायाया दुर्घटकार्य्यकारित्वस्वभावत्वे दृष्टान्तमाह द्रवत्वमिति । उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया दुर्घटकारित्वमित्यर्थः ॥ १३५ ॥

न वेत्ति मायिनं लोको यावत् तावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात् तु मायैवेत्युपशाम्यति ॥ १३६ ॥
प्रसरन्ति हि चोद्यानि जगद्वस्तुत्ववादिषु ।
न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ॥ १३७ ॥
चोद्येऽपि यदि चोद्यं स्यात् तच्चोद्ये चोद्यते मया ।
परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यताम् ॥ १३८ ॥
विस्मयैकशरीराया मायायाश्चोद्यरूपतः ।
अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ॥ १३९ ॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम् ॥ १४० ॥
न निरूपयितुं शक्या विस्पष्टं भासते च या ।
सा मायेतीन्द्रजालादौ लोकाः सम्प्रतिपेदिरे ॥ १४१ ॥

ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्चमत्कारहेतुत्वदर्शनादित्याशङ्क्य मायाप्रयोक्तृसाक्षात्कारपर्यन्तमेवाश्चर्यकारणत्वं नोपरिष्टादित्याह न वेत्तीति ॥ १३६

किञ्च जगत्सत्यत्ववादिनो नैयायिकादीन् प्रत्येवंविधानि चोद्यानि कर्तव्यानि न मायावादिनं प्रतीत्याह प्रसरन्तीति ॥ १३७ ॥

मायावादिनं प्रति चोद्यकरणेऽतिप्रसङ्गमाह चोद्येऽपीति । तर्हि किं कर्तव्यमित्यत आह परिहार्यमिति ॥ १३८ ॥

उक्तमेवार्थं प्रपञ्चयति विस्मयेति ॥ १३९ ॥

मायात्वनिश्चये तत्परिहारान्वेषणमुचितं स एव नेदानीं सिद्ध इ' प्रकृते मायात्वं प्रति मायाया लक्षणसद्भावात् मायात्वं निश्चीयतामित्यभिप्रायेणाह तर्हीति । किं लक्षणमित्यत आह लोकेति ॥ १४० ॥

तत्रापि किं लक्षणमित्यत आह न निरूपयितुमिति ॥ १४१ ॥

स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणम्।
मायामयं जगत् तस्मादीक्षस्वापक्षपाततः॥ १४२॥
निरूपयितुमारब्धे निखिलैरपि पण्डितैः।
अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित्॥ १४३॥
देहेन्द्रियादयो भावा वीर्येणोत्पादिताः कथम्।
कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरम्॥ १४४॥
वीर्यस्यैष स्वभावश्चेत् कथं तद् विदितं त्वया।
अन्वयव्यतिरेकौ यौ भग्नौ तौ व्यर्थवीर्यतः॥ १४५॥
न जानामि किमप्येतदित्यन्ते शरणं तव।
अत एव महान्तोऽस्याः प्रवदन्तीन्द्रजालताम्॥ १४६॥
एतस्मात् किमिवेन्द्रजालमपरं यद् गर्भवासस्थितम्।
रेतश्चेतति हस्तमस्तकपदं प्रोद्भूतनानाङ्कुरम्।
पर्यायेण शिशुत्वयौवनजरारोगैरनेकैर्वृतं
पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति॥१४७॥

दृष्टान्ते सिद्धं लक्षणं दार्ष्टान्तिके योजयति स्पष्टमिति ॥ १४२ ॥

जगतोऽशक्यनिरूपणत्वं कथमित्याशङ्क्य तद् दर्शयति निरूपयितुमिति ॥ १४३ ॥

अशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टयति देहेन्द्रियेति ॥ १४४ ॥

स्वभाववादी शङ्कते वीर्यस्येति। सिद्धान्ती पृच्छति कथं तदिति। अन्वयव्यतिरेकाभ्यां जानामीत्याशङ्क्य व्याप्त्यभावान्मैवमित्याह अन्वयेति ॥ १४५ ॥

एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्तरं देयमिति फलितमाह न जानामीति ॥ १४६ ॥

उक्तानिर्वचनीयत्वे वृद्धसम्मतिं दर्शयति एतस्मादिति ॥ १४७ ॥

देहवद् वटधानादौ सुविचार्य्यावलोक्यताम्।
क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु ॥ १४८ ।
निरुक्तावभिमानं ये दधते तार्किकादयः।
हर्षमिश्रादिभिस्ते तु खण्डनादौ सुशिक्षिताः ॥ १४९ ।
अचिन्त्याः खलु ये भावा न तांस्तर्केषु योजयेत्।
अचिन्त्यरचनारूपं मनसापि जगत् खलु ॥ १५० ॥
अचिन्त्यरचनाशक्तिबीजं मायेति निश्चिनु।
मायाबीजं तदेवैकं सुषुप्तावनुभूयते ॥ १५१ ॥
जाग्रत्स्वप्नजगत् तत्र लीनं बीज इव द्रुमः।
तस्मादशेषजगतो वासनास्तत्र संस्थिताः ॥ १५२ ॥
या बुद्धिवासनास्तासु चैतन्यं प्रतिबिम्बति।
मेघाकाशवदस्पष्टचिदाभासोऽनुमीयताम् ॥ १५३ ॥

न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किन्तु वटधानादेरपीत्याह देहवदिति ॥ १४८ ॥

अन्यथाभिनिवेशेन मननशीलत्वेऽपि खण्डनादिभिराचार्य्यैर्निरूप्यते इत्यभिप्रायेणाह निरुक्तावभिमानमिति ॥ १४९ ॥

उक्तार्थे शास्त्रदार्शिकानां वाक्यं संवादयति अचिन्त्या इति ॥ १५० ॥

ननु भवत्वेवं जगतोऽचिन्त्यरचनात्वं मायायां किमायातमित्यत आह अचिन्त्येति। अचिन्त्यरचनाशक्तिमद् यद् बीजं कारणं तं मायेत्यवेहि। तच्चैवंविधं कारणं क्व दृष्टमित्यत आह मायेति ॥ १५१ ॥

कथं तस्मिन् जगतोऽवस्थितत्वमित्यत आह जाग्रदिति। ततः किमित्यत आह तस्मादिति। यतो जगत्कारणं माया अतोऽशेषजगद्वासनास्तस्यां मायायां निलीनास्तिष्ठन्ति ॥ १५२ ॥

ततोऽपि किं तत्राह या बुद्धिवासना इति। ननु तासु प्रतिबिम्ब

साभासमेव तद्बीजं धीरूपेण प्ररोहति ।
अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ॥ १५४ ॥
मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुतम् ।
मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ ॥ १५५ ॥
मेघवद्वर्त्तते माया मेघस्थिततुषारवत् ।
धीवासनाश्चिदाभासस्तुषारस्थखवत् स्थितः ॥ १५६ ॥
मायाधीनश्चिदाभासः श्रुतौ मायी महेश्वरः ।
अन्तर्यामी च सर्वज्ञो जगद्योनिः स एव हि ॥ १५७ ॥

ऽस्ति चेत् कुतो नानुभूयते इत्याशङ्क्याऽस्पष्टत्वादित्याह मेघेति । तर्हि कुतस्तत्सिद्धिरित्यत आह अनुमीयतामिति ॥ १५३ ॥

ननु मेघांशोदकस्यास्पष्टाकाशप्रतिबिम्बत्वेऽपि तज्जातीयस्य घटोदकस्य स्पष्टाकाशप्रतिबिम्बतः सद्भावात् मेघाकाशानुमानं घटते इह तथाविधदृष्टान्ताभावात् कथमनुमानोदय इत्याशङ्क्यात्रापि तथाविधदृष्टान्तसम्पादनायाह साभासमिति । चिदाभासविशिष्टं तदेवाज्ञानं बुद्धिरूपेण परिणममानं विस्पष्टचिदाभासवद्भवतीति भावः । एवञ्चेदमनुमानमत्र सूचितं भवति विमता बुद्धिवासनाश्चित्प्रतिबिम्बवत्यो भवितुमर्हन्ति बुद्धेरवस्थाविशेषत्वात् बुद्धिवृत्तिवदिति ॥ १५४ ॥

एवं जीवेश्वरयोर्मायिकत्वं श्रुत्युक्तमुपपादितमुपसंहरति मायाभासेनेति । ननु जीवेशयोर्मायिकत्वे समाने कथमवान्तरभेदसिद्धिरित्याशङ्क्य स्पष्टास्पष्टोपाधिमत्त्वेन मेघाकाशजलाकाशयोरिव तत्सिद्धिरित्याह मेघाकाशेति ॥ १५५ ॥

ईशस्य मेघाकाशसाम्यं स्फुटीकरोति मेघवदिति ॥ १५६ ॥

मायाप्रतिबिम्बस्येश्वरत्वे किं प्रमाणमित्याशङ्क्य श्रुतिरेवेत्याह मायाधीनेति । न केवलमीश्वरत्वमस्य श्रुतम् अपि त्वन्तर्यामित्वादिकमपि धर्मजातं श्रुतमस्तीत्याह अन्तर्यामीति ॥ १५७ ॥

सौषुप्तमानन्दमयं प्रक्रम्यैवं श्रुतिर्जगौ ।
एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ॥ १५८ ॥
सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यताम् ।
श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्वसम्भवात् ॥ १५९ ॥
अयं यत् सृजते विश्वं तदन्यथयितुं पुमान् ।
न कोऽपि शक्तस्तेनायं सर्वेश्वर इति श्रुतः ॥ १६० ॥
अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः ।
ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः ॥ १६१ ॥

ननु शोधितमायाप्रतिबिम्बस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशङ्क्य तदुपपादिकां श्रुतिं दर्शयति सौषुप्तमिति सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् इत्यादिका श्रुतिः शोधितमायाप्रतिबिम्बरूपस्यानन्दमयस्येश्वरत्वादिकं प्रतिपादयतीत्यर्थः ॥ १५८ ॥

नन्वानन्दमयस्य सर्वज्ञत्वादिकम् अनुभवविरुद्धमित्याशङ्क्याह सर्वज्ञत्वादिक इति । कुत इत्यत आह श्रौतेति । इतोऽपि न विप्रतिपत्तिः कार्येत्याह मायायामिति ॥ १५९ ॥

नन्वसङ्गस्वभावे श्रुतिरपि ग्रावप्लवनवाक्यवदर्थवादः स्यादित्याशङ्क्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादिकमुपपादयति अयमिति । अयमानन्दमयो यच्छ्वापदादिविश्वं सृजति तत् केनापि अन्यथा कर्तुं न शक्यते अतोऽयं सर्वेश्वर इत्यर्थः ॥ १६० ॥

इदानीं सर्वज्ञत्वमुपपादयति अशेषेति । तत्र सौषुप्ते अज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबुद्धीनां वासना तिष्ठन्ति ताभिश्च वासनाभिः सर्वं जगत् क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावदज्ञानोपाधिकत्वेन सर्वज्ञ उच्यते इत्यर्थः ॥ १६१ ॥

वासनानां परोक्षत्वात् सर्वज्ञत्वं न हीक्ष्यते ।
सर्वबुद्धिषु तद् दृष्ट्वा वासनास्वनुमीयताम् ॥ १६२ ॥
विज्ञानमयमुख्येषु कोषेष्वन्यत्र चैव हि ।
अन्तस्तिष्ठन् यमयति तेनान्तर्यामितां व्रजेत् ॥ १६३ ॥
बुद्धौ तिष्ठन्नान्तरोऽस्याधियानोच्यश्च धीवपुः ।
धियमन्तर्यमयतीत्येवं वेदेन घोषितम् ॥ १६४ ॥
तन्तुः पटे स्थितो यद्वदुपादानतया तथा ।
सर्व्वोपादानरूपत्वात् सर्वत्रायमवस्थितः ॥ १६५ ॥
पटादप्यान्तरस्तन्तुस्तन्तोरप्यंशुरान्तरः ।
आन्तरत्वस्य विश्रान्तिर्यत्रासावनुमीयताम् ॥ १६६ ॥

ननु यदि सर्वज्ञत्वमस्ति तत् कुतो नानुभूयते इत्याशङ्क्य तदुपाधीनां वासनानां परोक्षत्वात् नानुभव इत्याह वासनानामिति । कथं तर्हि तदवगम इत्याशङ्क्याह सर्वबुद्धिष्विति । सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हति कार्य्यनिष्ठधर्मविशेषत्वात् पटगतरूपादिवदित्यर्थः ॥ १६२ ॥

सर्वज्ञत्वमुपपाद्य एषोऽन्तर्यामीति श्रुत्युक्तमन्तर्यामित्वमुपपादयति विज्ञानमयेति । अन्यत्र पृथिव्यादौ तिष्ठन् यमयति यतस्तेनेत्यन्वयः ॥ १६३

अस्मिन्नर्थेऽन्तर्यामिब्राह्मणं श्रुत्यन्तरं प्रमाणमिति दर्शयितुं तदेकदेशभूतं यो विज्ञाने तिष्ठन्नित्यादिवाक्यम् अर्थतोऽनुक्रामति बुद्धाविति॥ १६४

इदानीमन्तर्यामिब्राह्मणस्य प्रतिपर्यायव्याख्याने ग्रन्थबाहुल्यभयात् व्याख्यानस्य सर्वपर्यायसाधारण्यसिद्धये यः सर्वेषु भूतेष्विति व्याख्यातो यः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं दृष्टान्तमाह तन्तुः पट इति ॥१६५॥

ननूपादानतया सर्वत्रायमवस्थितश्चेत् किमिति सर्वत्र नोपलभ्यत

द्वित्रान्तरत्वकक्षाणां दर्शनेऽप्ययमान्तरः ।
न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ॥ १६७ ॥
पटरूपेण संस्थानात् पटस्तन्तोर्वपुर्यथा ।
सर्वरूपेण संस्थानात् सर्वमस्य वपुस्तथा ॥ १६८ ॥
तन्तोः सङ्कोचविस्तारचलनादौ पटस्तथा ।
अवश्यमेव भवति न स्वातन्त्र्यं पटे मनाक् ॥ १६९ ॥
तथान्तर्याम्ययं यत्र यया वासनया यथा ।
विक्रीयते तथावश्यं भवत्येव न संशयः ॥ १७० ॥

इत्याशङ्क्य सर्वान्तरत्वमित्याह पटादपीति । अत्रेदमनुमानम् अन्त-रतमतारतम्यं क्वचिद् विश्रान्तं तारतम्यत्वादणुत्वतारतम्यवदिति ॥ १६६ ॥

तस्यान्तरस्याप्यस्मदादिदन्तर्यामिणो दर्शनं किं न स्यादित्याशङ्क्य तेषा-मिव प्रत्यक्षाभावात् दृश्यते इत्यभिप्रायेणाह द्वित्रान्तरत्वेति । कुत-स्तर्हि तन्निर्णय इत्यत आह तत इति । अचेतनस्य चेतनाधिष्ठानमन्त-रेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तु घटाद्युक्तैव ॥ १६७ ॥

यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह पटरूपेणेति । पट-रूपेणावस्थितस्य तन्तोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ॥ १६८ ॥

यः सर्वाणि भूतान्यन्तरो यमयतीति वाक्यस्य तात्पर्यं दृष्टान्त-माह तन्तोरिति श्लोकद्वयेन । तन्तुसङ्कोचादिना पटसङ्कोचादिर्यथा भवति ॥ १६९ ॥

एवं पृथिव्यादिरूपादानत्वेन स्थितोऽन्तर्यामी यया यया वासनया यथा यथा घटादिकार्यरूपेण विक्रीयते तथा तथा तत्कार्यजातं तथा तथा-ऽवश्यं भवतीति भावः ॥ १७० ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ १७१ ॥
सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः ।
तदुपादानभूतेशस्तत्र विक्रियते खलु ॥ १७२ ॥
देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥ १७३ ॥
विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः ।
स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ॥१७४॥
अन्तर्यमयतीत्युक्तायमेवार्थः श्रुतौ श्रुतः ।
पृथिव्यादिषु सर्वत्र न्यायोऽयं योज्यतां धिया ॥ १७५ ॥
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥१७६

एवमन्तर्यामिप्रतिपादिकां श्रुतिमुपन्यस्य स्मृतिमप्युपन्यस्यति ईश्वर इति ॥ १७१ ॥

सर्वभूतानीति पदस्यार्थमाह सर्वभूतानीति। ते च हृदयपुण्डरीके स्थिताः। ननु तेषां कुतो हृदवस्थानमित्याशङ्क्य हृद्यन्तर्यामिणो विज्ञानमयाकारेण परिणामादित्याह तदुपादानेति ॥ १७२ ॥

यन्त्रारूढानीत्यत्र यन्त्रारोहणशब्दयोरर्थमाह देहादीति। भ्रामयन्निति पदस्य प्रकृत्यर्थमाह विहितेति ॥ १७२ ॥

इदानीं णिच्प्रत्ययमायापदयोरर्थमाह विज्ञानमयेति ॥ १७४ ॥

श्रौतस्य यमयतीति पदस्याप्ययमेवार्थः इत्याह अन्तर्यमयतीति। तद्व्याख्यानं पर्यायान्तरेऽप्यतिदिशति पृथिव्यादिष्विति ॥ १७५ ॥

प्रवृत्तिजातस्य सर्वेश्वराधीनत्वे वचनान्तरमुदाहरति। जानामि धर्ममिति ॥ १७६ ॥

नार्थः पुरुषकारेणेत्येवं मा शङ्क्यतां यतः ।
ईशः पुरुषकारस्य रूपेणापि विवर्त्तते ॥ १७७ ॥
ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्मैव वार्य्यताम् ।
तथापीशस्य बोधेन स्वात्मासङ्गत्वधीजनिः ॥ १७८ ॥
तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा ।
श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितम् ॥ १७९ ॥
आज्ञाया भीतिहेतुत्वं भीषास्मादिति हि श्रुतम् ।
सर्वेश्वरत्वमेतत् स्यादन्तर्यामित्वतः पृथक् ॥ १८० ॥
एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः ।
अन्तः प्रविष्टः शास्ता यं जनानामिति च श्रुतिः ॥१८१॥

ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशङ्क्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति नार्थ इति । अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः ॥ १७७ ॥

ननु पुरुषप्रयत्नस्यापीश्वररूपत्वे यमयति भ्रामयतीति प्रतिपादितमन्तर्यामिप्रेरणं व्यर्थं स्यादित्याशङ्क्य तद्बोधेन स्वात्मासङ्गत्वज्ञानलक्षणफलस्य सत्त्वान्नैवमिति परिहरति । ईदृगिति । ईदृग्बोधेनेश्वरस्य पुरुषकारादिरूपेणावस्थानज्ञानेन प्रवृत्तिः अन्तर्यामिरूपेण प्रेरणा ॥१७८॥

आत्मनोऽसङ्गत्वज्ञानेनापि किं प्रयोजनमित्यत आह तावतेति । श्रुतिस्मृत्युदितज्ञाननिवर्तनीयत्वे भूतं दर्शयति श्रुतिस्मृतीति ॥१७९॥

स्वस्यापीश्वरस्य भीतिहेतुत्वलक्षणमित्याह आज्ञाया इति । ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशङ्क्य सर्वेश्वरत्वज्ञानार्थमित्यतः पार्थक्यविवक्षा इति मत्वाह सर्वेश्वरत्वमिति ॥ १८० ॥

सर्वेश्वरत्वमीश्वर एव नियामक इत्यत्र श्रुतिद्वयमाह एतस्य वा इति ॥ १८१ ॥

जगद्योनिर्भवेदेष प्रभवाप्ययकृत् यतः ।
आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ॥ १८२ ॥
आविर्भावयति स्वस्मिन् विलीनं सकलं जगत् ।
प्राणिकर्मवशादेष पटो यद्वत् प्रसारितः ॥ १८३ ॥
पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत् ।
प्राणिकर्मक्षयवशात् संकोचितपटो यथा ॥ १८४ ॥
रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने ।
तूष्णीम्भावमनोराज्ये इव सृष्टिलयाविमौ ॥ १८५ ॥
आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना ।
आरम्भपरिणामादिचोद्यानां नात्र सम्भवः ॥ १८६ ॥

क्रमप्राप्तस्य एष योनिरित्यस्यार्थमाह जगद्योनिरिति । प्रतिज्ञातार्थे प्रभवाप्ययौ हि भूतानामिति वाक्यं हेतुत्वेन योजयति प्रभवेति । प्रभवाप्ययौ उत्पत्तिप्रलयौ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः । उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थमाह आविर्भावेति । उत्पत्तिप्रलयौ आविर्भावतिरोभावौ मताविति योजना ॥ १८२ ॥

आविर्भावकारित्वं सदृष्टान्तमुपपादयति आविर्भावयतीति । यथा सङ्कुचितचित्रपटः स्वस्य प्रसारणेन स्वनिष्ठानि चित्राण्याविर्भावयति एवमीशोऽपीत्यर्थः ॥ १८३ ॥

तस्यैव प्रलयकारणत्वं दर्शयति पुनरिति । स एव पटः सङ्कुचितश्चित्राणि यथा तिरोभावयति तद्वदित्यर्थः ॥ १८४ ॥

आविर्भावतिरोभावयोर्दृष्टान्तान्तराणि दर्शयति रात्रिघस्राविति । स्पष्टोऽर्थः ॥ १८५ ॥

नन्वीश्वरस्य जगद्योनित्वं किमारम्भकत्वेन किं वा तदाकारपरिणामित्वेन नाद्यः अद्वितीयस्य द्वितीयारम्भकत्वायोगात् न द्वितीयः

अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा ।
चिदाभासांशतस्त्वेष जीवानां कारणं भवेत् ॥ १८७ ॥
तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनाम् ।
परः कारणतामेति भावनाज्ञानकर्मभिः ॥ १८८ ॥
इति वार्त्तिककारेण जड़चेतनहेतुता ।
परमात्मन एवोक्ता नेश्वरस्येति चेच्छृणु ॥ १८९ ॥
अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ।
ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ॥ १९० ॥
सत्यं ज्ञानमनन्तं यद् ब्रह्म तस्मात् समुत्थिताः ।
ख वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥ १९१ ॥

निरवयवस्य परिणामासम्भवादित्याशङ्क्य विवर्त्तवादाश्रयणान्नायं दोष इति परिहरति व्याविशतीति ॥ १८६ ॥

नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशङ्क्य जाड्यप्राधान्येनाचेतनोपादानं चित्प्राधान्येन चेतनोपादानञ्च भविष्यतीत्याह अचेतनानामिति ॥ १८७ ॥

ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्य्यैः परमात्मन एव तदभिधानादिति श्लोकद्वयेन शङ्कते तमःप्रधान इति । तमःप्रधानः तमोगुणप्रधानः मायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनाः संस्काराः ज्ञानं देवताध्यानादि, कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः ॥ १८८ ॥ १८९ ॥

त्वं पदार्थ इव तत्पदार्थेऽप्यधिष्ठानारोप्ययोरन्योऽन्याध्यासस्य विवक्षितत्वात् नैवमिति परिहरति अन्योऽन्याध्यासमिति ॥ १९० ॥

ननु सुरेश्वराचार्य्यैरीश्वरब्रह्मणोरन्योऽन्याध्यासः सिद्धवत्कृत्य

आपातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता ।
हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ॥ १९२ ॥
अन्योन्याध्यासरूपोऽसावन्नलिप्तः पटो यथा ।
घट्टितेनैकतामेति तद्वद् भ्रान्त्यैकतां गतः ॥ १९३ ॥
मेघाकाशमहाकाशौ विविच्येते न पामरैः ।
तद्वद् ब्रह्मेशयोरैक्यं पश्यन्त्यापातदर्शिनः ॥ १९४ ॥
उपक्रमादिभिर्लिङ्गैस्तात्पर्यस्य विचारणात् ।
असङ्गं ब्रह्म मायावी सृजत्येष महेश्वरः ॥ १९५ ॥

ध्यवधृत इति कुतोऽवगम्यत इत्याशङ्क्य श्रुत्यर्थपर्यालोचनयादिति दर्शयितुं श्रुतिमर्थतः पठति सत्यमिति ॥ १९१ ॥

भवत्वेषा श्रुतिरनया कथमन्योऽन्याध्यासावगतिरित्यत आह आपातेति । तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमापाततः प्रतीयमानमन्योऽन्याध्यासमन्तरेण न घटत इति भावः ॥ १९२ ॥

एवमन्योऽन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वोदाहृतघट्टितपटदृष्टान्तकरणेन द्रढयति अन्योऽन्येति ॥ १९३ ॥

भ्रान्त्यैकत्वापत्तौ दृष्टान्तमभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टान्तान्तरं दर्शयति मेघाकाशेति । ऐक्यं पश्यन्ति न भेदमित्यर्थः ॥ १९४ ॥

कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह उपक्रमेति । उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये इत्युक्तैः षड्विधैर्लिङ्गैः श्रुतितात्पर्यावधारणे सति ब्रह्मासङ्गं मायावी स्रष्टेत्यवगम्यत इति शेषः ॥ १९५ ॥

सत्यं ज्ञानमनन्तमित्युपक्रम्योपसंहृतः ।
यतो वाचो निवर्तन्त इत्यसङ्गत्वनिर्णयः ॥ १९६ ॥
मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया ।
अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ॥ १९७ ॥
आनन्दमय ईशोऽयं बहु स्यामित्यवैक्षत ।
हिरण्यगर्भरूपोऽभूत् सुप्तिः स्वप्नो यथा भवेत् ॥ १९८ ॥
क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति ।
द्विविधश्रुतिसद्भावात् द्विविधस्वप्नदर्शनात् ॥ १९९ ॥

श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनेनोक्तं ब्रह्मणोऽसङ्गत्वं स्पष्टयति सत्यमिति । अतोऽसङ्गत्वनिर्णयो भवतीति शेषः ॥ १९६ ॥

मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति मायीति । अस्मात् मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं दर्शयतीत्यर्थः ॥ १९७ ॥

एवमानन्दमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह आनन्दमय इति । ईक्षित्वा च हिरण्यगर्भरूपोऽभूदित्यन्वयः । तत्र दृष्टान्तमाह सुप्तिरिति ॥ १९८ ॥

तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः इत्यादौ क्रमेण सृष्टिश्रवणात् इदं सर्वमसृजतेति युगपच्छ्रवणाच्च कस्योपादेयत्वं कस्य वा हेयत्वमित्याकाङ्क्षायां श्रुतिबलादुभयमपि ग्राह्यमित्याह क्रमेणेति । एषा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात् क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना । तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति । लोके क्रमयुक्तस्य चाक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः ॥ १९९ ॥

सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः ।
सर्व्वाहंमानधारित्वात् क्रियाज्ञानादिशक्तिमान् ॥२००॥
प्रत्यूषे वा प्रदोषे वा मग्नो मन्दे तमस्ययम् ।
लोको भाति यथा तद्वदस्पष्टं जगदीक्ष्यते ॥ २०१ ॥
सर्वतो लाञ्छितो मस्या यथा स्याद् घट्टितः पटः ।
सूक्ष्माकारैस्तथेशस्य वपुः सर्व्वत्र लाञ्छितम् ॥ २०२ ॥
शस्यं वा शाकजातं वा सर्व्वतोऽङ्कुरितं यथा ।
कोमलं तद्वदेवैष पेलवो जगदङ्कुरः ॥ २०३ ॥
आतपाभातलोको वा पटो वा वर्णपूरितः ।
शस्यं वा फलितं यद्वत् तथा स्पष्टवपुर्विराट् ॥ २०४ ॥

हिरण्यगर्भस्य स्वरूपं निरूपयति सूत्रात्मेति । सूत्रात्मा पटे सूत्रमिव जगत्यनुस्यूत आत्मा स्वरूपं यस्य सः सूक्ष्मदेहाख्यः सूक्ष्मदेह इत्याख्या यस्य स तथाविधः सर्वजीवघनात्मकः सर्वेषां जीवानां लिङ्गशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः । तत्र हेतुः सर्वाहंमानेति । सर्वेषु व्यष्टिलिङ्गशरीरेषु अहमभिमानत्वादिति भावः । इच्छाज्ञानक्रियाशक्तिमांश्च ॥ २०० ॥

हिरण्यगर्भावस्थायां जगत्प्रतीतौ दृष्टान्तमाह प्रत्यूष इति । प्रत्यूषे उषःकाले ॥ २०१ ॥

एवं लोकप्रसिद्धदृष्टान्तमभिधाय यथा धौत इति पूर्वोक्तश्लोकेऽभिहितं लाञ्छितपटं दृष्टान्तयति सर्वत इति । तथा घट्टितः पटो मषीमयैराकारविशेषैर्लाञ्छितो भवति तथा मायिन ईश्वरस्य वपुरपञ्चीकृतभूतकार्यैर्लिङ्गशरीरैर्लाञ्छितमित्यर्थः ॥ २०२ ॥

पुष्टाारोहाय वैभवं दृष्टान्तान्तरमाह शस्यमिति ॥ २०३ ॥

एवं सूत्रात्मस्वरूपं निरूप्य तस्यैवावस्थाभेदं पञ्चीकृतभूत-

विश्वरूपाध्याय एष उक्तः सूक्तेऽपि पौरुषे ।
धात्रादिस्तम्बपर्यन्तानेतस्यावयवान् विदुः ॥ २०५ ॥

ईशसूत्रविराड्वेधोविष्णुरुद्रेन्द्रवह्नयः ।
विघ्नभैरवमैरालमारिका यक्षराक्षसाः ॥ २०६ ॥

विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः ।
अश्वत्थवटचूताद्या यवव्रीहितृणादयः ॥ २०७ ॥

जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः ।
ईश्वराः सर्व एवैते पूजिताः फलदायिनः ॥ २०८ ॥

यथा यथोपासते तं फलमीयुस्तथा तथा ।
फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ॥ २०९ ॥

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा ।
स्वप्रबोधं विना नैव स्वस्वप्नो हीयते यथा ॥ २१० ॥

कार्योपाधिकं विराजं दृष्टान्तत्वेन विशदयति आतपेति । सूर्योदयानन्तरमातपेन प्रकाशितलोक आतपाभातलोकः ॥ २०४ ॥

तत्सद्भावे प्रमाणमाह विश्वरूपेति । विश्वरूपाध्यायादौ कीदृक् रूपमुदितमित्याकाङ्क्षायां ब्रह्मादिस्तम्बपर्यन्तं जगत् तद्रूपमुदितमित्याह धात्रादीति ॥ २०५ ॥

एतावता प्रकृतं किमायातमित्याशङ्क्य अन्तर्यामिप्रभृति कुद्दालकादिपर्यन्तं वस्तुजातं प्रत्येकमीश्वरत्वेन पूज्यतामित्याह ईशेत्यादिना श्लोकत्रयेण ॥ २०६ ॥ २०७ ॥ २०८ ॥

तं यथा यथोपासते तदेव भवति इति श्रुतिस्तत्तत्पूजायां तत्तत्फलप्राप्तौ प्रमाणमित्याह यथा यथेति । ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशङ्क्य पूज्यानामधिष्ठानानां पूजानामर्चनादीनाञ्च निकृष्टादिभेदेन वैषम्यमित्याह फलोत्कर्षेति ॥ २०९ ॥

तर्हि ईश्वरपूजयैव भवतु मुक्तिः ब्रह्मोपासनाद्वा भवतीत्याशङ्क्य

अद्वितीयब्रह्मतत्त्वे स्वप्नो यमखिलं जगत् ।
ईशजीवादिरूपेण चेतनाचेतनात्मकम् ॥ २११ ॥
आनन्दमयविज्ञानमयावीश्वरजीवकौ ।
मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितम् ॥ २१२ ॥
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ २१३ ॥

ज्ञानव्यतिरेकेण न केनापि भवतीत्याह मुक्तिरिति । तत्र दृष्टान्तमाह स्वप्नबोधमिति । स्वजागरणमन्तरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्त्तते तथा ब्रह्मतत्त्वज्ञानमन्तरेण तदज्ञानकल्पितः स्वसंसारो न निवर्त्तत इति भावः ॥ २१० ॥

ननु द्वैतनिवृत्तिलक्षणायामुक्तेः स्वप्नदृष्टान्तेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्त्यस्य द्वैतस्य स्वप्नतुल्यत्वाभावादित्याशङ्क्यान्यथापह्नवरूपत्वेनास्य स्वप्नतुल्यत्वमस्त्येव । तथैतत् सुषुप्तं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वात् मैवमित्याह अद्वितीयेति । ईशजीवादिरूपेण वर्त्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्ति अयमद्वितीयब्रह्मतत्त्वे स्वप्न इति योजना ॥ २११ ॥

नन्वीशजीवयोर्ब्रह्माभिन्नयोः कथं जगदन्तःपातित्वमित्याशङ्क्य तयोर्मायाकल्पितत्वेन जगदन्तःपातित्वमित्याह आनन्दमयेति ॥ २१२ ॥

ताभ्यां सर्वं कल्पितमित्युक्तम् । तत्र केन कियत् कल्पितमित्याकाङ्क्षायामाह ईक्षणादीति । स ईक्षत लोकान्नु सृजा इत्यादिकया, एतया द्वारा प्रपद्यत इत्यन्तया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्त्तृका । तस्य त्रय आवसथा इत्यादिकया, स एतमेव पुरुषं ब्रह्मततममपश्यदित्यन्तया प्रतिपादितः संसारो जीवकर्त्तृक इत्यर्थः ॥ २१३ ॥

अद्वितीयं ब्रह्मतत्त्वमसङ्गं तन्न जानते ।
जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः ॥ २१४ ॥
ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयम् ।
अनुशोचाम एवान्यान् न भ्रान्तैर्विवदामहे ॥ २१५ ॥
वृक्षार्चकादियोगान्ता ईश्वरभ्रान्तिमाश्रिताः ।
लोकायतादिसांख्यान्ता जीवविभ्रान्तिमाश्रिताः ॥२१६॥
अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा ।
भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखम् ॥२१७
उत्तमाधमभावश्चेत् तेषां स्यादस्तु तेन किम् ।
स्वप्नस्थराज्यभिक्षाभ्यां न बुधः स्पृश्यते खलु ॥ २१८ ॥

ननु ब्रह्मण एव पारमार्थिकत्वे वादिनां जीवेश्वरतत्त्वविषया विप्रतिपत्तिः कुत इत्याशङ्क्य श्रुतिसिद्धतत्त्वज्ञानशून्यत्वादित्याह अद्वितीयमिति ॥ २१४ ॥

जीवेश्वरविषयायाः वादिविप्रतिपत्तेरज्ञानमूलत्वे तथाविधतत्त्वेन ते बोधनीया इत्याशङ्क्य उपायाभावान्नेत्याह ज्ञात्वेति ॥ २१५ ॥

ईश्वरे जीवे च भ्रान्त्या विप्रतिपन्नान् वादिनो विभज्य दर्शयति वृक्षार्चकादीति ॥ २१६ ॥

कुतो भ्रान्तत्वं तेषामित्यत आह अद्वितीयेति । ततः किं तत्राह भ्रान्ता इति । परिच्छिन्नतत्त्वप्रतिपादनाभिनिवेशेन चित्तविक्षेपानुभावा-दैहिकमपि सुखं नैवेत्याह क्वेह वा सुखमिति ॥ २१७ ॥

ननु तेषां ब्रह्मविद्याभावेऽपि इतरविद्याप्रयुक्त उत्तमाधमभावो दृश्यते तत उत्तमत्वप्रयुक्तं सुखं तेषामस्तु इत्याशङ्क्य तस्य बुद्धिम-द्भिरनादरणीयत्वं दृष्टान्तेनाह उत्तमेति ॥ २१८ ॥

तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः ।
कार्य्या किन्तु ब्रह्मतत्त्वं विचार्य्य बुध्यतां च तत् ॥२१९॥
पूर्वपक्षतया तौ चेत् तत्त्वनिश्चयहेतुताम् ।
प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैतावता श्रमः ॥ २२० ॥
असङ्गचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः ।
योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेच्छृणु ॥ २२१ ॥
न तत्त्वमोरुभावार्थावस्मत्सिद्धान्ततां गतौ ।
अद्वैतबोधनायैव सा कक्षा काचिदिष्यते ॥ २२२ ॥

जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावात् न मुमुक्षुभिस्तत्र मतिर्निवेशनीयेति उपसंहरति तस्मादिति । तर्हि किं कर्त्तव्यमित्याशङ्क्य श्रुतिविचारेण ब्रह्मबोध एव कर्त्तव्यः इत्याह किन्त्विति ॥ २१९ ॥

ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशङ्क्य तथात्वे जीवेशवादयोरेव बुद्धिं न परिसमापनीयेत्याह पूर्वेति । एतावता पूर्वपक्षतया तत्त्वनिश्चयहेतुत्वसम्भवेन तयोर्जीवेशवादयोरेव श्रमो विवेकज्ञानशून्यो न निमज्जस्वेति योजना ॥ २२० ॥

ननु सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन भवद्भिरप्युपादेयत्वाच्च तयोः पूर्वपक्षत्वमिति शङ्कते असङ्गेति ॥ २२१ ॥

सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेऽपि तयोर्वास्तवभेदस्य तैरङ्गीकृतत्वादाम्नायसम्मतसिद्धान्त इत्याह नेति । तत्त्वम्पदयोरुभावर्थौ अस्मत्सिद्धान्तत्वं न गताविति योजना । ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्त्वम्पदार्थौ भवद्भिरपि भिन्नौ निरूपिताविति चाशङ्क्याह अद्वैतबोधनायैवेति । लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनोदितौ न तु तयोर्भेदः प्रतिपाद्यत इति भावः ॥२२२॥

अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ ।
मन्यन्ते तद्व्युदासाय केवलं शोधनं तयोः ॥ २२३ ॥
अत एवात्र दृष्टान्तो योग्यः प्राक् सम्यगीरितः ।
घटाकाशमहाकाशजलाकाशाभ्रखात्मकः ॥ २२४ ॥
जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः ।
आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ ॥ २२५ ॥
एवमानन्दविज्ञानमयौ मायाधियोर्वशौ ।
तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले ॥ २२६ ॥
एतत्कक्षोपयोगेन सांख्ययोगौ मतौ यदि ।
देहोऽन्नमयकक्षत्वादात्मत्वे नाभ्युपेयताम् ॥ २२७ ॥

तर्हि पदार्थशोधनं किमर्थमित्यत आह अनादीति । अत्र माया-शब्देन स्वाश्रयव्यामोहिकाऽविद्या लक्ष्यते तया विपरीतज्ञानं प्राप्ताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वमीश्वरस्य पारमार्थिकं मन्यन्ते अतस्तन्निरासार्थमेव शोधनं क्रियत इति भावः ॥ २२३ ॥

पदार्थशोधनप्रकारमेव दिदर्शयिषुस्तदुपायत्वेन पूर्वोक्तदृष्टान्तं स्मारयति अत इति । यतः पदार्थशोधनं कर्तव्यमत एवेत्यर्थः ॥ २२४ ॥

पदार्थशोधनप्रकारमाह जलेति । ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपारमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाभ्रोपाधिरहिताकाशमात्ररूपावित्यर्थः ॥ २२५ ॥

दार्ष्टान्तिकमाह एवमिति ॥ २२६ ॥

ननु पदार्थद्वयशोधनकक्षोपयोगित्वेनापि सांख्ययोगमतद्वयमङ्गी-कार्यमिति चेत् अत्रास्माभिरिदमुच्यते इतरेषामपि शास्त्राणां तत्तत्कक्षो-पयोगित्वात्तावन्मात्रमभ्युपेयत्वादित्याह एतदिति ॥ २२७ ॥

आत्मभेदो जगत् सत्यमीशोऽन्य इति चेत् त्रयम् ।
त्यज्यते तैस्तदा सांख्ययोगवेदान्तसम्मतिः ॥ २२८ ॥
जीवासङ्गत्वमात्रेण कृतार्थ इति चेत् तदा ।
स्रक्चन्दनादिनित्यत्वमात्रेणापि कृतार्थता ॥ २२९ ॥
यथा स्रगादिनित्यत्वं दुःसम्पाद्यं तथात्मनः ।
असङ्गत्वं न सम्भाव्यं जीवतोर्जगदीशयोः ॥ २३० ॥
अवश्यं प्रकृतिः सङ्गं पुरेवापादयेत् तथा ।
नियच्छत्येतमीशोऽपि कोऽस्य मोक्षस्तथा सति ॥२३१॥
अविवेककृतः सङ्गो नियमश्चेति चेत् तदा ।
बलादापतितो मायावादः सांख्यस्य दुर्मतेः ॥ २३२ ॥

कुतस्तर्हि सांख्ययोगयोर्वेदान्तविरोधित्वमित्याशङ्क्य जीवभेदजगत्सत्यत्वेश्वरतटस्थत्वलक्षणेऽंशे इत्याह आत्मभेद इति ॥ २२८ ॥

ननु जीवस्यासङ्गत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधेनेत्याशङ्क्य अद्वैतज्ञानमन्तरेणासङ्गत्वादिकं न सम्भाव्यत इत्यभिसन्धिं हृदि निधायोत्तरमाह जीवेति ॥ २२९ ॥

अभिसन्धिमाविष्करोति यथेति । जीवतोर्विशेष्यविशेषणाकारेण भासमानयोः ॥ २३० ॥

असम्भवमेव घटयति अवश्यमिति । फलितमाह कोऽस्येति ॥ २३१ ॥

सङ्गनियमयोरविवेककार्यत्वाद् विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पुनः सङ्गाद्युत्पत्तिरिति शङ्कते अविवेकेति । एवं सत्यपसिद्धान्तापात इति परिहरति तदा बलादिति । अयम्भावः अविवेको नाम किं विवेकाभावः किं वा तदन्यः उत तद्विरोधी, नाद्यः अभावमात्रस्य भावकार्यजनकत्वायोगात् न द्वितीयः विवेकादन्यस्य घटादेः सङ्गहेतुत्वा-

बन्धमोक्षव्यवस्थार्थमात्मनानात्वमिष्यताम् ।
इति चेन्न यतो माया व्यवस्थापयितुं क्षमा ॥ २३३ ॥
दुर्घटं घटयामीति विरुद्धं किं न पश्यसि ।
वास्तवौ बन्धमोक्षौ तु श्रुतिर्न सहते तराम् ॥ २३४ ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ २३५ ॥
मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ ।
यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि ॥ २३६ ॥

दर्शनात् तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति मायावादप्रसङ्ग इति ॥ २३२ ॥

अद्वैताभ्युपगमे बन्धमोक्षव्यवस्थानुपपत्तेरात्मभेदोऽङ्गीकर्त्तव्य इति चोदयति बन्धमोक्षेति । एकस्याप्यात्मनो मायया बन्धमोक्षव्यवस्थोपपत्तेर्नैवमिति परिहरति न यत इति ॥ २३३ ॥

मायापि कथं व्यवस्थापयेदित्याशङ्क्य तस्या दुर्घटकारित्वस्वभावत्वादित्यभिप्रेत्याह दुर्घटमिति । बन्धस्याविद्याकृतत्वेऽपि मोक्षो वास्तवोऽभ्युपेतव्य इत्याशङ्क्य श्रुतिविरोधान्नैवमित्याह वास्तवाविति । न सहते तरामिति तरां नैव सहते इत्यर्थः । बन्धमिव मोक्षमपि वास्तवं न सहत इति भावः ॥ २३४ ॥

मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति न निरोध इति । निरोधो नाशः उत्पत्तिर्जन्म बद्धः सुखदुःखादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसम्पन्नः मुक्तः निवृत्ताविद्य इत्येतत् सर्वं वस्तुतो नास्तीत्यर्थः ॥ २३५ ॥

एवं जीवेश्वरादिभेदस्य मायामयत्वमुपसंहरति मायाख्याया इति ॥ २३६ ॥

कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि ।
घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् ॥ २३७ ॥
यदद्वैतं श्रुतं सृष्टेः प्राक् तदेवाद्य चोपरि ।
मुक्तावपि वृथा माया भ्रामयत्यखिलान् जनान् ॥ २३८ ॥
ये वदन्तीत्थमेतेऽपि भ्राम्यन्तेऽविद्ययात्र किम् ।
न यथा पूर्वमेतेषामत्र भ्रान्तेरदर्शनात् ॥ २३९ ॥
ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः ।
न भाति नास्ति चाद्वैतमित्यज्ञानिविनिश्चयः ॥ २४० ॥

ननु जीवेशयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेऽपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोऽपि पारमार्थिकः स्यादित्याशङ्क्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति कूटस्थेति । नाममात्रात् भेदप्रतीतावपि वस्तुतो भेदाभावे दृष्टान्तं पूर्वोक्तं स्मारयति घटाकाशेति ॥ २३७ ॥

एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्यत आह यदद्वैतमिति । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतौ यत् सदद्वितीयं ब्रह्म प्रतिपादितं तदेव कालत्रयेऽप्यबाध्यत्वेन वास्तवं न भेद इति भावः । कुतस्तर्हि सर्वैर्भेदेऽभिनिवेशः क्रियते इत्यत आह वृथा मायेति तत्त्वज्ञानरहितत्वात् अभिनिवेशं कुर्वन्तीति भावः ॥ २३८ ॥

ननु प्रपञ्चस्य मायामयत्वं तत्त्वस्याद्वितीयत्वञ्च ये वर्णयन्ति तेऽपि संसरन्तो दृश्यन्ते अतस्तत्त्वज्ञानेन किं प्रयोजनमिति शङ्कते ये वदन्तीति । कर्मवशात् तेषाञ्चित् व्यवहारे सत्यपि पूर्ववदभिनिवेशाभावान्नैवमिति परिहरति न यथेति ॥ २३९ ॥

ज्ञानिनं भ्रान्त्यभावं दर्शयितुमज्ञानिनां संसारे निश्चयं तावदाह ऐहिकेति । इह लोके भवः ऐहिकः पुत्रकलत्रादिपोषणरूपः अमुष्मिन् परलोके भवः आमुष्मिकः स्वर्गसुखाद्यनुभवरूपः ॥ २४० ॥

ज्ञानिनां विपरीतोऽस्मान्निश्चयः सम्यगीक्ष्यते ।
स्वस्वनिश्चयतो बद्धो मुक्तोऽहं वेति मन्यते ॥ २४१ ॥
नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात् ।
अशेषेण न भातं चेद् द्वैतं किं भासतेऽखिलम् ॥ २४२ ॥
दिङ्मात्रेण विभानं तु द्वयोरपि समं खलु ।
द्वैतसिद्धिवदद्वैतसिद्धिस्ते तावता न किम् ॥ २४३ ॥
द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदम् ।
चिद्भानं त्वविरोध्यस्य द्वैतस्यातोऽसमे उभे ॥ २४४ ॥

तत्त्वज्ञविनिश्चयस्य ततो वैलक्षण्यं दर्शयति ज्ञानिनामिति । अद्वैतं पारमार्थिकम् अस्ति भाति च, संसारस्त्वपारमार्थिकस्तु इति निश्चय इत्यर्थः । ततः किमित्याशङ्क्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह स्वस्वेति ॥ २४१ ॥

अद्वैतं भातीत्युक्तं शास्त्रत एव नानुभवतः अतो न तन्निश्चय इति शङ्कते नाद्वैतमिति । अनुभवगोचरत्वमस्त्येवेति परिहरति न चिद्रूपेणेति । घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूतस्फुरणरूपेण भासनादित्यर्थः । ननु चिद्रूपत्वस्य भानेऽपि तत् कार्त्स्न्येन न प्रतीयत इति शङ्कते अशेषेणेति । साकल्येन भानाभावः द्वैतेऽपि समान इत्याह द्वैतमिति ॥ २४२ ॥

एवं दोषसाम्यमभिधाय परिहारसाम्यमाह दिङ्मात्रेणेति । दिङ्मात्रेणैकदेशेन द्वयोर्द्वैताद्वैतयोरित्यर्थः । एतावता कथं परिहार-साम्यमित्याशङ्क्याह द्वैतसिद्धिवदिति । ते तव पक्षे तावता एकदेश-प्रतीतिमात्रेण द्वैतसिद्धिवत् द्वैतनिश्चयवदद्वैतसिद्धिरद्वैतनिश्चयो-ऽपि न किं सम्भवति किन्तु सम्भवत्येवेत्यर्थः ॥ २४३ ॥

पूर्ववादी प्रकारान्तरेणाद्वैतासिद्धिं शङ्कते द्वैतेनेति । अद्वैतं द्वैत-रहितं तयोः परस्परविरोधात् तथा सति द्वैतप्रतीतावद्वैतं न

एवं तर्हि शृणु द्वैतमसन्मायामयत्वतः ।
तेन वास्तवमद्वैतं परिशेषाद् विभासते ॥ २४५ ॥
अचिन्त्यरचनारूपं मायैव सकलं जगत् ।
इति निश्चित्य वस्तुत्वमद्वैते परिशिष्यताम् ॥ २४६ ॥
पुनर्द्वैतस्य वस्तुत्वं भाति चेत् त्वं तथा पुनः ।
परिशीलय को वात्र प्रयासस्तेन ते वद ॥ २४७ ॥
कियन्तं कालमिति चेत् खेदोऽयं द्वैत इष्यताम् ।
अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात् ॥ २४८ ॥

सम्प्रतीत्यर्थः । ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैते प्रतिभासमाने द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशङ्क्याह पूर्ववादी चिद्भानमस्त्विति । भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वात् तस्याश्च द्वैतविरोधित्वाभावादुभयोः साम्यमिति भावः ॥ २४४ ॥

प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्न वास्तवाद्वैतविघातित्व-मिति परिहरति सिद्धान्ती एवमिति । प्रसक्तप्रतिषेधेऽन्यत्राप्रसङ्गाच्छिष्य-माणे संप्रत्ययः परिशेषः ॥ २४५ ॥

परिशेषप्रकारमेव दर्शयति अचिन्त्येति । न चिन्त्याचिन्त्या रचना-रूपं यस्य तत् तथाविधं सकलं जगन्मायैव मिथ्यैवेत्यनेन प्रकारेणा-निर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वास्तवमद्वैतमेव परिशिष्यता-मित्यर्थः ॥ २४६ ॥

नन्वेवमद्वैतनिश्चये कृतेऽपि पुनर्द्वैतसत्यत्वं पूर्ववासनया भातीत्या-शङ्क्य तन्निवृत्तये पुनः पुनर्मिथ्यात्वं विचारयेदित्याह पुनर्द्वैतस्येति । आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये व्यासेन श्रवणाद्यावर्तनस्य विहि-तत्वादिति भावः ॥ २४७ ॥

कियन्तं कालमित्थं विचारणीयमित्याशङ्क्य तत्रापरोक्षविद्याप्ती

क्षुत्पिपासादयो दृष्टा यथापूर्वं मयीति चेत् ।
मच्छब्दवाच्येऽहङ्कारे दृश्यतां नेति को वदेत् ॥ २४९ ॥
चिद्रूपेऽपि प्रसज्येरन् तादात्म्याध्यासतो यदि ।
माध्यासं कुरु किन्तु त्वं विवेकं कुरु सर्वदा ॥ २५० ॥
झटित्यध्यास आयाति दृढवासनयेति चेत् ।
आवर्त्तयेद्द्विवेकञ्च दृढं वासयितुं सदा ॥ २५१ ॥
विवेके द्वैतमिथ्यात्वं युक्त्यैवेति न भण्यताम् ।
अचिन्त्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी ॥ २५२ ॥

विचारोऽयं समाप्यत इति विचारकालावधेरुक्तत्वाद्द्वैतविचारेऽयं खेदो युक्तः किन्तु द्वैतप्रतिभास एव युक्त इत्याह कियन्तमिति ॥२४८॥

नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवत्यपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शङ्कते क्षुत्पिपासादय इति । किं मच्छब्दवाच्येऽहङ्कारे दृश्यन्ते उत मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमङ्गीकरोति मच्छब्दवाच्य इति । न द्वितीयः तस्यासङ्गत्वाच्चेति वह्निरेव द्रष्टव्यम् ॥ २४९ ॥

वस्तुतस्तत्प्रसक्त्यभावेऽपि भ्रान्त्या तत्प्रसक्तिः स्यादिति शङ्कते चिद्रूपेऽपीति । एवं तर्ह्यनर्थहेतोरध्यासस्य निवृत्तये सदा विवेकः क्रियतामित्याह माध्यासमिति ॥ २५० ॥

अनादिवासनावशात् पुनः पुनरध्यासस्यागमने तन्निवृत्तये विवेक एवावर्त्तनीयो नोपायान्तरमित्याह झटितीति ॥ २५१ ॥

ननु विचारेण द्वैतस्य मायामयत्वं युक्त्यैव सिध्यति नानुभवत इत्याशङ्क्याचिन्त्यरचनात्वलक्षणमिथ्यात्वानुभवस्य स्वसाक्षिकत्वान्नैवमिति परिहरति विवेक इति ॥ २५२ ॥

चिदप्यचिन्त्यरचना यदि तर्ह्यस्तु नो वयम्।
चितिं स्वचिन्त्यरचनां ब्रूमो नित्यत्वकारणात् ॥२५३॥
प्रागभावो नानुभूतश्चितेर्नित्या ततश्चितिः।
द्वैतस्य प्रागभावस्तु चैतन्ये नानुभूयते ॥ २५४ ॥

नन्वचिन्त्यरचनात्वं मिथ्यापदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शङ्कते चिदपीति। प्रागभावयुतत्वे सति अचिन्त्यरचनात्वं मिथ्यात्वलक्षणमिति विवक्षुरचिन्त्यरचनात्वमात्मनोऽङ्गीकरोति तर्ह्यस्त्विति। एवमङ्गीकारेऽपसिद्धान्त आपतेदित्याशङ्क्य परिहरति नो वयमिति। तत्र हेतुमाह नित्यत्वेति। वयं चितिं स्वचिन्त्यरचनां नो ब्रूम इति योजना ॥ २५३ ॥

चितेर्नित्यत्वं कुत इत्याशङ्क्य प्रागभावाननुभवादित्याह प्रागभाव इति। यतः चितेः प्रागभावो नानुभूतस्ततो नित्येति योजना। इदमत्राकूतं चितेः प्रागभावोऽस्तीति वदन् प्रष्टव्यः चित्प्रागभावः किं चितानुभूयते उतान्येन तस्य जडत्वेनानुभवितृत्वानुपपत्तेः, चितानुभूयत इत्यपि पक्षे किं चिदन्तरेण उत स्वेनैव नाद्यः चिदद्वैतवादे चिदन्तरस्याभावात् तदङ्गीकारेऽपि चित्प्रतियोगिकस्याभावस्य चिद्ग्रहणमन्तरेण ग्रहीतुमशक्यत्वात् तस्या अपि स्वग्राह्यत्वे घटादिवदचित्त्वापत्तेः नापि द्वितीयः स्वाभावस्य स्वेन ग्रहीतुमशक्यत्वादिति। ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात् तदभावस्य च तेनैवानुभवितुमशक्यत्वात् तदनुभवित्रन्तराभावाच्च चैतन्यवद्द्वैतस्यापि नित्यत्वापत्तिरित्याशङ्क्य नानुभवित्रन्तराभावो सिद्ध इति परिहरति द्वैतस्येति। जाग्रदादिद्वैताभावस्य सुषुप्तौ साक्षिणानुभूयमानत्वात् अतः साक्षी द्वैतस्य साक्षीति श्रुतेश्चेति भावः ॥ २५४ ॥

प्रागभावयुतं द्वैतं रच्यते हि घटादिवत्।
तथापि रचना चिन्त्या मिथ्या तेनेन्द्रजालवत्॥ २५५॥
चित् प्रत्यक्षा ततोऽन्यस्य मिथ्यात्वं चानुभूयते।
नाद्वैतमपरोक्षञ्चेत्येतन्न व्याहतं कथम्॥ २५६॥
इत्थं ज्ञात्वाप्यसन्तुष्टाः केचित् कुत इतीर्य्यताम्।
चार्व्वाकादेः प्रबुद्धस्याप्यात्मा देहः कुतो वद॥ २५७॥
सम्यक् विचारो नास्त्यस्य धीदोषादिति चेत् तथा।
असन्तुष्टास्तु शास्त्रार्थं न त्वीक्षन्ते विशेषतः॥ २५८॥

एवं प्रागभावयुतत्वे सति अचिन्त्यरचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावात् द्वैतमिथ्यात्वं सिद्धमित्याह प्रागभावेति। प्रागभावयुतमिति हेतुगर्भितं विशेषणं द्वैतं प्रागभावयुतत्वात् घटादिवद् रच्यते हि तथापि रच्यमानत्वेऽपि तस्य द्वैतस्य रचना अचिन्त्या तेन रच्यमानत्वे सत्य-चिन्त्यरचनात्वेनेन्द्रजालवदैन्द्रजालिकप्रासादादिवन्मिथ्यैवेत्यर्थः॥ २५५॥

चितस्तावत् स्वप्रकाशत्वेन नित्यापरोक्षा च भासते चिद्व्यतिरि-क्तस्य च मिथ्यात्वं तथैव चितानुभूयते इति दर्शितम्। एवञ्च सत्यद्वै-तस्यापरोक्षं नास्तीति वदतो व्याघातश्च स्यादित्याह चित्प्रत्यक्षेति। नाद्वैतमपरोक्षञ्चेच्चिद्रूपेण भासमानादित्यभिहितयुक्तिसमुच्चयार्थश्च शब्दः अद्वैतमपरोक्षं नेत्येतत् कथं न व्याहतमिति योजना॥ २५६॥

एवं वेदान्तार्थं जानतामपि पुरुषाणां केषाञ्चिदद्य विश्वासः कुतो न जायते इति पृच्छन्तं दर्शयति। सम्यग्विचारशून्यत्वादिति विवक्षुः प्रतिबन्दिं गृह्णाति चार्वाकादेरिति आदिशब्देन पामरा गृह्यन्ते प्रबु-द्धस्योहापोहकुशलस्य॥ २५७॥

प्रतिबन्दीमोचनं शङ्कते सम्यगिति। बाढेन समाधत्ते तथेति। धीदोषादित्यनुषज्यते तथाशब्द एव शब्दार्थः॥ २५८॥

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः ।
इति श्रौतं फलं दृष्टं नेति चेद् दृष्टमेव तत् ॥ २५९ ॥
यदा सर्वे प्रभिद्यन्ते हृदयग्रन्थयस्त्विति ।
कामा ग्रन्थिस्वरूपेण व्याख्याता वाक्यशेषतः ॥ २६० ॥
अहङ्कारचिदात्मानावेकीकृत्याविवेकतः ।
इदं मे स्यादिदं मे स्यादितीच्छाः कामशब्दिताः ॥२६१॥
अप्रवेश्य चिदात्मानं पृथक् पश्यन्नहङ्कृतिम् ।

इत्थं तत्त्वं विचार्य्य तज्जन्यतत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादिकां श्रुतिं पठति यदेति । अथ मर्त्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मन्त्रस्योत्तरार्द्धम्, अस्य मनुष्यस्य हृदि श्रिता ये कामास्तादात्म्याध्यासमूला इच्छादयः सन्ति ते सर्वे यदा यस्मिन् काले प्रमुच्यन्ते तत्त्वज्ञानेनाध्याससन्निवृत्तौ निवर्त्तन्ते अथ तदानीमेव मर्त्त्यः पूर्वं देहतादात्म्याध्यासेन मरणधर्म्मा पुरुषः अमृतः अध्यासाभावेन तद्रहितो भवति । तत्र हेतुमाह अत्र ब्रह्म समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः । श्रुत्या प्रतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं किन्तु शास्त्रैकवेद्यमिति शङ्कते इति श्रौतमिति । समनन्तरश्रुतिवाक्यतात्पर्य्यालोचनया तस्य दृष्टत्वं सिध्यतीत्यभिप्रायेण परिहरति दृष्टमेव तदिति ॥ २५९ ॥

तस्य दृष्टत्वस्पष्टीकरणाय तद्वाक्यमुदाहृत्य तदर्थमाह यदा सर्व इति । अनेन वाक्यशेषेण कामप्रमोकस्य ग्रन्थिभेदत्वेन व्याख्यातत्वात् ग्रन्थिभेदस्य चाहङ्कारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वात्तस्य प्रत्यक्षतेति भावः वाक्यशेषत इत्यनेन वाक्येनेत्यर्थः ॥ २६० ॥

ननु लोके कामशब्देनेच्छाभेद एवोच्यते अतः कथं तस्य ग्रन्थित्वेन व्याख्यानमित्याशङ्क्याध्यासमूलस्यैवेच्छाविशेषस्य कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह अहङ्कारेति ॥ २६१ ॥

नन्वध्यासमूलस्यैव कामस्य त्याज्यत्वे सतीतरोऽप्युपेक्ष्यः स्यादि-

इच्छंस्तु कोटिवस्तूनि न बाधो ग्रन्थिभेदतः ॥ २६२ ॥
ग्रन्थिभेदेऽपि संभाव्या इच्छाः प्रारब्धदोषतः ।
बुद्धापि पापबाहुल्यादसन्तोषो यथा तव ॥ २६३ ॥
अहङ्कारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा ।
वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत् ॥ २६४ ॥
ग्रन्थिभेदात् पुराप्येवमिति चेत् तन्न विस्मर ।
अयमेव ग्रन्थिभेदस्तव तेन कृती भवान् ॥ २६५ ॥
नैवं जानन्ति मूढाश्चेत् सोऽयं ग्रन्थिर्न चापरः ।
ग्रन्थितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ॥ २६६ ॥

त्याशङ्क्याबाधकत्वादभ्युपेयत एवेत्याह अप्रवेश्येति । अहङ्कारे चिदात्मानम् अप्रवेश्य तादात्म्याध्यासेनानन्तभोग्येत्यर्थः ॥ २६२ ॥

नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशङ्क्यारब्धकर्मवशात् तेषामुत्पत्तिः सम्भविष्यतीत्याह ग्रन्थिभेदेऽपीति । तत्र दृष्टान्तमाह बुद्धापीति ॥ २६३ ॥

अध्यासाभावेऽहङ्कारगतेच्छादेरबाधकत्वं दृष्टान्तद्वयप्रदर्शनेन विशदयति अहङ्कारेति । यथा देहगतव्याध्यादिभिरहङ्कारसाक्षिणो बाधो नास्ति देहसम्बन्धरहितत्वात् यथा वृक्षादिगतैर्जन्मादिभिः एवम् अध्यासनिवृत्तावहङ्कारगतेच्छादिभिरपीति भावः ॥ २६४ ॥

चिदात्मनोऽसङ्गत्वस्वैकरूपत्वात् पूर्वमपि कामादिभिर्बाधो नासीदित्याशङ्कते ग्रन्थिभेदादिति । एवंविधबोधस्यैव ग्रन्थिभेदत्वेनास्माभिरभिधीयमानत्वादिदं चोद्यमयुक्तमित्याह तन्न विस्मरेति ॥ २६५ ॥

एवंविधज्ञानाभाव एव ग्रन्थिरित्याह नैवमिति । ननु ज्ञानिनोऽपीच्छाभ्युपगमे ज्ञान्यज्ञानिनोः कुतो वैलक्षण्यमित्याशङ्क्य ग्रन्थिभेदाभेदातिरेकेण न कुतोऽपीत्याह ग्रन्थितद्भेदेति ॥ २६६ ॥

प्रवृत्तौ वा निवृत्तौ वा देहेन्द्रियमनोधियाम् ।
न किञ्चिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ॥ २६७ ॥
व्रात्यश्रोत्रिययोर्वेदपाठापाठकृता भिदा ।
नाहारादावस्ति भेदः सोऽयं न्यायोऽत्र योज्यताम् ॥ २६८ ॥
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ।
उदासीनवदासीन इति ग्रन्थिभिदोच्यते ॥ २६९ ॥
औदासीन्यं विधेयञ्चेद् वच्छब्दव्यर्थता तदा ।
न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ॥ २७० ॥
तत्त्वबोधं क्षयव्याधिं मन्यन्ते ये महाधियः ।
तेषां प्रज्ञातिविशदा किं तेषां दुःशकं वद ॥ २७१ ॥
भरतादेरप्रवृत्तिः पुराणोक्तेति चेत् तदा ।
जक्षत् क्रीडन् रतिं विन्दन्नित्यश्रौषीर्न किं श्रुतिम् ॥ २७२ ॥

कारणान्तराभावमेव विशदयति प्रवृत्ताविति ॥ २६७ ॥

उक्तार्थे दृष्टान्तमाह व्रात्येति ॥ २६८ ॥

ज्ञानिनो ग्रन्थिशून्यत्वे गीतावाक्यं प्रमाणयति न द्वेष्टीति । संप्रवृत्तानि प्राप्तानि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न काङ्क्षति उदासीनवद् वर्त्तत इत्यर्थः । ग्रन्थिभिदा ग्रन्थिभेदः ॥ २६९ ॥

इदं वाक्यमौदासीन्यविधिपरं न तु ग्रन्थिभेदे प्रमाणमिति शङ्कते औदासीन्यमिति । विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परिहरति वच्छब्देति । ज्ञानिनो देहादेरकार्य्यक्षमत्वादप्रवृत्तिर्न तु ग्रन्थिभेदादित्याशङ्क्योपहसति न शक्ता इति ॥ २७० ॥

भवतु को दोषस्तत्राह तत्त्वबोधमिति । दुःशकमसाध्यमित्यर्थः ॥ २७१ ॥

ननु स्थाने परिहासोऽयं ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादित्याशङ्कते भरतादेरिति । श्रुतिमजानन्नेवं वदसीति परिहरति जक्ष-

न ह्याहारादि संत्यज्य भरताद्याः स्थिताः क्वचित्।
काष्ठपाषाणवत् किन्तु सङ्गभीता उदासते ॥ २७३ ॥
सङ्गी हि बाध्यते लोकैर्निःसङ्गः सुखमश्नुते।
तेन सङ्गः परित्याज्यः सर्वदा सुखमिच्छता ॥ २७४ ॥
अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा।
मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धान्त उच्यते ॥ २७५ ॥
वैराग्यबोधोपरमाः सहायास्ते परस्परम्।
प्रायेण सह वर्त्तन्ते वियुज्यन्ते क्वचित् क्वचित् ॥ २७६ ॥

दिति। जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमिति श्रौतवाक्यं नास्मार्षीरित्यर्थः। जक्षद् भक्षयन् जक्षभक्षहसनयोरिति धातुः, क्रीडन् स्वेच्छया विहरन् रममाणः स्त्र्यादिभिः नोपजनं स्मरन्निदं शरीरमित्युपजनं जनानां समीपे वर्त्तमानमिदं शरीरं न स्मरन् नानुसन्दधान इत्यर्थः श्लोके रतिं विन्दतीति श्रौतस्य रममाण इति पदस्य व्याख्यानम् ॥ २७२ ॥

ननु तर्हि पुराणस्य का गतिरित्याशङ्क्य पुराणमप्यौदासीन्यबोधपरं न प्रत्यक्षपरमित्यभिप्रेत्याह न ह्याहारादीति ॥ २७३ ॥

सङ्गोऽपि कृतदुःखत्वात् त्यक्त इत्याह सङ्गी हीति ॥ २७४ ॥

ननु तर्हि भारतादावेव ज्ञानिनोऽन्तःसङ्गशून्यानां बहिर्व्यवहारवत्ता शुक्रलिखितादेर्जनैः कथमुच्यत इत्याशङ्क्य शास्त्रतात्पर्यानभिज्ञत्वादित्याह अज्ञात्वेति। यतो मूढव्यवहारो नाम विचारणीय इत्याह मूर्खाणामिति। तर्हि किमस्मत्सिद्धान्ताकाङ्क्षायां शास्त्रहृदयमित्याह अस्मत्सिद्धान्त इति ॥ २७५ ॥

कोऽसावित्यत आह वैराग्येति ॥ २७६ ॥

हेतुस्वरूपकार्याणि भिन्नान्येषामसङ्करः ।
यथावदवगन्तव्यः शास्त्रार्थं प्रविविच्यता ॥ २७७ ॥
दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता ।
असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ॥ २७८ ॥
श्रवणादित्रयं तद्वत् तत्त्वमिथ्याविवेचनम् ।
पुनर्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ॥ २७९ ॥
यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः ।
स्युर्हेत्वाद्या उपरतेरित्यसङ्कर ईरितः ॥ २८० ॥
तत्त्वबोधः प्रधानं स्यात् साक्षान्मोक्षप्रदत्वतः ।
बोधोपकारिणावेतौ वैराग्योपरमावुभौ ॥ २८१ ॥

वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनादभेदाशङ्कायां तद्धेत्वादीनां भेदात् भेदोऽवगन्तव्य इत्याह हेतुस्वरूपेति ॥ २७७ ॥

तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति दोषदृष्टिरिति ॥ २७८ ॥

इदानीं तत्त्वबोधस्य कारणादीनि दर्शयति श्रवणादीति । आदिशब्देन मनननिदिध्यासने गृह्येते । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानात् श्रवणादीनां हेतुत्वं तत्त्वमिथ्याविवेचनं कूटस्थाहङ्कारादेर्भेदज्ञानं ग्रन्थेरनुदयोऽन्योन्याध्यासानुत्पत्तिः ॥ २७९ ॥

उपरतेस्तानि दर्शयति यमादिरिति । आदिशब्देन नियमादयो गृह्यन्ते धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः ॥ २८० ॥

किमेतेषां समप्राधान्यमुत नेत्याशङ्क्याह तत्त्वबोध इति । तमेव विदित्वातिमृत्युमेति । नान्यः पन्था विद्यतेऽयनायेति श्रुतेरित्यर्थः । इतरयोरुपकारित्वं ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं

त्रयोऽप्यत्यन्तपक्वाश्चेन्महतस्तपसः फलम् ।
दुरितेन क्वचित् किञ्चित् कदाचित् प्रतिबध्यते ॥ २८२ ॥
वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते ।
यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥ २८३॥
पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ।
मोक्षो विनिश्चितः किन्तु दृष्टदुःखं न नश्यति ॥ २८४ ॥
ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ।
देहात्मवत् परात्मत्वदार्ढ्ये बोधः समाप्यते ॥ २८५ ॥
सुप्तिवत् विस्मृतिः सीमा भवेदुपरमस्य हि ।
दिशानया विनिश्चेयं तारतम्यमवान्तरम् ॥ २८६ ॥

स्वगृहमेवाभिगच्छेत्, शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिभ्यामवगम्यते ॥ २८१ ॥

त्रयस्य सह वर्तन्ते वियुज्यन्ते कचित् कचिदित्युक्तं तत्र कारणमाह त्रयोऽपीति । अनेकजन्मार्जितपुण्यपुञ्जपरिपाके त्रयाणां सहभावो भवति अन्यदा तु प्रतिबन्धकपापानुसारेण पुरुषविशेषे कालविशेषे कश्चित् प्रतिबन्धो भवतीति भावः ॥ २८२ ॥

तत्रापि तत्त्वज्ञानप्रतिबन्धे मोक्षो नास्तीत्याह वैराग्येति । तर्हि वैराग्यादिसम्पादनं निष्फलमित्याशङ्क्य प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते इति भगवद्वचनात् पुण्यलोकप्राप्तिर्भवतीत्याह पुण्यलोकस्तपोबलादिति ॥२८३॥

वैराग्योपरत्योस्तु प्रतिबन्धे जीवन्मुक्तिसुखं न सिध्यतीत्याह पूर्णे बोधे इति ॥ २८४ ॥

इदानीं वैराग्यादीनामवधिं दर्शयति ब्रह्मलोकेति सार्द्धेन ॥२८५॥

अवान्तरतारतम्यं स्वबुद्ध्या निश्चेयमित्याह दिशेति ॥ २८६ ॥

आरब्धकर्मनानात्वात् बुद्धानामन्यथान्यथा।
वर्त्तनन्तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः॥ २८७॥
स्वस्वकर्मानुसारेण वर्त्तन्तां ते यथा तथा।
अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः॥ २८८॥
जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितम्।
मायया तदुपेक्ष्यैव चैतन्ये परिशिष्यताम्॥ २८९॥
चित्रदीपमिमं नित्यं येऽनुसन्दधते बुधाः।
पश्यन्तोऽपि जगच्चित्रं ते न मुह्यन्ति पूर्ववत्॥ २९०॥

इति चित्रदीपः समाप्तः।

ननु तत्त्वविदामपि रागादिमत्त्वेन वैषम्योपलम्भात् ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यत इत्याशङ्क्य रागाद्यभावादिप्रारब्धकर्मफलत्वान्मुक्तिप्रतिबन्धकत्वमपि नास्त्यतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह आरब्धकर्मनानात्वादिति॥ २८७॥

किं तर्हि प्रतिपत्तव्यमित्यत आह स्वस्वेति। सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवयवब्रह्मरूपेणावस्थानञ्च समानमिति भावः॥ २८८॥

प्रकरणस्य तात्पर्य्यं संक्षिप्य दर्शयति जगदिति॥ २८९॥

ग्रन्थाभ्यासफलमाह चित्रदीपमिति॥ २९०॥

इति चित्रदीपव्याख्या समाप्ता।

सप्तमपरिच्छेदः ।

तृप्तिदीपः ।

आत्मानञ्चेद् विजानीयादयमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥ १ ॥
अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्य्यते ।
जीवन्मुक्तस्य या तृप्तिः सा तेन विशदायते ॥ २ ॥
मायाभासेन जीवेशौ करोतीति श्रुतत्वतः ।
कल्पिताविव जीवेशौ ताभ्यां सर्वं प्रकल्पितम् ॥ ३ ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् ॥

तृप्तिदीपाख्यं प्रकरणमारभमाणः श्रीभारतीतीर्थगुरुस्तस्य श्रुति-व्याख्यानरूपत्वात् व्याख्येयां श्रुतिमादौ पठति आत्मानञ्चेदिति ॥ १ ॥

इदानीं चिकीर्षितं विचारं तत्फलञ्च दर्शयति अस्या इति । अत्र तृप्तिदीपाख्ये ग्रन्थे अस्याः आत्मानं चेत् विजानीयादित्यादिकायाः श्रुतेरभिप्रायस्तात्पर्यं सम्यग्विचार्य्यते, तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिप्रसिद्धा या तृप्तिः सा विशदायते स्पष्टीभवति ॥ २ ॥

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना । आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणमिति व्याख्यानलक्षणस्मरणात् पूरुष इति पद-स्यार्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति मायाभासेनेति । प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थं यदर्थान्तरवर्णनमुपोद्घातः, अत्र माया-भासेन चिदानन्दघनब्रह्मप्रतिबिम्बसमन्विता सत्त्वरजस्तमोगुणात्मिका

ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥ ४ ॥

जगदुपादानभूता प्रकृतिरुच्यते, सा च सत्त्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधा भिद्यमाना क्रमेण माया चाविद्या च भवति, तयोर्मायाविद्ययोः प्रतिबिम्बितं ब्रह्मचैतन्यमेवेश्वरो जीवश्चेत्युच्यते, तदिदं तत्त्वविवेकाख्ये ग्रन्थे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं, चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता । तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा । सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते । मायाबिम्बो वशीकृत्य तां स्यात् सर्वज्ञ ईश्वरः । अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा । सा कारणशरीरं स्यात् इति । इममेवार्थं मनसि निधाय जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता अतो जीवेश्वरयोर्मायाकल्पितत्वमन्यत् कृत्स्नं जगत् ताभ्यामेव कल्पितम् ॥ २ ॥

तत्र केन कियत् कल्पितमित्यत आह ईक्षणादीति । तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः सेक्षणादिः अनेन जीवेनात्मनानुप्रविश्येति श्रुतः प्रवेशोऽन्तो यस्याः सा प्रवेशान्ता ईक्षणादिश्चासौ प्रवेशान्ता चेति पश्चात् कर्मधारयः सेयं सृष्टिरीश्वरेण कल्पिता जाग्रदादिर्यस्य संसारस्यासौ जाग्रदादिः विमोक्षो मुक्तिरन्तो यस्य स विमोक्षान्तः संसारो जीवेन कल्पितस्तदभिमानित्वाज्जीवस्य इत्यर्थः, ते च जाग्रदादय इत्थं श्रूयन्ते, स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत् परितृप्तिमेति । स्वप्नेऽपि जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके । सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति । पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम् । जाग्रत् स्वप्नसुषुप्त्यादिप्रपञ्चं यत् प्रकाशते । तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते इति ॥ ३ ॥

भ्रमाधिष्ठानभूतात्मा कूटस्थासङ्गचिद्वपुः ।
अन्योन्याध्यासतोऽसङ्गधीस्थजीवोऽत्र पूरुषः ॥ ५ ॥
साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु ।
केवलो निरधिष्ठानविभ्रान्तेः क्वाप्यसिद्धितः ॥ ६ ॥
अधिष्ठानांशसंयुक्तं भ्रमांशमवलम्बते ।
यदा तदाहं संसारीत्येवं जीवोऽभिमन्यते ॥ ७ ॥

एवं पुरुषशब्दार्थावबोधोपयोगिनीं सृष्टिमभिधायेदानीं पुरुषशब्दार्थ-माह भ्रमाधिष्ठानेति । यः कूटस्थासङ्गचिद्वपुरविकार्यसङ्गचित्स्वरूपः भ्रमाधिष्ठानभूतात्मा भ्रमस्य देहेन्द्रियाद्यध्यासस्याधिष्ठानभूतोऽधिष्ठानत्वेन वर्तमानः परमात्मास्ति सोऽसङ्ग एवान्योन्याध्यासतः अन्योन्यस्मिन् अन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य इत्यादिना यो निरूपितस्तेन तादात्म्या-ध्यासेनासङ्गधीस्थजीवोऽत्र अनेन पारमार्थिकसम्बन्धशून्यायां बुद्धौ वर्त-मानो जीवः कल्पनाख्यां श्रुतौ पुरुष इत्युच्यते स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादितत्वात् पुरुषस्यैव च पुरुष-त्वात् पुरुष एव पदवा बुद्ध्यादिकल्पनाधिष्ठानं कूटस्थचैतन्यमेव बुद्धौ प्रतिबिम्बनत्वेन प्राप्तजीवभावं सत् पुरुषशब्देनोच्यते इत्यभिप्रायः ॥ ५ ॥

ननु पुरुषशब्देन केवलचिदाभासरूपो जीव एवोच्यतां किमनेन कूटस्थचैतन्येनाधिष्ठानभूतेनेत्याशङ्क्य तस्य मोक्षाद्यन्वयित्वसिद्धये तदपि जीवत्वमित्याह निरधिष्ठानेति । साधिष्ठानोऽधिष्ठानेन कूटस्थचैतन्येन सहितो जीवो विमोक्षादौ श्रवणादिसाधनानुष्ठानेऽधिक्रियतेऽधि-कारी भवति न तु केवलचिदाभासः । कुत इत्यत आह निरधिष्ठा-नेति । अधिष्ठानरहितस्यारोपस्य लोके अदृष्टत्वादिति भावः ॥ ६ ॥

इदानीं साधिष्ठानस्य तस्यैव संसाराद्यन्वयित्वं लोकदृष्ट्या विशद्य दर्शयति अधिष्ठानांशसंयुक्तमिति । जीवो यदाधिष्ठानांशसंयुक्तं कूटस्थ-

भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता ।
यदा तदा चिदात्माहमसङ्गोऽस्मीति बुध्यते ॥ ८ ॥
नासङ्गेऽहङ्कृतिर्युक्ता कथमस्मीति चेच्छृणु ।
एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोऽहमः ॥ ९ ॥
अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः ।
एकीभूय भवेन्मुख्यस्तत्र मूढैः प्रयुज्यते ॥ १० ॥

इत्थं भ्रमांशं चिदाभासोपेतं शरीरद्वयमवलम्ब्य स्वस्वरूपेण स्वीकरोति तदाहं संसारीत्यभिमन्यते ॥ ७ ॥

यदा पुनर्भ्रमांशस्य देहद्वयसहितस्य चिदाभासस्य तिरस्कारान्मिथ्यात्वज्ञानेनानादरणादधिष्ठानप्रधानता अधिष्ठानभूतस्यैव कूटस्थस्य स्वरूपत्वं जीवेन स्वीक्रियते तदाहं चिदात्माऽसङ्गोऽस्मीति बुध्यते जानाति ॥ ८ ॥

नन्वधिष्ठानचैतन्यस्य जीवस्वरूपत्वस्वीकारे चिदात्माहमसङ्गोऽस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असङ्गचिद्रूपस्य कूटस्थस्याहम्प्रत्ययविषयत्वाभावादिति शङ्कते नासङ्ग इति । असङ्गे चिदात्मन्यविषयेऽहंशब्दयो न युज्यते यतोऽतः कथमहमस्मीति जानीयात् न कथमपीत्यर्थः । मुख्यया वृत्त्याहंप्रत्ययविषयत्वाभावेऽपि लक्षणया तदस्मीति विवक्षुरहंशब्दार्थं तावत् विभजते शृण्विति । अहमोऽहंशब्दस्येत्यर्थः ॥ ९ ॥

कीदृशो मुख्योऽर्थः इत्याकाङ्क्षायां तं दर्शयति अन्योन्येति । कूटस्थचिदाभासयोः स्वरूपमन्योन्याध्यासेनैक्यं प्राप्तमहंशब्दस्य वाच्यत्वेन मुख्यार्थो भवति । अयं कुतो मुख्यत्वमित्यत आह तत्र मूढैरिति । यत इत्यध्याहारः तत्र तस्मिन् अविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेकज्ञानशून्यैः सर्वैरप्यहंशब्दः प्रयुज्यतेऽतोऽस्य मुख्यत्वमित्यर्थः ॥ १० ॥

पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् ।
पर्यायेण प्रयुङ्क्तेऽहंशब्दं लोके च वैदिके ॥ ११ ॥
लौकिकव्यवहारेऽहं गच्छामीत्यादिके बुधः ।
विविच्यैव चिदाभासं कूटस्थात् तं विवक्षति ॥ १२ ॥
असङ्गोऽहं चिदात्माहमिति शास्त्रीयदृष्टितः ।
अहंशब्दं प्रयुङ्क्तेऽयं कूटस्थे केवले बुधः ॥ १३ ॥
ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः ।
तथा च कथमाभासः कूटस्थोऽस्मीति बुध्यताम् ॥ १४ ॥

इदानीममुख्यार्थौ द्वौ दर्शयति पृथगिति । आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदा अमुख्यार्थौ भवतः । अनयोरमुख्यत्वे कारणमाह तत्रेति । अत्रापि यत इत्यध्याहारः तत्त्ववित् यतः तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुङ्क्ते इति योजना, अयम्भावः चिदाभासकूटस्थयोरविविक्तरूपस्य सार्वजनीनव्यवहारविषयत्वात् मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयैर्जनैः कदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति ॥ ११ ॥

पर्यायेण प्रयुङ्क्त इत्युक्तमेवार्थं प्रपञ्चयति प्रतिपत्तिसौकर्याय श्लोकद्वयेन लौकिकेत्यादिना । बुधो विद्वानहं गच्छामीत्यादिके लौकिकव्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति ॥ १२ ॥

अथवैष बुधः शास्त्रीयदृष्टितो वेदान्तश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थेऽसङ्गोऽहं चिदात्माहमिति वचनेष्वहंशब्दं प्रयुङ्क्ते यतो वचसा अहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वस्याभावादसङ्गोऽहमस्मीति ज्ञानमुपपद्यत इति भावः ॥ १३ ॥

ननु पृथगाभासकूटस्थावहंशब्दस्यामुख्यार्थावित्युक्तौ तयोर्मध्ये कूटस्थः किमज्ञाननिवृत्तावसङ्गोऽस्मीति जानाति किं वा चिदाभासः

नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् ।
आभासत्वस्य मिथ्यात्वात् कूटस्थत्वावशेषणात् ॥ १५ ॥
कूटस्थोऽस्मीति बोधोऽपि मिथ्या चेन्नेति को वदेत् ।
न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणम् ॥ १६ ॥
तादृशेनापि बोधेन संसारो विनिवर्त्तते ।
यक्षानुरूपो हि बलिरित्याहुर्लौकिका जनाः ॥ १७ ॥

न तावत् कूटस्थः तस्यासङ्गचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा च सति कूटस्थादन्यश्चिदाभासोऽहं कूटस्थोऽस्मीति न ज्ञातुमर्हति इति शङ्कते ज्ञानिनेति ॥ १४ ॥

तस्य कूटस्थादन्यत्वमेशासिद्धमिति परिहरति नायमिति । तत्रोपपत्तिमाह आभासत्वस्येति । यथा दर्पणे प्रतीयमानस्य मुखाभासस्य बींबाख्यं मुखमेव तत्त्वं तद्वदिति भावः ॥ १५ ॥

ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोऽस्मीति ज्ञानमपि मिथ्या स्यादिति शङ्कते कूटस्थ इति । कूटस्थस्वरूपातिरिक्तस्य सर्वस्यापि मिथ्यात्वाभ्युपगमात् तन्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति नेतीति । उक्तमर्थं दृष्टान्तेन स्पष्टयति नहीति । रज्जौ कल्पितस्य सर्पस्य सत्यादिकमपि प्रतीयमानं वास्तवं नाङ्गीक्रियते यथा तद्वदिति भावः ॥ १६ ॥

ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादित्याशङ्क्य निवर्त्यस्य संसारस्यापि तथात्वात् तन्निवृत्तिरुपपद्यते स्वप्नव्याघ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह तादृशेनापीति । अत्र यादृशो यक्षस्तादृशो बलिरिति लौकिकगाथां संवादयति यथानुरूप इति ॥ १७ ॥

तस्मादाभासपुरुषः सकूटस्थो विविच्य तम्।
कूटस्थोऽस्मीति विज्ञातुमर्हतीत्यभ्यधात् श्रुतिः ॥ १८ ॥

असन्दिग्धाविपर्यस्तबोधो देहात्मनीष्यते।
तद्वदत्रेति निर्णेतुमयमित्यभिधीयते ॥ १९ ॥

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम्।
आत्मन्येव भवेद् यस्य स नेच्छन्नपि मुच्यते ॥ २० ॥

अयमित्यपरोक्षत्वमुच्यते चेत् तदुच्यताम्।
स्वयंप्रकाशचैतन्यमपरोक्षं सदा यतः ॥ २१ ॥

उपपादितमर्थमुपसंहरति तस्मादिति। यस्मात् कूटस्थ एव चिदाभासस्य निजं स्वरूपं तस्मात् पुरुषशब्दवाच्यः कूटस्थसहितचिदाभासस्तं कूटस्थं मिथ्याभूतात् स्वस्माद् विविच्य तत्त्वतया कूटस्थोऽहमस्मीत्यवगन्तुं शक्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः ॥ १८ ॥

एवं पुरुषोऽस्मीति पदद्वयप्रयोगाभिप्रायमभिधाय अयमिति पदप्रयोगाभिप्रायमाह असन्दिग्धेति। लौकिकानां प्रसिद्धे देहरूपे आत्मनि संशयविपर्ययरहितोऽयमस्मीति बोधो यद्वदुपलभ्यते तद्वत् प्रत्यगात्मनि विषये तद्वत् तथाविधं ज्ञानं तत्सिद्धये सम्पाद्यमिति निर्णेतुमयमित्यभिधीयते श्रुत्येति शेषः ॥ १९ ॥

देहस्येव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति देहात्मेति। अहं मनुष्य इति देहात्मविषयो दृढप्रत्ययो यस्यैवं प्रत्यगात्मन्येव देह एवात्मेत्येवं देहात्मत्वज्ञानबाधनेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते स विद्वानिच्छन्नपि मोक्षेच्छारहितोऽपि मुच्यते संसारहेतोरज्ञानस्य ज्ञानेनापबाधितत्वादिति भावः ॥ २० ॥

अयमिति पदप्रयोगस्याभिप्रायान्तरं शङ्कते अयमिति। यथायं घट इत्यादिप्रयोगेष्विदमा निर्दिष्टस्य वस्तुन आपरोक्ष्यं दृष्टं तथा-

परोक्षमपरोक्षञ्च ज्ञानमज्ञानमित्यदः ।
नित्यापरोक्षरूपेऽपि द्वयं स्याद् दशमे यथा ॥ २२ ॥
नवसंख्याहृतज्ञानो दशमो विभ्रमात् तदा ।
न वेत्ति दशमोऽस्मीति वीक्षमाणोऽपि तान् नव ॥ २३ ॥
न भाति नास्ति दशम इति स्वं दशमं तदा ।
मत्वा वक्ति तदज्ञानकृतमावरणं विदुः ॥ २४ ॥
नद्यां ममार दशम इति शोचन् प्ररोदिति ।
अज्ञानकृतविक्षेपं रोदनादिं विदुर्बुधाः ॥ २५ ॥

यमस्त्यत्रापीति भावः । तदप्यस्माकमिष्टमेवेत्याह तदुच्यतामिति । कुत इत्यत आह स्वयंप्रकाशेति । साधनान्तरनिरपेक्षतयावभासमानं चैतन्यं ज्ञापकाभावान्नित्यमपरोक्षमित्यस्माभिरभ्युपगतत्वादित्यर्थः ॥ २१ ॥

नन्वात्मनः स्वप्रकाशचिद्रूपत्वेन नित्यापरोक्षत्वाभ्युपगमेऽयमिति पदप्रयोगस्याभिप्रायवर्णनाङ्गीकारवत्त्वादागतमात्मनः परोक्षविषयत्वं पूर्वोक्तं ज्ञानाज्ञानाश्रयविषयत्वञ्चानुपपन्नं स्यादित्याशङ्क्य दशम इव सर्वमुपपद्यत इत्याह परोक्षमपरोक्षञ्चेत्येकं युगलं ज्ञानमज्ञानमित्यपरम् इदं द्वयं नित्यापरोक्षरूपेऽप्यात्मनि दशम इव स्यादित्यर्थः ॥ २२ ॥

दृष्टान्तं व्युत्पादयति नवसंख्येति । परिगणनीयपुरुषनिष्ठया नवसंख्ययापहृतविवेकविज्ञानो दशमस्तदा तान् परिगणनीयान् नवसंख्याकान् वीक्षमाणोऽपि सम्यक् पश्यन्नपि भ्रान्त्या गणनाकर्त्तारं स्वात्मानं दशमोऽहमस्मीति नैव वेत्तीत्यर्थः ॥ २३ ॥

एवं दशमेऽज्ञानं प्रदर्श्य तत्कार्य्यमावरणं दर्शयति न भातीति । तदा दशमः स्वं दशमं सन्तं दशमो न भाति नास्तीति मत्वा वक्ति अस्य व्यवहारस्य यत् कारणं तदज्ञानकृतमज्ञानकार्य्यमावरणं विदुर्बुधा इति शेषः ॥ २४ ॥

अज्ञानस्यैव कार्य्यं विशेषं विक्षेपं दर्शयति नद्यामिति ॥ २५ ॥

न ह्रतो दशमोऽस्तीति श्रुत्वाप्तवचनं तदा ।
परोक्षत्वेन दशमं वेत्ति स्वर्गादिलोकवत् ॥ २६ ॥
त्वमेव दशमोऽसीति गणयित्वा प्रदर्शितः ।
अपरोक्षतया ज्ञात्वा हृष्यत्येव न रोदिति ॥ २७ ॥
अज्ञानावृतिविक्षेपद्विविधज्ञानतृप्तयः ।
शोकापगम इत्येते योजनीयाश्चिदात्मनि ॥ २८ ॥
संसारासक्तचित्तः संश्चिदाभासः कदाचन ।
स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययम् ॥ २९ ॥
न भाति नास्ति कूटस्थ इति वक्ति प्रसङ्गतः ।
कर्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते ॥ ३० ॥

दशमस्यासत्त्वभ्रमनिवृत्तिं परोक्षज्ञानमाह न ह्रत इति ॥ २६ ॥

तस्यैवाभानावरणनिवर्तकमपरोक्षज्ञानं दर्शयति त्वमेवेति । स्वेन परिगणितैर्नवभिः सह स्वात्मानं गणयित्वा त्वमेव दशमोऽसीति दर्शितोऽहं दशमोऽस्मीत्यपरोक्षतया ज्ञात्वा हर्षं प्राप्नोति रोदनञ्च त्यजति ॥ २७ ॥

एवं दृष्टान्तभूते दशमे प्रदर्शितमवस्थासप्तकमनूद्य दार्ष्टान्तिके चिदात्मन्यपि तद्योजनीयमित्याह अज्ञानावृतीति । अज्ञानमावृतिश्च विक्षेपश्च द्विविधज्ञानञ्च तृप्तिश्चेति द्वन्द्वसमासः ॥ २८ ॥

तत्राज्ञानावरणादिकं क्रमेण दर्शयति संसारासक्तेत्यादिचतुर्भिः । अयं चिदाभासो विषयभोगादावासक्तचित्तः सन् कदाचन गुरुशास्त्रविचारात् एवं कदाचिदपि स्वतत्त्वं स्वस्य निजरूपं स्वप्रकाशचिद्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जानातीति तदज्ञानमित्यर्थः ॥ २९ ॥

चिदाभासो [illegible] प्रसङ्गे भाति कूटस्थो नास्ति न भातीति वक्ता ब्रूते इदमभानावरणं [illegible] कूटस्थाच्छादकत्वात् [illegible] कर्तृत्वादिकमात्मन्यारोपयति [illegible] इदं [illegible] विक्षेपः ॥ ३० ॥

अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तया।
पश्चात् कूटस्थ एवास्मीत्येवं वेत्ति विचारतः॥ ३१॥
कर्त्ता भोक्तेत्येवमादिशोकजातं प्रमुञ्चति।
कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति॥ ३२॥
अज्ञानमावृतिस्तद्वद् विक्षेपश्च परोक्षधीः।
अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरङ्कुशा॥ ३३॥
सप्तावस्था इमाः सन्ति चिदाभासस्य तास्विमौ।
बन्धमोक्षौ स्थितौ तत्र तिस्रो बन्धकृतः स्मृताः॥ ३४॥

अस्ति कूटस्थ इति। परेण बोधितः कूटस्थोऽस्तीति जानातीदं परोक्षज्ञानं श्रवणादिपरिपाकवशात् कूटस्थोऽहमेवास्मीति जानातीदमपरोक्षज्ञानम्॥ ३१॥

कूटस्थापरोक्षज्ञानानन्तरं कर्तृत्वादिशोकजातं त्यजतीति यदयं शोकापगमः कृत्यं कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं प्राप्तमिति तुष्यतीयं तृप्तिरित्यर्थः॥ ३२॥

दार्ष्टान्तिकेऽप्युक्तमवस्थासप्तकमनुवदति अज्ञानमिति॥ ३३॥

नन्वुक्तावस्थासप्तकस्यात्मधर्मत्वाङ्गीकारे तस्य कूटस्थत्वं व्याहन्येतेत्याशङ्क्य एताः सप्तावस्थाश्चिदाभासस्यैव न कूटस्थस्येत्याह सप्तावस्था इति। सर्वं वाक्यं सावधारणमिति न्यायेन चिदाभासस्यैवेत्यवगम्यते न कूटस्थस्य। सप्तावस्थानामत्रोपन्यासो व्यर्थ इत्याशङ्क्य न तथा बन्धमोक्षकारित्वद्योतनपरत्वादुपन्यासस्येत्यभिप्रायेणाह तास्विमाविति। किमासां सप्तानामविशेषेण बन्धमोक्षकारित्वं नेत्याह तत्र तिस्र इति। अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः॥ ३४॥

न जानामीत्युदासीनव्यवहारस्य कारणम् ।
विचारप्रागभावेन युक्तमज्ञानमीरितम् ॥ ३५ ॥
अमार्गेण विचार्य्याथ नास्ति नो भाति चेत्यसौ ।
विपरीतव्यवहृतिरावृतेः कार्य्यमिष्यते ॥ ३६ ॥
देहद्वयचिदाभासरूपो विक्षेप ईरितः ।
कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बन्धकः ॥ ३७ ॥
अज्ञानमावृतिश्चैते विक्षेपात् प्राक् प्रसिध्यतः ।
यद्यप्यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः ॥ ३८ ॥

आसां बन्धकारित्वदर्शनाय तिसृणामपि स्वरूपं प्रत्येकं कार्य्यप्रदर्शनेन सहोपदिशन्नादावज्ञानस्य स्वरूपं तावद् दर्शयति न जानामीति । आत्मतत्त्वविचारस्य प्रागभावसहितमुदासीनव्यवहारस्य कारणं न जानामीत्यनुभूयमानमज्ञानमीरितमित्यर्थः ॥ ३५ ॥

आवृतेः कार्य्यं दर्शयति अमार्गेणेति । शास्त्रोक्तप्रकारमतिक्रम्य स्वैरं तर्केण विचार्य्यानन्तरं कूटस्थो नास्ति न भाति इत्येवंरूपो विपरीतव्यवहारः आवृतिकार्य्यमित्यर्थः ॥ ३६ ॥

विक्षेपस्य स्वरूपं तत्कार्यञ्च दर्शयति देहद्वयेति । स्थूलसूक्ष्माख्यशरीरद्वयसहितचिदाभास एव विक्षेपे बन्धकः बन्धहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकोऽस्य चिदाभासस्य कार्य्यमिति शेषः कर्तृत्वादीत्यादिपदेन प्रमातृत्वादयो गृह्यन्ते ॥ ३७ ॥

ननु अवस्थात्रयस्य चिदाभासस्येत्युक्तमनुपपन्नम् अज्ञानावरणयोर्विक्षेपोत्पत्तेः पुरावस्थितत्वाच्चिदाभासस्य च विक्षेपान्तःपातित्वात् तदवस्थात्वानुपपत्तेरित्याशङ्क्याह अज्ञानमिति । अनयोर्विक्षेपात् पुरा स्थितत्वेऽपि नाकाशस्यात्मनस्तथावस्थात्वे नावस्थावत्त्वानुपपत्तेः अतः परिशेषाच्चिदाभासावस्थात्वमेव तयोर्वक्तव्यमिति भावः ॥ ३८ ॥

विक्षेपोत्पत्तितः पूर्वमपि विक्षेपसंस्कृतिः ।
अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ॥ ३९ ॥
ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति ।
नाशङ्कनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ॥ ४० ॥
संसार्यहं विबुद्धोऽहं निःशोकस्तुष्ट इत्यपि ।
जीवगा उत्तरावस्था भान्ति न ब्रह्मगा यदि ॥ ४१ ॥
तर्ह्यज्ञोऽहं ब्रह्मसत्त्वभाने मद्दृष्टितो न हि ।
इति पूर्वे अवस्थे च भासेते जीवगे खलु ॥ ४२ ॥

अवस्थावतो विक्षेपस्य तदानीमभावात् तदवस्थात्वाभिधानमनुपपन्नमित्याशङ्क्य विक्षेपाभावेऽपि तत्संस्कारस्य तदानीं सत्त्वाद् विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह विक्षेपेति । ततः कारणात् तयोस्तदवस्थात्ववर्णनमविरुद्धमिति योजना ॥ ३९ ॥

नन्वप्रसिद्धसंसाराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णनाद् वरम् अधिष्ठानतया प्रसिद्धब्रह्मावस्थात्वकथनमित्याशङ्क्यातिप्रसङ्गात् नैवमिति परिहरति ब्रह्मणीति ॥ ४० ॥

ननु ब्रह्मण्यारोपितत्वाविशेषेऽपि विक्षेपोत्पत्त्युत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शङ्कते संसार्यहमिति । संसारी कर्तृत्वादिधर्मवान् विबुद्धस्तत्त्वसाक्षात्कारवान् निःशोकः शोकरहितः, तुष्टः वक्ष्यमाणकृतकृत्यत्वादिजनितसन्तोषवान् अहमस्मीति उत्तरावस्था जीवगा जीवाश्रिता भान्ति न ब्रह्माश्रिता इत्यर्थः ॥ ४१ ॥

एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्थात्वमेवेति परिहरति तर्हीति । मद्दृष्टितो ममानुभवेन इत्यर्थः ॥ ४२ ॥

अज्ञानस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः ।
जीवावस्थात्वमज्ञानाभिमानित्वादवादियम् ॥ ४३ ॥
ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतिः ।
न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ॥ ४४ ॥
परोक्षज्ञानतो नश्येदसत्त्वावृतिहेतुता ।
अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता ॥ ४५ ॥
अभानावरणे नष्टे जीवत्वारोपसंक्षयात् ।
कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्त्तते ॥ ४६ ॥

ननु तर्ह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशङ्क्य तद्विवक्षां दर्शयति अज्ञानस्येति । ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः । भवद्भिस्तर्हि किं विवक्षया जीवावस्थात्वमुक्तमित्याशङ्क्य स्वविवक्षां दर्शयति जीवावस्थात्वमिति ॥ ४३ ॥

एवं बन्धहेतुमवस्थात्रयं प्रदर्श्यावशिष्टास्ववस्थासु मध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति ज्ञानद्वयेनावरणाज्ञाने नष्टे सति तत्कृतावृतिस्तेनाज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यतीति ॥ ४४ ॥

कस्यावृतेः केन निवृत्तिरित्यपेक्षायाम् उभयं विभज्य दर्शयति परोक्षज्ञानत इति । कूटस्थोऽस्तीत्येवंरूपात् परोक्षज्ञानात् अज्ञानस्यासत्त्वावरणकारणत्वं निवर्त्तते कूटस्थोऽस्मीत्यपरोक्षज्ञानेन तु कूटस्थो न भातीत्येवंरूपावरणकारणत्वं निवर्त्तते ॥ ४५ ॥

इदानीं ज्ञानस्य फलरूपावस्थाद्वयप्रथमावस्थामाह अभानेति । अभानावरणे निवृत्ते सति भ्रान्त्या प्रतीयमानस्य जीवत्वस्यापि निवृत्तत्वात् तन्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोऽपि निवर्त्तत इत्यर्थः ॥ ४६ ॥

निवृत्ते सर्वसंसारे नित्यमुक्तत्वभासनात् ।
निरङ्कुशा भवेत् तृप्तिः पुनः शोकासमुद्भवात् ॥ ४७ ॥
अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे ।
अवस्थे जीवगे ब्रूते आत्मानञ्चेदिति श्रुतिः ॥ ४८ ॥
अयमित्यपरोक्षत्वमुक्तं तद् द्विविधं भवेत् ।
विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्षणात् ॥ ४९ ॥
परोक्षज्ञानकालेऽपि विषयस्वप्रकाशता ।
समा ब्रह्म स्वप्रकाशमस्तीत्येवं विबोधनात् ॥ ५० ॥

एवं शोकापगमरूपावस्थां प्रदर्श्य निरङ्कुशतृप्तिलक्षणां द्वितीयां दर्शयति निवृत्त इति ॥ ४७ ॥

नन्वात्मानञ्चेद् विजानीयादिति मन्त्रव्याख्याने प्रवृत्तत्वात् तद् विहाय मध्येऽज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतासङ्गतमित्याशङ्क्य आत्मानञ्चेदित्यस्याः श्रुतेस्तात्पर्यनिर्णयप्रयत्वेनाभिहितत्वान्न प्रकृतासङ्गतमित्यभिप्रेत्य श्रुतितात्पर्यमाह अपरोक्षेति । चिदाभासनिष्ठं यदवस्थासप्तकम् अस्ति तत्रापरोक्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयं प्रतिपादयितुमयं मन्त्रः प्रवृत्तः इत्यभिप्रायः ॥ ४८ ॥

अयमित्यपरोक्षत्वमुच्यते चेत् तदुच्यतामित्यत्रायमिति पदेनात्मनोऽपरोक्षत्वमुच्यत इत्युक्तं तथा चात्मापरोक्षज्ञानविषयत्वमेव स्यान्न परोक्षज्ञानविषयत्वमित्याशङ्क्य तदुपपादनायापरोक्षज्ञानं विभजते अयमिति । द्वैविध्ये कारणमाह विषयेति । विषयस्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात् स्वव्यवहारे साधनान्तरनिरपेक्षत्वात् धिया बुद्ध्या एवं अपरोक्षत्वेन तदीक्षणात् तस्य विषयस्यात्मनोऽवबोधनाच्चेत्यर्थः ॥ ४९ ॥

भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशङ्क्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वे विरोधि न भवति इत्याह परो-

अहं ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखेत् ।
परोक्षज्ञानमेतन्न भ्रान्तं बाधानिरूपणात् ॥ ५१ ॥
ब्रह्म नास्तीति मानञ्चेत् स्याद् बाध्येत तदा ध्रुवम् ।
न चैवं प्रबलं मानं पश्यामोऽतो न बाध्यते ॥ ५२ ॥
व्यक्त्यनुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि ।
भ्रान्तिः स्याद् व्यक्त्यनुल्लेखात् सामान्योल्लेखदर्शनात् ॥५३॥
अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः ।
परोक्षमित्यनुल्लेखादर्थात् पारोक्ष्यसम्भवात् ॥ ५४ ॥

चेति । अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेऽपि विषयस्य ब्रह्मणः अप्रकाशमानत्वमेव । तत्रोपपत्तिमाह ब्रह्मेति ॥ ५० ॥

प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमिति चाशङ्क्य प्रत्यगंशापरित्यागादित्याह अहं ब्रह्मेति । नन्विदं भ्रान्तमित्याशङ्क्याह भ्रान्तत्वं किं बाध्यत्वात् उत व्यक्त्यनुल्लेखात् अथवाऽपरोक्षेण ग्रहण-योग्यस्य परोक्षेण ग्रहणात् ग्रहणांशापरित्यागादिति चतुरो विकल्प्य प्रथमं प्रत्याह एतच्चेति ॥ ५१ ॥

हेतुं विघटयति ब्रह्म नास्तीति ॥ ५२ ॥

द्वितीयमनूद्य दूषयति व्यक्त्यनुल्लेखेति । अयं स्वर्ग इत्येव-माकारेण ग्रहणाभावात् किन्तु स्वर्गोऽस्तीत्येवं सामान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसङ्ग इत्यर्थः ॥ ५३ ॥

तृतीयं निराकरोति अपरोक्षत्वेति । अपरोक्षत्वेन ग्रहणयोग्यस्य प्रत्यगभिन्नब्रह्मविषयस्य परोक्षज्ञानस्य भ्रमत्वं न सम्भवति । कुत इत्यत आह परोक्षमिति ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभावात् । कुत-स्तर्हि तत्र परोक्षत्वमित्याशङ्क्याह अर्थादिति । इदं ब्रह्मेत्येवं व्यक्त्य-नुल्लेखाभावबलादर्थात् परोक्षत्वसिद्धिरिति भावः ॥ ५४ ॥

अंशागृहीतिर्भ्रान्तिश्चेत् घटज्ञानं भ्रमो भवेत् ।
निरंशस्यापि सांशत्वं व्यावर्त्यांशविभेदतः ॥ ५५ ॥
असत्त्वांशो निवर्त्तेत परोक्षज्ञानतस्तथा ।
अभानांशनिवृत्तिः स्यादपरोक्षधिया कृता ॥ ५६ ॥
दशमोऽस्तीत्यविभ्रान्तं परोक्षज्ञानमीक्ष्यते ।
ब्रह्मास्तीत्यपि तद्वत् स्यादज्ञानावरणं समम् ॥ ५७ ॥
आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते ।
व्यक्तिरुल्लिख्यते यद्वद् दशमस्त्वमसीत्यतः ॥ ५८ ॥

परमतमाशङ्कते अंशाग्रहीतिरिति । ब्रह्मांशग्रहणेऽपि प्रत्यगंशाग्रहणात् भ्रमत्वमित्यर्थः । एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसङ्ग इति परिहरति घटेति अन्तरावयवानामग्रहणादिति भावः । ननु घटस्य सावयवत्वादंशग्रहणेऽप्यंशाग्रहणं सम्भवति ब्रह्मणस्तु निरंशत्वात् कथमंशाग्रहणसम्भव इत्याशङ्क्य व्यावर्त्यांशोपाधिनिमित्तकं सांशत्वं तस्य भविष्यतीत्याह निरंशस्येति ॥ ५५ ॥

तौ कौ व्यावर्त्यांशावित्याकाङ्क्षायामाह असत्त्वांश इति ॥ ५६ ॥

अपरोक्षत्वेन ग्रहणयोग्यविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद् दृष्टान्तप्रदर्शनेनापि द्रढयति दशमोऽस्तीति दशमोऽस्तीत्याप्तवाक्यजन्यं परोक्षज्ञानमभ्रान्तं यथा ब्रह्मास्तीति वाक्यजन्यज्ञानमपि तद्वदभ्रान्तं स्यात् अज्ञानकृतस्यासत्त्वावरणांशस्य समत्वादिति भावः ॥ ५७ ॥

ननु वाक्यात् परोक्षज्ञानमुत्पद्यते चेदपरोक्षज्ञानं कुतो जायते इत्याशङ्क्य विचारसहितादेव वाक्यात् इत्याह आत्मा ब्रह्मेतीति । अयमात्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे पूर्वमस्तीति परोक्षतयाऽवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात् क्रियते । तत्र दृष्टान्तः यद्वदिति । दशमस्त्वमसीत्यतो वाक्यादात्मनि दशमत्वं यथा साक्षात् क्रियते तद्वदित्यर्थः ॥ ५८ ॥

दशमः क इति प्रश्ने त्वमेवेति निराकृते ।
गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत् ॥ ५९ ॥
दशमोऽस्मीति वाक्योत्था न धीरस्य विहन्यते ।
आदिमध्यावसानेषु न नवत्वस्य संशयः ॥ ६० ॥
सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः ।
गृहीत्वा तत्त्वमस्यादिवाक्याद् व्यक्तिं समुल्लिखेत् ॥ ६१ ॥
आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियम् ।
नैव व्यभिचरेत् तस्मादापरोक्ष्यं प्रतिष्ठितम् ॥ ६२ ॥

विचारप्रकृतेन वाक्येनापरोक्षज्ञानोत्पत्तिप्रकारं तावद् दृष्टान्तेन दर्शयति दशमः क इति त्वया दशमोऽस्तीति निरूपितो दशमः कः इति प्रश्ने कृते तस्य त्वमेवेति परिहारेऽभिहिते स्वात्मना सहेतरान् नव गणयित्वाऽहं दशमोऽस्मीति स्वमेव दशमं स्मरेदित्यर्थः ॥ ५९ ॥

अत्र दशमोऽस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वात् विपर्ययादिरूपत्वेनाह दशमोऽस्मीति । अस्य दशमस्य त्वमेव दशमोऽसीति वाक्यात् परिगणनादिरूपविचारसहितादुत्पन्नाहं दशमोऽस्मीति बुद्धिर्न विहन्यते न केनापि ज्ञानेन बाध्यते परिगणनक्रियायां च नवानामादिमध्यावसानेषु परिगणनेऽप्यहं दशमो न वेति संशयश्च न भवेत् अतः सा दृढाऽपरोक्षरूपेत्यर्थः ॥ ६० ॥

एतद् दृष्टान्तं दार्ष्टान्तिके योजयति सदेवेत्यादीति आदिमध्यावसानेष्विति च श्लोकद्वयेन । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं प्रथमं निश्चित्य तस्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रत्यक्पूर्णं ज्ञात्वा तत् तत्त्वमस्यादिवाक्येनाद्वितीयब्रह्मरूपतामात्मनः ब्रह्मास्मीति बाधात् कुर्यात् ॥ ६१ ॥

अत एवमात्मनो ब्रह्मत्वबुद्धिः पञ्चानां कोशानाम् आदिमध्यावसाने-

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा ।
परोक्षेण गृहीत्वाथ विचारात् व्यक्तिमैक्षत ॥ ६३ ॥
यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता ।
तथाप्यन्नं प्राणमिति विचार्य्यस्थलमुक्तवान् ॥ ६४ ॥
अन्नप्राणादिकोषेषु सुविचार्य्य पुनः पुनः ।
आनन्दव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् ॥ ६५ ॥

आत्मनो व्यवहारेऽपि नैवान्यथा भवति अतोऽस्या बुद्धेरपरोक्षज्ञानत्वं तु स्थितमित्यर्थः ॥ ६२ ॥

नन्वेवं प्रथमतः केवलवाक्यात् परोक्षज्ञानमुत्पद्यते पश्चात् विचारसहितादपरोक्षज्ञानमित्येतत् कुतोऽवगम्यते इत्याशङ्क्य तैत्तिरीयकादिश्रुत्यर्थपर्य्यालोचनयेत्याह जन्मादीति । भृगुनामैकः कश्चिदृषिः पुरा यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति वाक्यश्रुतेन जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्म परोक्षतयावगम्य अन्नमयादिपञ्चकोषविचाराद् व्यक्तिं प्रत्यगात्मनो रूपं ब्रह्म दृष्टवानित्यर्थः ॥ ६३ ॥

नन्वस्मिन् प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशवाक्याभावात् कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशङ्क्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह यद्यपीति ॥ ६४ ॥

नन्वन्नमयादिकोषेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशङ्क्य प्रतीच एव ब्रह्मत्वात् पञ्चकोषविचारेणानन्दात्मव्यक्तिं साक्षात् कृत्वा आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति इत्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह अन्नप्राणादीति ॥ ६५ ॥

सत्यं ज्ञानमनन्तं चेत्येवं ब्रह्मस्वलक्षणम् ।
उक्त्वा गुहाहितत्वेन कोशेष्वेतत् प्रदर्शितम् ॥ ६६ ॥
पारोक्ष्येण विबुध्येन्द्रो य आत्मेत्यादिलक्षणात् ।
अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ॥ ६७ ॥
आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितम् ।
अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितम् ॥ ६८ ॥

ननु ब्रह्मलक्षणस्यानन्दात्मरूपे प्रतीचि योजनं न घटते ब्रह्मणः तटस्थत्वेन प्रतीचो भिन्नत्वादित्याशङ्क्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यं ज्ञानमिति । सत्यं ज्ञानमनन्तं ब्रह्मेत्येवं ब्रह्मस्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पञ्चकोशगुहान्तःस्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ॥ ६६ ॥

एवं तैत्तिरीयश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकं विचारजन्यं साक्षात्कारं दर्शयित्वा छान्दोग्यश्रुतिपर्यालोचनयापि तद् दर्शयति पारोक्ष्येणेति । इन्द्रो य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितेन लक्षणेनात्मानं परोक्षतयावगम्य विचारात् शरीरत्रयनिराकरणेन तत्साक्षात्करणाय गुरुं प्रजापतिं चतुर्वारमुपगत इति छान्दोग्योपनिषद्यष्टमाध्याये श्रूयते ॥ ६७ ॥

इदानीमैतरेयश्रुत्यापि तद् दर्शयति आत्मेति । आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषदित्यनेन वाक्येन ब्रह्मणो लक्षणमभिधाय स ईक्षत लोकान्नु सृजा इत्युपक्रम्य स इमाँल्लोकानसृजत अम्भो मरीचीर्मरमापोऽदोऽम्भ इत्यनेन प्रत्यात्मनि जगदध्यारोपप्रकारमभिधाय स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एत

अथान्तरेण वाक्येन परोक्षब्रह्मधीर्भवेत् ।
सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः ॥ ६९ ॥
ब्रह्मापारोक्ष्यसिद्ध्यर्थं महावाक्यमितीरितम् ।
वाक्यवृत्तावतो ब्रह्मापारोक्ष्ये विमतिर्न हि ॥ ७० ॥
आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः ।
अन्तःकरणसम्भिन्नबोधः स त्वम्पदाभिधः ॥ ७१ ॥
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ।
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ७२ ॥

ऽयं पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिति प्रत्यगात्मनो ब्रह्मरूपत्वमभिहितं पुनश्च पुरुषे हेत्यादिना ज्ञानसाधनवैराग्यजननाय गर्भवासादिदोषं प्रदर्श्य कोऽयमात्मेति वयमुपास्महे इत्यादिना विचारेण तत्त्वम्पदार्थपरिशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः ॥ ६८ ॥

उक्तन्यायमितरासु श्रुतिष्वप्यतिदिशति अथान्तरेणेति। सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ॥ ६९ ॥

ननु महावाक्यविचारस्यापरोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशङ्क्य वाक्यवृत्तावाचार्यैस्तथा प्रतिपादितत्वान्नैवमित्याह ब्रह्मापरोक्ष्येति। अतो महावाक्याद् ब्रह्मापरोक्ष्यज्ञाने विप्रतिपत्तिर्नास्तीत्यर्थः॥७०॥

वाक्यवृत्त्युक्तप्रकारं दर्शयति आलम्बनतयेति। यो ऽन्तःकरणसम्भिन्नबोधोऽन्तःकरणोपाधिकश्चिदात्माऽस्मत्प्रत्ययशब्दयोरहमिति ज्ञानस्याहमिति शब्दस्य चालम्बनतया विषयत्वेन भाति स तथाविधो बोधस्त्वम्पदाभिधस्त्वमिति पदमभिधा वाचकं यस्य स त्वंपदाभिधः त्वंपदवाच्य इत्यर्थः ॥ ७१ ॥

एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह मायोपाधि-

प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता।
विरुध्येते यतस्तस्माल्लक्षणा संप्रवर्त्तते ॥ ७३ ॥
तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा।
सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ७४ ॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ७५ ॥

रिति। पारोक्ष्यशबलः परोक्षत्वधर्मविशिष्ट इत्यर्थः। एवं तटस्थलक्षणम् अभिधाय स्वरूपलक्षणमाह सत्याद्यात्मक इति। सत्यमादि येषां ज्ञानादीनां ते सत्यादयः आत्मा स्वरूपं यस्य स तथाविधः तत्पदाभिधः तत्पदमभिधा वाचकं यस्य स तत्पदाभिधः तत्पदवाच्य इत्यर्थः ॥७२॥

एवं पदार्थावभिधाय वाक्यार्थबोधाय लक्षणावृत्तिराश्रयणीयेत्याह प्रत्यगिति। प्रत्यक्त्वपरोक्षत्वे सद्वितीयत्वेन सहिता पूर्णतेति मध्यमपदलोपी समासः सद्वितीयपूर्णत्वे चैकस्य वस्तुनो यतो विरुध्येते अतो लक्षणावृत्तिराश्रयणीयेत्यर्थः ॥ ७३ ॥

सा च कीदृशीत्यत आह तत्त्वमस्यादीति। भागलक्षणा भागत्यागेन लक्षणेत्यर्थः। तत्र दृष्टान्तः सोऽयमिति। सोऽयं देवदत्त इति वाक्यस्थयोः सोऽयमिति पदयोर्यथा जहदजहल्लक्षणावृत्तिराश्रिता नापरा न जहल्लक्षणा नाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः ॥ ७४ ॥

ननु गामानयेत्यादिवाक्येषु लक्षणावृत्त्या विनापि वाक्यार्थबोधो दृश्यते तद्वदत्रापि किं न स्यादित्यत आह संसर्ग इति। यथा लोके गामानयेत्यादौ पदैः स्मारितानामाकाङ्क्षासान्निध्यादिमतां गवादिपदार्थानामन्वयो वाक्यार्थत्वेन स्वीकृतः यथा वा नीलं महत् सुगन्ध्युत्पलम् इत्यादौ नीलत्वादिविशिष्टस्योत्पलस्य वाक्यार्थत्वं स्वीकृतं नैवमत्र महावाक्येषु संसर्गविशिष्टयोरन्यतरस्य वाक्यार्थत्वमभ्युपगम्यते किन्तु अखण्डै-

प्रत्यग्बोधो य आभाति सोऽद्वयानन्दलक्षणः ।
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ७६ ॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्त्तेत तदैव हि ।
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ७७ ॥
एवं सति महावाक्यात् परोक्षज्ञानमीर्यते ।
यैस्तेषां शास्त्रसिद्धान्तविज्ञानं शोभतेतराम् ॥ ७८ ॥
आस्तां शास्त्रस्य सिद्धान्तो युक्त्या वाक्यात् परोक्षधीः ।
स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ॥ ७९ ॥

कारकत्वेन स्वगतादिभेदशून्यसन्मात्ररूपेण वाक्यार्थो विद्वद्भिरभ्युपेयते अतो लक्षणाश्रयणीयेत्यर्थः ॥ ७५ ॥

अखण्डैकरसं वाक्यार्थं दर्शयति प्रत्यग्बोधो य इति । यः प्रत्यग्बोधः सर्वान्तरचिदात्मा आभाति बुद्ध्यादिसाक्षित्वेन स्फुरति सोऽद्वयानन्दलक्षणोऽद्वितीय आनन्दरूपः परमात्मेत्यर्थः अद्वयानन्दरूपश्च तथाविधः परमात्मा प्रत्यग्बोधैकलक्षणश्चिदेकरसः प्रत्यगात्मैवेत्यर्थः ॥ ७६ ॥

एवमखण्डार्थबोधेन किं स्यादित्यत आह इत्थमिति । त्वमर्थस्य प्रत्यगात्मनोऽब्रह्मत्वं भ्रान्तिसिद्धा अब्रह्मरूपता तदर्थस्य ब्रह्मणश्च पारोक्ष्यं परोक्षज्ञानैकविषयत्वञ्च निवर्त्तेत । ततोऽपि किमिति पृच्छति यद्येवमिति । उत्तरमाह शृण्विति ॥ ७७ ॥

ननु अवान्तरवाक्येन ब्रह्मणः परोक्षानुभवसाधनमागम इत्यागमलक्षणमतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमुच्यत इत्याशङ्क्य सिद्धान्तपरिज्ञानशून्योऽयमिति मनसि निधायोपहसति एवं सतीति । एवं वदन्तः सिद्धान्तरहस्यं नैव जानन्तीत्यर्थः ॥ ७८ ॥

स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवाञ्छतः ।
नश्येत् सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ॥ ८० ॥
वृद्धिमिष्टवतो मूलमपि नष्टमितीरितम् ।
लौकिकं वचनं सार्थं सम्पन्नं त्वत्प्रसादतः ॥ ८१ ॥
अन्तःकरणसम्भिन्नबोधो जीवोऽपरोक्षताम् ।
अर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ॥ ८२ ॥
नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः ।
यावद्विदेहकैवल्यमुपाधेरनिवारणात् ॥ ८३ ॥

ननु सिद्धान्तस्यावत् तिष्ठतु वाक्यस्य परोक्षज्ञानजनकत्वमनुमानसिद्धमिति शङ्कते स्यादेतदिति । विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात् स्वर्गादिप्रतिपादकवाक्यवत् इत्यनुमानेन परोक्षज्ञानजनकत्वं सिद्धमित्यर्थः । अनैकान्तिकोऽयं हेतुरिति परिहरति मैवमिति । दशमस्त्वमसीति वाक्ये वाक्यत्वे समानेऽप्यपरोक्षज्ञानजनकत्वोपलम्भादिति भावः ॥ ७९ ॥

किञ्च त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसङ्गादपि न महावाक्यं परोक्षज्ञानजनकमित्यभिप्रायेणाह स्वत इति ॥ ८० ॥

इष्टापत्तिरित्युपहस्याह वृद्धिमिति ॥ ८१ ॥

ननु सोपाधिकत्वात् जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य तन्न युज्यते इति शङ्कते अन्तःकरणेति ॥ ८२ ॥

ब्रह्मणो निरुपाधिकत्वमसिद्धमिति परिहरति नैवमिति । जीवस्य ब्रह्मरूपताज्ञानं यदस्ति तस्य सोपाधिकवस्तुविषयत्वात् तद्विषयस्य ब्रह्मणोऽपि सोपाधिकत्वं ज्ञानस्य सोपाधिकविषयत्वञ्च ज्ञेयस्य सोपाधिकत्वमन्तरेण न घटत इति भावः । तदेव कुत इत्यत आह यावदिति ॥ ८३ ॥

अन्तःकरणसाहित्यराहित्याभ्यां विशिष्यते ।
उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ॥ ८४ ॥
यथा विधिरुपाधिः स्यात् प्रतिषेधस्तथा न किम् ।
सुवर्णलोहभेदेन शृङ्खलत्वं न भिद्यते ॥ ८५ ॥
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ।
वेदान्तानां प्रवृत्तिः स्यात् द्विधेत्याचार्य्यभाषितम् ॥ ८६ ॥

ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशङ्क्याह अन्तःकरणेति । जीवभावब्रह्मभावयोरन्तःकरणसाहित्यराहित्ये एवोपाधी इत्यर्थः ॥ ८४ ॥

नन्वन्तःकरणसम्बन्धस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशङ्क्य यावत् कार्य्यमवस्थायि भेदहेतोरुपाधितेत्युक्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति यथेति । विधिर्भावरूपोऽन्तःकरणसम्बन्धो यथोपाधिः स्यात् तथा प्रतिषेधोऽभावरूपोऽन्तःकरणवियोग उपाधिः किं न स्यात् किन्तु स्यादेव इत्यर्थः । तथापि भावाभावरूपत्वलक्षणमवान्तरवैलक्षण्यं दृश्यते एवेत्याशङ्क्य तस्याकिञ्चित्करत्वेनानादरणीयत्वमित्यभिप्रेत्य दृष्टान्तमाह सुवर्णेति । पुरुषप्रचारबोधकत्वांशे अनुपयुक्तं सुवर्णत्वलोहत्वादिकं वैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ॥ ८५ ॥

विधेरिव निषेधस्यापि ब्रह्मबोधोपायत्वेन ब्रह्मोपाधित्वं द्रढयितुं विधिनिषेधयोरपि ब्रह्मबोधोपायत्वमाचार्य्यैर्निरूपितमिति दर्शयति अतदिति । तच्छब्देन ब्रह्माभिधीयते अतच्छब्देन तदतिरिक्तप्राणादि, न तत् अतत् तस्य प्रपञ्चस्य व्यावृत्तिर्निरसनं तदेव रूपमुपायस्तेन साक्षात् विधिमुखेन च विधिर्विधानं साक्षात् वाचकशब्दप्रयोगः सत्यं ज्ञानमनन्तमित्येवमादिरूपस्तेन च विधिमुखेन तद्द्वारेणापीत्यर्थः वेदान्तानामुपनिषदां प्रवृत्तिः प्रवर्त्तनं प्रतिपादनं ब्रह्मणीति शेषः ॥ ८६ ॥

अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः ।
नैवमंशस्य हि त्यागो भागलक्षणयोदितः ॥ ८७ ॥
अन्तःकरणसंत्यागादवशिष्टे चिदात्मनि ।
अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ॥ ८८ ॥
स्वप्रकाशोऽपि साक्ष्येष धीवृत्त्या व्याप्यतेऽन्यवत् ।
फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम् ॥ ८९ ॥
बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥ ९० ॥

ननु वेदान्तानाम् अतद्व्यावृत्त्या ब्रह्मबोधकत्वाङ्गीकारेऽहमर्थस्य बुद्ध्यंशस्यापि त्यागप्रसङ्गादहं ब्रह्मास्मीति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीति शङ्कते अहमर्थेति । अहमर्थांशस्य सर्वथा त्यक्तत्वाभावान्नैव-मिति परिहरति नैवमिति । हि यस्मात् कारणात् भागलक्षणया जह-दजहल्लक्षणया अहमाद्यर्थैकदेशस्य जडांशस्य त्याग ईरितः न तु बुद्ध्यवच्छिन्नस्य अतोऽहं ब्रह्मास्मीति ज्ञानमुपपन्नम् इत्यर्थः ॥ ८७ ॥

अंशत्यागेन बोधप्रकारम् अभिनीय दर्शयति अन्तःकरणेति ॥ ८८ ॥

ननु चैतन्यस्य ब्रह्मात्मनः स्वप्रकाशत्वात् बुद्धिवृत्तिविषयत्वं न घटते इत्याशङ्क्याह स्वप्रकाशोऽपीति । अन्यवत् घटादिवदित्यर्थः । स्वप्रकाशो-ऽप्यविद्यावच्छिन्नत्वाद्बुद्धिवृत्तिव्याप्यत्वादिति भावः । नर्ह्यपसिद्धान्तापात इत्याशङ्क्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्याङ्गीकृतत्वान्नायमपसिद्धान्त इति परिहरति फलव्याप्यत्वमिति । फलं वृत्तिप्रतिबिम्बितचिदाभासस्तद्व्याप्यत्वमेवास्य ब्रह्मात्मनो निराकृतं स्वेनैव स्फुरणरूपत्वादिति भाव ॥ ८९ ॥

आत्मनि फलव्याप्त्यभावं दर्शयितुमनात्मनो वृत्त्या फलेन च व्याप्यत्वं दर्शयति बुद्धीति । उभयव्याप्तेः प्रयोजनमाह तत्रेति । तत्र तयोः बुद्धिचिदाभासयोर्मध्ये धिया बुद्धिवृत्त्या प्रमाणभूतया अज्ञानं नश्यति

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ।
स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते ॥ ९१ ॥
चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने तथा ।
न दीपदर्शने किन्तु चक्षुरेकमपेक्ष्यते ॥ ९२ ॥
स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत् परम् ।
न तु ब्रह्मण्यतिशयं फलं कुर्य्यात् घटादिवत् ॥ ९३ ॥
अप्रमेयमनादिञ्चेत्यत्र श्रुत्येदमीरितम् ।

ज्ञानाज्ञानयोर्विरोधात् । आभासेन चिदाभासेन घटः स्फुरेत् जडत्वेन स्वतः स्फुरणाभावादिति भावः ॥ ९० ॥

इदानीमात्मनि ततो वैलक्षण्यं दर्शयति ब्रह्मणीति । प्रत्यक्ब्रह्मणोरैक्यस्याज्ञानेनावृतत्वात् तस्याज्ञानस्य निवृत्तये वाक्यजन्यायाः ब्रह्माकारया धीवृत्त्या व्याप्तिरपेक्ष्यते स्वस्यैव स्फुरणरूपत्वात् तत्स्फुरणाय चिदाभासो नापेक्ष्यतेऽतो युज्यमानोऽपि चिदाभासो नोपयुज्यत इत्यर्थः ॥ ९१ ॥

उक्तमर्थं दृष्टान्तप्रदर्शनेन विशदयति चक्षुरिति । अन्धकारावृत-घटादिदर्शने चक्षुर्दीपावुभावप्यपेक्ष्येते दीपदर्शने न तु तथा किन्त्वेकं चक्षुरेवापेक्ष्यते यथा तथा ब्रह्मण्यज्ञाननाशायेति पूर्वेण सम्बन्धः ॥ ९२ ॥

ननु बुद्धितद्वृत्तीनां चिदाभासवैशिष्ट्यस्याभाव्यात् घटादिष्विव ब्रह्मण्यपि फलव्याप्तिर्बलाद् भवेदित्याशङ्क्याह स्थितोऽपीति । यद्यपि घटाद्याकारवृत्तिवत् ब्रह्मगोचरवृत्तावपि चिदाभासोऽस्ति तथापि नासौ ब्रह्मणो भेदेन भासते किन्तु प्रचण्डातपमध्यवर्त्तिप्रदीपप्रभावत् तेन एकीभूत इव भवति अतो न स्फुरणलक्षणातिशयजनको ब्रह्मणीत्यर्थः ॥ ९३ ॥

ननु ब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विद्यत इत्युक्तं तत्र

मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता ॥ ९४ ॥
आत्मानञ्चेद् विजानीयादयमस्मीति वाक्यतः ।
ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोऽभिधीयते ॥ ९५ ॥
अस्तु बोधोऽपरोक्षोऽत्र महावाक्यात् तथाप्यसौ ।
न दृढः श्रवणादीनामाचार्यैः पुनरीरणात् ॥ ९६ ॥

किं प्रमाणमित्याशङ्क्यागमः प्रमाणमित्याह अप्रमेयमिति । निर्विकल्प-मनन्तञ्च हेतुदृष्टान्तवर्जितम् । अप्रमेयमनादिञ्च यज्ज्ञात्वा मुच्यते बुध इत्यत्र मन्त्रे श्रुत्यामृतबिन्दूपनिषदा अप्रमेयशब्देनेदं फलव्याप्यत्वं निराकृतम् । मनसैवेदमाप्तव्यं नेह नानास्ति किञ्चनेति कठवल्ल्या धीव्याप्तता श्रुता वृत्तिव्याप्यत्वं श्रुतमित्यर्थः ॥ ९४ ॥

आत्मानञ्चेद् विजानीयादिति मन्त्रेणापरोक्षज्ञानशब्दाभिहत्याख्यं ज्ञानमपव्याहृत्य अभिधीयत इत्यपरोक्षज्ञानं येनोक्तमित्याख्ये इमं अनर्थं श्रोतसे ब्रूते आत्मानञ्चेदिति श्रुतिरित्यनेन श्लोकेन तत्र क्रियतामेतदपरोक्षज्ञानं जायते इत्याकाङ्क्षायामाह आत्मानञ्चेदिति । ब्रह्मात्मव्यक्तिं सत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मस्वरूपमुल्लिख्य विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मीति सोऽभिधीयते अनेन वाक्येनेत्यर्थः ॥ ९५ ॥

ननु तर्हि पूर्वोक्तरीत्या महावाक्यविचारादेवापरोक्षज्ञानसिद्धेरादिकरणसनुपरवादित्यादौ विहितं श्रवणाद्यावर्तनमननुष्ठेयं स्यादित्याशङ्क्य श्रवणादीनां तदावर्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह अस्त्विति । अत्र ब्रह्मात्मनि विषये महावाक्यात् सकृच्छ्रुताद् विचारविहिनादपरोक्षबोधोऽस्तु भवत्वेव तथापि नासौ दृढोऽतः श्रवणाद्यावर्तनीयं श्रीमच्छङ्कराचार्यैः पुनर्वाक्यार्थज्ञानोत्पत्त्यनन्तरमपि श्रवणाद्यावर्तनाभिधानादित्यर्थः । श्रवणादीति इति वक्ष्यते ॥ ९६ ॥

अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ।
शमादिसहितस्तावदभ्यसेत् श्रवणादिकम् ॥ ९७ ॥
बाढं सन्ति ह्यदार्ढ्यस्य हेतवः श्रुत्यनेकता ।
असम्भाव्यत्वमर्थस्य विपरीता च भावना ॥ ९८ ॥
शाखाभेदात् कामभेदात् श्रुतं कर्मान्यथान्यथा ।
एवमत्रापि माशङ्कीत्यतः श्रवणमाचरेत् ॥ ९९ ॥
वेदान्तानामशेषाणामादिमध्यावसानतः ।
ब्रह्मात्मन्येव तात्पर्य्यमितिधीः श्रवणं भवेत् ॥ १०० ॥

आचार्य्यैः केन वाक्येनाभिहितमित्याशङ्क्य तद्वाक्यं पठति अहमिति ॥ ९७ ॥

ननु वाक्यप्रमाणजनितस्य ज्ञानस्यादार्ढ्यं कुत इत्याशङ्क्याह बाढमिति । हि यस्मात् कारणात् श्रुत्यनेकता श्रुतीनां नानात्वमेको हेतुरर्थस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासम्भावितत्वमपरो हेतुः विपरीतभावना च पुनः कर्तृत्वाद्यभिमानरूपा तु तृतीयो हेतुः इत्येवंविधा अदार्ढ्यस्य हेतवो बाढं सन्ति सर्वथापि विद्यन्ते अतोऽपरोक्षानुभवदार्ढ्याय श्रवणादिकमावर्त्तनीयमिति भावः ॥ ९८ ॥

एवं त्रिविधानदार्ढ्यस्य हेतूनुपन्यस्य श्रुतिनानात्वप्रयुक्तादार्ढ्यनिवृत्तये श्रवणावृत्तिः कर्त्तव्येत्याह शाखाभेदादिति । यथा शाखाभेदात् कर्मभेदः श्रूयते बह्वृचैर्हौत्रं क्रियते यजुषाध्वर्य्यवं सामोद्गीथमिति यथा वा कामभेदात् कारीर्य्या वृष्टिकामो यजेत शतकृष्णलमायुष्काम इत्यादिकर्मभेदः श्रुत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशङ्कायां तन्निवारणाय श्रवणं पुनः पुनः कर्त्तव्यमित्यर्थः ॥ ९९ ॥

श्रवणस्वरूपमाकाङ्क्षायां तल्लक्षणमाह वेदान्तानामिति । सर्वेषामप्युपनिषदामुपक्रमोपसंहारादिपर्य्यालोचनया ब्रह्मरूपे प्रत्यगा-

समन्वयाध्याय एतत् सूत्रं धीस्वास्थ्यकारिभिः ।
तर्कैः सम्भावनार्थस्य द्वितीयाध्याय ईरिता ॥ १०१ ॥
बहुजन्मदृढ़ाभ्यासाद् देहादिष्वात्मधीः क्षणात् ।
पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ॥ १०२ ॥
विपरीता भावनेयमैकाग्र्यात् सा निवर्त्तते ।
तत्त्वोपदेशात् प्रागेव भवत्येतदुपासनात् ॥ १०३ ॥
उपास्तयोऽतएवात्र ब्रह्मशास्त्रेऽपि चिन्तिताः ।
प्रागनभ्यासिनः पश्चात् ब्रह्माभ्यासेन तद् भवेत् ॥१०४॥

अन्ये च तात्पर्य्यमिदमर्थस्य पर्य्यवसानमित्येवङ्रूपो निश्चयः श्रवण-मित्यर्थः ॥ १०० ॥

एवंविधं श्रवणं कुत्र निरूपितमित्यत आह समन्वयेति । एतत् श्रवणं समन्वयाध्याये सूत्रकृद्व्यासादिभिरिति शेषः । अर्थसम्भावना सिद्धिहेतुर्मननन्तु द्वितीयाध्याये निरूपितमित्याह धीस्वास्थ्येति । प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्त्यन्ताभिधेयैरर्थस्य सम्भावना सम्भावितत्वानुसन्धानं मननं द्वितीयाध्याये निरूपित-मित्यर्थः ॥ १०१ ॥

इदानीं विपरीतभावनां तन्निवृत्त्युपायञ्च दर्शयति बहुजन्मेति वाक्येन ॥ १०२ ॥

विपरीतभावनानिवर्त्तकं यदैकाग्र्यं तत् कुतो जायत इत्याशङ्क्याह तत्त्वेति । एतदैकाग्र्यं तत्त्वोपदेशात् प्रागेव सगुणब्रह्मोपासनाद् भवति भवेदित्यर्थः ॥ १०३ ॥

नन्वेतत् कुतोऽवगतमित्याशङ्क्योपासनाविचारस्य वेदान्तशास्त्रे कृत-त्वादित्याह उपास्तय इति । अकृतोपासनस्य कुतस्तज्ज्ञानमित्यत आह प्रागिति ॥ १०४ ॥

तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वञ्च ब्रह्माभ्यासं विदुर्बुधाः ॥ १०५ ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद् बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥ १०६ ॥
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ १०७ ॥
इति श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः ।

ब्रह्माभ्यासश्च कीदृश इत्याकाङ्क्षायामाह तच्चिन्तनमिति ॥ १०५ ॥

एतदेकपरत्वं विशदयितुं श्रुतिमाह तमेवेति । धीरः ब्रह्मचर्यादिसाधनसम्पन्नः ब्राह्मणः ब्रह्म भवितुमिच्छुः मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमेव विज्ञाय संशयाद्यभावो यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसन्ततिरूपामैकाग्र्यं कुर्वीत सम्पादयेत् । अनात्मगोचरान् बहून् शब्दान्नानुध्यायान्न स्मरेत्, ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्यात् अन्यथा शब्दध्यानेन वाग्विग्लापनानुपपत्तेः । कुत इत्यत आह वाचो विग्लापनं हि तदिति । हि यस्मात् तदभिधानं अनेन स्मरणमप्युपलक्ष्यते वाच इति मनसोऽप्युपलक्षणं विग्लापयतीति विग्लापनं श्रमहेतुः । अयमभिप्रायः इतरशब्दानुसन्धाने मनसः श्रमो भवति तदभिधाने तु वाच इति ॥ १०६ ॥

एवमैकाग्र्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह अनन्या इति । ये जनाः अनन्याः अहं ब्रह्मास्मीति ज्ञानेन मदभिन्नाः सन्तस्तथैव मां चिन्तयन्तः अखण्डानुसन्धानेन चिन्तनं कुर्वन्तः पर्युपासते परितः सर्वेष्वपि कालेषूपासते मद्रूपा एव वर्तन्ते नित्याभियुक्तानां सदा अविच्छिन्नानां तेषामस्मदात्मतयानुसन्धीयमानोऽहं योगक्षेममलब्धलाभलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि सम्पादयामीत्यर्थः ॥ १०७ ॥

उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह इतीति । एते श्रुतिस्मृती

विध्नो विपरीताया भावनायाः क्षयाय हि ॥ १०८ ॥
यद् यथा वर्त्तते तस्य तत्त्वं हित्वान्यथात्वधीः ।
विपरीता भावना स्यात् पित्रादावरिधीर्यथा ॥ १०९ ॥
आत्मा देहादिभिन्नोऽयं मिथ्या चेदं जगत् तयोः ।
देहाद्यात्मत्वसत्यत्वधीर्विपर्य्ययभावना ॥ ११० ॥
तत्त्वभावनया नश्येत् सातो देहातिरिक्तताम् ।
आत्मनो भावयेत् तद्वन्मिथ्यात्वं जगतोऽनिशम् ॥१११॥
किं मन्त्रजपवन्मूर्त्तिध्यानवद्वात्मभेदधीः ।
जगन्मिथ्यात्वधीश्चात्र व्यावर्त्त्या स्यादुतान्यथा ॥ ११२ ॥

विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयन्नित्यर्थः ॥ १०८ ॥

ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वम् इत्याशङ्क्य तल्लक्षणयोगादिति दर्शयितुं तस्या लक्षणमाह यद्यथेति । यद् वस्तु शुक्त्यादिरूपत्वं परित्यज्य अन्यथात्वधीरन्यथात्वस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यात् अतस्मिंस्तद्बुद्धिरिति यावत् । तत्र दृष्टान्तमाह पित्रादाविति ॥ १०९ ॥

उक्तलक्षणं प्रकृते योजयति आत्मेति । अयमात्मा देहादिभ्यो वस्तुतो भिन्नः इदं जगत् मिथ्या एवं सत्यपि तयोरात्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनेत्यर्थः ॥ ११० ॥

पूर्वोक्तायाः का निवर्त्तिकेति सामान्येनाभिधाय विशेषाकारेणाह तत्त्वभावनयेति । सा देहाद्यात्मत्वजगत्सत्यत्वरूपा विपरीतभावना तत्त्वभावनया आत्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरन्तरध्यानेन नश्येत् अत आत्मनो देहाद्यतिरिक्तत्वं देहादेर्जगतो मिथ्यात्वञ्च सदा भावयेदित्यर्थः ॥ १११ ॥

सदा भावयेदित्युक्तं तत् जपादाविव नियमेनापेक्षितं न वेति

अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत् ।
बुभुक्षुर्जपवत् भुङ्क्ते न कश्चित् नियतः क्वचित् ॥११३॥
अश्नाति वा न वाश्नाति भुङ्क्ते वा स्वेच्छयान्यथा ।
येन केन प्रकारेण क्षुधामपनिनीषति ॥ ११४ ॥
नियमेन जपं कुर्य्यादकृतौ प्रत्यवायतः ।
अन्यथाकरणेऽनर्थः स्वरवर्णविपर्य्ययात् ॥ ११५ ॥

पृच्छति किमिति । आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नत्वेन जगतो मिथ्यात्वानुसन्धानञ्च मन्त्रजपदेवताध्यानादिवत् किं नियमेनानुष्ठातव्य उत लौकिकव्यवहारवन्नियममन्तरेणापि कर्तुं शक्यत इति ॥ ११२ ॥

दृष्टफलत्वान्नात्र नियमः कश्चिदस्तीत्याह अन्यथेतीति । अन्यथा नियमं विनेत्यर्थः । तत्र हेतुमाह दृष्टार्थत्वेनेति । तत्र दृष्टान्तमाह भुक्तिवदिति । दृष्टार्थेऽपि भोजने नियमाः श्रुतिस्मृत्योरुपलभ्यन्त इत्याशङ्क्याह बुभुक्षुरिति । क्षुदपनयनाय भोक्तुमिच्छन् पुरुषो जपं कुर्वाण इव न नियमेन भुङ्क्ते अपि तु यथा क्षुद्बाधोपशान्तिः स्यात् तथा भोजनं करोतीत्यर्थः ॥ ११२ ॥

एतदेव प्रपञ्चयति अश्नातीति । अश्नाति वा काले सति कदाचित् भुङ्क्ते न वाश्नाति तत्किं भवति क्षुद्बाधाविकारकद्यूतादिचेष्टयाऽन्यत्रैव कालं नयति अन्यथा वा तिष्ठन् गच्छन् शयानो वा स्वेच्छया भुङ्क्ते एवं येन केन प्रकारेण तात्कालिकीं क्षुधाम् अपनेतुमिच्छति । अयमभिसन्धिः क्षुधानिवृत्तिलक्षणदृष्टफलाय भोजनमेव कार्यं नियमास्तु परलोकफलेतर इति ॥ ११४ ॥

जपादौ भोजनाद् वैलक्षण्यं दर्शयति नियमेनेति । तत्र हेतुमाह अकृतौ प्रत्यवायत इति । भवत्येवमकरणे प्रत्यवायः अन्यथा करणे तु

श्रुत्वैव दृष्टबाधाकृद् विपरीता च भावना ।
जेया केनाप्युपायेन नास्त्यत्रानुष्ठितेः क्रमः ॥ ११६ ॥
उपायः पूर्वमेवोक्तस्तच्चिन्ताकथनादिकः ।
एतदेकपरत्वेऽपि निर्बन्धो ध्यानवन्न हि ॥ ११७ ॥
मूर्तिप्रत्ययसान्तत्यमन्यानन्तरितं धियः ।
ध्यानं तत्रातिनिर्बन्धो मनसश्चञ्चलात्मनः ॥ ११८ ॥
चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम् ।

स नास्तीत्याशङ्क्याह अन्यथेति । 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' इत्युक्तत्वादिति भावः ॥ ११५ ॥

ननु प्रारब्धबाधया दृष्टबाधहेतुत्वात् तन्निवृत्तये भोगनियमेनापि भोक्तव्यमेव विपरीतभावनायास्तु तथात्वाभावात् तन्निवृत्तिकं ध्यानमदृष्टफलाय नियमेनानुष्ठेयमित्याशङ्क्याह श्रुत्वैवेति । विपरीतभावनायास्तु दृष्टहेतुत्वादनुभवसिद्धत्वादिति भावः ॥ ११६ ॥

तर्हि स उपायः प्रदर्शनीय इत्याशङ्क्य पूर्वमेव प्रदर्शित इत्याह उपाय इति । ननु तत्त्वज्ञानप्राक्साधनत्वादिनियमो मास्तु न ध्यानवदितरैकपरत्वेऽप्येकाग्रतानिर्बन्धोऽस्त्वित्याशङ्क्याह एतदिति ॥ ११७ ॥

ननु ध्यानस्य ध्येयवस्त्वाकारात्मकत्वात् तत्र को निर्बन्ध इत्याशङ्क्य ध्याने निर्बन्धं दर्शयितुं ध्यानस्वरूपं तावदाह मूर्तीति । धियो बुद्धेः सम्बन्धिनां मूर्तिप्रत्ययानां देवतादिमूर्तिगोचराणां प्रत्ययानां यत् सान्तत्यम् अविच्छिन्नतया प्रवाहरूपत्वं तदन्यानन्तरितम् अन्येन विजातीयप्रत्ययेनानन्तरितं चेत् ध्यानमित्युच्यते । एवं ध्यानस्वरूपमुक्त्वा तत्र निर्बन्धं दर्शयति तत्रेति । सदा पर्यटनशीलस्य कातरस्य मनसः चञ्चलस्य चाञ्चल्यादौ बलवत्त्वे ... निरोधे महान् प्रयत्नोऽपेक्षित इति भावः ॥ ११८ ॥

मनसश्चाञ्चल्यादौ गीतावाक्यं प्रमाणयति चञ्चलमिति । प्रमाथि

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ११९ ॥
अप्यब्धिपानान्महतः सुमेरून्मूलनादपि ।
अपि वह्न्यशनात् साधो विषमश्चित्तनिग्रहः ॥ १२० ॥
कथनादौ न निर्बन्धः शृङ्खलाबद्धदेहवत् ।
किन्त्वनन्तेतिहासाद्यैर्विनोदो नाट्यवद्धियः ॥ १२१ ॥
चिदेवात्मा जगन्मिथ्येत्यत्र पर्य्यवसानतः ।
निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् ॥ १२२ ॥

प्रमथनशीलं पुरुषस्य व्याकुलत्वकारणं बलवत् समर्थमनिग्राह्यमित्यर्थः । दृढं सत्यपि वा विषये लग्नं तत उद्धर्तुमशक्यमित्यर्थः । अतस्तस्य मनसो निग्रहो वायोर्निग्रह इव सुदुष्करः ॥ ११९ ॥

मनसो दुर्निग्रहत्वे वसिष्ठवाक्यमपि प्रमाणयति अप्यब्धिपानादिति ॥ १२० ॥

प्रकृते ततो वैषम्यं दर्शयति कथनादाविति । शृङ्खलाबद्धदेहस्य यथा निर्बन्धो न तथा कथनादावित्यर्थः । आदिशब्देन तच्चिन्तनादिकं गृह्यते न केवलं निर्बन्धाभावः प्रत्युत धियो विनोद इत्याह किन्त्विति । इतिहासः पूर्वेषां कथा आद्या येषां लौकिककथानुकूलयुक्तिदृष्टान्तप्रदर्शनादीनां ते तथा अनन्ताः असंख्याताः अनन्ताश्च ते इतिहासाद्याश्चेति अनन्तेतिहासाद्यास्तैर्धियो बुद्धेर्विनोदः क्रीडाविशेषो भवति । तत्र दृष्टान्तः नाट्यवदिति । नाट्यं क्रियाभिरोचनमिवेत्यर्थः ॥ १२१ ॥

ननु कथादिभिरप्येतदेकपरत्वव्याघातः स्यादित्याशङ्क्याह चिदेवेति । इतिहासादीनामात्मा चिन्मात्ररूपो न देहादिरूपो जगच्च मिथ्येत्यत्रैव पर्य्यवसानात् न तैरेतदेकपरत्वशब्दाभिधेयस्य निदिध्यासनस्य विक्षेप इत्यर्थः ॥ १२२ ॥

कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च ।
विक्षिप्यते प्रवृत्ता धीस्तैस्तत्त्वस्मृत्यसम्भवात् ॥ १२३ ॥
अनुसन्धत्तैवात्र भोजनादौ प्रवर्त्तितुम् ।
शक्यतेऽत्यन्तविक्षेपाभावादाशु पुनः स्मृतेः ॥ १२४ ॥
तत्त्वविस्मृतिमात्रान्नानर्थः किन्तु विपर्य्ययात् ।
विपर्य्येतुं न कालोऽस्ति झटिति स्मरतः क्वचित् ॥ १२५ ॥
तत्त्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः ।
प्रत्युताभ्यासघातित्वात् बलात् तत्त्वमपेक्ष्यते ॥ १२६ ॥
तमेवैकं विजानीत ह्यन्या वाचो विमुञ्चथ ।
इति श्रुतं तथाऽन्यत्र वाचो विग्लापनन्त्विति ॥ १२७ ॥

नन्वेवं भोजनादीनामङ्गीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशङ्क्याह कृष्यादीति ॥ १२३ ॥

कृष्यादीनां तत्त्वानुसन्धानविघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वात् तदपि त्याज्यमेवेत्याशङ्क्याह अनुसन्धत्तैवेति । कुत इत्यत आह शक्यत इति । विक्षेपाभावोऽपि कुत इत्यत आह आशु पुनः स्मृतेरिति ॥ १२४ ॥

ननु तदानीं विक्षेपाभावेऽपि तत्त्वविस्मृतिसद्भावात् पुरुषार्थहानिः स्यादित्याशङ्क्याह तत्त्वेति । कुतस्तर्ह्यनर्थ इत्यत आह किन्त्विति । विस्मरणे सति विपर्य्ययोऽपि स्यादित्याशङ्क्याह विपर्य्येतुमिति ॥ १२५ ॥

ननु भोजनादिके प्रवृत्तस्येव तर्काद्यभ्यासप्रवृत्तस्यापि तत्त्वस्मरणं किं न स्यादित्याशङ्क्याह तत्त्वस्मृतेरिति । न केवलं तत्त्वानुसन्धानावसराभाव एव किन्तु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात् तदानीं स्मृतमपि तत्त्वं बलादुपेक्ष्यते इत्याह प्रत्युतेति ॥ १२६ ॥

तत्त्वानुसन्धानविरोधिनः शब्दव्यापारस्य त्याज्यत्वे प्रमाणत्वेन 'तमे-

आहारादि त्यजन्नैव जीवेच्छास्त्रान्तरं त्यजन्।
किं न जीवसि येनैवं करोष्यत्र दुराग्रहम्॥ १२८॥
जनकादेः कथं राज्यमिति चेद्दृढबोधतः।
तथा तवापि चेत्तर्कं पठ यद्वा कृषिं कुरु॥ १२९॥
मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकाङ्क्षया।
अक्लिश्यन्तः प्रवर्तन्ते स्वस्वकर्मानुसारतः॥ १३०॥
अतिप्रसङ्गो मा शङ्क्यः स्वकर्मवशवर्तिनाम्।
अस्तु वा केन शक्येत कर्म वारयितुं वद॥ १३१॥

वैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः" इति श्रुतिवाक्यमर्थतः पठति तमेवैकमिति। "नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तत्" इत्येतदपि वाक्यं श्रूयत इत्याह तथान्यत्रेति॥ १२७॥

ननु तत्त्वानुसन्धानातिरिक्तमाहारादि यथा न त्यज्यते एवमितरशास्त्राद्यभ्यासोऽपि क्रियतामित्याशङ्क्य कुशोथं मत्वाह आहारादीति॥ १२८॥

ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपालनादौ प्रवृत्तिरिति शङ्कते जनकादेरिति। दृढापरोक्षज्ञानित्वात् तेषां सा न बाधिकेत्यभिप्रायेण परिहरति दृढेति। तर्हि ममापि दृढबोधोऽस्तीति वदन्तं प्रत्याह तथेति॥ १२९॥

ननु तत्त्वविदः संसारासारतां जानन्तः कथं तत्र प्रवर्तिष्यन्त इत्याशङ्क्य प्रारब्धस्यावश्यंभाविफलत्वात् भोगेन तत्क्षयाय प्रवृत्तिरित्याह मिथ्येति॥ १३०॥

तर्ह्यनाचारेऽपि प्रवृत्तिः स्यादित्याशङ्क्याह अतिप्रसङ्ग इति। प्रारब्धवशादेवातिप्रसङ्गोऽपि स्यादित्याशङ्क्याङ्गीकरोति अस्तु वेति॥ १३१॥

ज्ञानिनोऽज्ञानिनश्चात्र समेऽप्यारब्धकर्म्मणि ।
न क्लेशो ज्ञानिनो धैर्य्यान्मूढ़: क्लिश्यत्यधैर्य्यत: ॥१३२॥
मार्गे गन्तार्द्वयो: श्रान्तौ समायामप्यदूरताम् ।
जानन् धैर्य्यात् द्रुतं गच्छेदन्यस्तिष्ठति दीनधी: ॥१३३॥
साक्षात्कृतात्मधी: सम्यगविपर्य्ययबाधित: ।
किमिच्छन् कस्य कामाय शरीरमनु संज्वरेत् ॥ १३४ ॥
जगन्मिथ्यात्वधीभावादाचिष्टौ काम्यकामुकौ ।
तयोरभावे सन्ताप: शाम्येन्निस्नेहदीपवत् ॥ १३५ ॥
गन्धर्व्वपत्तने किञ्चिन्नैन्द्रजालिकनिर्म्मितम् ।

ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मणि अवश्यभोक्तव्यतया समाने तयोः कुतो वैलक्षण्यमित्याशङ्क्याह ज्ञानिन इति ॥ १३२ ॥

तत्र दृष्टान्तमाह मार्ग इति ॥ १३३ ॥

इत्यनुपपादितमात्मानञ्चेद्विजानीयादिति मन्त्रस्य पूर्वार्द्धमनुवदन् फलप्रदर्शनपरमुत्तरार्द्धम् अवतारयति साक्षात्कृतात्मधीरिति । साक्षात्कृतात्मधीः साक्षात्कृत आत्मा यया सा साक्षात्कृतात्मा तादृशी धीर्यस्य स साक्षात्कृतात्मधीः । अविपर्ययबाधितः विपर्ययेण देहाद्यात्मत्वबुद्ध्या बाधितो न भवतीत्यविपर्ययबाधितः । उभयं हेतुगर्भितं विशेषणम् ॥ १३४ ॥

तत्र मन्त्रार्द्धस्य तात्पर्यमाह जगन्मिथ्यात्वधीभावादित्यादिना । काम्यश्च कामुकश्च काम्यकामुकौ तावाशिष्टौ । तदभावे कारणमाह जगन्मिथ्यात्वधीभावादिति । ततः किमिच्छन्नित्याह तयोरभाव इति । तयोः काम्यकामुकयोरभावे सन्तापः कामनानिमित्तकः कारणाभावात् निःस्नेहदीपवत् शाम्येदित्यर्थः ॥ १३५ ॥

काम्याभावात् कामनाभावः क्व दृष्ट इत्याशङ्क्याह गन्धर्वपत्तन

जानन् कामयते किन्तु जिहासति हसन्निदम् ॥१२६॥
आपातरमणीयेषु भोगेष्वेवं विचारवान् ।
नानुरज्यति किन्त्वेतान् दोषदृष्ट्या जिहासति ॥१२७॥
अर्थानामर्जने क्लेशस्तथैव परिरक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थान् क्लेशकारिणः ॥१२८॥
मांसपाञ्चालिकायास्तु यन्त्रलोलेऽङ्गपञ्जरे ।
स्नाय्वस्थिग्रन्थिशालिन्याः स्त्रियाः किमिव शोभनम् ॥१२९॥
एवमादिषु शास्त्रेषु दोषाः सम्यक् प्रपञ्चिताः ।
विमृशन्ननिशन्तानि कथं दुःखेषु मज्जति ॥ १४० ॥

इति । मायाविनिर्मिते पत्तने स्थितं वस्तु किञ्चिदपि इदमैन्द्रजालिक-निर्मितमिति जानन् न कामयते न केवलं कामनाभावः प्रत्युत इदमनृ-तमिति हसन् जिहासति परित्यक्तुमिच्छति ॥ १२६ ॥

दार्ष्टान्तिके योजयति आपातेति । एवम् आपातरमणीयेषु प्रतीति-मात्ररम्येषु भोगेषु भुज्यन्त इति भोगाः विषयाः स्रक्चन्दनवनिता-दयः तेषु एवं विचारवान् आपातरमणीयत्वानुसन्धानवान् नानु-रज्यति नासक्तिं करोति किन्तु दोषदर्शनेन तान् परित्यक्तु-मिच्छति ॥ १२७ ॥

के ते दोषा इत्यत आह अर्थानामिति ॥ १२८ ॥

एवं विषयाणां दुःखहेतुत्वं प्रदर्श्य अशोभनत्वम् अपि दर्शयति मांसपाञ्चालिकायामिति । स्नायवः शिराः अस्थीनि प्रसिद्धानि ग्रन्थयो मांसनिचयरूपाः नितम्बस्तनादयः एतैः शालितायाः मांसपाञ्चालिकायाः पुत्तलिकायाः स्त्रियाः यन्त्रलोले यन्त्रवच्चञ्चले अङ्गपञ्जरे अङ्गान्येव पञ्जरं तस्मिन् शरीरे किं शोभनमिव न किमपीत्यर्थः ॥ १२९ ॥

एवमादिष्विति । आदिशब्देन त्वङ्मांसरक्तवसाद्यात्मकं पृथक् तथा

क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ।
मिष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ॥ १४१ ॥
प्रारब्धकर्मप्राबल्याद् भोगेष्विच्छा भवेद् यदि ।
क्लिश्यन्नेव तदाप्येष भुङ्क्ते विष्टिगृहीतवत् ॥ १४२ ॥
भुञ्जानास्तानपि बुधाः श्रद्धावन्तः कुटुम्बिनः ।
नाद्यापि कर्म नश्छिन्नमिति क्लिश्यन्ति सन्ततम् ॥ १४३ ॥
नायं क्लेशोऽत्र संसारतापः किन्तु विरक्तता ।
भ्रान्तिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ॥ १४४ ॥

विलोचने । समालोकय इत्यर्थः तु किं पुनः परिच्छिन्नानीत्येवमादयो दृष्टान्ताः ॥ १४० ॥

विषयदोषदर्शने सति भोगेच्छाभावे युक्तिसिद्धं दृष्टान्तमाह क्षुधया पीड्यमानोऽपीति । अयममूढः विवेकी मिष्टान्नभोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकाङ्क्षा यस्य स तथोक्तः इदं विषमित्येवं जानन् तद् विषं न जिघत्सति भक्तुमिच्छतीत्यर्थः ॥ १४१ ॥

ननु प्रारब्धकर्मणः प्रबलत्वात् ज्ञानिनोऽपीच्छा भवेत् इत्याशङ्क्य इच्छायां जातायां प्रीतिपुरःसरं न भुङ्क्ते इत्याह प्रारब्धकर्मप्राबल्यादिति ॥ १४२ ॥

कथमेतदवगम्यत इत्याशङ्क्य लोकदर्शनादित्याह भुञ्जानास्तानपि बुधा इति ॥ १४३ ॥

ननु तत्त्वविदः संसारनिमित्तक्लेशोऽनुपपन्नः ज्ञानेनैवाज्ञानापाकृतत्वादित्याशङ्क्याह नायमिति अयं क्लेशो नाद्यापि कर्म नश्छिन्नमित्येवमनुतापात्मकः संसारतापो न भवति किन्त्वत्र संसारे विरक्तता आसक्तिरहितता । तापकत्वाभावे युक्तिमाह भ्रान्तीति । हि यस्मात् कारणात् सांसारिकस्तापो भ्रान्तिज्ञाननिदानः भ्रान्तिरेव कारणं यस्य सः स्मृतः पूर्वाचार्यैः अयन्तु विवेकज्ञानमूलत्वात् न तथाविध इत्यर्थः ॥ १४४ ॥

विवेकेन परिच्छिद्य सोऽल्पभोगेन तृप्यति ।
अन्यथानन्तभोगेऽपि नैव तृप्यति कर्हिचित् ॥ १४५ ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥ १४६ ॥
परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये ।
विज्ञाय सेवितश्चौरो मैत्रीमेति न चौरताम् ॥ १४७ ॥
मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः ।
तमेवालब्धविस्तारं क्लिष्टत्वाद् बहु मन्यते ॥ १४८ ॥

अयं क्लेशो विवेकमूलोऽविवेकमूलो वेति कुतोऽवगम्यत इत्याशङ्क्य कामनिवर्त्तकत्वाद् विवेकमूल इत्याह विवेकेनेति ॥ १४५ ॥

विवेकिन इवाविवेकिनोऽपि भोगेनैव तृप्तिः स्यात् अतो विवेकोऽप्रयोजक इत्याशङ्क्य भोगस्य तृप्तिहेतुत्वाभावप्रतिपादिकां स्मृतिं पठति न जातु काम इति ॥ १४६ ॥

विवेकपूर्वस्य भोगस्य तृप्तिहेतुत्वमनुभवसिद्धमित्याह परिज्ञायोपभुक्तो हीति । अयं भोग एतावान् सर्वप्रयासलभ्य इत्येवमनुभवपूर्वकसेवनं तुष्टिहेतुर्दृश्यत इत्यर्थः । ननु तथा हेतोर्भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्वमित्याशङ्क्य सहकारिविशेषवशात् विपरीतकार्यकरत्वं लोके दृष्टमित्याह विज्ञायेति । अयं चोर इति ज्ञात्वा तेन सह वर्तमानस्य पुरुषस्य चोरो न चौरतामेति किन्तु मित्रतामेतीत्यर्थः ॥ १४७ ॥

ननु कामनायाभावत्वात् मनसः कथं अल्पेन भोगेन तृप्तिः स्यादित्याशङ्क्य निदिध्यासनेन निगृहीतस्यातथात्वात् भवत्येव तत्तृप्तिरित्याह मनसो निगृहीतस्येति । निगृहीतस्य लीलाभ्यासेन वशीकृतस्य मनसोऽल्पकोऽपि अल्पोऽपि लीलाभोगो लीलानुभवो

बद्धमुक्तो महीपालो ग्राममात्रेण तुष्यति ।
परैर्न बद्धो नाक्रान्तो न राष्ट्रं बहु मन्यते ॥ १४९ ॥
विवेके जाग्रति सति दोषदर्शनलक्षणे ।
कथमारब्धकर्मापि भोगेच्छां जनयिष्यति ॥ १५० ॥
नैष दोषो यतोऽनेकविधं प्रारब्धमीक्ष्यते ।
इच्छानिच्छा परेच्छा च प्रारब्धं त्रिविधं स्मृतम् ॥१५१॥
अपथ्यसेविनश्चौरा राजदाररता अपि ।
जानन्त एव स्वानर्थमिच्छन्त्यारब्धकर्मतः ॥ १५२ ॥
न चात्रैतद् वारयितुमीश्वरेणापि शक्यते ।
यत ईश्वर एवाह गीतायामर्जुनं प्रति ॥ १५३ ॥

योऽसौ अलब्धविस्तारमहाप्राज्यराज्यः तस्यैव भोगं क्लिष्टत्वात् दोष-युक्तत्वाद् बहु मन्यतेऽधिकत्वेन जानातीत्यर्थः ॥ १४८ ॥

निवृत्तेच्छस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टान्त-माह बद्धमुक्तो महीपाल इति ॥ १४९ ॥

ननु प्रारब्धकर्मप्राबल्यात् भोगेच्छा भवेद् यदि इच्छाया कर्म-वशात् इच्छा भवेदित्युक्तं तदनुपपन्नम् इच्छाविघातिनि विवेकज्ञाने सति तदुत्पत्त्यसम्भवात् इति शङ्कते विवेके जाग्रति सतीति ॥ १५० ॥

दोषदर्शने सत्यपीच्छाजनकत्वं प्रारब्धस्य नानाप्रकार-त्वादिति परिहरति नैष दोष इति । नानाप्रकारत्वमेव दर्शयति इच्छा-निच्छेति । इच्छाजनकम्, अनिच्छया भोगप्रदं परेच्छया भोगप्रदं चेति त्रिविधमित्यर्थः ॥ १५१ ॥

इच्छाप्रारब्धं दर्शयति अपथ्यसेविन इति ॥ १५२ ॥

अपथ्यसेवादाविच्छायाः प्रारब्धकृतत्वं कुतोऽवगम्यते इत्याशङ्क्या-

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥१५४ ॥
अवश्यम्भाविभावानां प्रतीकारो भवेद् यदि ।
तदा दुःखैर्न लिप्येरन् नलरामयुधिष्ठिराः ॥ १५५ ॥
न चेश्वरत्वमीशस्य हीयते तावता यतः ।
अवश्यम्भाविताप्येषामीश्वरेणैव निर्म्मिता ॥ १५६ ॥
प्रश्नोत्तराभ्यामेवैतद् गम्यतेऽर्जुनकृष्णयोः ।
अनिच्छापूर्वकञ्चास्ति प्रारब्धमिति तच्छृणु ॥ १५७ ॥

परिहार्यत्वादित्यभिप्रेत्याह न चाज्ञैतद्वारयितुमिति । अस्मिन् लोके प्रपञ्चादि इच्छनीयं तत् कुत इत्यत आह ईश्वर एवाहेति ॥ १५३ ॥

गीतावाक्यमपि पठति सदृशं चेष्टते स्वस्या इति । विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपं चेष्टते, प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्त्तमानजन्मादावभिव्यक्तः किमुत मूर्खः, तस्मात् प्रकृतिं यान्ति भूतानि निग्रहः प्रवृत्तिनिवृत्त्योर्निरोधो मया अन्येन वा कृतः किं करिष्यति न किमपीत्यर्थः ॥ १५४ ॥

प्रारब्धस्यापरिहार्यत्वे वचनान्तरसम्मतिमाह अवश्यमिति, अवश्यम्भाविभावानां दुःखादीनामित्यर्थः ॥ १५५ ॥

प्रारब्धस्यापरिहार्यत्वे तत्परिहारासमर्थस्य ईश्वरस्यानीश्वरत्वप्रसङ्ग इत्याशङ्क्याह न चेश्वरत्वमिति । कुत इत्यत आह यत इति । यतः कारणात् एषां दुःखादीनाम् अवश्यम्भाविताऽपि ईश्वरेण निर्म्मिता अतो नानीश्वरत्वप्रसङ्ग इत्यर्थः ॥ १५६ ॥

एवं प्रसङ्गप्राप्तम् इच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते प्रश्नोत्तराभ्यामिति अनिच्छापूर्वकञ्च प्रारब्धमस्ति एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेव गम्यते ज्ञायते इति योजना, तदभिधानाय प्रश्नमनिच्छापूर्वकमिति तच्छृणुष्वेति ॥ १५७ ॥

अथ केन प्रयुक्तोऽयं पापञ्चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥ १५८ ॥
काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥ १५९ ॥
स्वभावजेन कौन्तेय निबद्धः स्वेन कर्म्मणा ।
कर्त्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ॥ १६० ॥
नानिच्छन्तो न चेच्छन्तः परदाक्षिण्यसंयुताः ।

तत्र अर्जुनस्य प्रश्नं तावद् दर्शयति अथ केनेति । हे वार्ष्णेय वृष्णिवंशोत्पन्न अयं पुरुषः केन प्रयुक्तः प्रेरितः सन् अनिच्छन्नपि इच्छामकुर्वन्नपि राज्ञा बलान्नियोजित इव पापञ्चरति आचरतीति ॥१५८॥

तस्योत्तरमाह काम एष इति । एष पुरुषप्रवर्त्तकः रजोगुणसमुद्भवः रजोगुणादुत्पन्नत्वात् स रजोगुणसमुद्भवः काम एव प्रसिद्धोऽयं कामः कदाचित् क्रोधरूपेणापि परिणमते ततः क्रोधः, स पुनः कीदृशः महाशनः महदशनं विषयजातं यस्य स महाशनः महापाप्मा महतः पापस्य हेतुत्वादुपचारान्महापाप्मत्वमस्य, अत इह संसारे एनं कामं क्रोधञ्च एव वैरिणं विद्धि । अयमभिप्रायः प्रारब्धप्राबल्यादुद्भूतरजोगुणकार्य्ययोः कामक्रोधयोरन्तरङ्गत्वेन पुरुषप्रवर्त्तकत्वं न प्रतीच्छाया इति ॥ १५९ ॥

अन्यत्र कामक्रोधयोरेव पुरुषप्रवर्त्तकत्वमुपलभ्यते नानिच्छाप्रारब्ध-स्येत्याशङ्क्य तस्यैव प्रवर्त्तकत्वप्रतिपादकं तद् वाक्यं पठति स्वभाव-जेनेति । हे कौन्तेय ! स्वेनैवात्मीयेन कृत एव स्वकीयेन प्रारब्धेन कर्म्मणा निबद्धः सन् यत् कर्त्तुं नेच्छसि तदपि मोहादविवेकेन अवशः परवशः करिष्यसीति, अतोऽनिच्छाप्रारब्धमस्तीत्युपलभ्यत इति भावः ॥ १६० ॥

इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह नानिच्छन्त इति । अनि-

सुखदुःखे भजन्त्येतत् परेच्छापूर्वकर्म्म हि ॥ १६१ ॥
कथं तर्हि किमिच्छन्नित्येवमिच्छा निषिध्यते।
नेच्छानिषेधः किन्त्विच्छाबाधो भर्जितबीजवत् ॥१६२॥
भर्जितानि तु बीजानि सन्त्यकार्य्यकराणि च।
विद्वदिच्छा यथेष्टव्या सत्त्वबोधात् न कार्य्यकृत् ॥१६३॥
दग्धबीजमरोहेऽपि भक्षणायोपयुज्यते।
विद्वदिच्छाप्यल्पभोगं कुर्य्यान्न व्यसनं बहु ॥ १६४ ॥

च्छन्तोऽपि न भवन्ति इच्छन्तोऽपि न भवन्ति किन्तु परदाराभिगमसंयुताः सन्तानप्रीत्यर्थमेव सुखदुःखेऽनुभवन्ति अत एतत् सुखादिभोगहेतुभूत परेच्छापूर्वकं प्रारब्धं हि प्रसिद्धमित्यर्थः। अत एव दोषदर्शने सत्यपि प्रारब्धस्यापरिहार्य्यत्वात् तदिच्छाजनकत्वं न निवारयितुं शक्नोतीति भावः ॥ १६१ ॥

ननु तत्त्वविदोऽपीच्छाङ्गीकारे किमिच्छन्निति श्रुतिविरोध इति शङ्कते कथं तर्हीति। किमिच्छन्नित्यनेन वाक्येन कथमिच्छाभावो वर्णित इत्यर्थः। अनेन नेच्छाभावोऽभिधीयते किन्तु सत्या अपि तस्याः सामर्थ्यं प्रवृत्तिजनकत्वं नास्तीति बाध्यते इति परिहरति नेच्छानिषेध इति। स्वरूपेण सत्या अपि तस्याः सामर्थ्यराहित्ये दृष्टान्तमाह भर्जितबीजवदिति ॥ १६२ ॥

सङ्क्षेपेणोक्तमर्थं प्रपञ्चयति भर्जितानि त्विति। यथा भर्जितानि बीजानि स्वरूपेण विद्यमानान्यपि नाङ्कुरादिकार्य्यकराणि भवन्ति तथा विद्वदिच्छा स्वयं विद्यमानापि इष्यमाण पदार्थस्यासत्त्वज्ञानेन बाधितत्वात् न व्यसनादिकार्य्यक्षमेत्यर्थः ॥ १६२ ॥

ननु तर्हि विदुष इच्छैव नाङ्गीकर्त्तव्या फलाभावादित्याशङ्क्य फलाभावो विरुद्धः भोगलवफलसद्भावादिति दृष्टान्तमाह दग्धेति।

भोगेन चरितार्थत्वात् प्रारब्धं कर्म्म हीयते ।
भोक्तव्यसत्यताभ्रान्त्या व्यसनं तत्र जायते ॥ १६५ ॥
मा विनश्यत्वयं भोगो वर्द्धतामुत्तरोत्तरम् ।
मा विघ्नाः प्रतिबध्नन्तु धन्योऽस्म्यस्मादिति भ्रमः ॥१६६॥
यदभावि न तद् भावि भवि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयं बोधो भ्रमनिवर्त्तकः ॥ १६७ ॥
समेऽपि भोगे व्यसनं भ्रान्तो गच्छेन्न बुद्धिमान् ।

इत्थं भर्जितमिति यावत् व्यसनं विपदादिरूपं बहुविधं व्यसनं विपदि भ्रंशः दोषे कामजकोपजे इत्यभिधानात् ॥ १६४ ॥

ननु तर्हि कर्म्मैव भोगद्वारा व्यसनमपि जनयेदित्याशङ्क्याह भोगेनेति प्रारब्धकर्म्मणो भोगमात्रहेतुत्वात् न व्यसनजनकत्वमित्यर्थः । कुतस्तर्हि व्यसनस्य जन्मेत्यत आह भोक्तव्यसत्यताभ्रान्त्येति । तत्र तस्मिन् विषये ॥ १६५ ॥

व्यसनहेतुं भ्रमं दर्शयति मा विनश्यत्वयमिति । अयं भोगो मा विनश्यतु एव उत्तरोत्तरम् वर्द्धतां विघ्नाश्च मा प्रतिबध्नन्तु अस्य प्रतिबन्धं मा कुर्वन्तु अस्मादेव भोगादहं धन्यः कृतार्थोऽस्मीति एवंरूपो भ्रमो भवति ततश्च व्यसनमित्यर्थः ॥ १६६ ॥

भ्रमस्य तस्य परिहारोपायमाह यदभावीति । यद्वस्तु अयोग्यं तत् भवत्येव भावि तु योग्यं चेन्न तदन्यथा भवेदपि इति गच्छत्यविचिन्त्य इदं मे श्रेयः कदा भविष्यति इदमनिष्टं कदा निवर्त्तिष्यते इत्येवमादि चिन्तैव विषमस्य सहदुःखस्य नाशहेतुत्वात् विषम् इदं चिन्ताविषं हन्तीति चिन्ताविषघ्नः एवंभूतो यो बोधः सोऽयं भ्रमनिवर्त्तकः एतेनैतस्य भ्रमस्य निवर्त्तक इत्यर्थः ॥ १६७ ॥

ननु विदुषोऽविदुषोश्चोभयोरपि भोगित्वाविशेषे एकस्य व्यसनम् अपरस्य

भ्रमकार्यस्य सङ्कल्पात् भ्रान्तस्य व्यसनं बहु ॥ १६८ ॥
मायामयत्वं भोग्यस्य बुद्ध्वास्थामुपसंहरन् ।
भुञ्जानोऽपि न सङ्कल्पं कुरुते व्यसनं कुतः ॥ १६९ ॥
स्वप्नेन्द्रजालसदृशमचिन्त्यरचनात्मकम् ।
दृष्टनष्टं जगत् पश्यन् कथं तत्रानुरज्यति ॥ १७० ॥
स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन् स्वजागरम् ।
चिन्तयेदप्रमत्तः सन् उभावनुदिनं मुहुः ॥ १७१ ॥
चिरं तयोः सर्वसाम्यमनुसन्धाय जागरे ।
सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् ॥ १७२ ॥

तु तत्त्वेऽपि तत् कुत इत्याशङ्क्य विपरीतज्ञानसत्त्वासत्त्वाभ्यां तद्विशि-ष्टत्याह धीमतोऽपीति। बुद्धिमान् ज्ञानवान् ज्ञानीत्यर्थः। भ्रान्तेः कथं व्यसनहेतुत्वमित्यत आह भ्रमकार्यस्येति ॥ १६८ ॥

विवेकिनस्तदभावं दर्शयति मायामयत्वमिति ॥ १६९ ॥

ननु मायामयत्वेऽपि सत्यपि भोगस्य तदानीन्तनसुखहेतुत्वात् कुत आस्थोपसंहार इत्याशङ्क्य बहुविधदोषदर्शनात् इत्याह स्वप्नेन्द्रजाल-सदृशमिति ॥ १७० ॥

ननु स्वप्नेन्द्रजालसादृश्यादिज्ञाने सति आसक्त्यभावो भवेत् तदेव कुतो जायते इत्याशङ्क्य तज्ज्ञानोपायमाह स्वस्वप्नमिति। स्वकीयस्वप्न-मपरोक्षतया दृष्ट्वा स्वकीयञ्च जागरमनुभवन् स्वप्नजागरावुभावपि अप्र-मत्तः सन् मुहुश्चिन्तयेत् स्वप्नतुल्योऽयं जागर इति ॥ १७१ ॥

चिरं तयोरिति। एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरि-वर्तिविरसत्वविनाशित्वादिरूपं चिरमनुसन्धाय जागरितेऽपि सत्यत्व-बुद्धिं परित्यज्य जाग्रद्दुःखेष्वपि पूर्ववत् जगत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो न भवति इत्यर्थः ॥ १७२ ॥

इन्द्रजालमिदं द्वैतमचिन्त्यरचनात्वतः ।
इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ॥ १७३ ॥
निर्बन्धस्तत्त्वविद्याया इन्द्रजालत्वसंस्मृतौ ।
प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ॥ १७४ ॥
विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः ।
जानद्भिरप्यैन्द्रजालविनोदो दृश्यते खलु ॥ १७५ ॥
जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद् यदि ।

ननु प्रपञ्चगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वोपजीविनो भोगस्य परस्परविरोधात् मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशङ्क्य भोगस्य विषयसत्यत्वापेक्षाभावात् न विरोध इति परिहरति इन्द्रजालमिति । इदं द्वैतं भोग्यजातम् अचिन्त्यरचनात्वात् इन्द्रजालवन्मिथ्या इति युक्त्यानुसन्धायाविस्मरतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसन्धानस्य का हानिः वा यद्वा मिथ्यात्वानुसन्धानेन वा भोगस्य का हानिर्भिन्नविषयत्वादिति भावः ॥ १७३ ॥

भिन्नविषयत्वमेव दर्शयति निर्बन्धस्तत्त्वविद्याया इति । तत्त्वविद्याया जगत्तत्त्वगोचरस्य ज्ञानस्य इन्द्रजालवज्जगतो मिथ्यात्वानुसन्धाने निर्बन्धः न तु भोगापलापे प्रारब्धकर्मणो जीवस्य सुखदुःखयोः प्रदाने आग्रहः न तु भोग्यस्य सत्यत्वापादने इति भावः ॥ १७४ ॥

एवं विभिन्नविषयत्वं प्रदर्श्य फलितमाह विद्यारब्धे इति । विद्याप्रारब्धकर्मणी परस्परं न विरुध्येते विभिन्नविषयत्वात् सन्निपतद्रूपरसज्ञानवदित्यर्थः । भोग्यमिथ्यात्वज्ञानं भोगबाधकं न भवतीत्यत्र च दृष्टान्तमप्याह जानद्भिरिति । ऐन्द्रजालो विनोद इन्द्रजालसम्बन्धिचमत्कारविशेषः जानद्भिरपीन्द्रजालत्वं जानद्भिरप्यवलोक्यते इति प्रसिद्धमित्यर्थः ॥ १७५ ॥

ननु विद्यारब्धकर्मणोर्विरोधोऽस्तीति वदन् वादी प्रष्टव्यः किं प्रारब्धं

तदा विरोधि विद्याया भोगमात्रान्न सत्यता ॥ १७६ ॥
अन्यूनो जायते भोगः कल्पितैः स्वाप्नवस्तुभिः ।
जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यताम् ॥ १७७ ॥
यदि विद्यापह्नुवीत जगत्प्रारब्धघातिनी ।
तदा स्यान्न तु मायात्वबोधेन तदपह्नवः ॥ १७८ ॥
अनपह्नुत्य लोकास्तदिन्द्रजालमिदन्त्विति ।

कर्म विद्याविरोधीत्युच्यते उत विद्या प्रारब्धकर्मविरोधिनीति नाद्य इत्याह जगत्सत्यत्वमिति । प्रारब्धं कर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य सम्पाद्य यदि भोजयेज्जीवस्य सुखदुःखे दद्यात् तदा विद्याविषयस्य मिथ्यात्वस्यापहारात् विद्याया विरोधि स्यात् न च तथा करोति किन्तु भोगमेव प्रयच्छति अतो न विद्याविरोधि प्रारब्धमिति भावः । भोगबलादेव भोग्यस्य सत्यत्वमपि स्यादित्याशङ्क्याह भोगमात्रादिति । विमतं भोग्यं सत्यं भोग्यत्वादित्यत्र दृष्टान्ताभाव इति भावः ॥ १७६ ॥

ननु मिथ्यापदार्थैर्भोगो भवति इत्यत्रापि दृष्टान्तो नास्तीत्याशङ्क्याह अन्यून इति ॥ १७७ ॥

नापि द्वितीय इत्याह यदि विद्यापह्नुवीतेति । विद्या यदि जगद्भोग्यजातमपह्नुवीत नेदं रजतमिति निषेधज्ञानवत् प्रतीयमानस्य भोग्यस्य स्वरूपं विलोपयेत् तदा प्रारब्धकर्मभोग्यस्य सुखदुःखानुभवसंसाधनापहारेण प्रारब्धकर्मविघातिनी स्यात् न च तथा करोति किन्तु मिथ्यात्वमेव बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः । ननु मिथ्यात्वबोधनादेव स्वरूपमपि विलोपयेदित्याशङ्क्याह मायात्वेति । इन्द्रजालादौ स्वरूपविलोपमन्तरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः ॥ १७८ ॥

एतदेव प्रपञ्चयति अनपह्नुत्येति । लोका इन्द्रजालादिस्वरूप-

जानन्त्येवानपह्नुत्य भोगं मायात्वधीस्तथा ॥ १७९ ॥
यत्र त्वस्य जगत् स्वात्मा पश्येत् कस्तत्र केन किम् ।
किं जिघ्रेत् किं वदेद् वेति श्रुतौ तु बहु घोषितम् ॥ १८० ॥
तेन द्वैतमपह्नुत्य विद्योदेति न चान्यथा ।
तथा च विदुषो भोगः कथं स्यादिति चेत् शृणु ॥ १८१ ॥
सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति ।
उक्तं स्वाप्ययसम्पत्त्योरिति सूत्रे ह्यतिस्फुटम् ॥ १८२ ॥

अनपह्नुत्य अनिरस्य इदमिन्द्रजालमिति जानन्त्येव यथा तथा भोगं भोग्यमनपह्नुत्य अविनाश्य मायात्वधीर्जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः ॥ १७९ ॥

यत्र त्वस्य सर्वमात्मैवाभूत् केन कं पश्येत् इत्यादि श्रुतिर्द्वैतदर्शनस्याभावं बोधयन्ती विद्योदयकाले जगद् विनाशयत्येव एवं सति विदुषो भोगः कथं स्यादिति श्रुत्यर्थकथनेन शङ्कते श्लोकद्वयेन यत्र त्वस्येति । यत्र तु यस्यां विद्यावस्थायां कृत्स्नं जगदस्य विदुष आत्मैवाभूत् सर्वं यदयमात्मेति ज्ञानेन स्वरूपमेव भवति तत्र तस्यां दशायां को द्रष्टा केन साधनेन चक्षुषा किं दृश्यं रूपजातं पश्येत् एवं घ्राणेन्द्रियेण किं कुसुमादिकं जिघ्रेत् किं वाक्यं केन वागिन्द्रियेण वदेत् एवमितरेन्द्रियव्यापाराभावद्योतनाय वाशब्दः इत्येवं प्रकारेण श्रुतौ बहु वारमभिहितमित्यर्थः ॥ १८० ॥

ततः किमित्यत आह तेन द्वैतमिति । स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं [illegible] यत्र त्वस्येत्युदाहृताया श्रुतेः सुषुप्तिमोक्षयोरन्यतरविषयत्वेन व्याख्यातत्वात् न विद्यया जगदपह्नव इति परिहरति सुषुप्तीति ॥ १८१ ॥

सुषुप्तीति । स्वाप्ययः सुषुप्तिः सम्पत्तिर्मुक्तिरित्यर्थः ॥ १८२ ॥

अन्यथा याज्ञवल्क्यादेराचार्य्यत्वं न सम्भवेत् ।
द्वैतदृष्टावविद्वत्ता द्वैतादृष्टौ न वाग्वदेत् ॥ १८३ ॥
निर्विकल्पसमाधौ तु द्वैतादर्शनहेतुतः ।
सैवापरोक्षविद्येति चेत् सुषुप्तिस्तथा न किम् ॥ १८४ ॥
आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया ।
आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ॥ १८५ ॥
उभयं मिलितं विद्या यदि तर्हि घटादयः ।
अर्द्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः ॥ १८६ ॥

अस्याः श्रुतेः सुषुप्त्यादिविषयत्वानङ्गीकारे बाधकमाह अन्यथा याज्ञवल्क्यादेरिति । तत्रोपपत्तिमाह द्वैतदृष्टाविति । याज्ञवल्क्यादिर्यदि द्वैतं पश्येत् तर्हि तदद्वैतज्ञानाभावादनाचार्य्यो भवेत् अथ द्वैतं न पश्येत् बोध्यशिष्याद्यनुपलम्भात् आचार्य्यवाक्यं शिष्यं प्रतिबोधनाय न प्रवर्त्तेत अतो विद्यासम्प्रदायोच्छेदप्रसङ्ग इति भावः ॥१८३॥

ननु याज्ञवल्क्यादीनामाचार्य्यदशायां विद्यमानस्य ज्ञानस्य विद्यात्वमस्त्वेव तथापि तस्य नापरोक्षविद्यात्वं द्वैतप्रतीतिसद्भावात् निर्विकल्पसमाधौ तु द्वैतदर्शनाभावात् सैवापरोक्षविद्येति शङ्कते निर्विकल्पसमाधौ त्विति । द्वैताप्रतीतेरतिप्रसङ्गापादकत्वात् नैवमिति परिहरति सुषुप्तिस्तथा न किमिति ॥ १८४ ॥

अतिप्रसङ्गपरिहारं शङ्कते आत्मतत्त्वं न जानातीति । सुषुप्तौ द्वैतदर्शनाभावेऽपि आत्मगोचरज्ञानाभावात् न विद्यात्वं तस्या इत्यर्थः । तर्हि प्रत्यगात्मविवेकेन ज्ञानस्यैव विद्यात्वं न द्वैतदर्शनाभावस्येत्याह तदा त्वयेति ॥ १८५ ॥

ननु द्वैतादर्शनात्मधियोरुभयोर्मिलितयोरेव विद्यात्वं न प्रत्येकमिति शङ्कते उभयमिति । द्वैतविस्मृतेरपि विद्यांशत्वाङ्गीकारे अनु-

मशकध्वनिमुख्यानां विक्षेपाणां बहुत्वतः ।
तत्त्वविद्या तथा न स्यात् घटादीनां यथा दृढ़ा ॥१८७॥
आत्मधीरेव विद्येति यदि तर्हि सुखी भव ।
दुष्टचित्तं निरुन्ध्याच्चेन्निरुन्धि त्वं यथासुखम् ॥१८८॥
तदिष्टमेष्टव्यमायामयत्वस्य समीक्षणात् ।
इच्छन्नप्यज्ञवन्नेच्छेत् किमिच्छन्निति हि श्रुतम् ॥१८९॥
रागो लिङ्गमबोधस्य सन्तु रागादयो बुधे ।
इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः ॥ १९० ॥

आत्मधीर्विद्यात्वप्रसङ्ग इति परिहरति तर्हीति । तत्रोपपत्तिमाह चक्रवद्द्वैतविस्मृतेरिति ॥ १८६ ॥

अस्मिन्नेव मते समाधिमतां पुरुषाणामद्वैतविद्यावत्त्वमपि न स्यादिति चोद्यपरिहारमाह मशकध्वनिमुख्यानामिति । घटादीनां दृढ़द्वैतविस्मरणमिव तथा तव समाधौ द्वैतविस्मरणं न सम्भवति मशकध्वन्यादीनामनेकेषां विक्षेपाणां सम्भवादिति भावः ॥ १८७ ॥

तस्मादात्मधीरेव विद्यात्वं न द्वैतविस्मृतेरिति शङ्कते आत्मधीरिति । तदङ्गीकरणमिष्टमित्यभिप्रायेणाशीर्वदति तर्हि सुखी भवेति । ननु आत्मधीरेव विद्या सा न दुष्टचित्ते सम्भवति अतस्तद्दोषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शङ्कामनुभाषते दुष्टचित्तमिति । तदङ्गीकरोति निरुन्धि त्वमिति ॥ १८८ ॥

तदिष्टमिति । अस्माकमपीति शेषः । कुत इत्यत आह एष्टव्यमायामयत्वस्येति । चित्तदोषोपशमे सति अद्वितीयात्मतत्त्वावगमाद् इष्यमाणस्य मायामयत्वं समीक्ष्यते अतः स्वत इष्टनिरासः । एवं [illegible] मन्त्रांशेनाभिप्रेतमर्थमुपपादयति इच्छन्नप्यज्ञवदिति । इच्छन्नपि अज्ञवन्नेच्छेत् अतः किमिच्छन्निति श्रुतमिति योजना ॥ १८९ ॥

[illegible] आरब्धवान् आह रागो लिङ्गमिति । रागो लिङ्ग-

जगन्मिथ्यात्ववत् स्वात्मासङ्गत्वस्य समीक्षणात् ।
कस्य कामायेति वचो भोक्त्रभावविवक्षया ॥ १८१ ॥
पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति ।
किन्त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ॥ १८२ ॥
किं कूटस्थश्चिदाभासोऽथ वा किमुभयात्मकः ।
भोक्ता तत्र न कूटस्थोऽसङ्गत्वाद् भोक्तृतां व्रजेत् ॥१८३॥

प्रबोधस्य चित्तव्यायामभूमिषु । कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोः । इति तत्त्वविदो रागनिषेधपरं शास्त्रम् । शास्त्रार्थस्य समाप्तत्वान्मुक्तिः स्यात् तावता मुनेः । रागादयः सन्तु कामं न तद्भावोऽपराध्यते इति तस्यैव रागाङ्गीकारपरञ्च शास्त्रम् एवं सति तत्त्वविदो दृढरागाभावे सति शास्त्रद्वयं सार्थमर्थवद् भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य दृढरागविषयत्वात् तदभ्युपगमपरस्य रागाभासविषयत्वादिति भावः ॥ १८० ॥

एवं किमिच्छन् इत्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह जगन्मिथ्यात्ववदिति । यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोऽसङ्गत्वबोधेन च स्वस्य भोक्तृभावविवक्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ॥ १८१ ॥

नन्वात्मनः भोक्तृत्वप्रतिषेधस्तत्प्रसक्तिपूर्वको वक्तव्यः सा तु न विद्यतेऽसङ्गत्वादात्मन इत्याशङ्क्य तस्याः स्वानुभवसिद्धत्वात् नैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रामति पतिजायादिकमिति । न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्य आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यन्तेन वाक्यसन्दर्भेण पतिजायादिप्रपञ्चस्यात्मभोगसाधनत्वं प्रतिपाद्यते तत आत्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ॥ १८२ ॥

इत्थमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति

सुखदुःखाभिमानाख्यो विकारो भोग उच्यते।
कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथम्॥ १८४॥
विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि।
निरधिष्ठानविभ्रान्तिः केवला नहि तिष्ठति॥ १८५॥
उभयात्मक एवातो लोके भोक्ता निगद्यते।
तादृगात्मानमारभ्य कूटस्थः शेषितः श्रुतौ॥ १८६॥

किमिति। किं कूटस्थस्य भोक्तृत्वम् उत चिदाभासस्य किंवोभयात्मकस्येति विकल्पार्थः। तत्र प्रथमं प्रत्याह न कूटस्थ इति॥ १८३॥

अथ कूटत्वमस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशङ्क्याह सुखदुःखाभिमानाख्य इति। सुखित्वदुःखित्वाभिमानलक्षणो विकारो भोगः सोऽयमेकस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः॥ १८४॥

ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशङ्क्य विकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्नैवमिति परिहरति विकारिबुद्ध्यधीनत्वादिति। चिदाभासस्य विकारिबुद्ध्यधीनत्वात् तस्मिन् विकारे सम्भवत्यपि तस्यारोपितस्यारोपितस्वरूपेणाधिष्ठानभूतं कूटस्थं विना स्वातन्त्र्येणावस्थानासम्भवात् केवलचिदाभासस्यापि भोक्तृत्वं न सम्भवतीति भावः॥ १८५॥

तस्मात् तृतीयः पक्षः परिशिष्यत इत्याह उभयात्मक एवेति। अत एकैकस्य भोक्तृत्वं न सम्भवति अत उभयात्मकः साधिष्ठानचिदाभास एव लोके व्यवहारदशायां भोक्तृत्वमभिधीयते परमार्थतस्तु उभयात्मकस्यैव न घटत इति भावः। न कश्चित् स्वयं पुरुष इत्यादावुपक्रमस्यैव सोऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिवाचित्वस्यापि सम्भवादुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यात् कौटस्थ्यव्यवहारेणात्मविवक्षितत्वाशङ्क्य श्रुतेरत्र तात्पर्याभावाच्चेत्याह

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् ।
विज्ञानमयमारभ्यासङ्गं तं पर्यशेषयत् ॥ १९७ ॥

कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः ।
उभयात्मकमारभ्य कूटस्थः शेष्यते श्रुतौ ॥ १९८ ॥

कूटस्थसत्यतां स्वस्मिन्नध्यस्यात्मा विवेकतः ।
तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ॥ १९९ ॥

तादृगात्मानमारभ्येति । तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यानूद्य कूटस्थः बुद्ध्यादिकल्पनाधिष्ठानभूतश्चिदात्मा शेषितः बुद्ध्याद्यनात्मनिरसनेन परिशेषित श्रुतौ बृहदारण्यकादावित्यर्थः ॥ १९६ ॥

तत्र बृहदारण्यकवाक्यार्थं तावत् संक्षिप्य दर्शयति आत्मा कतम इति । जनकेन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यो विबोधयन् योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्य असङ्गो ह्ययं पुरुष इत्यसङ्गं कूटस्थं परिशेषितवानित्यर्थः ॥ १९७ ॥

एवं बृहदारण्यकेऽसङ्गात्मपरिशेषप्रकारं प्रदर्श्य ऐतरेयादिश्रुत्यन्तरेष्वपि तद् दर्शयति कोऽयमात्मेत्येवमादाविति । कोऽयमात्मेति वयमुपास्महे कतरः स आत्मेत्येवमादावात्मविचारेऽन्तःकरणोपाधिमात्मानमारभ्य प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यम् एवं द्विविधश्रुतिपर्यालोचनायाम् उभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासङ्गस्य कूटस्थस्याभोक्तृत्वं सिद्धम् ॥ १९८ ॥

ननूक्तरीत्या भोक्तुर्मिथ्यात्वे प्राप्ते आत्मा तर्हि भोक्तृत्वबुद्धिः कुतो आयात इत्याशङ्क्याह कूटस्थसत्यतामिति । आत्मा लोकप्रसिद्धो भोक्ता विवेकतः स्वात् कूटस्थाद् भेदज्ञानाभावेन कूटस्थेऽपि सत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वात्मनः भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न जिहासतीत्यर्थः ॥ १९९ ॥

भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति ।
एष लौकिकवृत्तान्तः श्रुत्या सम्यगनूदितः ॥ २०० ॥
भोग्यानां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यताम् ।
भोक्तर्य्येव प्रधानेऽतोऽनुरागं तं विधित्सति ॥ २०१ ॥
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥ २०२ ॥

ननु तर्हि आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य सर्वं प्रतिपाद्यते इत्याशङ्क्य न कूटस्थस्य शेषित्वं प्रतिपाद्यते किन्तु लोकप्रसिद्धोऽध्यासात्मकभोक्तृशेषित्वमेव श्रुत्यानूद्यत इत्याह भोक्ता स्वस्य भोगायेति। लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादिभोगोपकरणमिच्छतीत्ययं लौकिकवृत्तान्तः श्रुत्या सम्यगनूदितः नार्थान्तरं प्रतिपाद्यत इत्यर्थः ॥ २०० ॥

अनुवादे किमित्याशङ्क्य भोक्तर्य्येव प्रेम विधातव्यमित्याह भोग्यानामिति। भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकरणत्वात् भोग्येष्वनुरागो न कर्त्तव्यः किन्तु प्रधानभूते भोक्तर्य्येवानुरागः कर्त्तव्यः इति विधानमित्यर्थः ॥ २०१ ॥

भोग्येषु प्रेमत्यागपुरःसरमात्मप्रेमकर्त्तव्यतायां दृष्टान्तत्वेनाह प्रेमप्रार्थनापुरःसरं पुराणवचनमुदाहरति या प्रीतिरिति। अविवेकानामज्ञानामनित्यानां विषयेष्वनपायिनी दृढा या प्रीतिरस्ति हे [illegible] सा प्रीतिस्त्वामनुस्मरतस्त्वां सदा चिन्तयतो मम हृदयात् मनसः सर्पतु अपगच्छतु मम मनो विषयेभ्योऽपक्रम्य त्वय्येव तिष्ठतु इत्यर्थः। यद्वा अविवेकिनां विषयेषु या यादृशी दृढा प्रीतिरस्ति सा तादृशी विषयेण विद्यमाना प्रीतिस्त्वामनुस्मरतो मे हृदयान्मापगच्छतु सदा स्थिरास्त्वित्यर्थः ॥ २०२ ॥

इति न्यायेन सर्वस्मात् भोग्यजाताद् विरक्तधीः ।
उपसंहृत्य तां प्रीतिं भोक्तर्य्येवं बुभुत्सते ॥ २०३ ॥
स्रक्चन्दनवधूवस्त्रसुवर्णादिषु पामरः ।
अप्रमत्तो यथा तद्वन्न प्रमाद्यति भोक्तरि ॥ २०४ ॥
काव्यनाटकतर्कादिमभ्यस्यति निरन्तरम् ।
विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ॥ २०५ ॥
जपयागोपासनादि कुरुते श्रद्धया यथा ।
स्वर्गादिवाञ्छया तद्वत् श्रद्दध्यात् स्वे मुमुक्षया ॥ २०६ ॥
चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् ।

भवत्वेवं पुराणे श्रुतौ किमायातमित्यत आह इति न्यायेनेति । इत्यनेन पुराणोक्तन्यायेन सर्वस्मात् भोग्यजातात् पतिजायादिलक्षणाद् विरक्तधीः विरक्ता धीर्यस्यासौ विरक्तधीः पुरुषः तां भोग्यगोचरां प्रीतिं भोक्तर्य्यात्मन्युपसंहृत्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ॥ २०३ ॥

एवमात्मन्येव [illegible] फलितं सदृष्टान्तमाह स्रक्चन्दनेति । पामरः पृथग्जनः स्रगादिविषये यथा अप्रमत्तः सावधानो भवति एवं मुमुक्षुरपि आत्मनि विषये न प्रमाद्यति अनवधानं न करोति किन्तु तन्निष्ठयैव तिष्ठतीत्यर्थः ॥ २०४ ॥

अनव[illegible] दृष्टान्तैः स्पष्टयति काव्यनाटकेति । यथा विजिगीषुः [illegible] जयकामः इह लोके प्रधानः पुरुषो निरन्तरं काव्यादीनभ्यस्यति एवं मुमुक्षुरपि स्वात्मानं विचारयेत् ॥ २०५ ॥

जपयागेति । यथा वैदिकः स्वर्गार्थी तत्साधनानि जपादीनि श्रद्धापुरःसरम् अनुतिष्ठति यथा मुमुक्षुर्मोक्षेच्छया स्वे आत्मनि विश्वासं कुर्यात् ॥ २०६ ॥

चित्तैकाग्र्यमिति । योगी योगाभ्यासवान् अणिमाद्यैश्वर्यकामे-

अणिमादिप्रेप्सयैवं विविच्यात् स्वं मुमुक्षया ॥ २०७ ॥
कौशलानि विवर्द्धन्ते तेषामभ्यासपाटवात् ।
यथा तद्वद् विवेकोऽस्याप्यभ्यासाद् विशदायते ॥२०८॥
विविञ्चता भोक्तृतत्त्वं जाग्रदादिष्वसङ्गता ।
अन्वयव्यतिरेकाभ्यां साक्षिण्यध्यवसीयते ॥ २०९ ॥
यत्र यद् दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु ।
तत्रैव तन्नेतरत्रेत्यनुभूतिर्हि सम्मता ॥ २१० ॥
स यत् तत्र पश्यति किञ्चित् तेनानन्वागतो भवेत् ।

इच्छया महायोगिन चित्तैकाग्र्यं यथा सम्पादयेत् तद्वदयमप्यात्मानं सदा विविच्यात् देहादिभ्यो विविच्य जानीयादित्यर्थः ॥ २०७ ॥

ननु एवमपि एतेषां सदाभ्यासेन किं फलम् इत्यत आह कौशलानीति । यथा तेषां काम्यादिध्यानपरतामभ्यासपाटवेन तस्मिंस्तस्मिन् विषये कौशलानि विवर्द्धन्ते एवमस्यापि मुमुक्षोरभ्यासाद् विवेको देहादिभ्य आत्मनो भेदज्ञानं विशदायते स्पष्टं भवति ॥ २०८ ॥

विवेकैकाग्र्यस्य फलमाह विविञ्चतेति । अन्वयव्यतिरेकाभ्यां भोक्तृतत्त्वं भोक्तुः पारमार्थिकस्वरूपं विविञ्चता भोग्यजातात्तेभ्यो भेदेन जानता पुरुषेण जाग्रदादिषु जाग्रत्स्वप्नसुषुप्तिष्ववस्थासु साक्षिणोऽसङ्गताऽध्यवसीयते निश्चीयते इत्यर्थः ॥ २०९ ॥

अन्वयव्यतिरेकौ दर्शयति यत्रेति । जाग्रदादिषु मध्ये यत्र यस्मिन् अवस्थायां जाग्रति स्वप्ने सुषुप्तौ वा यत् स्थूलं सूक्ष्मं आनन्दं वेति त्रिविधं द्रष्टा साक्षिणा दृश्यतेऽनुभूयते तद्दृश्यं तत्रैव तस्यामवस्थायां तिष्ठति इतरत्र न इतरस्यामवस्थायां नास्ति. द्रष्टा तु सर्वत्रानुगततया वर्त्तत इत्यनुभवः सर्वेषामतः हि प्रसिद्धमित्यर्थः ॥ २१० ॥

न केवलमनुभवः किन्तु श्रुतिरप्यस्तीत्याह स इति । स यत् तत्र किञ्चित्

दृष्ट्वैव पुण्यं पापञ्चेत्येवं श्रुतिषु डिण्डिमः ॥ २११ ॥
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत् प्रकाशते ।
तद् ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ २१२ ॥
एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु ।
स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ २१३ ॥
त्रिषु धामसु यत् भोग्यं भोक्ता भोगश्च यद् भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥२१४॥

पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यञ्च पापञ्च पुनः प्रतिन्यायं प्रतियोन्या द्रवतीत्यादि वाक्यद्वयमर्थतः पठति स यदिति । स आत्मा तत्र तस्याम् अवस्थायां यत् किञ्चित् भोग्यम् ईक्षते पश्यति तेन दृष्टेनानन्वागतो भवेदनुगतो न भवेत् किन्तु स्वयमेवावस्थान्तरं गच्छतीत्यर्थः पुण्यं पुण्यफलं सुखं पापं तत्फलं दुःखञ्च दृष्ट्वैव नादायेत्यर्थः ॥ २११ ॥

भोक्तृतत्त्वविवेचनपराणि श्रुत्यन्तराणि दर्शयति जाग्रत्स्वप्नेति । यत् सत्यज्ञानानन्दलक्षणं ब्रह्म साक्षिरूपेणावस्थितं तत् जाग्रदादिप्रपञ्चं प्रकाशते प्रकाशयति तत् ब्रह्माहमस्मि बुद्धिचिदाभाससाक्ष्यहमस्मीति ज्ञात्वा श्रुत्यनुभवाभ्यां निश्चित्य सर्वप्रतिबन्धैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते ॥ २१२ ॥

एक एवात्मेति । जाग्रदादिस्थानत्रये एक एवात्मा मन्तव्यः एवं विवेकज्ञानेन स्थानत्रयव्यतीतस्य अवस्थात्रयात् विविक्तस्यात्मनः पुनर्जन्म न विद्यते वर्त्तमानशरीरपातानन्तरं शरीरान्तरप्राप्तिर्नास्तीत्यर्थः ॥ २१३ ॥

त्रिषु धामस्विति । त्रिषु धामसु त्रिष्ववस्थासु यद् भोग्यं स्थूलप्रविविक्तानन्दरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति विद्यन्ते तेभ्यः स्थानादिभ्यो विलक्षणो [illegible]-

एवं विवेचिते तत्त्वे विज्ञानमयशब्दितः ।
चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते ॥२१५॥
मायिकोऽयं चिदाभासः श्रुतेरनुभवादपि ।
इन्द्रजालं जगत् प्रोक्तं तदन्तःपात्ययं यतः ॥ २१६ ॥
विलोपोऽस्य सुषुप्त्यादौ साक्षिणा ह्यनुभूयते ।
एतादृशं स्वस्वभावं विविनक्ति पुनः पुनः ॥ २१७ ॥

रूपः साक्षी सदाशिवः निरतिशयानन्दरूपत्वेन सर्वदा शोभनः परमात्मास्ति सोऽहमस्मीत्यर्थः ॥ २१४ ॥

एवं विवेकेनात्मतत्त्वेऽसङ्गे निश्चिते सति भोक्तृत्वं कस्य इत्यत आह एवमिति । यो विज्ञानमयशब्देनाभिधीयमानः चिदाभासस्तस्य विकारित्वात् भोक्तृत्वमित्यर्थः ॥ २१५ ॥

ननु चिदाभासस्य भोक्तृत्वाङ्गीकारे कस्य कामायेति वचो भोक्त्रभावं दर्शयतीति पूर्वोक्तं विरुध्येत इत्याशङ्क्य तस्य वचनस्य पारमार्थिकभोक्त्रभावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति मायिकोऽयमिति । अयं चिदाभासो मायिको मृषात्मकः श्रुतेः जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि इन्द्रजालमयमध्यवर्तित्वेनानुभूयमानत्वादपीत्यर्थः । तदेवोपपादयति इन्द्रजालमिति । इन्द्रजालधर्मिण्याभूते जगज्जन्मभूतत्वादस्यापि मिथ्यात्वं तत्त्वतोऽनुभूयते विद्वद्भिरिति शेषः । यथा जगदन्तःपाती इत्यतो मृषेति योजना ॥ २१६ ॥

अस्य जगत इव विनाशित्वानुभवादपि मृषात्वमित्याह विलोपोऽस्येति । सुप्त्यादिरादिशब्दार्थः । भवतु मृषात्वं ततः किमित्यत आह एतादृशमिति । यदा कूटस्थात् विवेचितश्चिदाभासो मायिको ज्ञातस्तदा स्वस्वभावं स्वतत्त्वम् एतादृशं मृषात्मकं पुनः पुनर्विविनक्ति कूटस्थात् विविच्य जानाति ॥ २१७ ॥

विविच्य नाशं निश्चित्य पुनर्भोगं न वाञ्छति ।
मुमूर्षुः शायितो भूमौ विवाहं कोऽभिवाञ्छति ॥२१८॥
जिह्रेति व्यवहर्त्तुं च भोक्ताहमिति पूर्ववत् ।
छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते ॥ २१९ ॥
यदा स्वस्यापि भोक्तृत्वं मन्तुं जिह्रेत्ययं तदा ।
साक्षिण्यारोपयेदेतदिति कैव कथा वृथा ॥ २२० ॥
इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशङ्कया ।
कस्य कामायेति ततः शरीरानुज्वरो न हि ॥ २२१ ॥

ततोऽपि किमित्यत आह विविच्य नाशमिति । स्वविनाशनिश्चये भोगेच्छाभावे दृष्टान्तमाह मुमूर्षुरिति ॥ २१८ ॥

किञ्च पूर्ववदहं भोक्तेति व्याहर्त्तुमपि लज्जत इत्याह जिह्रेतीति । तर्हि ज्ञानोत्पत्त्यनन्तरं प्रारब्धावसानपर्य्यन्तं कथं व्याहरतीत्यत आह छिन्ननास इति । ह्रीतो लज्जितः क्लिश्यन्नेदानीमपि कर्म क्षीयते इति क्लेशमनुभवन् प्रारब्धमश्नुते प्रारब्धकर्मफलं भुङ्क्ते इत्यर्थः ॥ २१९ ॥

इदानीं ज्ञानानन्तरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह यदेति । अयं चिदाभासः स्वस्यापि भोक्तृत्वं मन्तुम् अहं भोक्तेति ज्ञातुं जिह्रेति विलज्जते यदा तदा एतत् स्वगतं भोक्तृत्वं साक्षिण्यसङ्गे आरोपयेदिति वृथा कथार्थशून्या कैव न कापीत्यर्थः ॥ २२० ॥

उक्तमर्थं श्रुत्यारूढं करोति इत्यभिप्रेत्येति । कस्य कामायेति श्रुतिरित्यर्थः, कूटस्थस्य चिदाभासस्य वा पारमार्थिकभोक्तृत्वाभावमभिप्रेत्याविशङ्कया शङ्काराहित्येन भोक्तारमाक्षिपति निराकरोति । भवत्वेवं भोक्त्राक्षेपः ततः किमित्यत आह तत इति । ज्वरो ज्वरवत् सन्तापः ॥ २२१ ॥

स्थूलं सूक्ष्मं कारणञ्च शरीरं त्रिविधं स्मृतम् ।
अवश्यं त्रिविधोऽस्त्येव तत्र तत्रोचितो ज्वरः ॥ २२२ ॥
वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ ।
दुर्गन्धत्व कुरूपत्वं दाहभङ्गादयस्तथा ॥ २२३ ॥
कामक्रोधादयः शान्तिदान्त्याद्या लिङ्गदेहगाः ।
ज्वराद्दयेऽपि बाधन्ते प्राप्त्यप्राप्त्या नरं क्रमात् ॥ २२४ ॥
स्वं परञ्च न वेत्त्यात्मा विनष्ट इव कारणे ।
आगामिदुःखबीजञ्चेत्येतदिन्द्रेण दर्शितम् ॥ २२५ ॥
एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः ।
वियोगे तु ज्वरैस्तानि शरीराण्येव नासते ॥ २२६ ॥

तत्त्वविदः शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावञ्च दर्शयति स्थूलमिति ॥ २२२ ॥

तत्र स्थूलशरीरे ज्वरांस्तावद्दाह वातपित्तेति ॥ २२३ ॥

सूक्ष्मशरीरे ज्वरान् दर्शयति कामेति । कामादीनां शान्त्यादीनाञ्च ज्वरत्वमुपपादयति द्वये इति । द्वयेऽपि द्विधा अपि क्रमेण प्राप्त्यप्राप्तिभ्यां नरं बाधन्ते अतो ज्वरबाधनात् ज्वरा इत्युच्यन्त इत्यर्थः ॥ २२४ ॥

कारणशरीरगतो ज्वरः कार्य्योन्मुखतापन्न इत्याह स्वं परञ्चेति । नहि खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानशून्यत्वमज्ञाने मरणावस्थं परोक्षागामिदुःखबीजत्वञ्चाज्ञानस्य इन्द्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः ॥ २२५ ॥

एवं त्रिष्वपि शरीरेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह एत इति । त्रिष्वपि शरीरेषु वर्तमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः कथ्यन्ते । स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति वियो-

तन्तोर्वियुज्येत पटो वालेभ्यः कम्बलो यथा ।
मृदो घटस्तथा देहो ज्वरेभ्योऽपीति दृश्यताम् ॥ २२७ ॥
चिदाभासे स्वतः कोऽपि ज्वरो नास्ति यतश्चितः ।
प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् ॥ २२८ ॥
चिदाभासेऽप्यसम्भाव्या ज्वराः साक्षिणि का कथा ।
एवमेवैकतां मेने चिदाभासो ह्यविद्यया ॥ २२९ ॥
साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये ।
तत् सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते ॥ २३० ॥

नेति । यतः कारणात् एभिर्ज्वरैरेषां शरीराणां वियोगे तानि शरीराणि भासन्त एव नैव भवन्ति अतः स्वाभाविका इत्यर्थः ॥ २२६ ॥

तत्र दृष्टान्तमाह तन्तोरिति ॥ २२७ ॥

इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभासे तावज्ज्वराभावं दर्शयति चिदाभासे इति । चिदाभासे स्वतः शरीरत्रयगतज्वरसम्बन्धमन्तरेण न कोऽपि ज्वरः विद्यते । कुत इत्यत आह यतश्चित इति । चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात् तत्प्रतिबिम्बितस्यापि चिदाभासस्य तथात्वमेष्टव्यमित्यभिप्रायः ॥ २२८ ॥

यदर्थं चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति चिदाभासे इति । यदा चिदाभासेऽपि ज्वरा न सम्भाव्यन्ते तदा न साक्षिणि सम्भवन्तीति किमुत वक्तव्यमिति भावः । ननु तर्हि ज्वराभीत्यनुभवस्य का गतिरित्यत आह एवमिति ॥ २२९ ॥

एकतां मेने इति सङ्क्षेपेणोक्तमर्थं प्रपञ्चयति साक्षीति । चिदाभासः स्वेन संहते शरीरत्रये साक्षिगतं सत्यत्वम् अध्यस्य तत् सर्वं ज्वरवत् शरीरत्रयं स्वस्य वास्तवं रूपम् इति मन्यत इत्यर्थः ॥ २३० ॥

एतस्मिन् भ्रान्तिकालेऽयं शरीरेषु ज्वरत्स्वथ ।
स्वयमेव ज्वरामीति मन्यते हि कुटुम्बिवत् ॥ २३१ ॥
पुत्रदारेषु तप्यत्सु तप्यामीति यथा तथा ।
मन्यते पुरुषस्तद्वदाभासोऽप्यभिमन्यते ॥ २३२ ॥
विविच्य भ्रान्तिमुज्झित्वा स्वमप्यगणयन् सदा ।
चिन्तयन् साक्षिणं कस्मात् शरीरमनुसंज्वरेत् ॥ २३३ ॥
अयथावस्तुसर्पादिज्ञानं हेतुः पलायने ।
रज्जुज्ञानेऽहिधीध्वस्तौ कृतमप्यनुशोचति ॥ २३४ ॥

एवं भ्रान्तिज्ञाने सति किं भवतीत्यत आह एतस्मिन्निति । अयं चिदाभासः अस्यां भ्रान्तिवेलायां शरीरनिष्ठं ज्वरं स्वात्मन्यारोपयतीत्यर्थः । तत्र दृष्टान्तमाह कुटुम्बिवदिति ॥ २३१ ॥

दृष्टान्तं विशदयति पुत्रेति ॥ २३२ ॥

एवमविवेकदशायां चिदाभासे भ्रान्त्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति विविच्येति । चिदाभासः कूटस्थं स्वात्मानं शरीराणि च विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवरूपमिति मन्यते इत्युक्तां भ्रान्तिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नप्यनादरं कुर्वन् स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिन्तयन् कथं नु शरीरमनुसंज्वरेत् इति ज्वरवत् शरीरमनुसृत्य स्वयं कस्मात् संज्वरेत् न संज्वरेदेवेत्यर्थः ॥ २३३ ॥

भ्रान्तिज्ञानतत्त्वज्ञानयोर्ज्वरतदभावकारणत्वं दृष्टान्तप्रदर्शनेन स्पष्टयति अयथेति । रज्ज्वादौ कल्पितस्य सर्पादेर्ज्ञानं पलायने कारणं भवति । आदिशब्देन स्थाणौ कल्पितचोरो गृह्यते । रज्ज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौ तदपि पलायनमनुशोचति वृथा कृतं भयेनेत्यनुतप्यत इत्यर्थः ॥ २३४ ॥

मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये ।
समापयन्निवात्मानं साक्षिणं शरणं गतः ॥ २३५ ॥
आवृत्तपापनुत्त्यर्थं स्नानाद्यावर्त्त्यते यथा ।
आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः ॥ २३६ ॥
उपस्थकुष्ठिनी वेश्या विलासेषु विलज्जते ।
जानतोऽग्रे तथाभासः स्वप्रख्यातौ विलज्जते ॥ २३७ ॥
गृहीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन् पुनः ।
म्लेच्छैः सङ्कीर्य्यते नैव तथाभासः शरीरकैः ॥ २३८ ॥
यौवराज्ये स्थितो राजपुत्रः साम्राज्यवाञ्छया ।
राजानुकारी भवति तथा साक्ष्यनुकार्य्ययम् ॥ २३९ ॥

साक्षिण एव सदा चिन्तयितव्यत्वं दृष्टान्तेन स्पष्टयति मिथ्याभियोगदोषस्येति । यथा लोके मिथ्याभियोगकर्त्ता तद्दोषस्य प्रायश्चित्तार्थं पुनः पुनः समापयति एवमयं चिदाभासोऽपि साक्षिण्यसङ्गात्मनि भोक्तृत्वाद्यारोपणरूपमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षिण्यात्मानं समापयन्नेव शरणं गतः ॥ २३५ ॥

तत्रैव दृष्टान्तान्तरमाह आवृत्तपापनुत्त्यर्थमित्यादि । यथा पापकारिणा पुरुषेणावृत्तपापनुत्त्यर्थमभ्यस्तपापापनोदनाय विहितं स्नानादिकं प्रायश्चित्तमावर्त्त्यते पुनः पुनरनुष्ठीयते तथायमपि चिरं साक्षिणि संसारित्वारोपणदोषपरिहाराय ध्यानं परिवर्त्तयन्निव सदा साक्षिपरायणो भवति ॥ २३६ ॥

एवं साक्षिपरत्वं दृष्टान्तैरुपपाद्य आत्मप्रख्यापने लज्जावत्त्वं सदृष्टान्तमाह उपस्थेति ॥ २३७ ॥

इदानीं शरीरत्रयाद्विविच्यमानस्य चिदाभासस्य पुनस्तैः सह तादात्म्याभावे दृष्टान्तमाह गृहीत इति ॥ २३८ ॥

न केवलं स्वापराधनिवृत्तये साक्ष्यनुकरणं किन्तु महत्प्रयोजन-

यो ब्रह्म वेद ब्रह्मैव भवत्येष इति श्रुतिम् ।
श्रुत्वा तदेकचित्तः सन् ब्रह्म वेत्ति न चेतरत् ॥ २४० ॥
देवत्वकामा ह्यग्न्यादौ प्रविशन्ति यथा तथा ।
साक्षित्वेनावशेषाय स्वविनाशं स वाञ्छति ॥ २४१ ॥
यावत् स्वदेहदाहं स नरत्वं नैव मुञ्चति ।
यावदारब्धदेहं स्यान्नाभासत्वविमोचनम् ॥ २४२ ॥

सिद्ध्यर्थमपीति सिंहावलोकनन्यायेन दृष्टान्तमाह यौवराज्य इति । राजानुकारी भवति राजेव प्रजानुरञ्जनादिगुणवान् भवतीत्यर्थः ॥२३९॥

ननु युवराजस्य राजानुसरणे साम्राज्यं फलं दृश्यते नैवं साक्ष्यनुसरणे कथं प्रवर्त्तत इत्याशङ्क्याह यो ब्रह्म वेदेति । स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित् कुले भवति तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तो ऽमृतो भवतीति श्रुतौ ब्रह्मभावादिरूपस्य फलस्य श्रवणात् तत्फलवाञ्छया साक्ष्यनुसरणे प्रवर्त्तनं युक्तमित्यर्थः ॥ २४० ॥

ननु ब्रह्मध्यानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्येत् अतः स्वनाशाय कथं प्रवर्त्तत इत्याशङ्क्याह देवत्वकामा ह्यग्न्यादाविति । यथा लोके देवत्वप्राप्तिकामा मनुष्याः अग्निप्रवेशगङ्गाप्रवेशादौ प्रवर्त्तन्ते एवं साक्षित्वेनावस्थानरूपस्याधिकफलस्य विद्यमानत्वात् चिदाभासत्वनाशहेतौ ब्रह्मध्यानेऽपि प्रवर्त्तत एवेत्यर्थः ॥ २४१ ॥

ननु तत्त्वज्ञानेन आभासत्वमपगच्छति चेत् कथं तत्त्वविदां जीवत्वव्यवहार इत्याशङ्क्य प्रारब्धकर्मक्षयपर्य्यन्तं तदुपपत्तिं दृष्टान्तमाह यावदिति । यथाऽग्न्यादौ प्रविष्टः पुरुषः दाहादिना स्वदेहनाशपर्य्यन्तं नरत्वं नरत्वव्यवहारयोग्यत्वं नैव मुञ्चति एवं प्रारब्धकर्मक्षयपर्य्यन्तं चिदाभासत्वव्यवहारो न निवर्त्तत इत्यर्थः ॥ २४२ ॥

रज्जुज्ञानेऽपि कम्पादिः शनैरेवोपशाम्यति ।
पुनर्मन्दान्धकारे सा रज्जुः क्षिप्तोरगो भवेत् ॥ २४३ ॥
एवमारब्धभोगोऽपि शनैः शाम्यति नो हठात् ।
भोगकाले कदाचित् तु मर्त्योऽहमिति भासते ॥ २४४ ॥
नैतावतापराधेन तत्त्वज्ञानं विनश्यति ।
जीवन्मुक्तिव्रतं नेदं किन्तु वस्तुस्थितिः खलु ॥ २४५ ॥
दशमोऽपि शिरस्ताडन् रुदन् बुद्ध्वा न रोदिति ।
शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ॥ २४६ ॥

ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात् पुनः कथं भोगानुवृत्तिः कथं वा मर्त्योऽहमिति विपरीतप्रतीतिरित्याशङ्क्य दृष्टान्तप्रदर्शनेन एतत् समाधत्ते रज्जुज्ञानेऽपीति ॥ २४३ ॥

दार्ष्टान्तिके योजयति एवमारब्धभोगोऽपीति ॥ २४४ ॥

ननु पुनर्मर्त्यत्वबुद्ध्युदये तत्त्वज्ञानं बाध्येत इत्याशङ्क्याह नैतावतेति । कदाचिदहं मर्त्य इत्येवं विज्ञानोदयमात्रेणागमप्रमाणजनितं तत्त्वज्ञानं न बाध्यते । कुत इत्यत आह जीवन्मुक्तीति । इदं मर्त्यत्वबुद्ध्यकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किन्तु सम्यक् ज्ञानेन भ्रान्तिज्ञाननिवृत्तिरित्ययं वस्तुस्वभावः अतः कदाचिन्मर्त्यत्वबुद्ध्युदयेऽपि पुनस्तत्त्वज्ञानान्तरेण तस्या एव बाध्यत्वमिति भावः ॥ २४५ ॥

भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकम्पाद्यनुवृत्तिः प्रकृतदृष्टान्ते दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यते इत्याशङ्क्याह दशमोऽपीति । दशमोऽस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्तते ताडनजन्यव्रणस्तु अनुवर्तत एवेत्यर्थः ॥ २४६ ॥

दशमास्मीतिलाभेन जातो हर्षो व्रणव्यथाम् ।
तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखिताम् ॥ २४७ ॥
व्रताभावात् यदाध्यासस्तदा भूयो विविच्यताम् ।
रससेवी दिने भुङ्क्ते भूयोभूयो यथा तथा ॥ २४८ ॥
शमयत्यौषधेनायं दशमः स्वव्रणं यथा ।
भोगेन शमयित्वैतत् प्रारब्धं मुच्यते तथा ॥ २४९ ॥
किमिच्छन्निति वाक्योक्तः शोकमोक्ष उदीरितः ।
आभासस्य ह्यवस्थैषा षष्ठी तृप्तिस्तु सप्तमी ॥ २५० ॥

ननु प्रारब्धभोगकालेऽपि ज्वराद्यनुवृत्तौ मुक्तेः कुतः पुरुषार्थता इत्याशङ्क्य मुक्तिलाभजन्यहर्षस्य दुःखाच्छादकत्वसम्भवात् पुरुषार्थतेति दृष्टान्तपूर्वकमाह दशमास्मीतिलाभेन जात इति ॥ २४७ ॥

जीवन्मुक्तिव्रतं नेदम् इत्युक्तं तस्य व्रतत्वाभावे किमायातमित्यत आह व्रताभावादिति । पुनः पुनर्विचारकरणे दृष्टान्तमाह रससेवीति । यथा रससेवी नरः कस्मिन् दिने क्षुधापरिहाराय पुनः पुनः भुङ्क्ते तद्वदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः ॥ २४८ ॥

ज्ञानेनानिवृत्तस्य प्रारब्धकर्मफलस्य केन तर्हि निवृत्तिरित्याशङ्क्य ज्ञानजन्यव्रणस्यौषधेनेव भोगेनैव निवृत्तिरित्याह शमयत्यौषधेनायमिति ॥ २४९ ॥

अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे । अवस्थे जीवगे श्रुते आत्मानं चेदिति श्रुतिः । इत्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् । इत्यस्मिन् मन्त्रे अपरोक्षज्ञानशोकनिवृत्त्याख्ये जीवावस्थे द्वे अभिहिते इत्युक्तम् इदानीं तदभिधानसूचितां जीवस्य सप्तमीं तृप्त्यवस्थां प्रपञ्चकीर्तनपूर्वकं वक्तुमारभते किमिच्छन्निति । किमिच्छन्नि-

साङ्कुशा विषयैस्तृप्तिरियं तृप्तिर्निरङ्कुशा ।
कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति ॥ २५१ ॥
ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये ।
बहुकृत्यं पुराऽस्याभूत् तत् सर्वमधुना कृतम् ॥ २५२ ॥
तदेतत् कृतकृत्यत्वं प्रतियोगिपुरःसरम् ।
अनुसन्दधदेवायमेवं तृप्यति नित्यशः ॥ २५३ ॥

अपरार्द्धेनाभिहितो यः शोकमोक्षः स एतावत्पर्यन्तसन्दर्भेण उदीरितः अभिहितः । यथा अज्ञानमावृतिस्तद्वद्विक्षेपश्च अपरोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरङ्कुशा इत्यनेन श्लोकेनाभिहितासु सप्तसु जीवावस्थासु षष्ठ्यास्तु आभासस्य भवतीति । तृप्तिरिति सप्तमी व्याख्यायते इति शेषः ॥ २५० ॥

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरङ्कुशत्वं प्रतियोगिदर्शनपुरःसरं प्रतिजानीते साङ्कुशेति । विषयज्ञानजन्यायास्तृप्तेर्विषयान्तरकामनया कुण्ठितत्वात् साङ्कुशत्वम् अस्यास्तु तदभावान्निरङ्कुशत्वं तदेव दर्शयति कृतं कृत्यमिति ॥ २५१ ॥

कृतकृत्यत्वमेवोपपादयति ऐहिकामुष्मिकेति । अस्य विदुषस्तत्त्वज्ञानोदयात् पूर्वमिह लोके दृष्टप्राप्तयेऽनिष्टनिवृत्तये वाणिज्यकृष्यादिकं स्वर्गादिप्राप्तये यागोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकञ्चेति बहुविधकर्तव्यमासीत् इदानीन्तु ऐहिकामुष्मिकफलेच्छाभावात् ब्रह्मानन्दप्राप्त्यात्-कारणस्य सिद्धत्वाच्च तत् सर्वं कृषिवाणिज्यादिकं कृतं कृतप्रायमभूत् इतः परम् अनुष्ठेयत्वाभावादित्यर्थः ॥ २५२ ॥

एवं कृतकृत्यत्वमुपपाद्य तदनुसन्धानजां तृप्तिं दर्शयति तदेतदिति । कृतकृत्यत्वं [illegible] प्रतियोगिपुरःसरं प्रतियोगितदभावपूर्वकं यथा भवति तथा एवं [illegible] तृप्यति ॥ २५३ ॥

दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया ।
परमानन्दपूर्णोऽहं संसरामि किमिच्छया ॥ २५४ ॥
अनुतिष्ठन्तु कर्माणि परलोकयियासवः ।
सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ॥ २५५ ॥
व्याचक्षतान्ते शास्त्राणि वेदानध्यापयन्तु वा ।
येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ॥ २५६ ॥
निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च ।
द्रष्टारश्चेत् कल्पयन्ति किं मे स्यादन्यकल्पनात् ॥ २५७ ॥
गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना ।
नान्यारोपितसंसारधर्मानेवमहं भजे ॥ २५८ ॥

तदेवानुसन्धानं प्रपञ्चयति दुःखिनोऽज्ञा इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनरित्यन्तेन ग्रन्थेन । तत्र तावदैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति दुःखिनोऽज्ञा इति ॥ २५४ ॥

स्वर्गाद्यर्थं कर्मानुष्ठातृभ्यो वैलक्षण्यमाह अनुतिष्ठन्तु कर्माणीति ॥ २५५ ॥

ननु स्वार्थप्रवृत्त्यभावेऽपि परार्थप्रवृत्तिः किं न स्यादित्याशङ्क्य अधिकाराभावात् साऽपि नास्ति इत्याह व्याचक्षतान्ते शास्त्राणीति ॥ २५६ ॥

ननु अदृष्टनिवृत्त्यर्थं भिक्षाटनादिकं परलोकार्थं स्नानादिकञ्च त्वया क्रियमाणमुपलभ्यते अतोऽक्रियत्वमसिद्धमित्याशङ्क्य तदेव अन्यदृष्ट्या नैवास्ति किन्त्वन्यैरेव कल्पितम् इत्याह निद्राभिक्षे इति ॥ २५७ ॥

अन्यकल्पनयापि नाशोऽस्तीत्याशङ्क्य तदभावे दृष्टान्तमाह गुञ्जापुञ्जादीति ॥ २५८ ॥

शृण्वन्त्वज्ञाततत्त्वास्ते जानन् कस्मात् शृणोम्यहम् ।
मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः ॥ २५९ ॥
विपर्य्यस्तो निदिध्यासेत् किं ध्यानमविपर्य्यये ।
देहात्मत्वविपर्य्यासं न कदाचिद् भजाम्यहम् ॥ २६० ॥
अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुम् ।
विपर्य्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥ २६१ ॥
प्रारब्धकर्म्मणि क्षीणे व्यवहारो निवर्त्तते ।
कर्म्माक्षये त्वसौ नैव शाम्येत् ध्यानसहस्रतः ॥ २६२ ॥
विरलत्वं व्यवहृतेरिष्टञ्चेत् ध्यानमस्तु ते ।
अबाधिकां व्यवहृतिं पश्यन् ध्यायाम्यहं कुतः ॥२६३॥

ननु फलान्तरेच्छाभावे कर्मानुष्ठानं मा भूत् तत्त्वसाक्षात्काराय श्रवणादिकं कर्त्तव्यमेव इत्याशङ्क्य अज्ञानाद्यभावात् श्रवणादिकर्त्तव्यमपि नास्तीत्याह शृण्वन्त्विति । अज्ञाततत्त्वा अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते तथाभूताः श्रवणं कुर्वन्तु तत्त्वमित्थमन्यथा वेति संशयवन्तो मननं कुर्वन्तु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरित्यर्थः ॥ २५९ ॥

मा भूतां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्त्तव्यमित्याशङ्क्य देहादौ आत्मबुद्धिलक्षणस्य विपर्ययस्याभावात् तदपि नानुष्ठेयमित्याह विपर्यस्त इति ॥ २६० ॥

ननु विपर्ययाभावात् अहं मनुष्य इति व्यवहारः कथं घटत इत्याशङ्क्य वासनावशात् भवतीत्याह अहं मनुष्य इत्यादीति ॥ २६१ ॥

तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं सम्पाद्यमित्याशङ्क्य प्रारब्धक्षयमन्तरेणास्य निवृत्तिर्नास्तीत्याह प्रारब्धकर्मणीति ॥ २६२ ॥

ननु प्रारब्धनिमित्तकस्यापि व्यवहारस्य विरलत्वाय ध्यानं कर्त्तव्यमेव इत्याशङ्क्य व्यवहारस्याबाधकत्वदर्शनात् तन्निवृत्तये न ध्यानमनुष्ठेयमित्याह विरलत्वमिति ॥ २६३ ॥

विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद् विकारिणः ॥२६४॥
नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् ।
कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ॥ २६५ ॥
व्यवहारो लौकिको वा शास्त्रीयोऽप्यन्यथापि वा ।
ममाकर्त्तुरलेपस्य यथारब्धं प्रवर्त्तताम् ॥ २६६ ॥
अथवा कृतकृत्योऽपि लोकानुग्रहकाम्यया ।
शास्त्रीयेणैव मार्गेण वर्त्तेऽहं का मम क्षतिः ॥ २६७ ॥
देवार्चनस्नानशौचभिक्षादौ वर्त्ततां वपुः ।
तारं जपतु वाक् तद्वत् पठत्वाम्नायमस्तकम् ॥२६८॥

ध्यानस्य कर्त्तव्यत्वेऽपि विक्षेपपरिहाराय समाधिः कर्त्तव्य इत्याशङ्क्य विक्षेपसमाधानयोर्मनोधर्मत्वात् न विक्षेपनिवारकोऽपि समाधिर्ममाविकारस्येत्याह विक्षेपो नास्तीति ॥ २६४ ॥

ननु तथापि समाधिफलमनुभवः सम्पादनीय इत्याशङ्क्य तस्य मत्स्वरूपत्वान्न सम्पाद्य इत्याह नित्यानुभवरूपस्येति । उपपादितं कृतकृत्यत्वं निगमयति कृतं कृत्यमिति ॥ २६५ ॥

एवं स्वस्य कर्त्तव्यानभ्युपगमेऽनियतव्यवहारित्वं प्रसक्तमित्याशङ्क्य प्रारब्धकर्मवशात् प्राप्तमनियतव्यवहारित्वमङ्गीकरोति व्यवहार इति । लौकिको भिक्षाटनादिः शास्त्रीयो जपध्यानादिरन्यथापि वा प्रतिषिद्धविषयादिव्यवहारः कर्त्तृत्वभोक्तृत्वरहितस्य मम प्रारब्धकर्मानतिक्रमेण प्रवर्त्ततामित्यर्थः ॥ २६६ ॥

एवं वस्तुतत्त्वमभिधाय पक्षान्तरेणाह अथवेति । लोकानुग्रहकाम्यया प्राण्यनुग्रहेच्छया इत्यर्थः ॥ २६७ ॥

शास्त्रीयमार्गे प्रवर्त्तनाप्रकारं दर्शयति तदभिमानशून्यो विकारस्तु

विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयताम्।
साक्ष्यहं किञ्चिदप्यत्र न कुर्वे नापि कारये ॥ २६९ ॥
एवञ्च कलहः कुत्र सम्भवेत् कर्मिणा मम।
विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ॥ २७० ॥
वपुर्वाग्धीषु निर्बन्धः कर्मिणो न तु साक्षिणि।
ज्ञानिनः साक्ष्यलेपत्वे निर्बन्धो नेतरत्र हि ॥ २७१ ॥
एवञ्चान्योन्यवृत्तान्तानभिज्ञौ बधिराविव।
विवदेतां बुद्धिमन्तो हसन्त्येव विलोक्य तौ ॥ २७२ ॥
यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित्।
ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ॥ २७३ ॥
देहवाग्बुद्धयस्त्यक्ता ज्ञानिनानृतबुद्धितः।
कर्मी प्रवर्त्तयत्वाभिर्ज्ञानिनो हीयतेऽत्र किम् ॥ २७४ ॥

इदानीं स्वाभिप्रायमाह देवार्चनेत्यादिना श्लोकद्वयेन। तत्र प्रथमम् [illegible] ॥ २६८ ॥

विष्णुं ध्यायत्विति सुगमम् ॥ २६९ ॥

फलितमाह एवञ्चेति ॥ २७० ॥

विभिन्नविषयत्वमेव स्पष्टयति वपुर्वाग्धीषु निर्बन्ध इति ॥ २७१ ॥

तथापि यौ ज्ञानिकर्मिणौ कलहं कुर्वाते तौ विद्वद्भिः परिहसनीयावित्याह एवञ्चेति ॥ २७२ ॥

कुतः परिहास्यत्वमित्याशङ्क्य निर्विषयकलहकारित्वादित्याह यं कर्मी न विजानातीति। कर्मी यं साक्षिणं कर्मानुष्ठानोपयोगिदेहव्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्वविदा तस्य ब्रह्मत्वे बुद्धे कर्मिणः कर्मानुष्ठाने किं हीयते ॥ २७३ ॥

ज्ञानिना मिथ्यात्वबुद्ध्या परित्यक्ताभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने

प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः क्वोपयुज्यते ।
बोधे हेतुर्निवृत्तिश्चेद् बुभुत्सायां तथेतरा ॥ २७५ ॥
बुद्धश्चेन्न बुभुत्सेत नाप्यसौ बुध्यते पुनः ।
अबाधादनुवर्त्तेत बोधो न त्वन्यसाधनात् ॥ २७६ ॥
नाविद्या नापि तत्कार्य्यं बोधं बाधितुमर्हति ।
पुरैव तत्त्वबोधेन बाधिते ते उभे यतः ॥ २७७ ॥
बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते ।
जीवन्नाखुर्न मार्जारं हन्ति हन्यात् कथं मृतः ॥ २७८ ॥

ज्ञानिनो वा किं हीयते अतो निर्विषयकत्वाहङ्कारित्वयोः परिहरणीयत्वमित्यर्थः ॥ २७४ ॥

कर्मानुष्ठानं प्रयोजनशून्यत्वात् न ज्ञानिनाभ्युपगम्यते इति शङ्कते प्रवृत्तिरिति । उपयोगाभावो निवृत्तावपि समान इति परिहरति निवृत्तिरिति । निवृत्तेर्बोधहेतुत्वात् नोपयोगाभाव इति शङ्कते बोधे हेतुरिति । तर्हि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयोगवतीत्याह बुभुत्सायामिति ॥ २७५ ॥

ननु बुद्धस्य बुभुत्साभावात् प्रवृत्तेरनुपयोगित्वमिति पुनः शङ्कते बुद्धश्चेदिति । तर्हि बुद्धस्य पुनर्बोधाभावात् तद्धेतुर्निवृत्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नाप्यसाविति । उत्पन्नस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्ष्यते इत्याशङ्क्य स्थिरत्वं बाधकाभावमपेक्षते न साधनान्तरमित्याह अबाधादिति । वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः स्यादेव अतो न साधनान्तरं तदर्थमनुष्ठेयमित्यर्थः ॥ २७६ ॥

ननु प्रमाणान्तरेण बाधाभावेऽप्यविद्यया तत्कार्येण कर्तृत्वाद्यध्यासेन वा बाधः स्यादित्याशङ्क्याह नाविद्येति । तत्र हेतुमाह पुरैवेति ॥ २७७ ॥

अविद्याया बाधितत्वेऽपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वा-

अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः।
निष्फलेषुवितुन्नाङ्गो नङ्क्ष्यतीत्यत्र का प्रमा ॥ २७९ ॥
आदावविद्यया चित्रैः स्वकार्य्यैर्जृम्भमाणया।
युद्धा बोधोऽजयत् सोद्य सुदृढो बाध्यतां कथम् ॥२८०॥
तिष्ठन्त्वज्ञानतत्कार्य्यशवा बोधेन मारिताः।
न हानिर्बोधसम्राजः कीर्त्तिः प्रत्युत तस्य तैः ॥२८१॥
य एवमतिशूरेण बोधेन न वियुज्यते।
निवृत्त्या वा प्रवृत्त्या वा देहादिगतयास्य किम् ॥२८२॥

भोगात् तेन बोधस्य बाधो भवेदित्याशङ्क्य उपादाननिवृत्त्यैव तस्यापि निवर्तितत्वात् न तेनापि बाधः शङ्कितुं शक्य इत्याह बाधितं दृश्यतामिति। तत्र दृष्टान्तमाह जीवन्मुक्तेरिति। आनुषङ्गिकः ॥ २७८ ॥

दृष्टान्तदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायदर्शनेन दृढयितुं तदनुकूलं दृष्टान्तमाह अपीति। यः अर्जुनः पाशुपतास्त्रेण विद्धोऽपि न ममार चेत् किन्तु स निष्फलेषुर्वितुन्नाङ्गः शल्यरहितेनेषुणा व्यथितदेह सन् नङ्क्ष्यतीति नाशं प्राप्स्यतीत्यत्र प्रमा प्रमाणं नास्तीत्यर्थः ॥२७९॥

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति आदावविद्ययेति। आदौ विद्याभ्याससमये चित्रैः बहुविधैः स्वकार्य्यैः प्रमातृत्वभोक्तृत्वकर्तृत्वादिभिर्जृम्भमाणया वर्द्धमानयाऽविद्यया बोधो युद्धा युद्धं कृत्वा तामजयत् स एवाभ्यासपाटवेन सुदृढः इदानीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्य्येणाभासेन सह बाध्यतां न कथमपि बाध्यत इत्यर्थः ॥ २८० ॥

उपपादितमर्थं श्लोकद्वयेनोपसंहरन् रूपकेणाह तिष्ठन्त्विति ॥२८१॥

भवत्वेवं ततः किमायातमित्याह य एवमिति। यः पुमानेवमुक्तप्रकारेणातिशूरेणाविद्यातत्कार्य्यघातकेन ब्रह्मात्मैकत्वज्ञानेन न वियु-

प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा ।
स्वर्गाय वापवर्गाय योजितव्यं यतो नृभिः ॥ २८३ ॥
विद्वांश्चेत् तादृशां मध्ये तिष्ठेत् तदनुरोधतः ।
कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ॥२८४॥
एष मध्ये बुभुत्सूनां यदा तिष्ठेत् तदा पुनः ।
बोधायैषां क्रियाः सर्व्वा दूषयंस्त्यजतु स्वयम् ॥ २८५ ॥
अविद्वदनुसारेण वृत्तिर्बुद्धस्य युज्यते ।
स्तनन्धयानुसारेण वर्त्तते तत्पिता यतः ॥ २८६ ॥

तया न कदाऽपि वियुक्तो भवति अस्य पुंसो देहादिनिष्ठया निवृत्त्या वा प्रवृत्त्या वा किं न किमपि इष्टमनिष्टं वेत्यर्थः ॥ २८२ ॥

तर्ह्येवं ज्ञानिवदज्ञानिनोऽपि प्रवृत्त्याग्रहो न युक्त इत्याशङ्क्याह प्रवृत्ताविति । तल्लोपपादयन्नाह स्वर्गाय वेति ॥ २८३ ॥

विदुष आग्रहो न युक्त इत्युक्तं तर्हि कर्मिणां मध्ये वर्त्तमानेन किं कर्त्तव्यमित्यत आह विद्वानिति तादृशानां कर्मिणां मध्ये तिष्ठेच्चेत् तदनुरोधतः तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोत्येव तान् कर्मिणो न निवारयेदित्यर्थः ॥ २८४ ॥

ज्ञानिनैव तत्त्वबुभुत्सूनां मध्येऽवस्थितस्य कृत्यमाह एष इति । एष विद्वान् बुभुत्सूनां मध्ये यदा तिष्ठेत् तदा एषां बुभुत्सूनां बोधाय तत्त्वज्ञानजननाय ताः क्रिया दूषयन् स्वयमपि त्यजतु ॥२८५॥

कुत एवं कर्त्तव्यमित्यत आह अविद्वदनुसारेणेति । अज्ञान्यनुसारेण ज्ञानिनो वर्त्तनमुचितं कृपालुत्वात् तेषामनुकम्पनीयत्वाच्चेति भावः । कथं तत् दृष्टमित्यत आह स्तनन्धयेति । स्तनन्धयाः स्तन्यपानकर्त्तारः शिशव इत्यर्थः ॥ २८६ ॥

अधिक्षिप्तस्ताड़ितो वा बालेन स्वपिता तदा ।
न क्लिश्यति न कुप्येच्च बालं प्रत्युत लालयेत् ॥ २८७ ॥
निन्दितः स्तूयमानो वा विद्वानज्ञैर्न निन्दति ।
न स्तौति किन्तु तेषां स्याद् यथा बोधस्तथाचरेत् ॥ २८८ ॥
येनायं नटनेनात्र बुध्यते कार्य्यमेव तत् ।
अज्ञप्रबोधान्नैवान्यत् कार्य्यमस्त्यत्र तद्विदः ॥ २८९ ॥
कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः ।
तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरन्तरम् ॥ २९० ॥
धन्योऽहं धन्योऽहं नित्यं स्वात्मानमञ्जसा वेद्मि ।
धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥ २९१ ॥

पितुः स्वमन्वयानुसारित्वमेव दर्शयति अधिक्षिप्त इति ॥ २८७ ॥

दार्ष्टान्तिके योजयति निन्दित इति । विद्वानज्ञैर्निन्दितः स्तूयमानो वा स्वयं न निन्दति न स्तौति किन्तु एषामज्ञानिनां यथा बोध उपजायते तथाचरेत् ॥ २८८ ॥

एवमाचरणे निमित्तमाह येनायमिति । अयमज्ञानी अस्माकं लोके विदुषो येन यादृशेन नटनेनाचरणेन बुध्यते तत्त्वमवगच्छति तथाचरणं तेन कर्त्तव्यमेव । तर्हि यदृच्छया कार्य्यान्तरमपि प्रसज्येत इत्यत आह अज्ञप्रबोधादिति । यतस्तद्विदस्तत्त्वविदः अत्र लोके अज्ञप्रबोधादन्यत् कर्त्तव्यं नैवास्ति अतस्तदनुसारेण तत्त्वबोधनं कर्त्तव्यमित्यर्थः ॥ २८९ ॥

इदानीं तृप्तिद्वयमप्याह कृतकृत्यतयेति । असौ विद्वान् उक्तप्रकारेण, कृतकृत्यतया कृतं कृत्यं येनासौ कृतकृत्यस्तस्य भावस्तत्ता तया तृप्तः सन् पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येन स प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तृप्यन् स्वमनसा निरन्तरमेवं मन्यते ॥ २९० ॥

किं मन्यते तदित्यत आह धन्योऽहमिति । धन्यः कृतकृतार्थः स्याद-

धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य ।
धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥२८२॥
धन्योऽहं धन्योऽहं कर्त्तव्यं मे न विद्यते किञ्चित् ।
धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमद्य सम्पन्नम् ॥ २८३ ॥
धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ।
धन्योऽहं धन्योऽहं धन्यो धन्यो धन्यः पुनः पुनः ॥२८४॥
अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् ।
अस्य पुण्यस्य सम्पत्तेरहो वयमहो वयम् ॥ २८५ ॥

द्विर्वीप्सा नित्यमनवरतं स्वात्मानं स्वस्य निजं रूपं देशाद्यनवच्छिन्नं ब्रह्मानन्दमञ्जसा साक्षात् यतो वेद्मि जानाम्यतो धन्य इत्यर्थः। एवं स्वज्ञानलाभनिमित्तां तुष्टिमभिधाय तत्फललाभनिमित्तां तां दर्शयति धन्योऽहमिति। ब्रह्मानन्दं ब्रह्मभूतानन्दः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा स्फुरतीत्यर्थः ॥ २८१ ॥

एवमिष्टप्राप्तौ तुष्टिमभिधायानिष्टनिवृत्त्यापि तुष्यतीत्याह धन्योऽहमिति। अद्य इदानीं दुःखं दुःखरूपं संसारं न वीक्षे न पश्यामि अतः कृतार्थ इत्यर्थः। दुःखाप्रतीतौ कारणमाह धन्योऽहमिति। अनेकवासनाजालमज्ञानं क्वापि पलायितं नष्टमित्यर्थः ॥ २८२ ॥

अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्तप्राप्यत्वञ्च दर्शयति धन्योऽहमिति ॥ २८३ ॥

इदानीं कृतकृत्यत्वमित्यादिना जातायास्तृप्तेर्निरतिशयत्वमाह धन्योऽहमिति। इतः परं ब्रह्मण्यादर्शनात् तृप्तिरेव परिस्फुरतीति दर्शयति धन्योऽहमिति ॥ २८४ ॥

अस्य सर्वस्य कारणभूतपुण्यपुञ्जपरिपाकमनुस्मृत्य तुष्यतीत्याह अहो पुण्यमिति। एवंविधपुण्यसम्पादकमात्मानमनुस्मृत्य तुष्यतीत्याह अस्य पुण्यस्येति ॥ २८५ ॥

अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ।
अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ॥ २९६ ॥
तृप्तिदीपमिमं नित्यं येऽनुसन्दधते बुधाः ।
ब्रह्मानन्दे निमज्जन्तस्ते तृप्यन्ति निरन्तरम् ॥ २९७ ॥

इति तृप्तिदीपः समाप्तः ।

अष्टमपरिच्छेदः ।

कूटस्थदीपः ।

आदित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् ।
कूटस्थभासितो देहो धीस्थजीवेन भास्यते ॥ १ ॥

इदानीं सम्यग् ज्ञानसाधनं शास्त्रं तदुपदेष्टारमाचार्य्यं चानुस्मृत्य स्तुयतीत्याह अहो शास्त्रमिति । पुनश्च शास्त्रजन्यज्ञानं तज्जन्यसुखं चानुस्मृत्य सन्तुष्यतीत्याह अहो ज्ञानमिति ॥ २९६ ॥

ग्रन्थाभ्यासफलमाह तृप्तिदीपमिति ॥ २९७ ॥

इति तृप्तिदीपव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
कुर्वे कूटस्थदीपस्य व्याख्यां तात्पर्यदीपिकाम् ॥

मुमुक्षोर्मोक्षसाधनब्रह्मात्मैक्यज्ञानस्य त्वंपदार्थशोधनपूर्वकत्वात् त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रन्थमारभमाणः आचार्य्योऽस्य ग्रन्थस्य वेदान्तप्रकरणत्वेन तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य त्वंपद-

अनेकदर्पणादित्यदीप्तीनां बहुसन्धिषु ।
इतरा व्यज्यते तासामभावेऽपि प्रकाशते ॥ २ ॥
चिदाभासविशिष्टानां तथानेकधियामसौ ।
सन्धिं धियामभावञ्च भासयन् प्रविविच्यताम् ॥ ३ ॥

लक्ष्यमाणौ कूटस्थजीवौ सदृष्टान्तं भेदेन निर्दिशति आदित्येति । आदित्यदीपिते च आदित्यः आदित्यः प्रसिद्धः सूर्य्य इत्यर्थः तेन च तत्सम्बन्ध्यालोको लक्ष्यते, तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवत् दर्पणेषु निपत्य पर्य्यावृत्तैः कुड्यसम्बन्धैरादित्यरश्मिभिस्तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन भासितः प्रकाशितो देहः धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते अनेन सामान्यतो विशेषतश्च कुड्यावभासकादित्यप्रकाशद्वयमिव देहावभासकचैतन्यद्वयमस्तीति प्रतिज्ञातं भवति ॥ १ ॥

ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेण आदित्यदीप्तिर्नोपलभ्यते इत्याशङ्क्य तामुपलभ्यां विभज्य दर्शयति अनेकेति । अनेका बहुदर्पणजन्याः कुड्ये तत्र तत्र मण्डलाकारविशेषप्रभा इष्यन्ते तासां सन्धौ मध्ये इतरा सामान्यप्रकाशरूपा आदित्याभा व्यज्यते अभिव्यक्तोपलभ्यते तासां दर्पणजन्याभासानामभावे दर्पणापगमादिना अपसृते च स्वयं सैव प्रकाशते ॥ २ ॥

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके दर्शयति चिदाभासविशिष्टानामिति । तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिम्बयुक्तानाम् अनेकधियामनेकासां बुद्धिवृत्तीनां घटज्ञानादिशब्दवाच्यानां सन्धिमन्तरालं जाग्रदादौ धियां तासामेव बुद्धिवृत्तीनाम् अभावञ्च सुषुप्त्यादौ भासयन् प्रकाशयन्नसौ कूटस्थः प्रविविच्यतां ताभ्यां भेदेन ज्ञायतामित्यर्थः ॥ ३ ॥

घटैकाकारधीस्था चित् घटमेवावभासयेत् ।
घटस्य ज्ञातता ब्रह्मचैतन्येनावभासते ॥ ४ ॥
अज्ञातत्वेन भातोऽयं घटो बुद्ध्युदयात् पुरा ।
ब्रह्मणैवोपरिष्टात् तु ज्ञातत्वेनेत्यसौ भिदा ॥ ५ ॥
चिदाभासान्तधीवृत्तिर्ज्ञानं लोहान्तकुन्तवत् ।
जाड्यमज्ञानमेताभ्यां व्याप्तः कुम्भो द्विधोच्यते ॥ ६ ॥
अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुम्भस्तथा न किम् ।

इदानीं देहान्तःकूटस्थचिदाभासयोर्भेदप्रदर्शनाय देहाद् बहिरपि चिदाभासब्रह्मणी विभज्य दर्शयति घटैकाकारधीस्थेति । घटैकाकारधीस्था चित् घटस्यैकस्याकार इवाकारो यस्याः सा घटैकाकारा तथाविधायां बुद्धौ वर्त्तमानचिदाभासः घटमेकमेवावभासयेत् तस्य घटस्य ज्ञातताख्यो धर्मः घटो ज्ञात इति व्यवहारहेतुर्यः स घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येन साधनभूतेनावभासते प्रकाश्यते इत्यर्थः ॥ ४ ॥

ननु ज्ञातताव भासकचैतन्येनैव घटप्रतीतिसम्भवात् बुद्धिः किमर्थेयमित्याशङ्क्य घटस्य ज्ञाततादिभेदविवक्षयेत्याह अज्ञातत्वेनेति । बुद्ध्युदयात् पुराऽयं घटो ब्रह्मणैवाज्ञातत्वेन प्रकाशितो बुद्ध्युदये सत्यां ज्ञातत्वेन ब्रह्मणैव प्रकाश्यत इतीयानेव भेदः नान्य इत्यर्थः ॥ ५ ॥

नन्वेकस्यैव घटस्य ज्ञातत्वाज्ञातत्वलक्षणं द्वैरूप्यं कथं सम्भवतीत्याशङ्क्य तदवबोधनाय ज्ञातताज्ञातानिमित्तयोर्ज्ञानाज्ञानयोः स्वरूपं तावद् दर्शयति चिदाभासान्तधीवृत्तिरिति । चिदाभासश्चित्प्रतिबिम्बः धीऽन्ते पुरोभागे यस्याः सा धीवृत्तिर्ज्ञानम् इत्युच्यते बोधो धीवृत्तिरिति आचार्य्यैरभिधानात् । तत्र दृष्टान्तो लोहान्तकुन्तवदिति । जाड्यं स्वतः स्फूर्त्तिरहितत्वमज्ञानमित्युच्यते एताभ्यां पर्य्यायेण व्याप्तः सर्वतः सम्बद्धः कुम्भो ज्ञातो ज्ञात इति चोच्यत इत्यर्थः ॥ ६ ॥

ननु अज्ञातस्य कुम्भस्याज्ञानव्याप्तत्वाद्भवतु ब्रह्मावभास्यत्वं ज्ञात-

ज्ञाततत्वजननेनैव चिदाभासपरिचयः ॥ ७ ॥

आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते ।
तादृग् बुद्धेर्विशेषः को मृदादेः स्याद् विकारिणः ॥ ८ ॥

ज्ञात इत्युच्यते कुम्भो मृदा लिप्तो न कुत्रचित् ।
धीमात्रव्याप्तकुम्भस्य ज्ञातत्वं नेष्यते तथा ॥ ९ ॥

ज्ञातत्वं नाम कुम्भेऽस्मिंश्चिदाभासफलोदयः ।
न फलं ब्रह्मचैतन्यं मानात् प्रागपि सत्त्वतः ॥ १० ॥

अज्ञातस्य व ज्ञातस्य कुम्भस्य कुतो ब्रह्मचैतन्यावभास्यत्वमित्याशङ्क्याज्ञानस्याज्ञातताजनने इव ज्ञानस्यापि ज्ञातताजननमात्रोपक्षीणत्वादज्ञातकुम्भवत् ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह अज्ञातो ब्रह्मणा भास्य इति । यथा अज्ञातः कुम्भो ब्रह्मावभास्यस्तथा ज्ञातः कुम्भो न किं ब्रह्मावभास्यो भवति किन्तु भवत्येवेत्यर्थः । कुत इत्यत आह ज्ञातत्वेति ॥ ७ ॥

नन्वज्ञातताजननायामज्ञानमिव ज्ञातताजननायापि बुद्धिरेवालं किमनेन चिदाभासेनेत्याशङ्क्य चिदाभासरहिताया बुद्धेर्घटादिवदचेतनत्वेन ज्ञातताजननं न सम्भवतीत्याह आभासहीनयेति ॥ ८ ॥

चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टान्तप्रदर्शनेन स्पष्टयति इत्युच्यत इति । लोके कुत्रचिदपि घटः मृदा पङ्करूपया लिप्तो लेपनं प्राप्तो ज्ञात इति नोच्यते यथा तथा चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वं नाभ्युपगन्तव्यमिति भावः ॥ ९ ॥

फलितमाह ज्ञातत्वमिति । यतः केवलाया बुद्धेर्ज्ञातत्वजननासामर्थ्यमतः कुम्भे चिदाभासव्याप्तस्य फलस्योत्पत्तिरेव ज्ञातत्वं नाम प्रसिद्धमित्यर्थः । ननु तथापि चिदाभासो न कल्पनीयः ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशङ्क्याह न फलमिति । ब्रह्मचैतन्यं फलं घटादिस्फुरणं न भवतीति । कुत इत्यत आह मानात् प्रागिति । प्रमाण-

परागर्थप्रमेयेषु या फलत्वेन सम्मता।
संवित् सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः॥
इति वार्त्तिककारेण चित्सादृश्यं विवक्षितम्।
ब्रह्मचित्फलयोर्भेदः साहस्र्यां विश्रुतो यतः॥ ११॥
आभास उदितस्तस्मात् ज्ञातत्वं जनयेद् घटे।
तत् पुनर्ब्रह्मणा भास्यमज्ञातत्ववदेव हि॥ १२॥
धीवृत्त्याभासकुम्भानां समूहो भास्यते चिता।
कुम्भमात्रफलत्वात् स एक आभासतः स्फुरेत्॥ १३॥

वृत्तेः पूर्वमपि विद्यमानत्वात् फलस्य तु तदुत्तरकालीनत्वनियमादिति भावः॥ १०॥

नन्विदं परागर्थप्रमेयेष्वित्यादिसुरेश्वरवार्त्तिकविरुद्धमित्याशङ्क्य तद्विरोधानभिज्ञातस्य चोद्यमिति परिहरति परागर्थप्रमेयेष्विति। अस्य चायमर्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्रमेयेषु प्रमाणविषयेषु सत्सु या प्रमाणफलत्वेनाभ्युपेता संविदस्ति सैवेहास्मिन् शास्त्रे वेदान्तोक्तिप्रमाणतः वेदान्तवाक्यलक्षणप्रमाणेन मेयोऽर्थः ज्ञातव्योऽर्थः इतीति इत्यनेन वार्त्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति भावः। वार्त्तिककाराणामीदृशी विवक्षेति कुतोऽवगम्यत इत्याशङ्क्य तद्गुरुभिः श्रीमदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वात् इत्याह ब्रह्मचित्फलयोरिति। ब्रह्म चित् फलं च ब्रह्मचित्फले तयोरिति विग्रहः॥ ११॥

एवञ्च सति प्रकृते किमायातमित्यत आह आभासेति। यस्मात् ब्रह्मचित्फलयोर्भेदः सिद्धस्तस्मात् घटे उदित उत्पन्न आभासस्तत्र घटे ज्ञातत्वं जनयेत् उत्पन्नं तज्ज्ञातत्वं पुनरज्ञातत्ववत् ब्रह्मणैव भास्यं भवति हि प्रसिद्धमित्यर्थः॥ १२॥

एवं ब्रह्मचिदाभासयोर्भेदमुपपादितं विषयभेदप्रदर्शनेन स्पष्टयति

चैतन्यं द्विगुणं कुम्भे ज्ञातत्वेन स्फुरेत् ततः ।
अन्येऽनुव्यवसायाख्यमाहुरेतद् यथोदितम् ॥ १४ ॥
घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः ।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् ॥ १५ ॥
आभासब्रह्मणी देहात् बहिर्यद्वद् विवेचिते ।
तद्वदाभासकूटस्थौ विविच्येतां वपुष्यपि ॥ १६ ॥
अहंवृत्तौ चिदाभासः कामक्रोधादिकासु च ।
संव्याप्य वर्त्तते तप्ते लोहे वह्निर्यथा तथा ॥ १७ ॥

[illegible]न्येति । चिता ब्रह्मचैतन्येनेत्यर्थः चिदाभासस्य कुम्भमात्रनिष्ठफलत्वात् तेनाभासेन घट एक एव स्फुरेत् भासते इत्यर्थः ॥ १३ ॥

कुम्भस्य चिदाभासब्रह्मोभयभास्यत्वे द्विगुणत्वं चैतन्यमिति । ततो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात् कुम्भे ज्ञातत्वेन द्विगुणं चैतन्यं भाति इदमेव घटज्ञाततावभासकं चैतन्यं तार्किकैर्नामान्तरेण व्यवह्रियते इत्याह अन्योऽनुव्यवसायाख्यमिति । यथोदितं यथोक्तमेतदेव ब्रह्मचैतन्यमन्ये तार्किका अनुव्यवसायाख्यं ज्ञानान्तरं प्राहुरिति योजना ॥ १४ ॥

अयं घट इति ज्ञातो घट इति च व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽवगन्तव्य इत्याह घटोऽयमित्यसाविति ॥ १५ ॥

देहाद् बहिश्चिदाभासब्रह्मणी विविच्येते यथा तथा देहान्तश्चिदाभासकूटस्थौ विवेचनीयावित्याह आभासब्रह्मणी देहादिति ॥ १६ ॥

ननु देहाद् बहिश्चिदाभासस्य बाह्यघटाकारवृत्तिवदान्तरविषयगोचरवृत्त्यभावात् कथं तद्व्यापकचिदाभासोऽभ्युपगम्यते इत्याशङ्क्याह अन्तर्विषयगोचरवृत्त्यभावेऽप्यहमादिवृत्तिसद्भावात् तद्व्यापकचिदाभासोऽभ्युपगन्तुं शक्यते इति दृष्टान्तेनाह अहंवृत्ताविति ॥ १७ ॥

स्वमात्रं भासयेत् तस्मं सोऽहं नान्यत् कदाचन ।
एवमाभाससहिता वृत्तयः स्वस्वभासिकाः ॥ १८ ॥
क्रमाद् विच्छिद्य विच्छिद्य जायन्ते वृत्तयोऽखिलाः ।
सर्व्वा अपि विलीयन्ते सुप्तिमूर्च्छासमाधिषु ॥ १९ ॥
सन्धयोऽखिलवृत्तीनामभावाश्चावभासिताः ।
निर्विकारेण येनासौ कूटस्थ इति गीयते ॥ २० ॥
घटे द्विगुणचैतन्यं यथा बाह्ये तथान्तरे ।
वृत्तिष्वपि ततस्तत्र वैशद्यं सन्धितोऽधिकम् ॥ २१ ॥
ज्ञातताज्ञातते न स्तो घटवद् वृत्तिषु क्वचित् ।

अहमादिवृत्तीनामेव चिदाभासभास्यत्वं दृष्टान्तप्रपञ्चनेन स्पष्टयति स्वमात्रमिति ॥ १८ ॥

एवं चिदाभासं व्युत्पाद्य कूटस्थस्वरूपं व्युत्पादयितुं तदुपयोगिनं वृत्त्यभावावसरं दर्शयति क्रमाद् विच्छिद्येति ॥ १९ ॥

भवत्वेवं समाध्यादौ वृत्तिविलयोऽनेन कथं कूटस्थोऽवगम्यते इत्याशङ्क्य वृत्त्यभावसाक्षित्वेनावगम्यते इत्याह सन्धयोऽखिलवृत्तीनामिति । वृत्तिसन्धयो वृत्त्यभावाश्च येन चैतन्येनावभास्यन्ते स कूटस्थोऽवगन्तव्य इत्यर्थः ॥ २० ॥

एवञ्च सति किं फलितमित्यत आह घटे द्विगुणेति । बाह्ये घटे यथा घटमात्रावभासकचिदाभासः घटस्य ज्ञाततावभासकं ब्रह्मचैतन्यञ्चेति चैतन्यद्वैगुण्यं तथान्तरेऽहङ्कारादिवृत्तिष्वपि कूटस्थचैतन्यं वृत्त्यवभासकचिदाभासश्चेति द्विगुणं चैतन्यमस्ति । तत्रोपपत्तिमाह ततस्तत्र वैशद्यमिति । यतो द्विगुणं चैतन्यमस्ति ततः सन्धितः सन्धिभ्यस्तत्र वृत्तिषु वैशद्यमधिकं दृश्यत इति शेषः ॥ २१ ॥

नन्वत्र वृत्तौ घटादिष्विव ज्ञाततावभासकत्वेन कूटस्थ किं नेष्यत

अस्य स्वेनागृहीतत्वात् ताभिश्चाज्ञाननाशनात् ॥२२॥
द्विगुणीकृतचैतन्ये जन्मनाशानुभूतितः ।
अकूटस्थं तदन्यत् तु कूटस्थमविकारितः ॥ २३ ॥
अन्तःकरणतद्वृत्तिसाक्षीत्यादावनेकधा ।
कूटस्थ एव सर्वत्र पूर्व्वाचार्य्यैर्विनिश्चितः ॥ २४ ॥
आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा ।
गम्यन्ते शास्त्रयुक्तिभ्यामित्याभासश्च वर्णितः ॥ २५ ॥

इत्याशङ्क्य तत्र ज्ञातताद्यभावाद्वैवेत्याह ज्ञातताज्ञाततेनेति । तत्रोपपत्तिमाह अस्य स्वेनागृहीतत्वादिति । ज्ञानाज्ञानव्याप्तिभ्यां ज्ञातताज्ञातते भवतः इदानीन्तु स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ताभिः वृत्तिभिश्चोत्पत्तिमात्रेण स्वगोचराज्ञानस्य निवर्त्तितत्वात् अज्ञानस्य व्याप्तिर्नास्तीति भावः ॥ २२ ॥

ननु कूटस्थचिदाभासयोरुभयोरपि चित्त्वे समाने एकस्य कूटस्थत्वमपरस्याकूटस्थत्वमित्येतत् कुत इत्याशङ्क्य चिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थत्वं इतरस्य विकारित्वे प्रमाणाभावात् कूटस्थत्वमित्याह द्विगुणीकृतेति ॥ २३ ॥

चिदाभासव्यतिरिक्तकूटस्थाभ्युपगमः स्वकपोलकल्पित इत्याशङ्क्याचार्य्यैश्च कूटस्थस्योपपादितत्वान्नैवमित्याह अन्तःकरणेति । अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः । आनन्दरूपः सत्यः सन् किं नात्मानं प्रपद्यसे इत्यादावित्यर्थः ॥ २४ ॥

कूटस्थातिरिक्तचिदाभासोऽपि तैर्वर्णित इत्याह आत्माभासेति । आत्मा च आत्माभासश्च आश्रयश्च आत्माभासाश्रयाः इति द्वन्द्वसमासः । मुखाभासाश्रया इत्यत्रापि तथा मुखं प्रतिबिम्बाभासो मुखप्रतिबिम्बाश्रयो दर्पणादिश्चेति त्रयं यथा प्रत्यक्षेणावगम्यते एवमात्मा कूटस्थ

बुद्ध्यवच्छिन्नकूटस्थो लोकान्तरगमागमौ ।
कर्तुं शक्तो घटाकाश इवाभासेन किं वद ॥ २६ ॥
शृण्वसङ्गः परिच्छेदमात्राज्जीवो भवेन्न हि ।
अन्यथा घटकुड्याद्यैरवच्छिन्नस्य जीवता ॥ २७ ॥
न कुड्यसदृशी बुद्धिः स्वच्छत्वादिति चेत् तथा ।
अस्तु नाम परिच्छेदे किं स्वाच्छ्येन भवेत् तव ॥ २८ ॥
प्रस्थेन दारुजन्येन कांस्यजन्येन वा न हि ।
मिमेतुस्तण्डुलादीनां परिमाणं विशिष्यते ॥ २९ ॥

आभासश्चिदाभास आश्रयोऽन्तःकरणादिरिति तयोरपि शास्त्रयुक्तिभ्यामगम्यत्वे इत्यर्थः । अत्र च आभासशब्देन कूटस्थातिरिक्तचिदाभासो वर्ण्यत इति भावः मनसः साक्षी बुद्धेश्च साक्षीति बुद्धिसाक्षिणः प्रतिपादकं शास्त्रं रूपं रूपं प्रतिरूपो बभूव इति चिदाभासप्रतिपादकं, विकारित्वाविकारित्वादिरूपा युक्तिः पूर्वमेवोक्तेति भावः ॥ २५ ॥

तत्र चिदाभासमाक्षिपति बुद्ध्यवच्छिन्नेति । स्वस्मिन् कल्प्यमानया बुद्ध्यावच्छिन्नः कूटस्थ एव घटद्वारा घटाकाश इव बुद्धिद्वारा लोकान्तरे गमनागमने कर्तुं शक्नोति अतश्चिदाभासकल्पनायां गौरवमिति भावः ॥ २६ ॥

असङ्गस्य कूटस्थस्य बुद्ध्यवच्छेदमात्रेण जीवत्वं न घटतेऽन्यथातिप्रसङ्गादिति परिहरति शृण्वसङ्ग इति ॥ २७ ॥

बुद्धिकुड्ययोः स्वाच्छ्यास्वाच्छ्याभ्यां वैषम्यं शङ्कते न कुड्यसदृशीति । उक्तं स्वाच्छ्यं परिच्छेदप्रयोजकं न भवतीत्याह तथेति ॥ २८ ॥

उक्तमर्थं दृष्टान्तेन स्पष्टयति प्रस्थेनेति । दारुकांस्यजन्ययोः प्रस्थयोः स्थितेऽपि स्वाच्छ्यास्वाच्छ्ये तण्डुलपरिमाणे न्यूनाधिकभावश्च न भवत इत्यर्थः ॥ २९ ॥

परिमाणाविशेषेऽपि प्रतिबिम्बो विशिष्यते ।
कांस्ये यदि तदा बुद्धावप्याभासो भवेद् बलात् ॥ १० ॥
ईषद्भासनमाभासः प्रतिबिम्बस्तथाविधः ।
बिम्बलक्षणहीनः सन् बिम्बवद् भासते स हि ॥ ११ ॥
ससङ्गत्वविकाराभ्यां बिम्बलक्षणहीनता ।
स्फूर्त्तिरूपत्वमेतस्य बिम्बवद् भासनं विदुः ॥ १२ ॥
न हि धीभावभावित्वादाभासोऽस्ति धियः पृथक् ।
इति चेदल्पमेवोक्तं धीरप्येवं स्वदेहतः ॥ १३ ॥

कांस्यमध्ये तद्गतमुखपरिमाणाधिक्याभावेऽपि प्रतिबिम्बलक्षणमाधिक्यमस्तीत्याशङ्क्य तर्हि बुद्धावपि चिदाभासो भवत्वेवाङ्गीकृतः स्यादित्याह परिमाणाविशेषेऽपीति ॥ १० ॥

प्रतिबिम्बाङ्गीकारे चिदाभासः कथमङ्गीकृत इत्याशङ्क्य प्रतिबिम्बाभासशब्दाभ्यामभिधेयस्यार्थस्यैक्यादित्याह ईषद्भासनमाभास इति । प्रतिबिम्बस्याभासत्वं कथमित्याशङ्क्याभासलक्षणयोगादित्याह बिम्बलक्षणहीन इति । हि यस्मात् कारणात् प्रतिबिम्बो बिम्बलक्षणरहितोऽपि बिम्बवदवभासते अतो बिम्बाभास इति भाव ॥ ११ ॥

आभासलक्षणयोजनमेव दर्शयति ससङ्गत्वविकाराभ्यामिति । यतश्चिदाभासस्य ससङ्गत्वविकारित्वाभ्यां बिम्बभूतासङ्गाविकारिचैतन्यलक्षणहीनत्वं स्फुरणरूपत्वं बिम्बवदवभासमानत्वमित्यर्थः, चैतन्यलक्षणरहितो चैतन्यवदवभासमानो चैत्याभास इतिवत् ॥ १२ ॥

एवं चिदाभासस्यापरोक्षत्वं निरूप्य इदानीं तस्य बुद्धेः पृथक् सत्त्वं बाधयितुं पूर्वपक्षमाह न हीति । यथा मृदं घटत्वेन भवन् घटो न मृदो भिद्यते तद्वदिति भावः । नन्वेवं तर्हि

देहे मृतेऽपि बुद्धिश्चेच्छास्त्रादस्ति तथा सति ।
बुद्धेरन्यश्चिदाभासः प्रवेशश्रुतिषु श्रुतः ॥ २४ ॥
धीयुक्तस्य प्रवेशश्चेन्नैतरेये धियः पृथक् ।
आत्मा प्रवेशं सङ्कल्प्य प्रविष्ट इति गीयते ॥ २५ ॥
कथं न्विदं साक्षदेहं मदृते स्यादितीरणात् ।
विदार्य मूर्ध्नः सीमानं प्रविष्टः संसरत्ययम् ॥ २६ ॥
कथं प्रविष्टोऽसङ्गश्चेत् सृष्टिर्वास्य कथं वद ।
मायिकत्वं तयोस्तुल्यं विनाशश्च समस्तयोः ॥ २७ ॥

देहातिरिक्ता धीरपि न सिध्येदिति प्रतिबन्द्या परिहरति शास्त्रमेवोक्त-मिति ॥ २३ ॥

प्रतिबन्दीमेवाह देहे मृतेऽपीति । देहव्यतिरिक्ताया बुद्धेः बहिर्गमनो भवतीत्यादिशास्त्रात् तथासिद्धत्वात् सत्त्वमिति भावः । ननु श्रुति-बलात् देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत् तर्हि प्रवेशश्रुतिबलात् बुद्ध्य-तिरिक्तचिदाभासोऽभ्युपेय इत्याह तथा सतीति ॥ २४ ॥

ननु बुद्ध्युपाधिकस्यैव प्रवेशो युज्यते नेतरस्येति शङ्कते धीयुक्तस्य प्रवेशश्चेदिति । ऐतरेयश्रुतौ बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणात् नैवमिति परिहरति नैतरेय इति ॥ २५ ॥

श्रुतिमर्थतः पठति कथं न्विदमिति । अयं परमात्मा साक्षदेहस्य स्रष्टापि च देहाद्यवकाशे: यत्र वर्तते इति साक्षदेहमिदं जडजातं मदृते चेतनं मां विहाय कथं नु स्यात् कथमपि निश्चेष्टमिति विचार्य मूर्ध्नः सीमानं कपालत्रयमध्यदेशं विदार्य स्वसन्निधिमात्रेण भित्त्वा प्रविष्टः सन् संसरति जाग्रदादिकमनुभवतीत्यर्थः ॥ २६ ॥

ननु असङ्गस्यात्मनः प्रवेशो न युक्त इति शङ्कते कथं प्रविष्ट इति । इदं चोद्यं सृष्टावपि समानमित्याह सृष्टिर्वेति । सृष्टिवन्मायिक-

समुत्थायैव भूतेभ्यस्तान्येवानुविनश्यति ।
विस्पष्टमिति मैत्रेय्यै याज्ञवल्क्य उवाच हि ॥ ३८ ॥
अविनाश्ययमात्मेति कूटस्थः प्रविवेचितः ।
मात्रासंसर्ग इत्येवमसङ्गत्वस्य कीर्त्तनात् ॥ ३८ ॥
जीवापेतं वाव किल शरीरं म्रियते न सः ।
इत्यत्र न विमोक्षोऽर्थः किन्तु लोकान्तरे गतिः ॥ ४० ॥

स्यात् न दोष इत्याशङ्क्यायं परिहारः प्रवेशस्यापि समान इत्याह मायि-कत्वमिति । अनयोर्मायिकत्वे हेतुश्च सम इत्याह विनाशश्च समस्तयो-रिति ॥ १७ ॥

प्रज्ञानघन एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति औपाधिकरूपविनाशप्रतिपादिकां श्रुतिं दर्शयति समुत्था-येति । एष प्रज्ञानघन आत्मा एतेभ्यो देहेन्द्रियादिरूपेभ्यः पञ्चभूत-कार्येभ्यो निमित्तभूतेभ्य उपाधिभ्यः समुत्थाय जीवत्वाभिमानं प्राप्य तान्येव देहादीनि विनश्यन्ति अनुविनश्यति तेषु विनश्यत्सु तद्गतं जीवत्वाभिमानं जहाति एवं प्रकारेण सोपाधिकरूपस्य विनाशित्वं याज्ञवल्क्यो मैत्रेय्यै उक्तवानित्यर्थः ॥ १८ ॥

अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा इति श्रुत्या कूटस्थ-स्ततो विभिन्नः प्रदर्शित इत्याह अविनाश्ययमात्मेति । मात्रासंसर्गस्त्वस्य भवतीति श्रुत्या अविनाशित्वे हेतुमसङ्गत्वमुक्तवानित्याह मात्रेति । मीयन्त इति मात्रा देहादयस्तैरस्यात्मनोऽसंसर्गो भवतीत्यर्थः ॥ १९ ॥

ननु जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते इति श्रुत्याप्यौ-पाधिकस्याप्यविनाशित्वं प्रतिपादितम् इत्याशङ्क्य तस्याः श्रुतेर्देहान्तर-प्राप्तिविषयतया नात्यन्तिकनाशाभावपरत्वमित्याह जीवापेतमिति । जीवापेतं जीवरहितं जीवेन त्यक्तमिति यावत् वाव एव स जीवो न म्रियते इत्यर्थः ॥ ४० ॥

नाहं ब्रह्मेति बुध्येत स विनाशीति चेन्न तत्।
सामानाधिकरण्यस्य बाधायामपि सम्भवात् ॥ ४१ ॥
योऽयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव।
ब्रह्मास्मीति धिया शेषा ह्यहं बुद्धिर्निवर्त्तते ॥ ४२ ॥
नैष्कर्म्यसिद्धावप्येवमाचार्य्यैः स्पष्टमीरितम्।
सामानाधिकरण्यस्य बाधार्थत्वं ततोऽस्तु तत् ॥ ४३ ॥
सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत्।
अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ॥ ४४ ॥

ननु जीवस्य विनाशित्वेऽहं ब्रह्मास्मीत्यविनाशिब्रह्मतादात्म्यज्ञानं न घटत इत्याह नाहं ब्रह्मेतीति। विनाशी स जीवोऽहं ब्रह्मेति ब्रह्मरूपेणात्मानं न बुध्येत न जानीयात् विनाश्यविनाशिनोरैक्यविरोधादिति चेत् मुख्यसामानाधिकरण्याभावेऽपि बाधायां सामानाधिकरण्यसम्भवात् जीवभावबाधेन ब्रह्मभावोऽवगन्तुं शक्यते इत्याह न तदिति ॥ ४१ ॥

बाधायां सामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्त्तिककारैः सदृष्टान्तो निरूपित इतीममर्थं तद्वाक्योदाहरणपूर्वकं दर्शयति योऽयं स्थाणुरिति। अयं स्थाणुरेव पुमान् इत्यस्मिन् वाक्ये पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्यथा निवर्त्तते एवमहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्त्ताहमस्मीति एवमादिरूपा सर्वा निवर्त्त्या स्यात् इति ॥ ४२ ॥

नैष्कर्म्येति। एवमुक्तेन प्रकारेणाचार्य्यैर्वार्त्तिककारैर्नैष्कर्म्यसिद्धौ सामानाधिकरण्यस्य बाधार्थत्वं स्पष्टमीरितमिति। फलितमाह ततोऽस्तु तदिति। ततः कारणात् ब्रह्माहमस्मीति वाक्ये तत्सामानाधिकरण्यस्य बाधार्थत्वमस्त्वित्यर्थः ॥ ४२ ॥

नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्यं न क्वापि दृष्ट-

सामानाधिकरण्यस्य बाधार्थत्वं निराकृतम् ।
प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ॥ ४५ ॥
शोधितस्त्वम्पदार्थो यः कूटस्थो ब्रह्मरूपताम् ।
तस्य वक्तुं विवरणे तथोक्तमितरत्र च ॥ ४६ ॥
देहेन्द्रियादियुक्तस्य जीवाभासभ्रमस्य या ।
अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ॥ ४७ ॥
जगद्भ्रमस्य सर्वस्य यदधिष्ठानमीरितम् ।
त्रय्यन्तेषु तदत्र स्यात् ब्रह्मशब्दविवक्षितम् ॥ ४८ ॥

मित्याशङ्क्य सर्वं ह्येतद्‌ ब्रह्म इत्यत्र बाधायां सामानाधिकरण्यं स्पष्टमतोऽत्रापि तद्भविष्यति इत्याह सर्वं ब्रह्मेतीति ॥ ४४ ॥

ननु तर्हि विवरणाचार्यैर्बाधायां सामानाधिकरण्यं कुतो निराकृतमित्याशङ्क्य तैस्त्वंशब्देन कूटस्थस्य विवक्षितत्वादित्याह सामानाधिकरण्यस्येति ॥ ४५ ॥

कूटस्थत्वविवक्षयेत्युक्तमर्थं विवृणोति शोधितस्त्वमिति । शोधितः बुद्ध्यादिभ्यो विवेचितस्त्वंपदलक्ष्यो यः कूटस्थः वक्ष्यमाणलक्षणलक्षितस्य ब्रह्मस्वरूपतां कूटस्थलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधायां सामानाधिकरण्यनिराकरणपूर्वकं मुख्यसामानाधिकरण्यमुक्तमित्यर्थः ॥ ४६ ॥

इदानीं कूटस्थस्य ब्रह्मणैक्यं प्रतिपादयितुं कूटस्थशब्देन विवक्षितमर्थमाह देहेन्द्रियादियुक्तस्येति । आदिशब्देन मनआदयो गृह्यन्ते । तस्य देहेन्द्रियादियुक्तस्य शरीरद्वयपरिच्छिन्नस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य या अधिष्ठानचितिः यदधिष्ठानचैतन्यमस्ति तदत्र वेदान्तेषु कूटस्थत्वेन विवक्षितमित्यर्थः ॥ ४७ ॥

ब्रह्मशब्दस्य चार्थमाह जगद्भ्रमस्येति । जगद्रूपभ्रमस्याधि-

एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा ।
तदा तदेकदेशस्य जीवाभासस्य का कथा ॥ ४९ ॥
जगत्तदेकदेशाख्यसमारोप्यस्य भेदतः ।
तत्त्वम्पदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः ॥ ५० ॥
कर्तृत्वादीन् बुद्धिधर्मान् स्फूर्त्याख्यां चात्मरूपताम् ।
दधद् विभाति पुरत आभासोऽतो भ्रमो भवेत् ॥ ५१ ॥
का बुद्धिः कोऽयमाभासः को वात्मा जगत् कथम् ।
इत्यनिर्णयतो मोहः सोऽयं संसार इष्यते ॥ ५२ ॥

ज्ञान यच्चैतन्यं वेदान्तेषु निरूपितं तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः ॥ ४८ ॥

ननु जीवभ्रमाधिष्ठानचैतन्यं कूटस्थ इत्युक्तमनुपपन्नं जीवस्यारोपितत्वासिद्धेरित्याशङ्क्यास्यारोपितत्वं कैमुतिकन्यायेन साधयति एतस्मिन्नेवेति । जगदेकदेशत्वञ्च अनेन जीवेनात्मनानुप्रविश्य इत्यादिश्रुतिसिद्धम ॥ ४९ ॥

ननु जगदधिष्ठानचैतन्यस्यैकत्वात् तत्त्वंपदार्थभेदाभावे तत्त्वंपदार्थयोः पौनरुक्त्यमित्याशङ्क्य तयोरौपाधिकभेदो वास्तवमैक्यमित्याह जगत्तदेकदेशाख्येति । जगदिति तदेकदेश इति च आख्या यस्य समारोप्यस्य तत् तथा जातावेकवचनम् ॥ ५० ॥

ननु चिदाभासस्य शुक्तिकारजतवदधिष्ठानारोप्योभयधर्मवत्त्वानुपलम्भात् कथमारोपितत्वमित्याशङ्क्याह कर्तृत्वादीनिति । बुद्ध्युपाधिद्वारा समारोप्यमाणान् कर्तृत्वभोक्तृत्वप्रमातृत्वादीन् स्फुरणलक्षणमात्मरूपत्वञ्च दधत् पुरतो भाति स्पष्टं प्रतिभासते अत आभासः कल्पित इत्यर्थः ॥ ५१ ॥

अस्तु भ्रमस्य किं कार्यमित्याकाङ्क्षायां बुद्ध्यादिस्वरूपापरिज्ञान-

बुद्ध्यादीनां स्वरूपं यो विविनक्ति स तत्त्ववित् ।
स एव मुक्त इत्येवं वेदान्तेषु विनिश्चयः ॥ ५२ ॥
एवञ्च सति बन्धः स्यात् कस्येत्यादिकुतर्कजाः ।
विडम्बनादृढं खण्ड्याः खण्डनोक्तिप्रकारतः ॥ ५४ ॥
वृत्तेः साक्षितया वृत्तेः प्रागभावस्य च स्थितः ।
बुभुत्सायां तथाज्ञोऽस्मीत्याभासाज्ञानवस्तुनः ।
असत्यालम्बनत्वेन सत्यः सर्वजडस्य तु ।
साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ।
आनन्दरूपः सर्वार्थसाधकत्वेन हेतुना ।
सर्वसम्बन्धवत्त्वेन सम्पूर्णः शिवसंज्ञितः ॥५५॥५६॥५७॥

मेवेत्याह का मुक्तिरिति । तस्य अनर्थहेतुतामाह सोऽयं संसार इष्यत इति ॥ ५१ ॥

ननु किं निवर्त्तकमित्याकाङ्क्षायां बुद्ध्यादीनां स्वरूपविवेक एव निवर्त्तक इत्यभिप्रेत्य तद्वानेव ज्ञानी तत एव चानर्थनिवृत्तिरित्याह बुद्ध्यादीनामिति ॥ ५२ ॥

एवं बन्धमोक्षयोरविवेकविवेकमूलत्वे सति अद्वैतवादे कस्य बन्धः कस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कजाः परिहासविशेषाः खण्डनोक्तयुक्तिभिस्तेषां निःसारत्वापादनेन परिहर्त्तव्या इत्याह एवञ्च सति बन्धः स्यादिति ॥ ५४ ॥

एवं श्रुतियुक्तिभ्यां कूटस्थं बुद्ध्यादिभ्यो विविच्य दर्शयित्वा पुराणेष्वपि तद्विवेकः कृत इत्याह वृत्तेः साक्षितयेत्यादिना श्लोकत्रयेण । वृत्त्युत्पत्तौ सत्यां तत्साक्षित्वेन, वृत्त्युदयात् पूर्वं तत्प्रागभावसाक्षित्वेन जिज्ञासायां सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञोऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन च स्थित एव तिष्ठति स च कूटस्थः असत्स्वाव-

इति शैवपुराणेषु कूटस्थः प्रविवेचितः ।
जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ॥ ५८ ॥
मायाभासेन जीवेशौ करोतीति श्रुतत्वतः ।
मायिकावेव जीवेशौ स्वच्छौ तौ काचकुम्भवत् ॥ ५९ ॥

स्वगतत्वेनाधिष्ठानत्वेन सत्यः सर्वस्य जडस्य साधकत्वेनावभासकत्वात् चिद्रूपः सर्वदा प्रेमविषयत्वादानन्दरूपः सर्वार्थावभासकत्वेन सर्वसम्बन्धित्वात् संपूर्ण इत्युच्यते अत्र चेदमभिप्रेतं विमतः शिवो इन्द्रादिभ्यो भिद्यते इन्द्रादिसाक्षित्वात् यद्यद् इन्द्रादिभ्यो न भिद्यते तत् तदिन्द्रादिसाक्षि न भवति यथा इन्द्रादिः विमतः सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वात् असन्दिग्धरजताधिष्ठानशुक्तिवत् विमतश्चिद्रूपः जडमात्रावभासकत्वात् यत् चिद्रूपं न भवति तत् सर्वं जडावभासकमपि न भवति यथा घटादिः विमतः परमानन्दरूपः परप्रेमास्पदत्वात् यत् परमानन्दरूपं न भवति तत् परप्रेमास्पदमपि न भवति यथा घटादिः विमतः परिपूर्णः सर्वसम्बन्धित्वात् गगनवत् सर्वसम्बन्धित्वञ्च सर्वार्थसाधकत्वेन, विमतः सर्वसम्बन्धवान् सर्वावभासकत्वात् यः सर्वसम्बन्धवान् न भवति स सर्वावभासको न भवति यथा दीपादिरिति ॥ ५५ ॥ ५६ ॥ ५७ ॥

उदाहृतपुराणवाक्यस्य तात्पर्यमाह इति शैवपुराणेष्विति । इत्येवं प्रकारेण सूतसंहितादिपुराणेषु जीवेश्वरत्वादिकल्पनारहितः केवलोऽद्वितीयः स्वप्रकाशरूपचैतन्यस्वरूपः शिवः कूटस्थो विवेचित इत्यन्वयः ॥ ५८ ॥

जीवेश्वरत्वादिरहितत्वं कुत इत्याशङ्क्य श्रुत्या तयोर्मायिकत्वप्रदर्शनादित्याह मायाभासेनेति । जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिः मायाविद्याधीनयोर्जीवेशाभासयोर्मायिकत्वं प्रतिपादयतीति भावः । मायिकत्वे तयोर्देहादिभ्यो वैलक्षण्यं न स्यादित्याशङ्क्य पार्थिवत्वाविशेषेऽपि काचकुम्भस्य घटा-

अन्नजन्यं मनोदेहात् स्वच्छं यद्वत् तथैव तौ ।
मायिकावपि सर्वस्मादन्यस्मात् स्वच्छतां गतौ ॥ ६० ॥
चिद्रूपत्वञ्च सम्भाव्यं चित्त्वेनैव प्रकाशनात् ।
सर्वकल्पनशक्ताया मायाया दुष्करं न हि ॥ ६१ ॥
अस्मन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् ।
महामाया सृजत्येतावित्याश्चर्यं किमत्र ते ॥ ६२ ॥
सर्वज्ञत्वादिकञ्चेशे कल्पयित्वा प्रदर्शयेत् ।
धर्मिणं कल्पयेद् यास्याः को भारो धर्मकल्पने ॥ ६३ ॥
कूटस्थेऽप्यतिशङ्का स्यादिति चेन्मातिशङ्क्यताम् ।
कूटस्थमायिकत्वे तु प्रमाणं न हि वर्त्तते ॥ ६४ ॥

दिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह स्वच्छौ तौ काचकुम्भव-दिति ॥ ५९ ॥

ननु घटकाचकुम्भारम्भकयोर्मृद्विशेषयोर्भेदात् तद्वैलक्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वात् तयोर्जगतो वैलक्षण्यमनुचित-मित्याशङ्क्य अन्नजन्ययोर्देहमनसोर्यथा वैलक्षण्यं तद्वदत्र च द्रष्ट-व्यमिति ॥ ६० ॥

भवतु काचादिवत् स्वच्छत्वं चित्त्वं कुत इत्याशङ्क्यानुभवादित्याह चिद्रूपत्वञ्चेति । चित्त्वेन प्रकाशनमपि मायिकयोरनुपपन्नमित्याशङ्क्य मायाया दुर्घटकारित्वाद्दुष्परिहारमित्याह सर्वकल्पनेति ॥ ६१ ॥

उक्तमर्थं कैमुतिकन्यायेन दृढयति अस्मन्निद्रेति ॥ ६२ ॥

ईश्वरस्यापि मायिकत्वे तस्य जीववदसर्वज्ञत्वादिकं स्यादित्याशङ्क्य सर्वज्ञत्वादिकमपि मायैव कल्पयतीत्याह सर्वज्ञत्वादिकमिति । तत्रोप-पत्तिमाह धर्मिणमिति ॥ ६३ ॥

ननु जीवेश्वरयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येत इति शङ्कते

वस्तुत्वं घोषयन्त्यस्य वेदान्ताः सकला अपि ।
सपत्नरूपं वस्त्वन्यन्न सहन्तेऽत्र किञ्चन ॥ ६५ ॥
श्रुत्यर्थं विशदीकुर्मो न तर्कान् वच्मि किञ्चन ।
तेन तार्किकशङ्कानामत्र कोऽवसरो वद ॥ ६६ ॥
तस्मात् कुतर्कं सन्त्यज्य मुमुक्षुः श्रुतिमाश्रयेत् ।
श्रुतौ तु मायाजीवेशौ करोतीति प्रदर्शितम् ॥ ६७ ॥
ईक्षणादिप्रवेशान्ता सृष्टिरीशकृता भवेत् ।
जाग्रदादिविमोक्षान्तः संसारो जीवकर्तृकः ॥ ६८ ॥
असङ्ग एव कूटस्थः सर्वदा नास्य कश्चन ।
भवत्यतिशयस्तेन मनस्येवं विचार्य्यताम् ॥ ६९ ॥

कूटस्थेऽप्यतिशङ्का स्यादिति । प्रमाणाभावान्नैवमिति परिहरति नेति ॥ ६४ ॥

कूटस्थस्य वास्तवत्वेऽपि प्रमाणं नोपलभ्यत इत्याशङ्क्य श्रुतयः सर्वा अपि प्रमाणम् इत्याह वस्तुत्वं घोषयन्त्यस्येति । अत्र कूटस्थस्य पारमार्थिकत्वे प्रतियोगिभूतमन्यद् वस्तु किञ्चन न सहन्त इत्यर्थः ॥ ६५ ॥

ननु कूटस्थस्य जीवेश्वरयोश्च वास्तवत्वावास्तवत्वसाधने श्रुतय एव सहन्ते न तर्काः किञ्चिदपि साधयन्त इत्याशङ्क्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वात् न तर्कोपन्यास इत्याह श्रुत्यर्थं विशदीकुर्म इति ॥ ६६ ॥

ततः किमित्यत आह तस्मात् कुतर्कं सन्त्यज्येति । मुमुक्षुणा श्रुत्यर्थः कीदृशोऽनुसन्धेय इत्याह श्रुताविति ॥ ६७ ॥

ईक्षणादीति ॥ ६८ ॥

असङ्ग इति श्रुतिस्तु जीवेशयोर्मायिकत्वमीक्षणादिप्रवेशान्तायाः सृष्टेरीश्वरकर्तृत्वं जाग्रदाद्युत्पत्तिबन्धमोक्षपर्यन्तस्य संसारस्य जीव-

न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ७० ॥
अवाङ्मनसगम्यन्तं श्रुतिर्बोधयितुं सदा ।
जीवमीशं जगद्वापि समाश्रित्यावबोधयेत् ॥ ७१ ॥
यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वीत्याचार्यभाषितम् ॥७२॥
श्रुतितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः ।
विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानन्दवारिधौ ॥ ७३ ॥
मायामेघो जगन्नीरं वर्षत्वेष यथा तथा ।

कर्तृत्वं कूटस्थस्यासङ्गत्वादिकं श्रुति जन्मादिलक्षणस्य व्यवहारजात-स्यासत्त्वञ्च प्रतिपादितम् अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभि-प्रायः ॥ ६८ ॥

कूटस्थस्य जन्माद्युत्पत्तिमयाभावः कुतोऽवगम्यते इत्याशङ्क्य श्रुतिवा-क्यादित्यभिप्रेत्य तद्वाक्यं पठति न निरोधो न चोत्पत्तिरिति ॥ ७० ॥

ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थ-मित्याशङ्क्य अवाङ्मनसगोचरस्यात्मनोऽवबोधनार्थमित्याह अवाङ्मनसग-म्यमिति ॥ ७१ ॥

ननु तत्त्वस्यैकरूपस्य श्रुतिबोध्यत्वे श्रुतिषु विगानं कुतो दृश्यते इत्याशङ्क्य न तत्त्वे विगानमस्ति अपि तु तद्बोधनप्रकारे तदपि बोध्य-पुरुषचित्तवैचित्र्यानुसारेण सुरेश्वराचार्यैरुक्तमित्याह यया ययेति ॥ ७२ ॥

श्रुत्यर्थस्यैकरूपत्वे तत्प्रतिपादकानामेव कुतो विप्रतिपत्तिरित्याशङ्क्य श्रुतितात्पर्यबोधशून्यानामेव विप्रतिपत्तिर्न तु तद्विदामित्याह श्रुति-तात्पर्यमिति ॥ ७३ ॥

चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥७४॥
इमं कूटस्थदीपं योऽनुसन्धत्ते निरन्तरम् ।
स्वयं कूटस्थरूपेण दीप्यतेऽसौ निरन्तरम् ॥ ७५ ॥

इति कूटस्थदीपः समाप्तः ।

नवमपरिच्छेदः ।

ध्यानदीपः ।

संवादिभ्रमवद् ब्रह्मतत्त्वोपास्त्यापि मुच्यते ।
उत्तरे तापनीयेऽतः श्रुतोपास्तिरनेकधा ॥ १ ॥

तर्हि विवेकिनो निश्चयः कीदृश इत्याकाङ्क्षायामाह मायामेघो जगन्नीरमिति ॥ ७४ ॥

ग्रन्थाभ्यासफलमाह इमं कूटस्थदीपमिति ॥ ७५ ॥

इति कूटस्थदीपव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया ॥

इह तावद् वेदान्तशास्त्रे नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नस्य सम्यक् श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकमहावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं तत्र श्रुतोपनिषदः कस्यापि बुद्धिमान्द्यादिना केनचित् प्रतिबन्धेन वाक्यविचारापरोक्षज्ञानानुत्पत्तौ सत्यां तदुत्पादनार्थं मोक्षफलकोपा-

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेऽपि विशेषोऽर्थक्रियां प्रति ॥ २ ॥
दीपोऽपवरकस्यान्तर्वर्त्तते तत्प्रभा बहिः ।
दृश्यते द्वार्यथान्यत्र तद्वत् दृष्टा मणेः प्रभा ॥ ३ ॥
दूरे प्रभाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः ।
प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ॥ ४ ॥

...नादि द्विदर्शिपुराणादौ तावत् सदृष्टान्तं ब्रह्मतत्त्वोपासनयाप्यभिलषित ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिजानीते संवादीति । यथा स्व-ादृष्टमेण प्रवृत्तस्याभिप्रेतार्थलाभो भवति एवं ब्रह्मतत्त्वोपासनयाप्यभिलषिता ब्रह्मभावलक्षणो मोक्षो भवति इत्यर्थः । नन्व किं प्रमाणमित्यत आह उत्तरे तापनीय इति । यतः उपासनयापि मोक्षोऽभि-धातस्तापनीयोपनिषदाद्यनेकप्रकारेण ब्रह्मतत्त्वोपासना श्रुता उक्तेत्यर्थः ॥१॥

संवादिभ्रमपदेनोक्तं दृष्टान्तं प्रपञ्चयितुं संवादिभ्रमप्रतिपादकं वार्तिकं पठति मणिप्रदीपप्रभयोरिति । मणिश्च प्रदीपश्च मणिप्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः । मणिप्रभायां प्रदीपप्रभायाञ्च या मणिबुद्धिः सा मिथ्याज्ञानमेव अतस्मिन् तद्बुद्धित्वात् तथापि मणिप्रभायां मणिबुद्ध्याभिधावत पुरुषस्य मणिलाभो भवति इतरस्य तु स नास्तीत्यर्थक्रियायां वैषम्यमस्ति इत्यर्थः ॥ २ ॥

वार्तिकं व्याचष्टे दीपोऽपवरकस्यान्तर्वर्तते तत्प्रभा बहिरित्यादिना श्लोकद्वयेन । दीपोऽपवरकस्यान्तरिति कस्मिंश्चित् मन्दिरेऽपवर-कस्यान्तर्दीपस्तिष्ठति तस्य प्रभा बहिर्द्वारि प्रदेशे रत्नमिव वर्तुलोप-लभ्यते तथाऽन्यस्मिन् मन्दिरेऽपवरकस्यान्तःस्थितस्य रत्नस्य प्रभा बहि-र्द्वारि प्रदेशे दीपप्रभेव दृश्यमानोपलभ्यते ॥ ३ ॥

दूरे प्रभाद्वयमिति । तथाविधं प्रभाद्वयं दूरतो द्वाऽऽदं मणिरय

न लभ्यते मणिर्दीपप्रभां प्रत्यभिधावता।
प्रभायां धावताऽवश्यं लभ्येतैव मणिर्मणेः॥ ५ ॥
दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमः स्मृतः।
मणिप्रभामणिभ्रान्तिः संवादिभ्रम उच्यते॥ ६ ॥
बाष्पं धूमतया बुद्ध्वा तत्राङ्गारानुमानतः।
वह्निर्यदृच्छया लब्धः स संवादिभ्रमो मतः॥ ७ ॥
गोदावर्युदकं गङ्गोदकं मत्वा विशुद्धये।
संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः॥ ८ ॥

मणिरिति बुद्ध्वा द्वौ पुरुषावभिधावन्तं कुरुतस्तयोर्द्वयोरपि प्रभाविषये [illegible]यमानं मणिज्ञानं भ्रान्तमेव ॥ ४ ॥

न लभ्यत इति। तथापि दीपप्रभायां मणिबुद्धिं कृत्वा धावता पुरुषेण मणिर्न लभ्यते मणिप्रभायां मणिबुद्ध्या धावता तु मणिर्लभ्येतैव ॥ ५ ॥

भवत्वेवं वार्त्तिकार्थः प्रकृते किमायातमित्यत आह दीपप्रभेति। या दीपप्रभायां मणिभ्रान्तिरस्ति स विसंवादिभ्रम इति स्मृतो विद्वद्भिः मणिलाभलक्षणार्थक्रियारहितत्वात्। मणिप्रभायां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियावत्त्वात् संवादिभ्रम इत्युच्यते इत्यर्थः ॥ ६ ॥

एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वा अनुमानविषयेऽपि तं दर्शयति बाष्पं धूमतयेति। क्वचित् प्रदेशे स्थितं बाष्पं धूमत्वेन निश्चित्य तस्मात्प्रदेशेऽयं प्रदेशोऽग्निमान् धूमवत्त्वादित्यनुमाय प्रवृत्तेन पुरुषेण दैवगत्या यद्यपि अग्निस्तत्रोपलभ्यते तदा बाष्पविषयं धूमज्ञानं संवादिभ्रमो मतः ॥ ७ ॥

आगमविषयेऽपि तं दर्शयति गोदावर्युदकमिति। गोदावर्युदक-

ज्वरेणाप्तः सन्निपातं भ्रान्त्या नारायणं स्मरन् ।
मृतः स्वर्गमवाप्नोति स संवादिभ्रमो मतः ॥ ९ ॥
प्रत्यक्षस्यानुमानस्य तथा शास्त्रस्य गोचरे ।
उक्तन्यायेन संवादिभ्रमाः सन्तीह कोटिशः ॥ १० ॥
अन्यथा मृत्तिकादारुशिलाः स्युर्देवताः कथम् ।
अग्नित्वादिधियोपास्याः कथं वा योषिदादयः ॥ ११ ॥

यद्यपि विशुद्धिहेतुत्वमागमसिद्धम् अतस्तत्प्रोक्षणादपि शुद्धिरस्तु तथापि गोदावर्युदके या गङ्गोदकबुद्धिः सा भ्रान्तिरेव ॥ ८ ॥

उदाहरणान्तरमाह ज्वरेणाप्त इति । ज्वरेण सन्निपातं प्राप्तः पुरुष इदं नारायणस्मरणं मम स्वर्गसाधनमिति ज्ञानमन्तरेणापि सन्निपातप्रयुक्तभ्रमवशात् साधारणपुरुषतया चैत्रादिवन्नारायणं स्मरन्मृतः स्वर्गं प्राप्नोत्येव हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः विक्रुश्य पुत्रमघवान् यदजामिलोऽपि नारायणेति म्रियमाण इयाय मुक्तिमित्यादिपुराणवचनेभ्यः । अत्रापि नारायणनाम्नः पुत्रनामत्वज्ञानं भ्रम एव ॥ ९ ॥

एवं त्रिविधसंवादिभ्रमोदाहरणेन सिद्धमर्थमाह प्रत्यक्षस्यानुमानस्येति ॥ १० ॥

विपक्षे बाधकदर्शनेन उक्तमर्थं द्रढयति अन्यथेति । अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन पूज्या न भवेयुः स्वतो देवतात्वाभावादित्यर्थः । बाधकान्तरमाह अग्नित्वादीति । पञ्चाग्निविद्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौतमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्निः असौ वाव लोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोकावाप्तिफलकं न भवेदित्यर्थः । आदिशब्देन मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेशादयो गृह्यन्ते ॥ ११ ॥

अयथावस्तुविज्ञानात् फलं लभ्यत ईप्सितम् ।
काकतालीयतः सोऽयं संवादिभ्रम उच्यते ॥ १२ ॥
स्वयं भ्रमोऽपि संवादी यथा सम्यक्फलप्रदः ।
ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदा ॥ १३ ॥
वेदान्तेभ्यो ब्रह्मतत्त्वमखण्डैकरसात्मकम् ।
परोक्षमवगम्यैतदहमस्मीत्युपासते ॥ १४ ॥
प्रत्यग्व्यक्तिमनुल्लिख्य शास्त्राद्विष्ण्वादिमूर्त्तिवत् ।
अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधीः ॥ १५ ॥

इदानीं बहुभिर्दृष्टान्तैरुपपादितं संवादिभ्रमं बुद्धिसौकर्याय संक्षिप्य दर्शयति अयथावस्तुविज्ञानादिति । विचिन्तितादविचिन्तिताद्वा यस्मादयथावस्तुविज्ञानाद् विपरीतज्ञानादीप्सितम् अभिलषितं फलं काकतालीयतः दैवगत्या लभ्यते सोऽयं संवादिभ्रम इत्यर्थः ॥ १२ ॥

ननु ब्रह्मोपासनस्यायथावस्तुविषयकस्य कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदात्वमित्याशङ्क्य संवादिभ्रमवदेवेत्याह स्वयं भ्रमोऽपीति ॥ १३ ॥

ननु ब्रह्मतत्त्वं ज्ञात्वोपासनं क्रियते अज्ञात्वा वा । आद्ये उपासनवैयर्थ्यं मोक्षसाधनज्ञानस्यैव विद्यमानत्वात् द्वितीये विषयापरिज्ञानात् उपासनमेव न घटत इत्याशङ्क्याह वेदान्तेभ्य इति । अयमभिप्रायः ब्रह्मात्मैकत्वापरोक्षज्ञानस्य मोक्षसाधनस्यानुत्पन्नत्वात् न उपासनावैयर्थ्यं शास्त्रात् परोक्षतयावगतत्वात् ब्रह्मण उपासनविषयत्वमिति ॥ १४ ॥

उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किं रूपमित्याकाङ्क्षायामाह प्रत्यग्व्यक्तिमनुल्लिख्येति । प्रत्यग्व्यक्तिं बुद्ध्यादिसाक्षिणमानन्दरूपमात्मानमनुल्लिख्य अविषयीकृत्य शास्त्रात् प्रज्ञानादिवाक्यजातात् ब्रह्मास्त्येव सामान्याकारेण जायमानं ज्ञानमत्रास्योप-

चतुर्भुजाद्यवगतावपि मूर्त्तिमनुल्लिखन्।
अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्षते ॥ १६ ॥
परोक्षत्वापराधेन भवेन्नातत्त्ववेदनम्।
प्रमाणेनैव शास्त्रेण सत्यमूर्त्तेर्विभासनात् ॥ १७ ॥
सच्चिदानन्दरूपस्य शास्त्राज्ज्ञानेऽप्यनुल्लिखन्।
प्रत्यक्षं साक्षिणं तत् तु ब्रह्म साक्षान्न वीक्षते ॥ १८ ॥

प्रमाया परोक्षधीः परोक्षज्ञानं विवक्षितमित्यर्थः। तत्र दृष्टान्तः विष्ण्वादिमूर्त्तिवदिति। विष्ण्वादिमूर्त्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः ॥ १५ ॥

ननु शास्त्रेण विष्ण्वादिमूर्त्तेश्चतुर्भुजत्वादिविशेषप्रतीतेस्तज्ज्ञानस्यापि कुतः परोक्षत्वमित्याशङ्क्याह चतुर्भुजाद्यवगतावपीति। शास्त्रेण चतुर्भुजत्वादिविशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्त्तिमविषयीकुर्वन् पुरुषः परोक्षज्ञान्येव। तत्रोपपत्तिमाह न तदा विष्णुमीक्षत इति। तदोपासनाकाले विष्णुरूपाख्यं नेक्षते नेन्द्रियैर्विषयीकरोतीत्यर्थः ॥ १६ ॥

ननु विष्ण्वादिगोचरस्य ज्ञानस्य अपरोक्षत्वाभावात् भ्रमत्वमित्याशङ्क्य प्रमाणेन जनितत्वान्न भ्रमत्वमित्याह परोक्षत्वापराधेनेति। परोक्षज्ञानं भ्रान्तिज्ञानकारणं न भवति किन्तु विषयासत्यत्वम् इह तु प्रमाणभूतेन शास्त्रेणैव यथार्थभूताया विष्ण्वादिमूर्त्तेरेव भासनान्न भ्रमत्वमित्यर्थः ॥ १७ ॥

ननु सच्चिदानन्दस्वरूपविषयिणो ब्रह्मतत्त्वज्ञानस्य शास्त्रजन्यस्यापि कुतः परोक्षत्वमित्याशङ्क्य अपरोक्षत्वप्रयोजकप्रत्यक्षोल्लेखाभावादित्याह सच्चिदानन्दरूपस्येति। सत्यं ज्ञानमनन्तं ब्रह्म, नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनः सदिदं सर्वं तत् सदिति चिदिदं सर्वं प्रकाशते चेत्यादिवाक्यात् सच्चिदानन्दरूपस्य ब्रह्मणो भानेऽपि प्रत्यक्षं साक्षिण-

शास्त्रोक्तेनैव मार्गेण सच्चिदानन्दनिर्णयात् ।
परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः ॥ १९ ॥
ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितम् ।
महावाक्यैस्तथाप्येतत् दुर्बोधमविचारिणः ॥ २० ॥
देहाद्यात्मत्वविभ्रान्तौ जाग्रत्यां न हठात् पुमान् ।
ब्रह्मात्मत्वेन विज्ञातुं क्षमते मन्दधीत्वतः ॥ २१ ॥

मनुस्मरन् तस्य ब्रह्मणः प्रत्यगात्मरूपमजानन् तद्ब्रह्म साक्षात् न वीक्षते नैव पश्यतीत्यर्थः ॥ १८ ॥

कथं तर्हि तथाविधब्रह्मगोचरस्य ज्ञानस्य तत्त्वज्ञानत्वमित्याशङ्क्य आगमप्रमाणजन्यत्वादित्याह शास्त्रोक्तेनैवेति । तज्ज्ञानं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानन्दरूपनिश्चयात्मकत्वात् सम्यक्ज्ञानमेव न भ्रम इत्यर्थः ॥ १९ ॥

ननु सत्यज्ञानादिवाक्यैः ब्रह्मणः सच्चिदानन्दरूपत्वमिव तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एव अतः शास्त्रजन्यस्यापि ब्रह्मज्ञानस्य प्रत्यगभिन्नब्रह्मविषयत्वादपरोक्षत्वमेवेत्याशङ्क्याह ब्रह्म यद्यपीति । यद्यपि वेदान्तेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतत् प्रत्यग्रूपत्वमन्वयव्यतिरेकाभ्यां तत्त्वम्पदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यम् अतः केवलाद्वाक्यात् नापरोक्षज्ञानमुत्पद्यत इत्यर्थः ॥ २० ॥

ननु सम्यग्ज्ञानस्य प्रमाणवस्तुपरतन्त्रत्वात् प्रमाणस्य च तत्त्वमस्यादिवाक्यरूपस्य सद्भावात् वस्तुनश्च ब्रह्मात्मैकत्वलक्षणस्य विद्यमानत्वात् कुतो विचारमन्तरेण दुर्बोधत्वमित्याशङ्क्याह देहाद्यात्मत्वविभ्रान्ताविति । ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेन्द्रियाद्यात्मभ्रमस्य विचारनिवर्त्यस्य सद्भावात् तं निरसितुं विचारोऽपेक्ष्यत इत्यर्थः ॥ २१ ॥

ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः ।
अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत् ॥ २२ ॥
अपरोक्षशिलाबुद्धिर्न परोक्षेशतां नुदेत् ।
प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते ॥ २३ ॥
अश्रद्धालोरविश्वासो नोदाहरणमर्हति ।
श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारतः ॥ २४ ॥
सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत् ।
विष्णुमूर्त्युपदेशो हि न मीमांसामपेक्षते ॥ २५ ॥
कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात् ।
बहुशाखाविप्रकीर्णं निर्णेतुं कः प्रभुर्नरः ॥ २६ ॥

ननु तर्हि देहेन्द्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावाद्द्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदीयादित्याशङ्क्य अपरोक्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वात् श्रद्धावतः पुंसः शास्त्रात् परोक्षज्ञानमुत्पद्यत एव इत्याह ब्रह्ममात्रं सुविज्ञेयमिति अपरोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुद्ध्यनुत् अतो ब्रह्ममात्रं सुविज्ञेयमिति योजना ॥ २२ ॥

अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टान्तमाह अपरोक्षशिलाबुद्धिरिति । विरोधाभावमेवोदाहृत्य दर्शयति प्रतिमादिष्विति ॥ २३ ॥

केचन विप्रतिपद्यमाना उपलभ्यन्त इत्याशङ्क्याह अश्रद्धालोरिति । कुत इत्यत आह श्रद्धालोरेवेति । सर्वेषु वैदिकानुष्ठानेषु श्रद्धावत एवाधिकारित्वादित्यर्थः ॥ २४ ॥

एतावता परोक्षज्ञाने किमायातमित्यत आह सकृदाप्तोपदेशेनेति । उक्तमर्थं लोकानुभवेन द्रढयति विष्णुमूर्त्युपदेश इति ॥ २५ ॥

ननु तर्हि कुतः शास्त्रेषु विचाराः क्रियन्त इत्याशङ्क्य अनुष्ठेययो-

निर्णीतोऽर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः ।
विचारमन्तरेणापि शक्तोऽनुष्ठातुमञ्जसा ॥ २७ ॥

उपास्तीनामनुष्ठानमार्षग्रन्थेषु वर्णितम् ।
विचाराक्षममर्त्याश्च तत् श्रुत्वोपासते गुरोः ॥ २८ ॥

वेदवाक्यानि निर्णेतुमिच्छन् मीमांसतां जनः ।
आप्तोपदेशमात्रेण ह्यनुष्ठानन्तु सम्भवेत् ॥ २९ ॥

कर्मोपासनयोः किं कर्म कर्तव्यं किंवोपासनमिति सन्देहसम्भवात् तन्निर्णयाय विचाराः क्रियन्त इत्याह कर्मोपास्तीति । सन्देहसम्भवमेवोपपादयति वेदशाखेति । अनेकासु शाखासु तत्र तत्र चोदितं कर्मोपासनं वा एकत्र समाहृत्य निर्णेतुमस्मदादिर्नरः कः प्रभुः समर्थः न कोऽपीत्यर्थः ॥ २६ ॥

ननु तर्ह्यनुष्ठेयत्वमेव कर्मोपासनयोः माभूदित्याशङ्क्याह निर्णीतोऽर्थ इति । जैमिन्यादिभिः पूर्वाचार्यैः निर्णीतोऽर्थः अनुष्ठानप्रकारः कल्पसूत्रैः संगृहीतोऽस्ति तावता तैर्ग्रथितत्वेनैव तेषु आस्तिकः विश्वासवान् पुरुषः विचारं विनापि कर्म सम्यगनुष्ठातुं शक्नोत्येव ॥ २७ ॥

ननु तर्ह्युपासनाविचाराभावात् तदनुष्ठानं न सम्भवेदित्याशङ्क्याह उपास्तीनामिति । आर्षग्रन्थेषु ब्रह्मवासिष्ठादिमन्त्रकल्पेषू-पासनानुष्ठानप्रकारो वर्णितः अतो विचाराक्षमाः मनुष्याः कल्पोक्तं तदुपासनं गुरुमुखादवगम्यानुतिष्ठन्तीत्यर्थः ॥ २८ ॥

ननु तर्हीदानीन्तनैरपि ग्रन्थकर्तृभिर्वेदवाक्यविचारः कुतः क्रियत इत्याशङ्क्य बुद्धिपरितोषायैव क्रियते नानुष्ठानसिद्धये इत्याह वेदवाक्यानीति ॥ २९ ॥

ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणाम् ।
आप्तोपदेशमात्रेण न सम्भवति कुत्रचित् ॥ २० ॥
परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरत् ।
अविचारोऽपरोक्षस्य ज्ञानस्य प्रतिबन्धकः ॥ २१ ॥
विचार्य्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् ।
आपरोक्ष्यावसानत्वात् भूयोभूयो विचारयेत् ॥ २२ ॥
विचारयन्नामरणं नैवात्मानं लभेत चेत् ।
जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥ २३ ॥

ननु ब्रह्मोपासनवत् ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रादेव सिद्धिः किं न स्यादित्याशङ्क्याह ब्रह्मसाक्षात्कृतिस्त्वेवमिति ॥ २० ॥

आप्तोपदेशमात्रेणोपासनानुष्ठानोपयोगिपरोक्षज्ञानमुत्पद्यते अपरोक्षज्ञानन्तु विचारमन्तरेण न जायत इत्युक्तं तत्र कारणमाह परोक्षज्ञानमिति । यतः अविश्वास एव परोक्षज्ञानं प्रतिबध्नाति नाविचारः अतस्तन्निवृत्तौ सकृदुपदेशादेव परोक्षज्ञानजन्मोपपद्यते । अविचारप्रतिबन्धस्यापरोक्षज्ञानस्य तु विचारद्वारा तन्निवृत्तिमन्तरेणोत्पत्तिर्न सम्भवति अतो विचारः कर्त्तव्य इति भावः ॥ २१ ॥

ननु विचारे कृतेऽपि यदा परोक्षज्ञानं न जायते तदा किं कर्त्तव्यमित्यत आह विचार्य्यापरोक्षेणेति । तत्त्वम्पदार्थौ सम्यग्विचार्य्यापि वाक्यार्थं ब्रह्मात्मैकत्वमपरोक्षतया न जानातीति चेत् तदापि पुनः पुनर्विचार एव कर्त्तव्यः अपरोक्षज्ञानहेतोरन्यस्याभावादिति भावः ॥ २२ ॥

ननु भूयो भूयो विचारेण च साक्षात्कारानुदये सति विचारो व्यर्थ स्यादित्याशङ्क्याह विचारयन्नामरणमिति ॥ २३ ॥

इह वामुत्र वा विद्येत्येवं सूत्रकृतोदितम् ।
शृण्वन्तोऽप्यत्र बहवो यन्न विद्युरिति श्रुतेः ॥ ३४ ॥
गर्भ एव शयानः सन् वामदेवोऽवबुद्धवान् ।
पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ॥ ३५ ॥
बहुवारमधीतेऽपि तदा नायाति चेत् पुनः ।
दिनान्तरेऽनधीत्यैव पूर्वाधीतं स्मरेत् पुमान् ॥ ३६ ॥
कालेन परिपच्यन्ते कृषिगर्भादयो यथा ।
तद्वदात्मविचारोऽपि शनैः कालेन पच्यते ॥ ३७ ॥
पुनः पुनर्विचारेऽपि त्रिविधप्रतिबन्धतः ।
न वेत्ति तत्त्वमित्येतद् वार्त्तिके सम्यगीरितम् ॥ ३८ ॥

नन्विदं कुतोऽवगतमित्याशङ्क्य ब्रह्मसूत्रकृता व्यासेन ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनादिति सूत्रेऽभिधानादित्याह इह वामुत्र वेति । सति प्रतिबन्धे इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति शृण्वन्तोऽपीति ॥ ३४ ॥

इह जन्मनि श्रवणादिकर्तुर्जन्मान्तरे अपरोक्षज्ञानं भवतीत्यत्रापि गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा इत्यादिकां श्रुतिमर्थतः पठति गर्भ एव शयान इति । इह जन्मनि अनुत्पन्नस्य ज्ञानस्य कालान्तरे उत्पत्तौ दृष्टान्तमाह यद्वदध्ययनादिष्विति ॥ ३५ ॥

दृष्टान्तं विवृणोति बहुवारमधीतेऽपीति ॥ ३६ ॥

स्वादिमत्त्वेन परिपक्वतानि दृष्टान्तान्तराण्याह कालेनेति । दार्ष्टान्तिके योजयति तद्वदात्मविचारोऽपीति ॥ ३७ ॥

बहुवारं विचारितेऽपि तत्त्वे प्रतिबन्धवशात् साक्षात्कारो न जायते इत्येतद् वार्त्तिककारैरपि निरूपितमित्याह पुनः पुनर्विचारेऽपीति ॥ ३८ ॥

कुतस्तज्ज्ञानमिति चेत् तद्धि बन्धपरिक्षयात् ।
असावपि च भूतो वा भावी वा वर्त्तते तथा ॥ ३९ ॥
अधीतवेदवेदार्थोऽप्यत एव न मुच्यते ।
हिरण्यनिधिदृष्टान्तादिदमेव च दर्शितम् ॥ ४० ॥
अतीतेनापि महिषीस्नेहेन प्रतिबन्धतः ।
भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगीयते ॥ ४१ ॥
अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान् ।
ततो यथावद्वेदैष प्रतिबन्धस्य संक्षयात् ॥ ४२ ॥

तान्येव वार्त्तिकवाक्यान्युदाहरति कुतस्तज्ज्ञानमित्यादिना भरतस्य त्रिजन्मभिरित्यन्तेन । तत्र तावत् पूर्वमनुत्पन्नस्य ज्ञानस्येदानीमुत्पत्तौ कारणं पृच्छति कुतस्तज्ज्ञानमिति चेदिति । उत्तरमाह तद्धि बन्धपरिक्षयादिति । बन्धः प्रतिबन्धः तस्य परिक्षयादित्यर्थः । सोऽपि प्रतिबन्धो भूतो भावी वर्त्तमानश्चेति त्रिविध इत्याह असावपि च भूतो वेति ॥ ३९ ॥

भवत्वेवं त्रिविधः प्रतिबन्धः ततः किमित्यत आह अधीतवेदेति । अत एव प्रतिबन्धसद्भावादेवेत्यर्थः । सति प्रतिबन्धे ज्ञानं नोदेतीति यत् तथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्त्यनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह हिरण्येति ॥ ४० ॥

भूतस्य प्रतिबन्धकत्वं न दृष्टमित्याशङ्क्याह अतीतेनापीति । अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्याञ्चिन्महिष्यां स्नेहं कृत्वा पश्चात् सन्न्यासानन्तरं श्रवणे प्रवृत्तोऽपि तेनैव स्नेहेन जनितात् प्रतिबन्धात् तत्त्वं गुरुणा उपदिष्टमपि न ज्ञातवान् इत्येवंविधा गाथा लोके प्रगीयते न पुराणादिषु पठितेत्यर्थः ॥ ४१ ॥

तर्हि तथाविधस्य कथं ज्ञानोत्पत्तिरित्यत आह अनुसृत्येति ।

प्रतिबन्धो वर्तमानो विषयासक्तिलक्षणः ।
प्रज्ञामान्द्यं कुतर्कश्च विपर्ययदुराग्रहः ॥ ४३ ॥
शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयम् ।
नीतेऽस्मिन् प्रतिबन्धेऽतः स्वस्य ब्रह्मत्वमश्नुते ॥ ४४ ॥
आगामिप्रतिबन्धश्च वामदेवे समीरितः ।
एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥ ४५ ॥

गुरुस्तस्य तत्त्वोपदेष्टा तदीयं महिषीस्नेहम् अनुसृत्य तस्यामेव महिष्यां तत्त्व तन्महिष्युपाधिकं ब्रह्म उक्तवान् ततः सोऽपि महिषीस्नेह-लक्षणप्रतिबन्धकापगमेन गुरूपदिष्टं तत्त्वं यथावत् शास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः ॥ ४२ ॥

एवमतीतप्रतिबन्धं प्रदर्श्य वर्तमानं तं दर्शयति प्रतिबन्ध इति । वर्तमानः प्रतिबन्धश्चित्तस्य विषयासक्तिरूप एकः प्रज्ञामान्द्यं बुद्धेस्तै-क्ष्ण्याभावः कुतर्कश्च शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथाज्ञानं विपर्यय-दुराग्रहः विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोऽभिनिवेशः एतेषामन्यतमस्यापि सत्त्वे ज्ञानं नोदेतीत्यर्थः॥४३

तस्यापि प्रतिबन्धस्य केन निवृत्तिरित्यत आह शमाद्यैरिति । शमादयः शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वेति श्रुत्युक्ताः श्रवणादयः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुत्या अभिहिता एतैः साधनै-स्तत्र तत्र तस्य तस्य प्रतिबन्धस्य निवर्तने उचितैर्योग्यैरस्मिन् प्रतिबन्धे क्षयं नीते सति विनाशिते सत्यतः प्रतिबन्धापगमादेव स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः ॥ ४४ ॥

इदानीं भाविप्रतिबन्धं दर्शयति आगामिप्रतिबन्धश्चेति । आगामि-प्रतिबन्धो जन्मान्तरहेतुः प्रारब्धमेव इत्यर्थः । तस्य च भोगमन्तरेण निवृत्त्यभावात् तन्निवृत्तौ कालनियमो नास्तीत्याह एकेनेति । स च

योगभ्रष्टस्य गीतायामतीते बहुजन्मनि ।
प्रतिबन्धक्षयः प्रोक्तो न विचारोऽप्यनर्थकः ॥ ४६ ॥
प्राप्य पुण्यकृतां लोकानात्मतत्त्वविचारतः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४७ ॥
अथवा योगिनामेव कुले भवति धीमताम् ।
निःस्पृहो ब्रह्मतत्त्वस्य विचारात् तद्धि दुर्लभम् ॥ ४८ ॥
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।

एकेन जन्मना क्षीणः वामदेवस्येति शेषः। भरतस्य त्रिजन्मभिः क्षीण इत्यनुषज्यते ॥ ४५ ॥

ननु एवं त्रिजन्मभिरिति नियतकालत्वं भवतैव उच्यते इत्याशङ्क्याह योगभ्रष्टस्येति। योगभ्रष्टस्य तत्त्वसाक्षात्कारपर्यन्तविचाररहितस्येत्यर्थः। तर्हि तत्त्वविचारो निष्फलः स्यादित्याशङ्क्याह न विचारोऽप्यनर्थक इति। प्रतिबन्धनिवृत्त्यनन्तरमेवापरोक्षज्ञानलक्षणफलसम्पादित्वादिति भावः ॥ ४६ ॥

गीतायां प्रतिपादितमर्थं दर्शयति प्राप्य पुण्यकृतामित्यादिना ततो याति परां गतिमित्यन्तेन। योगभ्रष्ट आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान् स्वर्गविशेषान् प्राप्य तत्र बहुकालं सुखमनुभूय तद्भोगावसाने साभिलाषश्चेदस्मिन् लोके शुचीनां मातृतः पितृतश्च शुद्धानां श्रीमतां कुलेऽभिजायते ॥ ४७ ॥

पक्षान्तरमाह अथवेति। निःस्पृहः स्वयमतिविरक्तश्चेत् ब्रह्मतत्त्वविचारादेव धीमतामात्मतत्त्वविचारवतां योगिनां चित्तैकाग्र्यवतां कुले भवति जायते इत्यर्थः। पूर्वस्मात् पक्षात् कोऽतिशय इत्यत आह तद्धि दुर्लभमिति। हि यस्मात् कारणात् तद्योगिकुले जन्म दुर्लभम् अल्पपुण्यैरलभ्यमित्यर्थः ॥ ४८ ॥

तस्य दुर्लभत्वमुपपादयति तत्र तमिति। हि यस्मात् कारणात्

यतते च ततो भूयस्तस्मादेतद्धि दुर्लभम् ॥ ४९ ॥
पूर्वाभ्यासेन तेनैव क्रियते ह्यवशोऽपि सः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ५० ॥
ब्रह्मलोकाभिवाञ्छायां सम्यक् सत्यां निरुध्यताम् ।
विचारयेत् य आत्मानं न तु साक्षात् करोत्ययम् ॥ ५१ ॥
वेदान्तविज्ञानसुनिश्चितार्था इति शास्त्रतः ।
ब्रह्मलोके सकल्पान्ते ब्रह्मणा सह मुच्यते ॥ ५२ ॥

तत्र तस्मिन् जन्मनि पौर्वदेहिकं तं बुद्धिसंयोगं तत्त्वविचारगोचरं बुद्धिसम्बन्धं शीघ्रं लभते प्राप्नोति न केवलं बुद्धिसम्बन्धमात्रलाभः किन्तु ततः पूर्वस्मात् प्रयत्नात् भूयो यतते चाधिकप्रयत्नं करोति तस्मादेतज्जन्म दुर्लभमित्यर्थः ॥ ४९ ॥

भूयोऽभ्यासे कारणमाह पूर्वाभ्यासेनेति । स योगभ्रष्टस्तेन पूर्वाभ्यासेनैवावशोऽपि स्वस्याधीनोऽपि ह्रियते आकृष्यते एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्त्वज्ञानसम्पन्नस्ततस्तस्मात् तत्त्वज्ञानात् परां शान्तिं मुक्तिं याति प्राप्नोतीत्यर्थः ॥ ५१ ॥

ध्यानाभिप्रतिबन्धान्तरं दर्शयति ब्रह्मलोकाभिवाञ्छायामिति । ब्रह्मलोकप्राप्तीच्छाया दृढ़ यां सत्यां तां निरुध्य य आत्मानं विचारयेत् तस्य साक्षात्कारो नैव जायत इत्यर्थः ॥ ५१ ॥

ननु तर्हि तस्य कदापि मुक्तिर्न स्यात् इत्याशङ्क्याह वेदान्तविज्ञानेति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः ते ब्रह्मलोकेषु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे, ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे, परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्, इत्यादिशास्त्रवचनाद् ब्रह्मलोकप्राप्त्यनन्तरं तत्र तत्त्वं साक्षात्कृत्य ब्रह्मणा सह मुक्तो भविष्यति इत्यर्थः ॥ ५२ ॥

केषाञ्चित् स विचारोऽपि कर्मणा प्रतिबध्यते ।
श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः ॥ ५३ ॥
अत्यन्तबुद्धिमान्द्याद् वा सामग्र्या वाप्यसम्भवात् ।
यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् ॥ ५४ ॥
निर्गुणब्रह्मतत्त्वस्य न ह्युपास्तेरसम्भवः ।
सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसम्भवात् ॥ ५५ ॥
अवांमनसगम्यं तन्नोपास्यमिति चेत् तदा ।
अवांमनसगम्यस्य वेदनञ्च न सम्भवेत् ॥ ५६ ॥

एवं तत्त्वविचारे क्रियमाणे प्रतिबन्धवशात् तत्र साक्षात्कारो न जायत इत्यभिधाय तीव्रपापिनान्तु सोऽपि विचारो दुर्लभ इत्य आह केषाञ्चिदिति । तत्र प्रमाणमाह श्रवणायापीति । यः परमात्मा बहुभिः पुरुषैः श्रवणाय अपि श्रोतुमपि न लभ्यः दुर्लभ इत्यर्थः ॥ ५३ ॥

एतावता सति प्रतिबन्धे तत्त्वसाक्षात्कारस्तत्साधनभूतो विचारश्च न सम्भवतीत्यभिधाय इदानीं विचारासमर्थेन पुरुषार्थिना किं कर्त्तव्यमित्यपेक्षायां विचाराक्षमस्यापि तत्फलं प्राप्यते गुरोरिति यत् प्राक् प्रतिज्ञातं तदुपपादयति अत्यन्तेति । सामग्र्यसम्भवो नाम तत्त्वोपदेष्टुर्गुरोरभ्यासस्य देशकालादेर्वा असम्भवस्तस्मादित्यर्थः ॥ ५४ ॥

ननु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात् तदुपासनं न घटत इत्याशङ्क्य उपासनस्य प्रत्ययावृत्तिरूपत्वात् सगुणब्रह्मणीव निर्गुणेऽपि तत् सम्भवतीत्याह निर्गुणब्रह्मतत्त्वस्येति ॥ ५५ ॥

ननु निर्गुणस्य ब्रह्मणोऽवाङ्मनसगोचरत्वाभावान्नोपास्यत्वमित्याशङ्क्य वेदनपक्षेऽप्ययं दोषः समान इत्याह अवाङ्मनसगम्यमिति ॥ ५६ ॥

वागाद्यगोचराकारमित्येवं यदि वेत्त्यसौ।
वागाद्यगोचराकारमित्युपासीत नो कुतः॥ ५७॥
सगुणत्वमुपास्यत्वाद् यदि वेद्यत्वतोऽपि तत्।
वेद्यं चेत् लक्षणावृत्त्या लक्षितं समुपास्यताम्॥ ५८॥
ब्रह्म विद्धि तदेव त्वं न त्विदं यदुपासते।
इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि॥ ५९॥
विदितादन्यदेवेति श्रुतेर्वेद्यत्वमस्य न।
यथा श्रुत्यैव वेद्यं तत् तथा श्रुत्याप्युपास्यताम्॥ ६०॥

ननु ब्रह्म अवाङ्मनसगोचरमित्येवं ज्ञातुं शक्यमित्याशङ्क्य एवमेव उपासितुमपि शक्यमित्याह वागाद्यगोचराकारमित्येवमिति ॥५७॥

ब्रह्मण उपास्यत्वे सगुणत्वं प्रसज्येतेत्याशङ्क्य वेद्यत्वेऽपि तत् सगुणत्वं स्यादित्याह सगुणत्वमिति। तत् सगुणत्वमित्यर्थः। ननु लक्षणावृत्त्याश्रयणान्न वेद्यत्वे सगुणत्वप्रसङ्ग इत्याशङ्क्य उपासनमपि तथैव क्रियतामित्याह वेद्यं चेदिति ॥ ५८ ॥

ननु ब्रह्मण उपास्यत्वं श्रुत्या निषिध्यत इति शङ्कते ब्रह्मविद्धीति। यन्मनसा न मनुते येनाहुर्मनो मतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति श्रुतिरुपास्यस्य ब्रह्मत्वं निषेधतीत्यर्थः। त्वं यद्वाङ्मनसागम्यं तदेव ब्रह्म विद्धि इदमिति यत् तूपासते पुरुषास्तन्न विद्धीति योजना ॥ ५९ ॥

उपास्यत्ववत् वेद्यत्वस्यापि निषेधः समान इत्याह विदितादन्यदेवेति। अन्यदेव तद्विदितादथो अविदितादधीति ब्रह्मणो वेद्यत्वमपि निवारयतीत्यर्थः। विदिताविदिताभ्यामन्यत् ब्रह्मेति श्रुतिः प्रतिपादयति इति चेत् तर्हि तथैव तज्जानीयादित्याशङ्क्य उपासनेऽप्येतत् समानमित्याह यथा श्रुत्यैव वेद्यं तदिति ॥ ६० ॥

अवास्तवी वेद्यता चेदुपास्यत्वं तथा न किम् ।
वृत्तिव्याप्तिर्वेद्यता चेदुपास्यत्वेऽपि तत् समम् ॥ ६१ ॥
का ते भक्तिरुपास्तौ चेत् कस्ते द्वेषस्तदीरय ।
मानाभावो न वाच्योऽस्यां बहुश्रुतिषु दर्शनात् ॥ ६२ ॥
उत्तरस्मिंस्तापनीये शैव्यप्रश्नेऽथ काठके ।
माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥ ६३ ॥
अनुष्ठानप्रकारोऽस्याः पञ्चीकरण ईरितः ।

ननु वेद्यत्वं ब्रह्मणो वास्तवं न भवतीत्याशङ्क्य उपास्यत्वमपि तथेत्याह अवास्तवी वेद्यता चेदिति । ननु वेदनपक्षे वृत्तेर्ब्रह्माकारत्वमस्ति नोपासने इत्याशङ्क्य मानसत्वात् तदाकारत्वमुभयत्र समानं इत्याह वृत्तिव्याप्तिरिति ॥ ६१ ॥

युक्तिमुक्त्वा उपासनस्य तत्पक्षेऽपि समान इत्याह का ते भक्तिरिति । ननु निर्गुणोपासने प्रमाणं नास्तीत्याशङ्क्यानेकासु श्रुतिषूपलभ्यमानत्वात् नैवमित्याह मानाभाव इति ॥ ६२ ॥

बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति उत्तरस्मिन्निति । तापनीयोपनिषदि तावदेवाह वै प्रजापतिमब्रुवन् अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्व इत्यादिना बहुधा निर्गुणोपासनमभिधीयते, शैव्यप्रश्ने प्रश्नोपनिषदि पञ्चमप्रश्ने यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति काठके कठवल्ल्यां सर्वे वेदा यत् पदमामनन्ति इत्युपक्रम्य एतद्ध्येवाक्षरं ब्रह्म एतदालम्बनं श्रेष्ठमित्यादिना प्रणवोपासनमित्युक्तं माण्डूक्योपनिषदि ओमित्येतदक्षरमिदं सर्वमित्यादिना अवस्थात्रयातीततुरीयोपासनमेव विधीयत इत्यर्थः । आदिशब्देन तैत्तिरीयवल्ल्यादयो गृह्यन्ते ॥ ६३ ॥

ननु निर्गुणोपासनं कथमनुष्ठेयमित्यत आह अनुष्ठानप्रकारोऽस्या

ज्ञानसाधनमेतच्चेत् नेति केनात्र वर्जितम् ॥ ६४ ॥
नानुतिष्ठति कोऽप्येतदिति चेन्नानुतिष्ठतु ।
पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यति ॥ ६५ ॥
इतोऽप्यतिशयं मत्वा मन्त्रान् वश्यादिकारिणः ।
मूढा जपन्तु तेभ्योऽतिमूढाः कृषिमुपास्यताम् ॥ ६६ ॥
तिष्ठन्तु मूढाः प्रकृता निर्गुणोपास्तिरीर्य्यते ।
विद्यैक्यात् सर्वशाखास्थान् गुणानत्रोपसंहरेत् ॥ ६७ ॥

इति । नन्वेतदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशङ्क्य ब्रह्मतत्त्वोपास्त्यापि मुच्यते इति वदतामस्माकमनुकूलमित्याह ज्ञानसाधनमिति ॥ ६४ ॥

ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपासनम् इत्याशङ्क्य तस्य प्रमाणसिद्धस्यापि त्यागो न युक्त इत्याह नानुतिष्ठतीति ॥ ६५ ॥

प्रमाणसिद्धस्यानुष्ठानाभावेनापरित्याज्यत्वे दृष्टान्तमाह इतोऽप्यतिशयमिति । अयमभिप्रायः यथा सगुणोपासनेभ्यः कालान्तरभाविफलेभ्यो वश्यादिकारिमन्त्रेषु ऐहिकफलप्रदातृत्वं अतिशयं बुद्ध्वा मूढानां तन्मन्त्रजपादौ प्रवृत्तावपि विवेकिभिः सगुणोपासनं न परित्यज्यते, यथा यमनियमानुष्ठानापेक्षेभ्योऽपि मन्त्रेभ्यः कृष्यादावतिशयं नियमानपेक्षत्वं मत्वा मूढतराणां तत्र प्रवृत्तावपि न तन्मन्त्रानुष्ठानं त्यज्यते, तथा सांसारिकफलेप्सूनां निर्गुणोपासनानुष्ठानाभावेऽपि मुमुक्षुभिर्निर्गुणोपासनं त्यज्यत इति ॥ ६६ ॥

एवं प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति तिष्ठन्तु मूढाः इति । सर्ववेदान्तप्रत्ययचोदनाद्यविशेषादित्युक्तन्यायेन निर्गुणोपासनस्यैकत्वात् तासु शाखासु श्रुतानुपास्यगुणानेकत्रोपसंहृत्य उपासनं कर्त्तव्यमित्याह विद्यैक्यादिति ॥ ६७ ॥

आनन्दादेर्विधेयस्य गुणसंघस्य संहृतिः।
आनन्दादय इत्यस्मिन् सूत्रे व्यासेन वर्णिता॥ ६८॥
अस्थूलादेर्निषेध्यस्य गुणसंघस्य संहृतिः।
तथा व्यासेन सूत्रेऽस्मिन्नक्षरधियाम्त्विति॥ ६९॥
निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः।
न युज्यतेत्युपालम्भो व्यासं प्रत्येव मां तु न॥ ७०॥
हिरण्यश्मश्रुसूर्य्यादिमूर्त्तीनामनुदाहृतेः।
अविरुद्धं निर्गुणत्वमिति चेत् तुष्यतां त्वया॥ ७१॥

ते च गुणाः द्विप्रकाराः विधेया निषिद्धाश्चेति तत्र आनन्दो ब्रह्म विज्ञानमानन्दं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरस इत्यादयो ये विधेयगुणाः तेषामुपसंहारः आनन्दादयः प्रधानस्येत्यस्मिन्नधिकरणेऽभिहित इत्याह आनन्दादेरिति॥ ६८॥

ये च अस्थूलमनण्वह्रस्वं यत् तदद्रेश्यमग्राह्यं अगन्धमरसमरूपमव्ययमित्यादयो निषेध्या गुणास्तेषामुपसंहारः अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तमित्यस्मिन्नधिकरणेऽभिहित इत्याह अस्थूलादेरिति॥ ६९॥

ननु निर्गुणब्रह्मविद्यायां न गुणोपसंहार एवोपयुज्यते निर्गुणविद्यात्वविरोधादित्याशङ्क्य उक्तप्रकारेणैवाभिहितस्य उपसंहारस्याभिधीयमानत्वाद्व्यासं प्रतीदं चोद्यमुचितमित्याह निर्गुणब्रह्मतत्त्वस्येति॥ ७०॥

हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्त्तीनामनभिधानादिदं निर्गुणोपासनमेवेति चेत् तर्हि न विरोध इत्याह हिरण्यश्मश्रुसूर्य्यादीति हिरण्यश्मश्रुसूर्य्यादिमूर्त्तीनां हिरण्मयानि श्मश्रूणि च वक्षाप

गुणानां लक्षकत्वेन न तत्त्वेऽन्तःप्रवेशनम् ।
इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यताम् ॥ ७२ ॥
आनन्दादिभिरस्थूलादिभिश्चात्मात्र लक्षितः ।
अखण्डैकरसः सोऽहमस्मीत्येवमुपासते ॥ ७३ ॥
बोधोपास्त्योर्विशेषः क इति चेदुच्यते शृणु ।
वस्तुतन्त्रो भवेद् बोधः कर्तृतन्त्रमुपासनम् ॥ ७४ ॥
विचाराज्जायते बोधोऽनिच्छा यं न निवर्त्तयेत् ।
स्वोत्पत्तिमात्रात् संसारे दहत्यखिलसत्यताम् ॥ ७५ ॥

हिरण्यश्मश्रुस्तथाविधः सूर्यो हिरण्यश्मश्रुसूर्यः स आदिर्येषां ते हिरण्यश्मश्रुसूर्यादयः तेषां मूर्त्तयो हिरण्यश्मश्रुसूर्यादिमूर्त्तयस्तासामिति विग्रहः ॥ ७१ ॥

नन्वानन्दादीनाम् अस्थूलादीनाञ्च गुणानामुपास्यतत्त्वे अन्तःप्रवेशाभावात् तद्गुणविशिष्टत्वेन कथमुपास्यत्वमित्याशङ्क्य तेषां तत्त्वान्तःप्रवेशाभावेऽपि तथा लक्षकत्वसम्भवात् तैर्लक्षितं ब्रह्मोपास्यमित्याह गुणानामिति ॥ ७२ ॥

तथोपासनप्रकारमेव दर्शयति आनन्दादिभिरिति । अत्र श्रुतिषु योऽखण्डैकरस आत्मानन्दादिभिरस्थूलादिभिश्च गुणैर्लक्षितः सोऽहमस्मीत्येवमुपासते मुमुक्षव इति शेषः ॥ ७३ ॥

नन्वेवं सति विद्योपासनयोः कुतो भेद इत्याशङ्क्य वस्तुतन्त्रत्वकर्तृतन्त्रत्वाभ्यां भेद इत्याह बोधोपास्त्योरिति ॥ ७४ ॥

वैलक्षण्यान्तरसिद्धये बोधस्य फलादिकं दर्शयति विचाराज्जायत इत्यादिना श्लोकद्वयेन । विचाराद् वस्तुतत्त्वविचाराद् बोधो जायते, किञ्च विचारवशाज्जायमानं यं बोधमनिच्छा बोधो माभूदित्येवंरूपा

तावता कृतकृत्यः सन्नित्यतृप्तिमुपागतः ।
जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ॥ ७६ ॥
आप्तोपदेशं विश्वस्य श्रद्धालुरविचारयन् ।
चिन्तयेत् प्रत्ययैरन्यैरनन्तरितवृत्तिभिः ॥ ७७ ॥
यावच्चिन्त्यस्वरूपत्वाभिमानः स्वस्य जायते ।
तावद् विचिन्त्य पश्चाच्च तथैवामृति धारयेत् ॥ ७८ ॥
ब्रह्मचारी भिक्षमाणो युतः संवर्गविद्यया ।
संवर्गरूपतां चित्ते धारयित्वा ह्यभिक्षत ॥ ७९ ॥
पुरुषस्येच्छया कर्तुमकर्तुं कर्तुमन्यथा ।

न निवर्तयेत् न निवारयेत् उत्पद्यमानस्य बोधः स्वजन्ममात्रात् संसारेऽखिलस्य प्रपञ्चस्य सत्यतां दहति नाशयति ॥ ७५ ॥

तावतेति तावता तत्त्वज्ञानोत्पत्तिमात्रेण निरतिशयं सुखं प्राप्नोतीत्यर्थः ॥ ७६ ॥

उपासनायाश्च बोधाद्वैलक्षण्यान्तरविषये तद्दर्शयति आप्तोपदेशमिति । आप्तस्य गुरोरुपदेशमुपास्यस्वरूपप्रतिपादकवाक्यजातं विश्वस्य विश्वासं कृत्वा अविचारयन्नुपास्यतत्त्वं प्रत्ययैरन्यैर्घटादिविषयैरनन्तरितवृत्तिभिश्चिन्तयेदिति ॥ ७७ ॥

कियन्तं कालं चिन्तयेदित्याशङ्क्याह यावदिति ॥ ७८ ॥

उपासकस्य तद्रूपत्वाभिमानसद्भावे उदाहरणप्रदर्शनेन स्पष्टीकरोति ब्रह्मचारीति । कश्चित् संवर्गत्वगुणविशिष्टप्राणोपासको ब्रह्मचारी भिक्षाचरणार्थमागत्य अभिप्रतारिनाम्नो राज्ञः पुरतो महात्मनश्चतुरो देव एकः क स जगार भुवनस्य गोपास्तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तमिति मन्त्रं च आत्मनः संवर्गस्वरूपत्वं चित्ते धृतं प्रकटीकृतवानिति छान्दोग्ये श्रूयत इत्यर्थः ॥ ७९ ॥

आस्तामिति धारणे निमित्तं दर्शयन्निच्छया न निवर्तेतेत्युक्तादु-

शक्योपास्तिरतो नित्यं कुर्य्यात् प्रत्ययसन्ततिम् ॥ ८० ॥
वेदाध्यायी ह्यप्रमत्तोऽधीते स्वप्नेऽपि वासितः ।
जपिता तु जपत्येव तथा ध्यातापि वासयेत् ॥ ८१ ॥
विरोधिप्रत्ययं त्यक्त्वा नैरन्तर्य्येण भावयन् ।
लभते वासनावेशात् स्वप्नादावपि भावनाम् ॥ ८२ ॥
भुञ्जानोऽपि निजारब्धमास्थातिशयतोऽनिशम् ।
ध्यातुं शक्तो न सन्देहो विषयव्यसनी यथा ॥ ८३ ॥
परव्यसनिनी नारी व्यग्रापि गृहकर्म्मणि ।
तदेवास्वादयत्यन्तः परसङ्गरसायनम् ॥ ८४ ॥
परसङ्गं स्वादयन्त्या अपि नो गृहकर्म्म तत् ।

बोधवैलक्षण्यमाह पुरुषेच्छया कर्त्तुमिति । उपास्तिः पुरुषस्यापि सकलेच्छया कर्त्तुमकर्त्तुमन्यथा वा प्रकारान्तरेण वा कर्त्तुं शक्या अत पुरुषस्येच्छानियतत्वादुपासनं सदा कुर्य्यादित्यर्थः ॥ ८० ॥

एवं सति सदा चिन्तने किं भवतीत्याह वेदाध्यायीति । अप्रमत्तो वेदाध्यायी सदाध्ययनशीलः जपिता सदा जपशीलो वा वासितः दृढवासनया स्वप्नादिष्वप्यध्ययनं जपं वा करोति एवमुपासकोऽपि वासनादार्ढ्यात् स्वप्नादावपि ध्यायतीत्यर्थः ॥ ८१ ॥

स्वप्नादावपि ध्यानानुवर्त्तने कारणमाह विरोधीति । वासनावेशात् संस्कारपाटवात् भावना ध्यानम् ॥ ८२ ॥

ननु प्रारब्धकर्म्मवशाद्विषयाननुभवतः कथं नैरन्तर्य्येण भावनासिद्धिरित्याशङ्क्य आस्थातिशये सति विषयव्यसनिवद्भावनासिद्धिः स्यादित्याह भुञ्जानोऽपीति ॥ ८३ ॥

दृष्टान्तं विवृणोति परव्यसनिनीति ॥ ८४ ॥

कुण्ठीभवेदपि त्वेतदापातेनैव वर्त्तते ॥ ८५ ॥
गृहकृत्यव्यसनिनी यथा सम्यक् करोति तत् ।
परव्यसनिनी तद्वत् न करोत्येव सर्वथा ॥ ८६ ॥
एवं ध्यानैकनिष्ठोऽपि लेशाल्लौकिकमाचरेत् ।
तत्त्ववित् त्वविरोधित्वाल्लौकिकं सम्यगाचरेत् ॥ ८७ ॥
मायामयः प्रपञ्चोऽयमात्मा चैतन्यरूपधृक् ।
इति बोधे विरोधः को लौकिकव्यवहारिणः ॥ ८८ ॥
अपेक्षते व्यवहृतिर्न प्रपञ्चस्य वस्तुताम् ।
नाप्यात्मजाड्यं किन्त्वेषा साधनान्येव काङ्क्षति ॥ ८९ ॥
मनोवाक्कायतद्बाह्यपदार्थाः साधनानि तान् ।
तत्त्वविन्नोपमृद्नाति व्यवहारोऽस्य नो कुतः ॥ ९० ॥

परवश्याश्वादिभ्योऽन्यकृत्यविच्छेदः । श्वादिन्यायं ह्याह परवश्य-मिति ॥ ८५ ॥

आपातेनैव वर्त्तत इत्युक्तमर्थं विवृणोति गृहकृत्यव्यसनि-नीति ॥ ८५ ॥

दार्ष्टान्तिके योजयति एवं ध्यानैकनिष्ठोऽपीति । ननु तत्त्वविदपि लौकिकव्यवहारं किं क्लेशेनाचरति किंवा सम्यगिति विवक्षव्यवहारस्य तत्त्वज्ञानाविरोधित्वात् सम्यगाचरति इत्याह तत्त्वविद् त्वविरोधि-त्वादिति ॥ ८७ ॥

अविरोधित्वमेव दर्शयति मायामयः प्रपञ्चोऽयमिति ॥ ८८ ॥

विरोधाभावमेव प्रपञ्चयति अपेक्षते व्यवहृतिरिति ॥ ८९ ॥

कानि तानि व्यवहारसाधनानि इत्यत आह मनोवागिति । ननु बाह्याः पदार्थाः स्वप्नेनाद्वयतां मम आदौ तत्त्वज्ञानी -

उपमृद्नाति चित्तं चेज्ज्ञातासौ न तु तत्त्ववित् ।
न बुद्धिं मर्द्दयन् दृष्टो घटतत्त्वस्य वेदिता ॥ ९१ ॥
सकृत् प्रत्ययमात्रेण घटश्चेद् भासते तदा ।
स्वप्रकाशोऽयमात्मा किं घटवच्च न भासते ॥ ९२ ॥
स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनम् ।
बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिषु ॥ ९३ ॥
घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः ।
इष्टो नेतुं तदा शक्य इति चेत् सममात्मनि ॥ ९४ ॥

वर्त्तयति अतोऽस्य ज्ञानिनो व्यवहारः कुतो न भवतीति भवत्येवेत्यर्थः ॥ ९० ॥

ननु विषयानुपमर्द्देऽपि तत्त्वविदा चित्तोपमर्द्दनं कार्य्यमित्याशङ्क्य तथाङ्गीकरणे तत्त्वविदेव न स्यादित्याह उपमृद्नातीति । ननु तत्त्वविदा चित्तं नोपमृद्यत इत्येतत् क दृष्टमित्याशङ्क्याह न बुद्धिमिति । घटतत्त्वस्य वेदिता ज्ञाता बुद्धिं मर्द्दयन् पीडयन् ऐकाग्र्यं कुर्व्वन् पुरुषो न दृष्टो नोपलभ्यत इत्यर्थः ॥ ९१ ॥

ननु घटस्य स्थूलत्वेन स्फुटत्वात् तद्दर्शने चित्तपीडनं नापेक्ष्यते आत्मनस्तथात्वाभावात् तज्ज्ञाने तदपेक्ष्यत इत्याशङ्क्य तस्य स्वप्रकाशत्वेन घटादपि स्फुटत्वात् चित्तरोधनं नैवापेक्ष्यत इत्याह सकृत् प्रत्ययमात्रेणेति ॥ ९२ ॥

ननु आत्मनः स्वप्रकाशत्वेऽपि तद्गोचरायाः बुद्धेरेव तत्त्वज्ञानत्वात् तस्याश्च क्षणिकत्वेन नष्टायाः पुनः पुनरावृत्तिरपेक्ष्यते इत्याशङ्क्य इदं चोद्यं घटादिष्वपि समानमित्याह स्वप्रकाशतयेति ॥ ९३ ॥

घटादिज्ञानस्य क्षणिकत्वेऽपि पूर्वनिश्चितस्य घटस्य यदा व्यव-

निश्चित्य सकृदात्मानं यदापेक्षा तदैव तत् ।
वक्तुं मन्तुं तथा ध्यातुं शक्नोत्येव हि तत्त्ववित् ॥ ९५ ॥
उपासक इव ध्यायन् लौकिकं विस्मरेद् यदि ।
विस्मरत्येव सा ध्यानाद् विस्मृतिर्न तु वेदनात् ॥ ९६ ॥
ध्यानं त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः ।
ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिण्डिमः ॥ ९७ ॥
तत्त्वविद् यदि न ध्यायेत् प्रवर्त्तेत तदा बहिः ।
प्रवर्त्ततां सुखेनायं को बाधोऽस्य प्रवर्त्तने ॥ ९८ ॥
अतिप्रसङ्ग इति चेत् प्रसङ्गं तावदीरय ।
प्रसङ्गो विधिशास्त्रञ्चेत् न तत्तत्त्वविदं प्रति ॥ ९९ ॥

कर्त्तुं शक्यत्वात् तत्र चित्तस्थैर्यसम्पादनप्रयोजकमित्याशङ्क्य दृढ-साक्षात्कारेऽपि ध्यानमित्याह घटादाविति ॥ ९४ ॥

सकृदात्मनीत्युक्तं विवृणोति निश्चित्येति ॥ ९५ ॥

ननु तत्त्वविदपि उपासकवदात्मानुसन्धानवशात् जगदनुसन्धान-रहितो भवेत् इत्याशङ्क्य योऽनुसन्धानाभावो ध्यानप्रयुक्तो न वेदन-प्रयुक्त इत्याह उपासक इवेति ॥ ९६ ॥

ननु तत्त्वविदापि मुक्तिसिद्धये ब्रह्मध्यानं कर्त्तव्यमित्याशङ्क्य ज्ञाना-देव कैवल्यं प्राप्यते, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ज्ञात्वा देवं मुच्यते सर्वपाशैरित्यादिशास्त्रसद्भावात् न मोक्षाय ध्यानं कर्त्तव्यमित्याह ध्यानं त्वैच्छिकमिति ॥ ९७ ॥

तत्त्वविदो ध्यानाभ्युपगमे तस्य यदा बहिः प्रवृत्तिः स्यादि-त्याशङ्क्य अबाधकत्वात् प्रवृत्तेः साभ्युपेयत इत्याह तत्त्वविद् यदीति ॥ ९८ ॥

बहिःप्रवृत्त्यभ्युपगमेऽतिप्रसङ्गः स्यादित्याशङ्क्य प्रसङ्गं दुर्निरूप-

वर्णाश्रमवयोवस्थाभिमानो यस्य विद्यते ।
तस्यैव हि निषेधाश्च विधयः सकला अपि ॥ १०० ॥
वर्णाश्रमादयो देहे मायया परिकल्पिताः ।
नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः ॥ १०१ ॥
समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः ॥ १०२ ॥
नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः ।
न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥ १०३ ॥

तर्ह्येवमिति परिहरति अतिप्रसङ्ग इति चेदिति । न प्रसङ्गो दुर्निरूपः विधिशास्त्रस्य प्रसङ्गमात्रेण विवक्षितत्वादिति चेन्न तस्यात्मानिश्चयत्वेन तत्त्वविद्विषयत्वाभावादित्याह प्रसङ्ग इति । विधिशास्त्रमित्युपलक्षणं निषेधशास्त्रस्यापि ॥ ९९ ॥

विधिशास्त्रस्याविद्वद्विषयत्वमेव दर्शयति वर्णाश्रमेति ॥ १०० ॥

ननु तत्त्वविदोऽपि देहधारित्वेन वर्णाश्रमाद्यभिमानित्वमवश्यंभावीत्याशङ्क्याह वर्णाश्रमादय इति ॥ १०१ ॥

ननु तत्त्वविन्निश्चयस्तावत् तिष्ठतु शास्त्रं तु तस्य कर्तव्यं प्रतिपादयति इत्याशङ्क्य तदपि तस्याकर्तव्यतामेव बोधयति इत्याह समाधिमिति । हृदयेन बुद्ध्या अस्तसर्वास्थोऽस्ताः परित्यक्ताः सर्वाः अपेक्षाः आस्थाः आवश्यकक्रियेषणा यस्य स तथाविधः अत एव उत्तमाशयः उत्तमः आशयोऽभिप्रायः निर्मलं ज्ञानं यस्य स तथोक्तः स मुक्त एव अतः समाधिमथ करोतीत्यन्वयः ॥ १०२ ॥

विदुषां कर्तव्यं नास्तीत्यत्र वचनान्तरमुदाहरति । नैष्कर्म्येणेति । नैष्कर्म्यं कर्मराहित्यं तेन कर्मत्यागेनेत्यर्थः, समाधानं समाधिर्जप्यं जपः ॥ १०३ ॥

आभासस्तु ततोऽन्यत् स्यादिन्द्रजालं हि मायिकम् ।
इत्यबाधितनिर्णीते कुतो मनसि वासना ॥ १०४ ॥

एवं नास्ति प्रसङ्गोऽपि कुतोऽस्यातिप्रसञ्जनम् ।
प्रसङ्गो यस्य तस्यैव शङ्क्येतातिप्रसञ्जनम् ॥ १०५ ॥

विध्यभावान्न बालस्य दृश्यतेऽतिप्रसञ्जनम् ।
स्यात् कुतोऽतिप्रसङ्गोऽस्य विध्यभावे समे सति ॥१०६॥

न किञ्चिद् वेत्ति बालश्चेत् सर्वं वेत्त्येव तत्त्ववित् ।
अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः ॥ १०७ ॥

शापानुग्रहसामर्थ्यं यस्यासौ तत्त्वविद् यदि ।
न तत् शापादिसामर्थ्यं फलं स्यात् तपसो यतः ॥१०८॥

ननु विदुषामपि वासनानिवृत्तये ध्यानं कर्त्तव्यमित्याशङ्क्य सम्यक्-ज्ञानिनो वासनैव नास्तीत्याह आभासस्त्विति ॥ १०४ ॥

भवत्वेवं प्रकृते किमायातम् इत्यत आह एवं नास्ति प्रसङ्गोऽपीति । कस्य तर्ह्यतिप्रसङ्ग इत्यत आह प्रसङ्गो यस्य तस्यैवेति ॥ १०५ ॥

एवं च दृष्टविरुद्धमित्यत आह विध्यभावान्न बालस्येति । दार्ष्टान्तिके बोधवति स्यादिति ॥ १०६ ॥

बालस्य विध्यभावप्रयोजकमल्पज्ञत्वमस्ति न विदुष इत्याशङ्क्य तस्य अल्पज्ञत्वाभावेऽपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह न किञ्चिदिति । तर्हि विध्यधिकारः कस्येत्याशङ्क्याह अल्पज्ञस्यैवेति ॥ १०७ ॥

ननु व्यासादिवत् शापानुग्रहसामर्थ्यं यस्य स एव तत्त्ववित् नान्य इति शङ्कते शापानुग्रहसामर्थ्यमिति । परिहरति नेति । तत्र हेतुमाह तच्छापादिसामर्थ्यमिति ॥ १०८ ॥

व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात् ।
शापादिकारणादन्यत् तपोज्ञानस्य कारणम् ॥ १०९ ॥
द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानयोर्जनिः ।
एकैकं तु तपः कुर्वन्नेकैकं लभते फलम् ॥ ११० ॥
सामर्थ्यहीनो निन्द्यश्चेत् यतिभिर्विधिवर्जितः ।
निन्द्यन्ते यतयोऽप्यन्यैरनिशं भोगलम्पटैः ॥ १११ ॥
भिक्षावस्त्रादि रक्षेयुर्यद्येते भोगतुष्टये ।
अहो यतित्वमेतेषां वैराग्यभरमन्थरम् ॥ ११२ ॥
वर्णाश्रमपरान् मूर्खा निन्दन्त्वित्युच्यते यदि ।
देहात्ममतयो बुद्धं निन्दन्त्वाश्रममानिनः ॥ ११३ ॥

ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यते इत्याशङ्क्य तेषां न तत्त्वज्ञानफलम् अपि तु तपसः फलमित्याह व्यासादेरिति । ननु तर्हि तपसा ब्रह्म विजिज्ञासस्व इति श्रुतेस्तपोरहितस्य तत्त्वज्ञानमपि न घटते इत्याशङ्क्य शापादिकारणादन्यस्य तपसः तत्त्वाप्तेरेवमित्याह शापादीति ॥ १०९ ॥

तर्हि तेषां व्यासादीनां तत्त्वज्ञानित्वं शापादिकारणत्वञ्च कथं दृश्यते इत्याशङ्क्य उभयविधतपसः सद्भावादित्याह द्वयं यस्यास्तीति ॥ ११० ॥

ननु शापादिसामर्थ्यरहितस्य विद्यमानेऽपि विहितानुष्ठाने निन्द्यत्वं स्यादित्याशङ्क्य तेषामपि विषयलम्पटैर्निन्द्यत्वं स्यादित्याह सामर्थ्यहीनो निन्द्यश्चेदिति ॥ १११ ॥

एतेऽपि भोगतुष्ट्यर्थं विषयान् सम्पादयेयुरित्याशङ्क्य तदा तेषां यतित्वमेव हीयते इत्यभिप्रायेणोपहसति भिक्षावस्त्रादि रक्षेयुरिति ॥ ११२ ॥

विषयलम्पटैः पामरैः शिष्टमार्गया निन्द्या क्रियमाणानां विद्व-

तदित्थं तत्त्वविज्ञाने साधनानुपमर्दनात् ।
ज्ञानिनाचरितुं शक्यं सम्यग्राज्यादि लौकिकम् ॥११४॥
मिथ्यात्वबुद्ध्या तत्रेच्छा नास्ति चेत् तर्हि मास्तु तत् ।
ध्यायन् वाथ व्यवहरन् यथारब्धं वसत्वयम् ॥ ११५ ॥
उपासकस्तु सततं ध्यायन्नेव वसेद् यतः ।
ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुतादिवत् ॥ ११६ ॥
ध्यानोपादानकं यत् तद् ध्यानाभावे विलीयते ।
वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते ॥११७॥

टानां ज्ञानित्वमस्तीत्युच्यते चेत् तर्हि देहाभिमानिभिः क्रियापरैः क्रियमाणया निन्दया तत्त्वविदोऽपि न हानिरित्याह बध्नीम-यराम् मूर्खा इति ॥ ११३ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति तदित्थमिति । तत् तस्मात् कारणात् इत्थमुक्तप्रकारेण तत्त्वज्ञाने सति साधनानुपमर्दनात् लौकिक-व्यवहारसाधनानां मनआदीनाम् अविनाशनात् लौकिकं राज्यपरि-पालनादि कर्म ज्ञानिना सम्यगाचरितुं शक्यमित्यर्थः ॥ ११४ ॥

ननु तत्त्वविदः प्रपञ्चमिथ्यात्वज्ञानेन तत्रेच्छैव नोदीयात् इति चेत् तर्हि प्रारब्धानुसारेण वर्ततामित्याह मिथ्येति ॥ ११५ ॥

इदानीम् उपासकज्ञानिनोर्वैषम्यं दर्शयति उपासकस्त्विति । तत्रोप-पत्तिमाह यत इति । यतः कारणात् तस्य ब्रह्मत्वं ध्यानेनैव कृतं न प्रमाणेन प्रमितम् अतो ध्यायिना सदा ध्यानं कर्तव्यमित्यर्थः । तत्र दृष्टान्तः विष्णुतादिवदिति । यथा वर्णिनाम् ध्यानेन सम्पादितस्य विष्णु-त्वादेः पारमार्थिकत्वं नास्ति तद्वदित्यर्थः ॥ ११६ ॥

ध्यानसम्पादितस्यापि तस्य पारमार्थिकत्वं किं न स्यादित्याशङ्क्य ध्यानसम्पादितस्य कामधेन्वादेः ध्यानापायेऽपगमदर्शनाद्वैषम्यमाह

ततोऽभिज्ञापकं ज्ञानं न नित्यं जनयत्यदः ।
ज्ञापकाभावमात्रेण न हि सत्यं विलीयते ॥ ११८ ॥
अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेत् ।
पामराणां तिरश्चां च वास्तवी ब्रह्मता न किम् ॥ ११९ ॥
अज्ञानादपुमर्थत्वमुभयत्रापि तत् समम् ।
उपवासाद् यथा भिक्षा वरं ध्यानं तथान्यतः ॥ १२० ॥
पामराणां व्यवहृतेर्वरं कर्माद्यनुष्ठितिः ।

ध्यानेति । ध्यानेन प्रकाशितस्य ब्रह्मत्वस्य ततो वैलक्षण्यमाह वास्तवीति हेतुगर्भितं विशेषणं यतो ब्रह्मत्वं वास्तवम् अतो ज्ञापकस्य ज्ञानाभावे सति नैव विलीयते ॥ ११७ ॥

वास्तवत्वादेव ज्ञानेन नैव जन्यते इत्याह ततोऽभिज्ञापकमिति । यतोऽदो ब्रह्मत्वं नित्यं ततो ज्ञानं तस्याभिज्ञापकम् अवबोधकमेव न जनकमित्यर्थः । तत्रोपपत्तिं व्यतिरेकमुखेनाह ज्ञापकाभावमात्रेणेति । अयमभिप्रायः ब्रह्मत्वं यदि ज्ञानजन्यं स्यात् तर्हि ज्ञाननाशे अयं विलीयेत न च विलीयतेऽतो न जन्यमित्यर्थः ॥ ११८ ॥

ननु ज्ञानिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येवेति शङ्कते अस्त्येवोपासकस्येति । अत्यल्पमिदमुच्यते इत्यभिप्रायेणाह पामराणामिति ॥ ११९ ॥

पामरादीनां विद्यमानमपि ब्रह्मत्वम् अज्ञातत्वात् न पुरुषार्थोपयोगीत्याशङ्क्य अज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापि समानमित्याह अज्ञानादपुमर्थत्वमिति । ननु तर्ह्युपासनं किमर्थमभिधीयते इत्याशङ्क्य इतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टान्तपूर्वकमाह उपवासादिति ॥ १२० ॥

ततोऽपि सगुणोपास्तिर्निर्गुणोपासनं ततः ॥ १२१ ॥
यावद् विज्ञानसामीप्यं तावत् श्रैष्ठ्यं विवर्धते ।
ब्रह्मज्ञानायते साक्षात् निर्गुणोपासनं शनैः ॥ १२२ ॥
यथा संवादिविभ्रान्तिः फलकाले प्रमायते ।
विद्यायते तथोपास्तिर्मुक्तिकालेऽतिपाकतः ॥ १२३ ॥
संवादिभ्रमतः पुंसः प्रवृत्तस्यान्यमानतः ।
प्रमेति चेत् तथोपास्तिर्मान्तरे कारणायताम् ॥ १२४ ॥
मूर्त्तिध्यानस्य मन्त्रादेरपि कारणता यदि ।
अस्तु नाम तथाप्यत्र प्रत्यासत्तिर्विशिष्यते ॥ १२५ ॥
निर्गुणोपासनं पक्वं समाधिः स्यात् शनैस्ततः ।

इतरानुष्ठानात् श्रैष्ठ्यमेव दर्शयति पामराणां व्यवहृतेरिति ॥ १२१ ॥

उत्तरोत्तरश्रैष्ठ्ये कारणमाह यावदिति । निर्गुणोपासनस्य सर्वश्रैष्ठ्ये कारणमाह ब्रह्मज्ञानायते इति ॥ १२२ ॥

उक्तमर्थं दृष्टान्तप्रदर्शनपूर्वकं द्रढयति यथेति ॥ १२१ ॥

ननु संवादिविभ्रान्तिः स्वयमेव न प्रमा भवति किन्तु तया प्रवृत्तस्योत्थितवस्तुविषयकात् प्रमा जायते इति मनुते संवादीति । अस्तु, तर्हि निर्गुणोपासनमपि निदिध्यासनरूपं सद् ब्रह्मापरोक्षज्ञाने कारणं भविष्यतीत्याह तथोपास्तिरिति ॥ १२४ ॥

नन्वेवं सति मूर्त्तिध्यानादेरपि चित्तैकाग्र्यसम्पादनद्वाराऽपरोक्षज्ञानसाधनत्वं स्यादिति चेत् तदप्यङ्गीक्रियते इत्याह मूर्त्तीति । तर्हि निर्गुणोपासने कोऽतिशयस्तत्राह तथाप्यत्रेति । प्रत्यासत्तिः सामीप्यं ज्ञानं प्रतीति शेषः ॥ १२५ ॥

यः समाधिर्निरोधाख्यः सोऽनायासेन लभ्यते ॥ १२६ ॥
निरोधलाभे पुंसोऽन्तरसङ्गं वस्तु शिष्यते ।
पुनः पुनर्वासितेऽस्मिन् वाक्यात् जायेत तत्त्वधीः ॥१२७॥
निर्विकारासङ्गनित्यस्वप्रकाशैकपूर्णताः ।
बुद्धौ झटिति शास्त्रोक्ता आरोहन्त्यविवादतः ॥ १२८ ॥
योगाभ्यासस्त्वेतदर्थोऽमृतबिन्द्वादिषु श्रुतः ।
एवञ्च दृष्टद्वारापि हेतुत्वादन्यतो वरम् ॥ १२९ ॥
उपेक्ष्य तत्तीर्थयात्रां जपादीनेव कुर्वताम् ।

तस्यावस्थितिप्रकारमेव दर्शयति निर्गुणोपासनमिति। निर्गुणोपासनं यदा पक्वं भवति तदा सविकल्पकसमाधिः स्यात् ततः सविकल्पकसमाधेर्निरोधाख्यो यस्तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिरिति सूत्रोक्तलक्षणो निर्विकल्पः समाधिः सोऽनायासेन लभ्यते ॥१२६॥

भवत्वेवं निर्विकल्पकलाभस्ततः किमित्यत आह । निरोधलाभ इति । ततोऽपि किमित्यत आह पुनः पुनरिति । असङ्गवस्तुनि पुनः पुनर्वासिते भाविते सति वाक्यात् तत्त्वमस्यादिवाक्यात् तत्त्वधीस्तत्त्वज्ञानम् अहं ब्रह्मास्मीत्येवमाकारं जायेतोत्पद्येत ॥ १२७ ॥

तत्त्वज्ञानस्वरूपमेव विशदयति निर्विकारेति ॥ १२८ ॥

ननु निर्विकल्पसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्याशङ्क्य अमृतबिन्द्वादिश्रुतयः प्रमाणमित्याह योगाभ्यास इति । फलितमाह एवञ्चेति एवञ्च सति निर्गुणोपासनस्यापरोक्षज्ञानप्रत्यासत्तिसद्भावे सति दृष्टद्वारापि निर्विकल्पसमाधिलाभद्वारेणापि यस्माद्दृष्टद्वारापि हेतुत्वात् ज्ञानसाधनत्वात् अन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः ॥ १२९ ॥

पिण्डं समुत्सृज्य करं लेढीति न्याय आपतेत् ॥ १३० ॥
उपासकानामप्येवं विचारत्यागतो यदि ।
बाढं तस्माद् विचारस्यासम्भवे योग ईरितः ॥ १३१ ॥
बहुव्याकुलचित्तानां विचारात् तत्त्वधीर्नहि ।
योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥ १३२ ॥
अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम् ।
सांख्यनामा विचारः स्यान्मुख्यो झटिति सिद्धितः १३३
यत् साङ्ख्यैः प्राप्यते स्थानं तत् योगैरपि गम्यते ।

एवं निर्गुणोपासनस्यापरोक्षज्ञानसाधनत्वे सिद्धे सति तदपरित्यज्य न्यत्र प्रवृत्तानां वृथा श्रमः स्यादिति लौकिकन्यायप्रदर्शनेन च उपेक्ष्येति ॥ १३० ॥

ननु तत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्यायसमान इत्याशङ्क्याङ्गीकरोति उपासकानामिति । तर्हि निर्गुणोपासनं कुतः प्रतिपाद्यत इत्यत आह तस्मादिति । यस्मादुक्तन्यायसङ्कटस्तस्माद् विचारासम्भवे योग उपासनमुक्तमित्यर्थः ॥ १३१ ॥

विचारासम्भवे कारणमाह बहुव्याकुलचित्तानामिति । यतो विचारो न सम्भवति अतो योगः कर्त्तव्य इत्याह योगो मुख्य इति । मुख्यत्वे कारणमाह धीदर्प इति । तेन योगेन यतो धीदर्पो नश्यति अतो मुख्य इत्यर्थः ॥ १३२ ॥

एवं व्याकुलचित्तानां योगमुख्यत्वमभिधाय तद्रहितानां विचारो मुख्य इत्याह अव्याकुलधियामिति । सांख्यनामा विचारः सांख्यशब्दवाच्यतत्त्वविचारो मुख्यः । कुत इत्यत आह झटिति सिद्धिद इति ॥ १३३ ॥

योगसांख्ययोरुभयोरपि तत्त्वज्ञानद्वारा मुक्तिसाधनत्वे गीता-

एकं साङ्ख्यञ्च योगञ्च यः पश्यति स पश्यति ॥ १३४ ॥
तत् कारणं साङ्ख्ययोगाधिगम्यमिति हि श्रुतिः।
यस्तु श्रुतेर्विरुद्धः स आभास साङ्ख्ययोगयोः ॥ १३५ ॥
उपासनं नातिपक्कमिह यस्य परत्र सः।
मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते ॥ १३६ ॥
यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्।
तं तमेवैति यच्चित्तस्तेन यातीति शास्त्रतः ॥ १३७ ॥
अन्त्यप्रत्ययतो नूनं भाविजन्म तथा सति।
निर्गुणप्रत्ययोऽपि स्यात् सगुणोपासने यथा ॥ १३८ ॥

वाक्यं प्रमाणयति यदेव सांख्यैरिति। यः सांख्यं योगञ्च फलत एकं पश्यति स शास्त्रार्थं सम्यक् पश्यतीत्यर्थः ॥ १३४ ॥

न केवलं गीतावाक्यं प्रमाणं किन्तु तन्मूलभूता श्रुतिरप्यस्तीत्याह तत्कारणमिति। ननु सांख्ययोगयोरात्मज्ञानसाधनत्वेनाङ्गीकारे तच्छास्त्रप्रतिपादितानां तत्त्वानामपि स्वीकार्यत्वं स्यादित्याशङ्क्याह यस्त्विति। आभासो बाध्यत इत्यर्थः ॥ १३५ ॥

ननूपासनं कुर्वाणस्य तत्त्वज्ञानात् पूर्वं प्रागेव मरणे सति मोक्षो न सिध्येदित्याशङ्क्याह उपासनमिति ॥ १३६ ॥

मरणावसरे ज्ञानाभावेऽपि मुक्तिलाभे प्रमाणमाह यं यं वापीति। यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथा सङ्कल्पितं लोकं नयतीति वाक्याच्चेत्यर्थः ॥ १३७ ॥

नन्वेताभ्यां श्रुतिस्मृतिवाक्याभ्यामन्त्यप्रत्ययतो भाविजन्माभिधीयते न ज्ञानान्मुक्तिरित्याशङ्क्य सगुणध्यानवता विधानमङ्गीकरोति अन्त्यप्रत्यय इति। कथं तर्हि मरणकाले ज्ञानात् मोक्षो भवतीत्येतद्वाक्यद्वय प्रमाणत्वेन उपन्यस्तमित्याशङ्क्याह तथा सतीति। तथा सत्यन्त्य-

नित्यं निर्गुणरूपं तन्नाममात्रेण गीयताम् ।
अर्थतो मोक्ष एवैष संवादि भ्रमवन्मतः ॥ १३९ ॥
तत्सामर्थ्याज्जायते धीर्मूलाविद्यानिवर्त्तिका ।
अविमुक्तोपासनेन तारकब्रह्म बुद्धिवत् ॥ १४० ॥
सकामो निष्काम इति ह्यशरीरो निरिन्द्रियः ।
अभयं हीति मुक्तत्वं तापनीये फलं श्रुतम् ॥ १४१ ॥

प्रत्ययात् भाविजन्मनिश्चये सति सगुणोपासकस्य यथा मरणावसरे पूर्वाभ्यासवशात् सगुणब्रह्माकारः प्रत्ययो जायते एवं निर्गुणोपासकस्यापि निर्गुणब्रह्मगोचरः प्रत्ययो जनिष्यते इत्यर्थः ॥ १३८ ॥

ननु निर्गुणप्रत्ययाभ्यासवशात् निर्गुणब्रह्मप्राप्तिरेव न मुक्तिरित्याशङ्क्य ब्रह्मप्राप्तिमुक्त्योः शब्दमात्रेण भेदो नार्थत इत्याह नित्यमिति । तत् ब्रह्म नित्यमिति निर्गुणमिति नाममात्रेणोच्यतामर्थतस्त्वेष मोक्ष एव स्वरूपावस्थितिर्मुक्तिरित्यभिधानादिति भावः । तत्र दृष्टान्तमाह संवादीति । यथा संवादि भ्रमो नाममात्रेण भ्रम इत्युच्यते वस्तुतस्तु तत्त्वज्ञानमेव तद्वदित्यर्थः ॥ १३९ ॥

ननु निर्गुणोपासनस्य ज्ञानोत्पादकत्वरूपस्य मुक्तिसाधनत्वाभिधानं विरुद्धं मन्यमानस्य तत्त्वज्ञानस्य मोक्षसाधनत्वाभिधानात् विरोध इत्याह तत्सामर्थ्यादिति । तत्र दृष्टान्तमाह अविमुक्तेति ॥ १४० ॥

ननु निर्गुणोपासनस्य मोक्षफलकत्वे किं प्रमाणमित्याशङ्क्याह सकाम इति । सकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते ब्रह्मैव सन् ब्रह्माप्येति अशरीरो निरिन्द्रियोऽप्राणोऽमना अचिद्रूपानन्दमात्रः स्वराड् भवति य एवं वेद, चिन्मात्रोऽमनस्कोऽरूपश्चिन्मात्रोऽहं यं तस्मात् परमेश्वर एवैकमेव तद्भवतो तद्वतनमभयमेतद्ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं

उपासनस्य सामर्थ्यात् विद्योत्पत्तिर्भवेत् ततः ।
नान्यः पन्था इति ह्येतच्छास्त्रं नैव विरुध्यते ॥ १४२ ॥
निष्कामोपासनान्मुक्तिस्तापनीये समीरिता ।
ब्रह्मलोकः सकामस्य शैब्यप्रश्ने समीरितः ॥ १४३ ॥
य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते ।
स एतस्माज्जीवघनात् परं पुरुषमीक्षते ॥ १४४ ॥

वेति रहस्यमित्यादिवाक्यैस्तापनीयोपनिषदि यदि निर्गुणोपासनस्य मोक्षफलत्वेन श्रूयते इत्यर्थः ॥ १४१ ॥

ननूपासनयापि मुक्तिः स्याच्चेन्नान्यः पन्था विद्यतेऽयनाय इति श्रुतिविरोध इत्याशङ्क्य विद्याव्यवधानेन मोक्षप्रदत्वाभिधानान्न विरोध इत्याह उपासनस्येति ॥ १४२ ॥

मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यते इत्युक्तेऽर्थे श्रुतिद्वयं प्रमाणयति निष्कामोपासनादिति ॥ १४३ ॥

तत्र सकामनिष्काम इत्यादि तापनीयवाक्यं पूर्वमेवोदाहृतम् इदानीं प्रश्नोपनिषद्वाक्यमर्थतः पठति य उपास्त इति । यः पुनरेतं त्रिमात्रेणो-मित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स साम-भिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुष-मीक्षते इति सकामस्य ब्रह्मलोकप्राप्तिः श्रूयत इत्यर्थः । ननु शैब्यप्रश्ने सकामस्य ब्रह्मलोकगतिरिति न मुक्तिः प्रतीयते इत्याशङ्क्य तत्र तत्त्व-साक्षात्कारः श्रूयते इत्याह स एतस्मादिति । ब्रह्मलोकं गतः स उपा-सकः एतस्मात् जीवघनात् जीवसमष्टिरूपात् हिरण्यगर्भात् परम् उत्-कृष्टं पुरुषं निरुपाधिकचैतन्यरूपं परमात्मानमीक्षते साक्षात्करोती-त्यर्थः ॥ १४४ ॥

अप्रतीकाधिकरणे तत्क्रतुन्याय ईरितः ।
ब्रह्मलोकफलं तस्मात् सकामस्येति वर्णितम् ॥ १४५ ॥
निर्गुणोपास्तिसामर्थ्यात् तत्र तत्त्वमवेक्षणात् ।
पुनरावर्त्तते नायं कल्पान्ते तु विमुच्यते ॥ १४६ ॥
प्रणवोपास्तयः प्रायो निर्गुणा एव वेदगाः ।
क्वचित् सगुणता प्रोक्ता प्रणवोपासनस्य हि ॥ १४७ ॥
परापरब्रह्मरूप ओङ्कार उपवर्णितः ।
पिप्पलादेन मुनिना सत्यकामाय पृच्छते ॥ १४८ ॥
एतदालम्बनं ज्ञात्वा यो यदिच्छति तस्य तत् ।
इति प्रोक्तं यमेनापि पृच्छते नचिकेतसे ॥ १४९ ॥

किन्तु अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात् तत्क्रतुश्चेत्यत्र कामानुसारेण फलप्राप्तिर्भवतीति प्रतिपादितं तस्मादत्र सकामस्य ब्रह्मलोकगतिरप्युक्ता स्याच्च अप्रतीकेति ॥ १४५ ॥

तर्हि सकामस्य तत्त्वज्ञानं कुतो जायते इत्याशङ्क्याह निर्गुणेति । इमं मानवमावर्त्तं नावर्त्तन्ते न स पुनरावर्त्तते ब्रह्मणा सह ते सर्वे इत्यादिश्रुतिस्मृतिसद्भावात् तस्य पुनः संसारप्राप्तिः किन्तु ब्रह्मणैव च मुक्तिरिति ॥ १४६ ॥

इदानीं प्रणवोपासनप्रसङ्गात् [illegible] तद्द्वैविध्यं दर्शयति प्रणवेति ॥ १४७ ॥

द्वैविध्ये प्रमाणमाह परापरेति । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीत्युभयरूपत्वं प्रतिपादितमित्यर्थः ॥ १४८ ॥

कठवल्ल्यां यमेनापि एतदालम्बनं ज्ञात्वेत्यादिना द्वैविध्यमुक्तमित्याह एतदिति ॥ १४९ ॥

इह वा मरणे वास्य ब्रह्मलोकेऽथवा भवेत् ।
ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणम् ॥ १५० ॥
अर्थोऽयमात्मगीतायामपि स्पष्टमुदीरितः ।
विचाराक्षम आत्मानमुपासीतेति सन्ततम् ॥ १५१ ॥
साक्षात् कर्त्तुमशक्तोऽपि चिन्तयेन्मामशङ्कितः ।
कालेनानुभवारूढो भवेयं फलतो ध्रुवम् ॥ १५२ ॥
यथागाधनिधेर्लब्धौ नोपायः खननं विना ।
मल्लाभेऽपि तथा स्वात्मचिन्तां मुक्त्वा न चापरः ॥ १५३ ॥
देहोपलमपाकृत्य बुद्धिकुद्दालकात् पुनः ।
खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान् ॥ ५४ ॥
अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिन्त्यताम् ।
अप्यसत् प्राप्यते ध्यानात् नित्याप्तं ब्रह्म किं पुनः ॥ १५५ ॥

उक्तमर्थमुपसंहरति इह वेति ॥ १५० ॥

विचारात् तत्त्वज्ञानसम्पादनासमर्थस्य निर्गुणब्रह्मध्यानेऽधिकार इत्ययमर्थ आत्मगीतायाम् सम्यगभिहित इत्याह अर्थोऽयमिति ॥ १५१ ॥

आत्मगीतावाक्यान्येवोदाहरति साक्षात्कर्त्तुमिति ॥ १५२ ॥

ध्यानस्य सम्यक्ज्ञानोपायत्वे दृष्टान्तमाह यथेति । दार्ष्टान्तिके योजयति मल्लाभेऽपीति ॥ १५३ ॥

व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनाह देहोपलमिति ॥ १५४ ॥

एतेऽसमर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यान्तरं पठति अनुभूतेरिति । ध्यानादपि ब्रह्मप्राप्तौ कैमुतिकन्यायमाह अप्यसदिति । उपासकस्य पूर्वमविद्यमानमपि देवत्वादिकं ध्यानात् प्राप्यते किमु स्वरूपत्वेन

अनात्मबुद्धिशैथिल्यं फलं ध्यानाद् दिने दिने ।
पश्यन्नपि न चेत् ध्यायेत् कोऽपरोऽस्मात् पशुर्वद ॥ १५६ ॥
देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयम् ।
पश्यन् मर्त्यो मृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ॥ १५७ ॥
ध्यानदीपमिमं सम्यक् परामृशति यो नरः ।
मुक्तसंशय एवायं ध्यायति ब्रह्म सन्ततम् ॥ १५८ ॥

इति ध्यानदीपः समाप्तः ।

नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात् प्राप्यते इति किमुत वक्तव्यमित्यर्थः ॥ १५५ ॥

ब्रह्मध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह अनात्मेति ॥ १५६ ॥

यदादावुपपादितमर्थं सङ्क्षिप्य दर्शयति देहाभिमानमिति । मरणशीले देहेऽहम् इत्यभिमानपरित्यागात् स्वयममृतो भूत्वा अस्मिन्नेव शरीरे स्वस्य निजं स्वरूपं सदानन्दचिद्रूपं ब्रह्म प्राप्नोतीत्यर्थः ॥ १५७ ॥

ग्रन्थचिन्तनफलमाह ध्यानदीपमिति ॥ १५८ ॥

इति ध्यानदीपव्याख्या समाप्ता ।

दशमपरिच्छेदः ।

नाटकदीपः ।

परमात्माऽद्वयानन्दपूर्णः पूर्वं स्वमायया ।
स्वयमेव जगद् भूत्वा प्राविशत् जीवरूपतः ॥ १ ॥
ब्रह्माद्युत्तमदेहेषु प्रविष्टो देवताभवत् ।
मर्त्याद्यधमदेहेषु स्थितो भजति देवताम् ॥ २ ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
अर्थो नाटकदीपस्य मया संक्षिप्य वर्ण्यते ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवतातत्त्वानुस्मरणलक्षणं मङ्गलमाचरन् मन्दाधिकारिणामनायासेन निष्प्रपञ्चब्रह्मात्मतत्त्वप्रतिपत्तिसिद्धये अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते शिष्याणां बोधसिद्ध्यर्थं तत्त्वज्ञैः कल्पितः क्रमः इति न्यायमनुसृत्याध्यारोपं तावदाह परमात्मेति । पूर्वं सृष्टेः प्राक् अद्वयानन्दपूर्णः सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयं विज्ञानमानन्दं ब्रह्म पूर्णमदः पूर्णमिदमित्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानन्दरूपः परिपूर्णः परात्मा स्वमायया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुत्युक्तया स्वनिष्ठया मायाशक्त्या स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत सच्च त्यच्चाभवदित्यादिश्रुतेः स्वयमेव जगदाकारतां प्राप्य जीवरूपतः प्राविशत् तत् सृष्ट्वा तदेवानुप्राविशत् अनेन जीवेनात्मनाऽनुप्रविश्य इत्यादिश्रुतेर्जीवरूपेण प्रविष्टवानित्यर्थः ॥ १ ॥

ननु परमात्मन एव एकस्य सर्वशरीरेषु प्रविष्टत्वेन पूज्यपूजकादि-

अनेकजन्मभजनात् स्वविचारं चिकीर्षति ।
विचारेण विनष्टायां मायायां शिष्यते स्वयम् ॥ ३ ॥
अद्वयानन्दरूपस्य सद्वयत्वञ्च दुःखिता ।
बन्धः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्य्यते ॥ ४ ॥
अविचारकृतो बन्धो विचारेण निवर्त्तते ।
तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ॥ ५ ॥

भावेन प्रतीयमान उत्तमाधमादिभावो विरुध्येतेत्याशङ्क्याह ब्रह्मादीति । नायं स्वाभाविक उत्तमाधमभावः किन्तु शरीरोपाधिनिबन्धनोऽतो न विरोध इति भावः ॥ २ ॥

इत्थमात्मन्यध्यारोपं सङ्क्षेपेण प्रदर्श्य यथाक्रमं तदपवादं सङ्क्षिप्य दर्शयति अनेकेति । अनेकजन्मभजनादनेकेषु जन्मस्वनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपात् भजनात् स्वविचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं चिकीर्षति कर्त्तुमिच्छति ततः स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याद्वयानन्दत्वादिरूपाच्छादिकायाम् अज्ञानाविद्यादिपदवाच्यायां विनष्टायां निवृत्तायां सत्यां स्वयमद्वयानन्दपूर्णः परमात्मैवावशिष्यते ॥ ३ ॥

ननु तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते इत्यादिश्रुतिभिर्बन्धनिवर्त्तकत्वस्य मोक्षस्य ज्ञानफलत्वाभिधानात् परमात्मावशेषस्य तत्फलत्वाभिधानमनुपपन्नमित्याशङ्क्याह अद्वयेति । अद्वितीये ब्रह्मणि वास्तवस्य बन्धस्य मोक्षस्य वा दुर्निरूपत्वात् दुःखित्वादिभ्रम एव बन्धः स्वरूपावस्थितिलक्षणः तन्निवृत्तिरेव मोक्षः अतो न श्रुतिविरोध इति भावः ॥ ४ ॥

ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति स्मृतेर्मोक्षस्य कर्मसाध्यत्वावगमात् किमनेन विचारजनितज्ञानेनेत्यत आह अवि-

अहमित्यभिमन्ता यः कर्तासौ तस्य साधनम् ।
मनस्तस्य क्रिये अन्तर्बहिर्वृत्ती क्रमोत्थिते ॥ ६ ॥
अन्तर्मुखाहमित्येषा वृत्तिः कर्तारमुल्लिखेत् ।
बहिर्मुखेदमित्येषा बाह्यं वस्त्विदमुल्लिखेत् ॥ ७ ॥
इदमो ये विशेषाः स्युर्गन्धरूपरसादयः ।
असाङ्कर्येण तान् भिन्द्यात् घ्राणादीन्द्रियपञ्चकम् ॥ ८ ॥
कर्तारञ्च क्रियां तद्वद् व्यावृत्तविषयानपि ।

चारेति । विचारप्रागभावोपलक्षितात्मानन्तरस्य बन्धस्य न विचारजन्यज्ञानादन्यतो निवृत्तिरुपपद्यते उदाहृतश्रुतौ च संविविशब्देन चित्तशुद्धिरेवाभिधीयते न मोक्ष इति भावः । विचारेण बन्धनिवृत्तिश्चेत्ता कि विशेषेण विचारेणेत्यत आह तस्मादिति । तत्त्वसाक्षात्कारपर्यन्तं सर्वदा विचारं कुर्यादित्यर्थः ॥ ५ ॥

तत्र जीवस्य स्वरूपं तावद् दर्शयति अहमिति । यश्चिदाभासविशिष्टोऽहङ्कारो व्यवहारदशायां देहादावहमित्यभिमन्यते असौ कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः । तस्य किं करणमित्याकाङ्क्षायामाह तस्य साधनं मन इति । कामादिवृत्तिमानन्तःकरणभागो मनः । करणस्य क्रियाव्याप्तत्वात् तत्क्रियां दर्शयति तस्य क्रिये इति ॥ ६ ॥

अनयोरन्तर्बहिर्वृत्त्योः स्वरूपं विषयञ्च विविच्य दर्शयति अन्तर्मुखेति । इदमित्येषेति बहिर्वृत्तेः स्वरूपाभिनयः अवशिष्टेन विषयप्रदर्शनं बाह्यं देहाद् बहिर्वर्तमानमिदन्तया निर्दिश्यमानं वस्तु उल्लिखेत् विषयीकुर्यादित्यर्थः ॥ ७ ॥

ननु मनसैव सर्वव्यवहारसिद्धौ चक्षुरादिवैयर्थ्यं प्रसज्येत इत्याशङ्क्याह इदम इति । मनसेदमिति सामान्यमात्रं ज्ञायते न तु तद्विशेषो गन्धादि अतस्तद्ग्रहणाय घ्राणादिकमुपयुज्यत इत्यर्थः ॥ ८ ॥

एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति

स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुः ॥ ९ ॥
ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहम् ।
इति भासयते सर्वं नृत्यशालास्थदीपवत् ॥ १० ॥
नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्त्तकीम् ।
दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥ ११ ॥
अहङ्कारं धियं साक्षी विषयानपि भासयेत् ।
अहङ्काराद्यभावेऽपि स्वयं भात्येव पूर्ववत् ॥ १२ ॥
निरन्तरं भासमाने कूटस्थे ज्ञप्तिरूपतः ।
तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा ॥ १३ ॥

कर्तारमिति । कर्तारं पूर्वोक्तमहङ्काररूपं क्रियामहमिदमाकारकमनोवृत्तिरूपां व्यावृत्तविषयानपि व्यावृत्तानन्योन्यविलक्षणान् रूपादिव्याकारान् शब्दादीन् विषयांश्च एकयत्नेन युगपदेव यश्चिद्वपुः चिद्रूप एव सन् स्फोरयेत् प्रकाशयेत् असावत्र वेदान्तशास्त्रे साक्षीत्युच्यत इत्यर्थः ॥ ९ ॥

साक्षिण एकयत्नेन सर्वस्फोरकत्वमभिनीय दर्शयति ईक्ष इति । ईक्षे रूपमहं पश्यामि इत्येवं दृष्टृदर्शनदृश्यलक्षणां त्रिपुटीमेकयत्नेन भासयते एवं शृणोमीत्यादावपि योज्यम् । युगपदविकारित्वेनानेकावभासकत्वे दृष्टान्तमाह नृत्येति ॥ १० ॥

दृष्टान्तं स्पष्टयति नृत्यशालास्थित इति । अविशेषेण प्रभ्वादिविषयविशेषाभावनाय तद्गतादिविकारमन्तरेण इति यावत् ॥ ११ ॥

दार्ष्टान्तिके योजयति अहङ्कारमिति । सुषुप्त्यादावहङ्काराद्यभावेऽपि तत्साक्षितया भात्येव इत्यर्थः ॥ १२ ॥

ननु प्रकाशरूपाया बुद्धेरेवाहङ्कारादिसर्वावभासकत्वसम्भवात् किमर्थमतिरिक्तसाक्षिकल्पनमित्याशङ्क्याह निरन्तरमिति । कूटस्थे निर्वि-

अहङ्कारः प्रभुः सभ्या विषया नर्त्तकी मतिः ।
तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ॥ १४ ॥
स्वस्थानसंस्थितो दीपः सर्वतो भासयेद् यथा ।
स्थिरस्थायी तथा साक्षी बहिरन्तः प्रकाशयेत् ॥ १५ ॥
बहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि ।
विषया बाह्यदेशस्था देहस्यान्तरहङ्कृतिः ॥ १६ ॥

कारे साक्षिणि सम्बिद्रूपतः स्वप्रकाशचैतन्यरूपतया निरन्तरं भासमाने दृष्टा स्फुरति यतीयं बुद्धिस्तद्भासा तस्य साक्षिणः स्वरूपचैतन्यस्य भासा दीप्त्या भास्यमाना प्रकाश्यमानैवानेकधा घटोऽयं पटोऽयं मठोऽयमित्यादिनानाकारेण नृत्यति विक्रियते । अयं भावः यतो बुद्धेर्विकारितया जडत्वात् स्वतः स्फूर्त्तिराहित्यम् अतस्तद्व्यतिरिक्तः सर्वावभासकः साक्षी अभ्युपगन्तव्य इति ॥ १३ ॥

उक्तमर्थं श्रोतृबुद्धिसौकर्याय नाटकत्वेन निरूपयति अहङ्कार इति । विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात् तत्प्राभिमानिप्रभुतुल्यत्वमहङ्कारस्य परिसरवर्त्तित्वेऽपि विषयाणां तद्राहित्यात् सभ्यपुरुषसाम्यं नानाविधविकारवत्त्वान्नर्त्तकीसाम्यं धियः धीविक्रियाणाम् अनुकूलव्यापारकत्वात् तालादिधारिसमानत्वम् इन्द्रियाणाम् एतत् सर्वावभासकत्वात् साक्षिणो दीपसादृश्यमिति द्रष्टव्यम् ॥ १४ ॥

ननु साक्षिणोऽप्यहङ्काराद्यवभासकत्वे तेन तेन सम्बन्धापगमागमरूपविकारित्वं स्यादित्याशङ्क्याह स्वस्थानेति । दीपो यथा गमनादिविकारशून्यः स्वदेशेऽवस्थित एव सन् सन्निहिताखिलपदार्थमेव भासयति एवं साक्ष्यपीति भावः ॥ १५ ॥

ननु साक्षिणो बहिरन्तरवभासकत्वमनुपपन्नम् अपूर्वमनपरमनन्तर-

अन्तस्था धीः सहैवाक्षैर्बहिर्याति पुनः पुनः ।
भास्यबुद्धिस्थचाञ्चल्यं साक्षिण्यारोप्यते वृथा ॥ १७ ॥
गृहान्तरागतः स्वल्पो गवाक्षादातपोऽचलः ।
तत्र हस्ते नर्त्यमाने नृत्यतीवातपो यथा ॥ १८ ॥
निजस्थानस्थितः साक्षी बहिरन्तर्गमागमौ ।
अकुर्वन् बुद्धिचाञ्चल्यात् करोतीव तथा तथा ॥ १९ ॥
न बाह्यो नान्तरः साक्षी बुद्धेर्देशौ हि तावुभौ ।
बुद्ध्याद्यशेषसंशान्तौ यत्र भात्यस्ति तत्र सः ॥ २० ॥

अबाह्यमिति श्रुत्या तस्य बाह्यान्तरविभागाभावाभिधानात् इत्याशयेनाह बहिरन्तरिति । तस्य बाह्यत्वं तस्य चान्तरत्वमित्येतत् चाह मिथ्या इति ॥ १६ ॥

ननु स्थिरस्थायी तदा साक्षी बहिरन्तः प्रकाशयेत् इत्यविकारिणः साक्षिणो बहिरन्तरवभासकत्वोक्तिरयुक्ता अहं घटं पश्यामीत्यत्र अहं-मित्यन्तरहङ्कारसाक्षितया प्रथमतोऽवभासकस्यानन्तरं घटं पश्यामि इति घटाकारवृत्तिस्फुरणरूपेण बहिर्निर्गमानुभवात् इत्याशङ्क्याह अन्तस्थेति । इन्द्रियोपाधिकत्वेन देहान्तरवस्थिता बुद्धिरुपाधिरूपा चक्षुरादिद्वारा भूयो भूयो निर्गच्छति तदा च तद्गतचाञ्चल्यं तद्भासके साक्षिण्यारोप्यते अतो न वास्तवं साक्षिचाञ्चल्यमिति भावः ॥ १७ ॥

भासके भास्यचाञ्चल्यारोपः क्व दृष्ट इत्याशङ्क्याह गृहान्तरेति । गवाक्षात् गृहान्तरागतः स्वल्प आतपोऽचल एव वर्तते तत्र तस्मिन्नातपे पुरुषेण हस्ते नर्त्यमाने इतस्ततश्चाल्यमाने यथा आतपो नृत्यतीव चलतीव दृश्यते न तु चलतीत्यर्थः ॥ १८ ॥

दार्ष्टान्तिकमाह निजस्थानेति ॥ १९ ॥

निजस्थानस्थित इत्यनेन किं बाह्यादिदेशस्थितत्वमेवोच्यते नेत्याह

देशः कोऽपि न भासेत यदि तर्ह्यस्त्वदेशभाक् ।
सर्वदेशप्रकॢप्त्यैव सर्वगत्वं न तु स्वतः ॥ २१ ॥
अन्तर्बहिर्वा सर्वं वा यं देशं परिकल्पयेत् ।
बुद्धिस्तद्देशगः साक्षी तथा वस्तुषु योजयेत् ॥ २२ ॥
यद्यद्रूपादि कल्प्येत बुद्ध्या तत् तत् प्रकाशयन् ।
तस्य तस्य भवेत् साक्षी स्वतो वाग्बुद्ध्यगोचरः ॥ २३ ॥
कथं तादृङ् मया ग्राह्यमिति चेन्मैव गृह्यताम् ।
सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते ॥ २४ ॥

न बाह्य इति । तत्र हेतुमाह बुद्धेरिति । तर्हि किं विवक्षितमित्यत आह बुद्ध्यादीति । आदिशब्देन इन्द्रियादयो गृह्यन्ते । संशान्तिशब्देन तत्प्रतीत्युपरतिर्विवक्षिता ॥ २० ॥

ननु सर्वव्यवहारोपरतौ देश एव नोपलभ्यते कुतस्तद्विशिष्टत्वमुच्यते इत्याशङ्क्याभिप्रायमाविष्करोति देश इति । देशादिकल्पनाधिष्ठानस्य स्वातिरिक्तदेशापेक्षा नास्तीति भावः । ननु देशाद्यभावे शास्त्रे सर्वगतत्वसर्वसाक्षित्वाद्युक्तिर्विरुध्येत इत्यत आह सर्वदेशेति । स्वाभाविकमेव किं न स्यादित्यत आह न त्विति । अद्वितीयत्वादसङ्गत्वाच्चेति भावः ॥ २१ ॥

सर्वगतत्ववत् सर्वसाक्षित्वमपि न वास्तवमित्याह अन्तर्बहिर्वेति ॥ २२ ॥

तथा वस्तुषु योजयेदित्येतत् प्रपञ्चयति यद्यदिति । तर्हि किं तस्य निजं रूपमित्यत आह स्वत इति ॥ २३ ॥

वाग्बुद्ध्यगोचरत्वे मुमुक्षुणा न गृह्यते इति शङ्कते कथमिति । अग्राह्यत्वमिष्टमेवेत्याह मैवेति । नन्वात्मनो ग्राह्यत्वाभावे विचारेण विनष्टायां मायायां शिष्यते शून्यमित्युक्तं परमात्मावशेषणं न सिध्ये-

न तत्र मानापेक्षास्ति स्वप्रकाशस्वरूपतः ।
तादृग्व्युत्पत्त्यपेक्षा चेत् श्रुतिं पठ गुरोर्मुखात् ॥२५॥
यदि सर्वग्रहत्यागोऽशक्यस्तर्हि धियं व्रज ।
शरणं तदधीनोऽन्तर्बहिर्वैषोऽनुभूयताम् ॥ २६ ॥

इति नाटकदीपः समाप्तः ।

दित्यत आह सर्वेपेति। आत्मातिरिक्तस्य द्वैतस्य मिथ्यात्वनिश्चयेन तत्प्रतीत्युपशान्तौ आत्मैव सत्यतयावशिष्यते इति भावः ॥ २४ ॥

यद्यप्युक्तन्यायेन आत्मा परिशिष्यते तथापि तदपरोक्षाय किञ्चित् प्रमाणमपेक्षितमित्यत आह न तत्रेति। तत्र हेतुमाह स्वप्रकाशेति। ननु आत्मा स्वप्रकाशतया स्वस्फूर्त्तौ मानं नापेक्षते इति व्युत्पत्तिसिद्धये मानमपेक्षितमित्याशङ्क्य श्रुतिरेवात्र प्रमाणमित्याह तादृगिति ॥२५॥

एवमुत्तमाधिकारिण आत्मानुभवोपायमभिधाय मन्दाधिकारिणस्तं दर्शयति यदि सर्वेति। बुद्धिशरणत्वे किं फलमित्यत आह तदधीन इति। बुद्ध्या यद्यत् परिकल्प्यते बाह्यमान्तरं वा तस्य तस्य साक्षित्वेन तदधीनः परमात्मा तत्रैवानुभूयतामित्यर्थः ॥ २६ ॥

इति नाटकदीपव्याख्या समाप्ता ।

एकादशपरिच्छेदः ।

ब्रह्मानन्दे योगानन्दः ।

ब्रह्मानन्दं प्रवक्ष्यामि ज्ञाते तस्मिन्नशेषतः ।
ऐहिकामुष्मिकानर्थव्रातं हित्वा सुखायते ॥ १ ॥

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
ब्रह्मानन्दाभिधे ग्रन्थे योगानन्दो विविच्यते ॥

चिकीर्षितस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय परिपन्थिकल्मषनिवृत्तयेऽभिमतदेवतातत्त्वानुसन्धानलक्षणं मङ्गलमाचरन् श्रोतृप्रवृत्तिसिद्धये प्रयोजनमभिधेयमाविष्कुर्वन् ग्रन्थारम्भं प्रतिजानीते ब्रह्मानन्दमिति। निर्विशेषं परं ब्रह्म साक्षात् कर्तुमनीश्वराः । ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणैरिति सविशेषब्रह्मस्वरूपाणां देवतात्वात् तस्य निर्विशेषब्रह्मस्वरूपत्वाभिधानात् ब्रह्मैव आनन्दो ब्रह्मेत्यादिश्रुतिभिरानन्दरूपताभिधानात् ब्रह्मानन्दमित्यानन्दरूपस्य ब्रह्मणो वाचकशब्दप्रयोगेण यद्धि मनसा ध्यायति तद्धि वाचा वदतीति श्रुतिप्रोक्तन्यायेन ब्रह्मानुसन्धानलक्षणं मङ्गलाचरणं सिद्धम् । ब्रह्मैव सर्ववेदान्तप्रतिपाद्यत्वात् तत्प्रकरणरूपस्यास्य ग्रन्थस्यापि तदेव विषय इति ब्रह्मशब्दप्रयोगेण विषयश्च सूचितः ऐहिकामुष्मिकानिष्टनिवृत्तीष्टप्राप्तिरूपं प्रयोजनद्वयं सूचत एवोक्तं ब्रह्मानन्दमिति ब्रह्म चासावानन्दश्चेति ब्रह्मानन्दः वाच्यवाचकयोरभेदोपचारात् तत्प्रतिपादको

ब्रह्मवित् परमाप्नोति शोकं तरति चात्मवित् ।
रसो ब्रह्मरसं लब्ध्वानन्दी भवति नान्यथा ॥ २ ॥

यन्योऽपि ब्रह्मानन्दः तं प्रवक्ष्यामीति तस्मिन् प्रतिपाद्यप्रतिपादक-रूपे ब्रह्मानन्दे ज्ञातेऽवगते सति ऐहिकामुष्मिकानर्थव्रातं ऐहि-कानाम् इह लोके भवानां देहपुत्रादिष्वहं ममाभिमानप्रयुक्तानाम् आध्या-त्मिकादितापानाम् आमुष्मिकानाम् अमुष्मिन् परलोके भवानाञ्च तेषामन-र्थानां व्रातः समूहः तम् अयमतो निःशेषं यथा भवति तथा हित्वा परित्यज्य सुखायते सुखस्वरूपं ब्रह्मैव भवति ॥ १ ॥

ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वे बहूनि श्रुतिस्मृतिवाक्यानि प्रमाणानि सन्तीति प्रदर्शयितुकामस्तावत् ब्रह्मविदाप्नोति परं श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु इति च वाक्यद्वयमर्थतः पठति ब्रह्मविदिति । ब्रह्म वेत्तीति ब्रह्मवित् परम् उत्कृष्टमानन्दरूपं ब्रह्म प्राप्नोति आत्मवित् भूमशब्दवाच्यं देशकालवस्तुपरिच्छेदशून्यम् आत्मानं वेत्तीति आत्मवित् शोकं संसारं दुःखं शोचयतीति शोकस्तमो-मूलः संसारः तं तरति अतिक्रामति । तदुदाहृततैत्तिरीयकश्रुति वाक्ये ब्रह्मज्ञानस्य परप्राप्तिहेतुतैवावभासते नानन्दप्राप्तिहेतुत्वमित्या-शङ्क्य आनन्दप्राप्तिहेतुत्वप्रतिपादनपरं रसो वै सः रसं ह्येवायं लब्ध्वा-नन्दीभवति इति तदीयमेव वाक्यमर्थतः पठति रस इति । सत्यं ज्ञान-मनन्तं ब्रह्म तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इति प्रक-रणादौ ब्रह्मात्मशब्दाभ्यां अभिहितो य आत्मा स रसः सारः आनन्द-रूप इत्यर्थः । रसमानन्दरूपं ब्रह्म लब्ध्वा ब्रह्माहमस्मीति ज्ञानेन प्राप्यानन्दीभवति अपरिच्छिन्ननिरतिशयसुखवान् भवति । उक्तमर्थं व्यतिरेकप्रदर्शनेन द्रढयति नान्यथेति । अन्यथा ब्रह्मात्मत्वज्ञानं विना बाह्यनामात्मकाद्युपायेन नानन्दीभवतीत्यर्थः ॥ २ ॥

प्रतिष्ठां विन्दते स्वस्मिन् यदा स्यादथ सोऽभयः ।
कुरुतेऽस्मिन्नन्तरञ्चेदथ तस्य भयं भवेत् ॥ ३ ॥
वायुः सूर्यो वह्निरिन्द्रो मृत्युर्जन्मान्तरेऽन्तरम् ।
कृत्वा धर्मं विजानन्तोऽप्यस्माद् भीत्या चरन्ति हि ॥४॥

एवमन्वयमुखेन इष्टप्राप्त्यनिष्टनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्य अन्वयव्यतिरेकाभ्यामनर्थनिवृत्तिप्रदर्शनपरं यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति इति वाक्यद्वयमर्थतोऽनुक्रामति प्रतिष्ठामिति । अस्यायमर्थः यदा यस्मिन् काले हीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः, एवेत्ययमेवानर्थनिवृत्त्युपायो नान्य इति नियमार्थः, एष मुमुक्षुरेतस्मिन् विद्वदनुभवगम्ये अदृश्ये इन्द्रियागोचरे अनात्म्ये अनात्मीये स्वरूपतया स्वकीयत्वरहिते अनिरुक्ते निरुक्तं निर्वचनं शब्देनाभिधानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने निलीयतेऽस्मिन्निति निलयनमाधारः स न विद्यते यस्य तस्मिन् सर्वाधिष्ठाने इत्यर्थः अभयं द्वितीयाद्वै भयं भवतीति श्रुतेर्भयशब्देनात्र भयहेतुर्भेदो लक्ष्यते न विद्यते भयं भेदो यथा भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येन स्थितिः ब्रह्माहमस्मीत्यवस्थानं प्रतिष्ठा तां विन्दते गुरूपसत्त्यादिना श्रवणादिकं कृत्वा लभते अथ तदानीमेव स एवं विद्वान् अभयं भयरहितं मोक्षरूपमद्वितीयं ब्रह्म गतः प्राप्तो भवति ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः यदा यस्मिन्नेव काले एषः पूर्वोक्तः एतस्मिन्नदृश्यमानत्वादिगुणके प्रमाणसिद्धे ब्रह्मणि उत् इति निपातोऽप्यर्थः अरमल्पमप्यन्तरं भेदं उपास्योपासकादिलक्षणं कुरुते पश्यति धातूनामनेकार्थत्वात् अथ तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति ॥ ३ ॥

आनन्दं ब्रह्मणो विद्वान् बिभेति कुतश्चन ।
एतमेव तपेन्नैषा चिन्ता कर्माग्निसम्भृता ॥ ५ ॥
एवं विद्वान् कर्मणी द्वे हित्वात्मानं स्मरेत् सदा ।

भेददर्शिनां भयं भवतीत्येतद् दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्मात् वातः पवते इत्यादिवाक्यमर्थतः पठति वायुरिति । वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पञ्चापि देवताः अतीते जन्मनि धर्ममिष्टापूर्त्तादिलक्षणं विजानन्तोऽपि ज्ञानपूर्वकमनुष्ठितवन्तोऽपि अन्तरं प्रत्यग्ब्रह्मणोर्भेदं कृत्वास्मात् ब्रह्मणो भीत्यास्मिन् वाय्वादिजन्मनि चरन्ति स्वस्वव्यापारेषु सदा वर्त्तन्ते श्रूयते च भयादस्याग्निस्तपति भयात् तपति सूर्य्यः भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः इति कठश्रुतौ यमेनोक्तां प्रसिद्धिं दर्शयति ॥ ४ ॥

ननु तरति शोकमात्मविदित्यादिषूदाहृतवाक्येषु ब्रह्मानन्दज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नाभिधीयते इत्याशङ्क्य तथा प्रतिपादनपरं वाक्यमुदाहरति आनन्दमिति । राहोः शिर इतिवत् भेदव्यपदेश औपचारिकः ब्रह्मणः स्वरूपभूतमानन्दं विद्वानपरोक्षतया जानन् पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति । ननु तत्त्वविदः पापादेर्भयं नाप्नोति एतत् कुतोऽवगम्यते इत्याशङ्क्य तत्प्रतिपादकम् एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति वाक्यमर्थतः पठति एतमिति । कर्माग्निसंभृता पुण्यपापरूपं कर्मैवाग्निः करणाकरणाभ्याम् अग्निवत् सन्तापहेतुत्वात् तेन संभृता सम्पादिता यथा पुण्यं नाकरवं कस्मात् पापन्तु कृतवान् कुत इत्येवंरूपा चिन्ता एतमेव तत्त्वविदमेव न तपेत् न सन्तापयेत् नात्मज्ञ-विहीनं स तु तया चिन्तया सदा सन्तप्यते इत्यर्थः ॥ ५ ॥

कृते च कर्मणी स्वात्मरूपेणैवैष पश्यति ॥ ६ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥ ७ ॥

पुण्यपापयोरतापकत्वे हेतुप्रदर्शनपरं स य एवं विद्वान् एते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुते इति वाक्यद्वयमर्थतः पठति एवमिति । स यः कश्चित् पुमान् एवमुक्तप्रकारेण यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन प्रकारेण विद्वान् जानन् वर्तते स एते पुण्यपापे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं प्रत्यञ्चं स्पृणुते प्रीणयति सदा करोतीत्यर्थः यतः पुण्यपापयोर्मिथ्यात्वानुसन्धानेन ज्ञानं कृतम् अतस्तद्विषया चिन्तैव नास्ति कुतस्तन्निमित्तकतापः इत्यभिप्रायः । किञ्च एष विद्वान् एते पूर्वोक्ते पुण्यपापरूपे कर्मणी देहेन्द्रियादिप्रवृत्त्या जनिते स्वात्मरूपेणैव इदं सर्वं यदयमात्मेत्यादिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः अतः स्वात्मभिन्नत्वादतापकत्वमिति भावः ॥ ६ ॥

ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यापुण्यलक्षणेषु कर्मस्वसंख्यातेषु अपरिच्छिन्नत्वेनात्मतयानुसन्धानायोग्येषु सत्सु कथं तद्विषया चिन्ता न भवेदित्याशङ्क्य सञ्चितानां तेषां तत्त्वज्ञानेन विनाशितत्वान्न चिन्ताजनकत्वमित्यभिप्रायेण हृदयग्रन्थ्यादिनिवृत्तिपरं मुण्डकादिश्रुतिषु स्थितं वाक्यं पठति भिद्यत इति । परावरे परमपि हिरण्यगर्भादिकं पदम् अवरं निकृष्टं यस्मात् तस्मिन् परात्मनि दृष्टे साक्षात्कृतेऽस्य साक्षात्कारवतो हृदयस्य बुद्धिचिदात्मनः ग्रन्थिवद्दृढसम्बन्धत्वात् ग्रन्थिरन्योन्याध्यासो भिद्यते विदीर्यते, विनश्यतीत्यर्थः, सर्वसंशयाः आत्मा देहादिव्यतिरिक्तो न वा देहादिव्यतिरिक्तोऽपि

तमेव विद्वानत्येति मृत्युं पन्था न चेतरः ।
ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मभाक् ॥ ८ ॥

कर्तृत्वादिधर्मयोगी स वा अकर्तृत्वेऽपि तस्य ब्रह्मणो भेदोऽस्ति न वा अभेदेऽपि तज्ज्ञानं कर्मादिसहितं मुक्तिसाधनं केवलं वेत्याद्यश्छिद्यन्ते द्वैधीक्रियन्ते तत्त्वतः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति भावः, कर्माणि सञ्चितानि पुण्यापुण्यलक्षणानि क्षीयन्ते स्वनिदानाज्ञाननाशेन विनश्यन्तीत्यर्थः ॥ ७ ॥

ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे । विद्याञ्चाविद्याञ्च यस्तद् वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इत्यादिश्रुतेः कर्मणैव हि संसिद्धिमास्थिता जनकादयः । यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतम् । एवं तपश्च विद्या च संयुक्तं भेषजं महत् इत्यादिस्मृतेश्च केवलस्य ज्ञानस्य समुच्चितस्य वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशङ्क्य उदाहृतवाक्यस्थस्य कर्मपदस्य पापनिवृत्तिपरत्वात् संसिद्धिशब्देन च ज्ञानसाधनचित्तशुद्ध्यभिधानात् विद्याशब्देन चोपासनाया विवक्षितत्वाच्च कर्मणो मुक्तिसाधनत्वम् इत्यभिप्रायेण साधनान्तरनिषेधपरं तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय इति श्वेताश्वतरवाक्यमर्थतः पठति तमेवेति । तं पूर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येति अतिक्रामति इतरः समुच्चयरूपः केवलकर्मरूपो वा पन्था मार्गो मोक्षोपायो न च नैव विद्यते । ननूदाहृतायां श्रुतौ अन्वयव्यतिरेकाभ्यां ऐहिकानिष्टनिवृत्तिरेव प्रत्यमानभासते नामुष्मिकीत्याशङ्क्य आमुष्मिकस्यानिष्टस्य भाविजन्मपूर्वकत्वात् तस्य निदानक्लेशाभावप्रतिपादकं ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिरिति श्वेताश्वतरवाक्यमर्थतः पठति ज्ञात्वेति । देवं स्वप्रकाशं प्रत्यगभिन्नं ब्रह्म ज्ञात्वाऽपरोक्षतयानुभूय स्थितस्य

देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान् ।
नैनं कृताकृते पुण्यपापे तापयतः क्वचित् ॥ ९ ॥
इत्यादिश्रुतयो बह्वः पुराणैः स्मृतिभिः सह ।
ब्रह्मज्ञानेऽनर्थहानिमानन्दञ्चाप्यघोषयन् ॥ १० ॥

कामक्रोधादीनां सर्वेषां पाप्मनां हानिर्भवति तैः पाप्मशब्दाभिधेयैः रागादिभिः क्लेशैः क्षीणैर्नष्टैर्भाविजन्महेतुकर्मारम्भायोगात् तत्र प्राप्नोतीत्यर्थः ॥ ८ ॥

ननु शोकतरणादिरूपं फलं श्रूयत एव नानुभूयते ज्ञानिनामपीष्टानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिदर्शनादित्याशङ्क्य दृढापरोक्षज्ञानिनां तदभावप्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थतः पठति देवमिति । धैर्यवान् ब्रह्मचर्यादिसाधनसम्पन्नो देवं चिदानन्दादिलक्षणं मत्वावगम्यात्रैवास्मिन्नेव जन्मनि हर्षशोकौ जहाति । एतमेव तपेदेषा चिन्ता कर्माग्निसंभृता इत्युक्तार्थे विशेषप्रदर्शनपरं नैनं कृताकृते पुण्यपापे तपत इति ब्राह्मणवाक्यमर्थतः पठति नैनमिति । पूर्वमकृतं पुण्यं कृतञ्च पापं तत्त्वविदस्तापहेतुर्न भवतीत्युक्तम् इह तु कृतमकृतं वा पुण्यं पापं वा तथाविधं तापकं न भवतीत्युच्यते इति विशेषः । तथाहि तापो नाम चित्तविकारविशेषः पुण्यं कृतं सत् हर्षलक्षणं विकारमुत्पादयति अकृतं विषादं पापं पुनस्तद्वैपरीत्येनाकृतं हर्षमुत्पादयति कृतं विषादम् । तत्त्वविदस्तु उभे अपि उभयविधविकारहेतू न कदाचित् भवतः अविक्रियब्रह्मरूपत्वज्ञानादित्यभिप्रायः ॥ ९ ॥

नन्वियन्त्येव वाक्यानि प्रमाणानि नेत्याशङ्क्याह इत्यादिश्रुतय इति । आदिशब्देन इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः । य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापि यन्ति ।

आनन्दस्त्रिविधो ब्रह्मानन्दो विद्यासुखं तथा ।
विषयानन्द इत्यादौ ब्रह्मानन्दो विविच्यते ॥ ११ ॥
भृगुः पुत्रः पितुः श्रुत्वा वरुणाद् ब्रह्मलक्षणम् ।
अन्नप्राणमनोबुद्धीस्त्यक्त्वानन्दं विजज्ञिवान् ॥ १२ ॥

तत् यो यो देवानां प्रत्यबुध्यत स एव तदभवत्। निचाय्य तं मृत्युमुखात् प्रमुच्यते इत्याद्याः श्रुतयो दृश्यन्ते। सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। सम्पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति। चेतनस्यात्मविज्ञानाद् विमुक्तिः परमात्मना इत्यादिपुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः। उदाहृतानां श्रुतिस्मृतिपुराणवाक्यानां सर्वेषां तात्पर्य्यमाह ब्रह्मज्ञाने इति ॥ १० ॥

ननु ब्रह्मानन्द इत्यानन्दस्य ब्रह्मपदेन विशेषणादानन्दान्तरमप्यस्तीत्यवगम्यते स कतिविधः कीदृशश्चानन्द इत्याकाङ्क्षायां तद्भेददर्शनपूर्वकं ब्रह्मानन्दविवेचनं प्रतिजानीते आनन्द इति। ब्रह्मानन्दो विद्यानन्दो विषयानन्द इत्यनेन प्रकारेण आनन्दस्य त्रैविध्यमवगन्तव्यं तत्रेतरयोरानन्दयोर्ब्रह्मानन्दमूलत्वादादावध्यायत्रयेण ब्रह्मानन्दो विभज्य प्रदर्श्यत इत्यर्थः ॥ ११ ॥

तत्रादौ तावत्तैत्तिरीयश्रुतिपर्य्यालोचनायामानन्दरूपं ब्रह्मावगम्यते इत्यभिप्रायेण भृगुवल्ल्या अर्थं संक्षेपेण दर्शयति भृगुरिति। भृगुनामकः पुत्रः पितुर्वरुणाख्यात् ब्रह्मलक्षणं यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तत् ब्रह्मेत्येवं रूपं श्रुत्वा अन्नादिकोशेषु तल्लक्षणासम्भवेन तेषाम् अब्रह्मत्वं निश्चित्य आनन्दमानन्दमयकोशस्य पुच्छावयवत्वेन ब्रह्म पुच्छं प्रतिष्ठेति श्रुतं बिम्बभूतमानन्दं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्यर्थः ॥ १२ ॥

आनन्दादेव भूतानि जायन्ते तेन जीवनम् ।
तेषां लयश्च तत्रातो ब्रह्मानन्दो न संशयः ॥ १३ ॥
भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ।
ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो ॥ १४ ॥

कथमानन्दे तल्लक्षणं योजितवानित्याशङ्क्य तद्योजनप्रकारदर्शनपरम् आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति इति वाक्यमर्थतः पठति आनन्दादिति । पाप्यधर्मनिमित्तादानन्दादेव भूतानि प्राणिनो जायन्ते तेन विषयभोगादिनिमित्तेनानन्देन जीवनं प्राप्नुवन्ति तेषां प्राणिनां लयश्च तत्र तस्मिन् सुषुप्तिकालीने स्वस्वरूपभूते आनन्द एव भवति सुषुप्तावानन्दव्यतिरेकेण कस्याप्यनुभवाभावात् । अत आनन्दो ब्रह्मैव सर्वानुभवसिद्धत्वात्तत्र न संशयः कर्त्तव्य इति भावः ॥ १३ ॥

एवं तैत्तिरीयश्रुतितात्पर्यालोचनया ब्रह्मण आनन्दरूपतां प्रदर्श्य छान्दोग्यश्रुतितात्पर्यालोचनयापि तां दिदर्शयिषुः सनत्कुमारनारदसंवादरूपे सप्तमाध्याये स्थितस्य भूमरूपप्रतिपादकस्य यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमेत्यादिवाक्यस्यार्थं संक्षेपेणाह भूतोत्पत्तेरिति । भूतानामाकाशादीनां तत्कार्याणां जरायुजाण्डजादीनां चोत्पत्तेः पूर्वं त्रिपुटीद्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारस्त्रिपुटी सैव द्वैतं तस्य वर्जनमभावस्तस्मात् भूमा देशतः कालतो वस्तुतो वा परिच्छेदशून्यः परमात्मा भारानयने द्व्यानयनमिति न्यायाद् भूमैवासीदित्यध्याहारः । तदेव द्वैतवर्जनमुपपादयति ज्ञात्रिति । ज्ञातृज्ञानज्ञेयादिरूपा त्रिपुटी प्रलयकाले नासीत् एतत् सर्ववेदान्तसम्मतमिति हिशब्दप्रयुक्तान्वयाभिप्रायः ॥ १४ ॥

विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः ।
ज्ञेयाः शब्दादयो नैतत् त्रयमुत्पत्तितः पुरा ॥ १५ ॥
त्रयाभावे तु निर्द्वैतः पूर्ण एवानुभूयते ।
समाधिसुप्तिमूर्च्छासु पूर्णः सृष्टेः पुरा तथा ॥ १६ ॥
यो भूमा तत् सुखं नाल्पे सुखं त्रेधा विभेदिनि ।
सनत्कुमारः प्राहैवं नारदायातिशोकिने ॥ १७ ॥

इदानीं ज्ञात्रादिस्वरूपं दर्शयति विज्ञानमय इति । परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयः ज्ञाता, मनसि प्रतिबिम्बितं मनोमयशब्दवाच्यं चैतन्यं ज्ञानं, शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः एतं त्रयं कार्य्यत्वादुत्पत्तेः पुरा कारणव्यतिरेकेण नासीदित्यर्थः ॥ १५ ॥

फलितमाह त्रयेति । ज्ञात्रादित्रयाभावे निर्द्वैतो द्वैतरहितः पूर्ण एवात्मानुभूयते । कुत्रानुभूयत इत्यत आह समाधीति । विद्वदनुभवप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुषुप्तिमूर्च्छयोरुदाहरणं सुषुप्त्याद्युत्थितस्य द्वैतादर्शनकारणस्यान्यथानुपपत्त्या निर्द्वैतस्य तदनुभवितुः सिद्धिरिति भावः । भवतु सुषुप्त्यादावद्वैतसिद्धिः प्रकृते किमायातमित्यत आह पूर्ण इति । यथा सुषुप्त्यादौ परिच्छेदकाभावात् पूर्णस्तथा सृष्टेः पुरापि तदभावादित्यर्थः ॥ १६ ॥

अस्तु ब्रह्मणः पूर्णत्वम् आनन्दरूपत्वे किमायातम् इत्याशङ्क्य अन्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत् सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोऽनुक्रामति यो भूमेति । यः पूर्वोक्तः भूमा स सुखरूप एव द्वितीयस्य दुःखहेतोरभावात् इत्यर्थः अल्पे परिच्छिन्ने तस्यैव विवरणं त्रेधा विभेदिनीति ज्ञेयगर्भं विशेषणं सुखं तत्र न विद्यते इत्यर्थः । एवं कस्मै केनाभिहितम् इत्यत आह सनत्कुमार इति ।

स पुराणान् पञ्च वेदान् शास्त्राणि विविधानि च ।
ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच हि ॥ १८ ॥
वेदाभ्यासात् पुरा तापत्रयमात्रेण शोकिता ।
पश्चात्त्वभ्यासविस्मारभङ्गगर्वैश्च शोकिता ॥ १९ ॥
सोऽहं विद्वन् प्रशोचामि शोकपारं नयस्व माम् ।
इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः ॥ २० ॥

नारदस्य शिष्यत्वे कारणमाह अतिशोकिन इति । अतिशोकिनेऽतिशोकोऽस्यास्तीत्यतिशोकी तस्मै ॥ १७ ॥

तस्यातिशोकित्वे हेतुमाह सपुराणानिति । नारदः पुराणैः सह वर्तन्त इति सपुराणाः पञ्च वेदास्तान् विविधानि च शास्त्राणि विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः ॥ १८ ॥

ननु वेदशास्त्रविषयज्ञानस्य शोकनिवर्तकत्वेन प्रसिद्धस्य कथमतिशयशोकहेतुत्वमित्यत आह वेदाभ्यासादिति । तापत्रयेणाध्यात्मिकादिलक्षणेनैव शोकिता शोकोऽस्यास्तीति शोकी तस्य भावस्तत्ता आसीदित्यध्याहारः । पश्चात्त्विति तुशब्दो विशेषद्योतनार्थः । अभ्यासः पाठाद्यावर्तनं, विस्मारः पठितस्य विस्मरणं, भङ्गः ततोऽधिकेन तिरस्कारः, गर्वो न्यूनदर्शनेन स्वाधिक्यबुद्धिः, एतैश्च कारणैः शोकित्वम् ॥१९॥

नन्वेवं सर्वज्ञस्यापि नारदस्य अतिशोकित्वं जातमिति कुतोऽवगम्यते इत्याशङ्क्य सोऽहं भगवः शोचामीति तदीयादेव वाक्यादवगतमित्यभिप्रेत्य तं मा भगवाञ्छोकस्य पारं तारयत्विति तन्निवृत्त्युपाये तेन पृष्टे सति सनत्कुमारो भूमशब्दवाच्यं सुखरूपं ब्रह्मैव ज्ञायमानं शोकनिवृत्त्युपाय इति सुखं त्वेव विजिज्ञासितव्यमित्यारभ्योत्तरग्रन्थसन्दर्भेण उक्तवानित्याह सोऽहमिति ॥ २० ॥

सुखं वैषयिकं शोकसहस्रेणावृतत्वतः ।
दुःखमेवेति मत्वाह नास्त्यत्रास्ति सुखमित्यसौ ॥ २१ ॥
ननु द्वैते सुखं माभूदद्वैतेऽप्यस्ति नो सुखम् ।
अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् ॥ २२ ॥
मास्त्वद्वैते सुखं किन्तु सुखमद्वैतमेव हि ।
किं मानमिति चेन्नास्ति मानाकाङ्क्षा स्वयं प्रभे ॥ २३ ॥
स्वप्रभत्वे भवद्वाक्यं मानं यस्माद् भवानिदम् ।
अद्वैतमभ्युपेत्यास्मिन् सुखं नास्तीति भाषते ॥ २४ ॥

ननु स्वर्गादिजन्येषु सुखेषु बहुषु सत्सु नास्त्येव सुखमस्तीत्युक्तिरनुपपन्नेति चेन्न तेषां दुःखानुषङ्गेण विषसंपृक्तान्नवत् बहुदुःखरूपत्वस्य मुनिनाभिप्रेतत्वादित्याह सुखमिति ॥ २१ ॥

द्वैते सुखाभावमङ्गीकृत्याद्वैतेऽपि तमाशङ्कते नन्विति । तत्रानुपलब्धिं प्रमाणयति अस्ति चेदिति । अद्वैते यदि सुखं विद्येत तर्हि विषयसुखादिवदुपलभ्येत यतो नोपलभ्यते अतो नास्तीत्यर्थः । ननूपलभ्यत एवेत्याशङ्क्यमानं प्रत्याह तथेति । अनुभवस्यानुभवित्रनुभव्यसापेक्षत्वाद्द्वैतहानिरिति भावः ॥ २२ ॥

अद्वैतस्य सुखाधिकरणत्वनिषेधमङ्गीकरोति सिद्धान्ती मास्त्विति । तत्र हेतुमाह किन्तु सुखमद्वैतमिति । हि यस्मात् कारणात् अद्वैतमेव सुखम् अतः सुखाधिकरणं न भवतीत्यर्थः । अद्वैतं सुखमित्यत्र किं प्रमाणम् इत्याशङ्कानुवादपूर्वकं तस्य स्वप्रकाशत्वात् प्रमाणप्रश्न एवानुपपन्न इत्याह किं मानमिति चेदिति ॥ २३ ॥

ननु स्वप्रकाशत्वेऽपि किं प्रमाणमित्याशङ्क्य त्वदीयमेव वचनं प्रमाणमित्याह स्वप्रभत्व इति । तदुपपादयति यस्मादिति । यतः कारणात् भवता प्रमाणैरपेक्ष्ये चाद्वैतमभ्युपेत्य सुखमेवाश्रियतेऽतः स्वप्रभत्वमित्यर्थः ॥ २४ ॥

नाभ्युपैम्यहमद्वैतं त्वद्वचोऽनूद्य दूषणम् ।
वच्मीति चेत् तदा ब्रूहि किमासीद् द्वैततः पुरा ॥२५॥
किमद्वैतमुत द्वैतमन्यो वा कोटिरन्तिमः ।
अप्रसिद्धो न द्वितीयोऽनुत्पत्तेः शिष्यतेऽग्रिमः ॥ २६ ॥
अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेद् वद ।
निर्दृष्टान्ता सदृष्टान्ता वा कोट्यन्तरमत्र नो ॥ २७ ॥
नानुभूतिर्न दृष्टान्त इति युक्तिस्तु शोभते ।
सदृष्टान्तत्वपक्षे तु दृष्टान्तं वद मे मतम् ॥ २८ ॥

न मयाऽद्वैतमभ्युपगम्यते किन्तु त्वदुक्तमद्वैतमनूद्य दूष्यतेऽतो नोक्तसिद्धिरिति शङ्कते नाभ्युपैमीति। विकल्पासहत्वादद्वैतानभ्युपगमोऽनुपपन्न इति मन्वानः पृच्छति तदेति ॥ २५ ॥

किमत्रस्फुरितं विकल्पं सूचयति किमद्वैतमिति। तृतीयं पक्षं निराकरोति अन्तिम इति। द्वैताद्वैतविलक्षणस्य रूपस्य लोकेऽदर्शनादिति भावः। द्वितीयं पक्षं निराकरोति न द्वितीय इति। तत्र हेतुमाह अनुत्पत्तेरिति। द्वैतस्य तदानीमनुत्पन्नत्वादिति भावः। अतः प्रथमः पक्षः परिशिष्यत इत्याह शिष्यत इति ॥ २६ ॥

नन्वक्तेन प्रकारेणाद्वैतं युक्त्या एव सिध्यति नानुभवेनेति चोदयति अद्वैतेति। अद्वैतसिद्धिर्युक्त्यैवेत्युक्तं विकल्पासहत्वादनुपपन्नमिति मन्वानो युक्तिं विकल्पयति निर्दृष्टान्तेति। विकल्पस्य न्यूनतां निराकरोति कोट्यन्तरमत्र नो इति ॥ २७ ॥

प्रथमं पक्षं सोपहासं निराकरोति नानुभूतिरिति। अद्वैतसिद्धिर्युक्त्यैवेति वदता अनुभूतिस्तावन्नाभ्युपेयते युक्तिस्तु दृष्टान्तप्रदर्शनमन्तरेण न किञ्चित् साधयति अतो न दृष्टान्त इत्युक्तिरयुक्तेति भावः।

अद्वैतः प्रलयो द्वैतानुपलम्भेन सुप्तिवत् ।
इति चेत् सुप्तिरद्वैतेत्यत्र दृष्टान्तमीरय ॥ २८ ॥
दृष्टान्तः परसुप्तिश्चेदहो ते कौशलं महत् ।
यः स्वसुप्तिं न वेत्त्यस्य परसुप्तौ तु का कथा ॥ ३० ॥
निश्चेष्टत्वात् परः सुप्तो यथाहमिति चेत् तदा ।
उदाहर्तुः सुषुप्तेस्ते स्वप्रभत्वं बलाद्भवेत् ॥ ३१ ॥

द्वितीये विकल्पे उभयवादिसम्प्रतिपन्नो दृष्टान्तो वक्तव्य इत्याह अदृष्टान्तेति ॥ २८ ॥

तर्हि दृष्टान्तेनाद्वैतं साधयामीति शङ्कते पूर्वपक्षवादी अद्वैत इति । प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपलब्धिमत्त्वात् यो यो द्वैतानुपलब्धिमान् स स द्वैतरहितः यथा स्वाप इति । नन्वेवं साधयतस्तव स्वसुप्तिर्दृष्टान्तः परसुप्तिर्वा, नाद्ये तस्याः परं प्रत्यसिद्धत्वेन तत्सिद्धये दृष्टान्तान्तरं वक्तव्यमित्याह सुप्तिरिति ॥ २९ ॥

ननु तस्याः परसुप्तिरेव दृष्टान्त इति द्वितीयं विकल्पमाशङ्कते दृष्टान्तः परेति । परसुप्तेरत्यन्ताप्रसिद्धत्वेन त्वया दृष्टान्तीकरणमनुपपन्नमिति दोषमाह सिद्धान्ती अहो इति । यो भवान् सुप्तेरनुभवगम्यत्वानङ्गीकारेण स्वसुप्तिमपि न वेत्ति अस्य तव परसुप्तौ का कथा परसुप्तिज्ञानं न भवतीति किमुत वक्तव्यमिति भावः ॥ ३० ॥

नन्वनुमानात् परसुप्तिसिद्धिरिति शङ्कते निश्चेष्टेति । विमतः परः सुप्तो भवितुमर्हति प्राणादिमत्त्वे सति निश्चेष्टत्वात् मद्वदित्यनुमानादित्यर्थः । एवं तर्हि तव सुप्तेः स्वप्रकाशत्वं परिशिष्यत इत्याह सिद्धान्ती उदाहर्तुरिति । तदा तर्हि मां प्रति स्वसुप्त्युदाहर्तुर्दृष्टान्तीकर्तुस्ते तव सुप्तेः स्वप्रभत्वं स्वप्रकाशत्वं बलात् सुप्त्युदाहरणसामर्थ्यादेव भवेत् ॥ ३१ ॥

नेन्द्रियाणि न दृष्टान्तस्तथाप्यङ्गीकरोषि ताम् ।
इदमेव स्वप्रभत्वं यज्ज्ञानं साधनैर्विना ॥ ३२ ॥
स्तामद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथम् ।
शृणु दुःखं तदा नास्ति ततस्ते शिष्यते सुखम् ॥ ३३ ॥
अन्धः सन्नप्यनन्धः स्याद् विद्धोऽविद्धोऽथ रोग्यपि ।
अरोगीति श्रुतिः प्राह तच्च सर्वे जना विदुः ॥ ३४ ॥

ननु कथं बलाद् भवतीत्याशङ्क्याह नेन्द्रियाणीति । सुप्तिग्राहकाणीन्द्रियाणि न सन्ति तेषां स्वकारणे विलीनत्वात् दृष्टान्तश्च सम्मतिरूपो नास्ति परसुप्तेरप्रसिद्धत्वस्योक्तत्वात् तथापि तां सुषुप्तिम् अङ्गीकरोषि एवञ्च सति साधनैर्विना ज्ञानसाधनमन्तरेणापि भानं प्रकाशनमिति यदिदमेव स्वप्रभत्वं सुषुप्त्या इत्यर्थः । अत्रायं प्रयोगः विमता सुप्तिः स्वप्रकाशा असत्स्वपि ज्ञानसाधनेषु प्रकाशमानत्वात् सांख्याभिमतात्मवत् प्राभाकराभिमतफलज्ञानवच्च ॥ ३२ ॥

इत्थं प्रसङ्गाद् दृष्टान्तत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वञ्च प्रसाध्य तत्र सुखप्रसाधनाय पूर्वपक्षिण आकाङ्क्षामुत्थापयति स्तामद्वैतेति । सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात् सुखमेव परिशिष्यते इत्याह शृण्विति । सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः ॥ ३३ ॥

सुप्तौ दुःखाभावे किं मानमित्याकाङ्क्षायां श्रुत्यनुभवादित्याह अन्ध इति । तस्माद्वा एत सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवति तत् यद्यपीदं भगवः शरीरमन्धं भवत्यनन्धः स भवतीत्यादिश्रुतिर्देहाभिमानप्रयुक्तान्धत्वादीन् दोषान् सुप्तौ वारयति । व्याध्यादिना पीड्यमान-

न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु ।
द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः ॥ २५ ॥
मुखदैन्यप्रकाशाभ्यां परदुःखसुखोहनम् ।
दैन्याद्यभावतो लोष्टे दुःखाद्यूहो न सम्भवेत् ॥ २६ ॥
स्वकीयसुखदुःखे तु नोहनीये ततस्तयोः ।
भावो वेद्योऽनुभूत्यैव तदभावोऽपि नान्यतः ॥ २७ ॥

तथापि सुप्तौ तद्दुःखानुभवो नास्तीत्येतत् सर्वजनप्रसिद्धमि-त्यर्थः ॥ २४ ॥

ननु यत्र दुःखाभावस्तत्र सुखमित्यस्याः व्याप्तेर्लोष्टादौ व्यभिचार इति शङ्कते न दुःखेति । दुःखाभावमात्रेण सुखं कल्पयितुं न शक्यते लोष्टशिलादिषु द्वयाभावस्य सुखदुःखयोरभावस्य प्रदर्शनादि-त्यर्थः । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्नैवमिति परिहरति विषममिति वचो दृष्टान्तवचनं विषमं दार्ष्टान्तिकाननुसारीत्यर्थः ॥ २५ ॥

दृष्टान्तस्याननुकूलत्वमेवोपपादयति मुखेति । अन्यनिष्ठयोर्दुःखसुखयो-रूहनं यथाक्रमं मुखदैन्यविकासाभ्यां लिङ्गाभ्यां कर्त्तव्यम् अयं दुःखी विषण्णवदनत्वात् असंप्रतिपन्नवत् अयं सुखी प्रसन्नवदनत्वात् सम्प्रतिपन्नवत् इत्यर्थः । भवत्वेवं लोके प्रकृते किमायातमित्यत आह दैन्येति । लोष्टादौ मुखदैन्यादिलिङ्गाभावात् सुखदुःखयोरूहनमेव न सम्भवति अतस्तत्र दुःखाभावोऽपि न निषेद्धुं शक्यते इत्यर्थः ॥ २६ ॥

इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति स्वकीयेति । स्वनिष्ठयोस्तु सुखदुःखयोरनुभवविषयत्वादननुमेयत्वं यत-स्ततस्तयोः सुखदुःखयोर्भावः सद्भावो यथानुभूत्यैव वेद्यः प्रत्यक्षेणाव-गम्यते तथा तदभावोऽपि तयोः सुखदुःखयोरभावोऽपि अन्यतः अन्यस्मात् अनुमानादेर्नावगम्यते किन्तु प्रत्यक्षेणैवेत्यर्थः ॥ २७ ॥

तथा सति सुषुप्तौ च दुःखाभावोऽनुभूतितः ।
विरोधिदुःखराहित्यात् सुखं निर्विघ्नमिष्यताम् ॥ ३८ ॥
महत्तरप्रयासेन मृदुशय्यादिसाधनम् ।
कुतः सम्पाद्यते सुप्तौ सुखञ्चेत् तत्र नो भवेत् ॥ ३९ ॥
दुःखनाशार्थमेवैतदिति चेद्रोगिणस्तथा ।
भवत्वरोगिणस्ते तत् सुखायैवेति निश्चिनु ॥ ४० ॥
तर्हि साधनजन्यत्वात् सुखं वैषयिकं भवेत् ।
भवत्वेवात्र निद्रायाः पूर्वं शय्यासनादिजम् ॥ ४१ ॥

फलितमाह तथेति। तथा सति स्वकीयस्य सुखादेरनुभवगम्यत्वे सति सुषुप्तौ स्वकीयसुषुप्तावपि विद्यमानो दुःखाभावोऽनुभवेनैव सिद्धः। ततोऽपि किं तत्राह विरोधीति। सुप्तौ सुखविरोधिनो दुःखस्याभावान्निर्विघ्नं बाधरहितं सुखमिष्यताम् अभ्युपेयताम् ॥ ३८ ॥

शय्यादिसाधनसम्पादनस्यान्यथानुपपत्त्यापि सुषुप्तौ सुखमस्तीत्यभ्युपगम्यते इत्याह महत्तरेति। तत्र तस्यां सुषुप्तौ सुखं न भवेच्चेत् महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडनादिना मृदुशय्यादि कशिपुमञ्चादि सुखसाधनं कुतः कस्मात् कारणात् सम्पाद्यते न कुतोऽपीत्यर्थः ॥ ३९ ॥

उक्तोपपत्तेरन्यथोपपत्तिं शङ्कते दुःखेति। एतत् शय्यादिसाधनसम्पादनं दुःखनिवृत्तिफलकं न निवर्तमिति परिहरति रोगिण इति। रोगादिदुःखे सति तन्निवृत्तये तत्सम्पत्तु तदभावे ते तव निवर्त्यदुःखाभावात् तत्सम्पादनं सुखायैव इत्यवगम्यते इत्यर्थः ॥ ४० ॥

ननु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येतेति शङ्कते तर्हीति। किं निद्रागमनात् पूर्वकालीनस्य विषय-

निद्रायान्तु सुखं यत् तज्जन्यते केन हेतुना ।
सुखाभिमुखधीरादौ पश्चाल्लीनेत् परे सुखे ॥ ४२ ॥
जाग्रत्व्यापृतिभिः श्रान्तो विश्रम्याथ विरोधिनि ।
अपनीते स्वस्थचित्तोऽनुभवेत् विषये सुखम् ॥ ४३ ॥
आत्माभिमुखधीवृत्तौ स्वानन्दः प्रतिबिम्बति ।
अनुभूयैनमत्रापि त्रिपुट्या श्रान्तिमाप्नुयात् ॥ ४४ ॥

जन्यत्वमुच्यते उत निद्राकालीनस्येति विकल्पद्वयमङ्गीकरोति भव-त्विति ॥ ४१ ॥

द्वितीयं निराकरोति निद्रायामिति । सुषुप्तौ शय्याद्यनुसन्धाना-भावात् तज्जन्यत्वं तस्य न सम्भवतीति भावः । ननु निद्रायामजन्य सुखं यद्यस्ति तर्हि विषयसुखवत् कुतो नानुभूयते इत्याशङ्क्य अनु-भविता तदा तस्मिन् निमग्नत्वान्न विषयसुखवदनुभव इत्यभिप्रायेणाह सुखेति । आदौ निद्रायाः पूर्वस्मिन् काले जीवः सुखाभिमुखधीः शय्यादिजन्यसुखाभिमुखी बुद्धिर्यस्य, स तथाविधो भवति पश्चान्निद्रा-काले परे उत्कृष्टे सुखे स्वरूपसुखे मज्जेत् निलीनो भवेत् ॥ ४२ ॥

सङ्क्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपञ्चयति जाग्रदिति । जाग्रद्व्या-पृतिभिर्जागरणावस्थायां क्रियमाणव्यापारविशेषैः श्रान्तो विश्रम्य मृदुशय्यादौ शयनं कृत्वाथानन्तरं विरोधिनि व्यापारजनिते दुःखे-ऽपनीते निवारिते सति स्वस्थचित्तोऽव्याकुलमनाः भूत्वा शय्यादौ विषये जायमानं सुखमनुभवेत् साक्षात् कुर्यात् ॥ ४३ ॥

विषयसुखस्य कीदृशमित्याकाङ्क्षायां तत्स्वरूपं दर्शयन् परे सुखे निमज्जननिमित्तत्वेन तदनुभवेऽपि श्रमं दर्शयति आत्मेति । अना-गतविषयसम्पादनार्दना दुःखमनुभूय तन्निवृत्तौ मृदुशय्यादौ शयानस्य बुद्धिरन्तर्मुखा भवति तस्यां बुद्धिवृत्तौ स्वरूपभूत आनन्दः स्वाभि-

तच्छ्रमस्यापनुत्त्यर्थं जीवो धावेत् परात्मनि ।
तेनैक्यं प्राप्य तत्रत्यो ब्रह्मानन्दः स्वयं भवेत् ॥ ४५ ॥
दृष्टान्ताः शकुनिः श्येनः कुमारश्च महानृपः ।
महाब्राह्मण इत्येते सुप्त्यानन्दे श्रुतिरीताः ॥ ४६ ॥
शकुनिः सूत्रबद्धः सन् दिक्षु व्यापृत्य विश्रमम् ।
अलब्ध्वा बन्धनस्थानं हस्तस्तम्भाद्युपाश्रयेत् ॥ ४७ ॥
जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये ।
स्वप्ने जाग्रति च भ्रान्त्वा क्षीणे कर्मणि लीयते ॥ ४८ ॥

स्वच्छे दर्पणे मुखमिव प्रतिबिम्बति एष हि विषयानन्दः । अतस्तामपि वेलायामेनं विषयानन्दमनुभूय अनुभवित्रनुभवानुभाव्यलक्षणया त्रिपुट्या श्रमं प्राप्नुयादिति ॥ ४४ ॥

ततः किं तत्राह तच्छ्रमस्येति । तस्य त्रिपुटीदर्शनजनितस्य श्रमस्यापनोदनाय स एव जीवः परात्मनि आनन्दरूपे ब्रह्मणि धावेत् गत्वा च तेन ब्रह्मणैक्यं तादात्म्यं गत्वा सता सोम्य तदा सम्पन्नो भवति इति श्रुतेः स्वयमपि तत्रत्यः तस्यां सुप्तौ स्थितो ब्रह्मानन्दो भवेत् ॥ ४५ ॥

उक्तमुपपादिते सौषुप्तानन्दे शकुन्यादयो बहवो दृष्टान्ताः श्रुत्युक्ता विद्यन्त इत्याह दृष्टान्ता इति शकुन्यादिभिः पञ्चभिर्दृष्टान्तैः सौषुप्तानन्दोपपादनेन तत्र सुखं नास्तीति मतं निराकृतम् ॥४६ ॥

तत्र तावत् स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनं हि सोम्य मन इत्यस्य दृष्टान्तदार्ष्टान्तिकप्रतिपादनपरस्य छान्दोग्यश्रुतिवाक्यस्यार्थं सङ्क्षेपेण दर्शयति श्लोकद्वयेन शकुनिरिति । हस्तादौ

श्येनो वेगेन नीडैकलम्पटः शयितुं व्रजेत् ।
जीवः सुप्त्यै तथा धावेद् ब्रह्मानन्दैकलम्पटः ॥ ४९ ॥
अतिबालस्तनं पीत्वा मृदुशय्यागतो हसन् ।
रागद्वेषाद्यनुत्पत्तेरानन्दैकस्वभावभाक् ॥ ५० ॥

कश्चिदाधारे सूत्रेण बद्धः शकुनिः पक्षी आहारादिप्राप्त्यर्थाय दिक्षु प्राच्यादिषु व्यापारं कृत्वा तत्र विश्रमं विश्रम्यन्तेऽलब्ध्वेति विश्रम आधारः तमलब्ध्वा बन्धनस्थानं हस्तादिकमेव यथाश्रयेत् तथा जीवोपाधिभूतं मनोऽपि पुण्यापुण्यफलयोः सुखदुःखयोरनुभवाय स्वप्नजाग्रदवस्थयोस्तत्र तत्र भ्रान्त्वा भोगप्रदे कर्मणि क्षीणे सति स्वोपादानेऽज्ञाने विलीयते तल्लये च तदुपहितो जीवः परमात्मैव भवतीत्यर्थः ॥ ४७ ॥ ४८ ॥

इदानीं श्येनदृष्टान्तप्रपञ्चनपरस्य तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीत्यस्य बृहदारण्यकवाक्यस्यार्थं संक्षिप्याह श्येन इति । यथाकाशे सर्वतः प्रचरन् श्येन एतन्नामा पक्षी गगने सञ्चारनिमित्तश्रमपरिहाराय शयितुं शयनं कर्तुं नीडैकलम्पटः कुलायैकाभिलाषवान् व्रजेत् शीघ्रं गच्छेत् तद्वदेव जीवो मनउपाधिः कश्चिदाभासोऽपि ब्रह्मानन्दैकाभिलाषवान् स्वापाय शीघ्रं गच्छेत् हृदयाकाशमिति शेषः ॥ ४९ ॥

स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीतैवमेवैष एतच्छेत इति कुमारादिदृष्टान्तत्रयदर्शनपरं बृहदारण्यकगतं वाक्यं श्लोकद्वयेन व्याचष्टे अतिबाल इति । यथा स्तनन्धयः शिशुः मातुः स्तनं पायित्वा मृद्वादिगुणवति

महाराजः सार्वभौमः सुतृप्तः सर्वभोगतः।
मानुषानन्दसीमानं प्राप्यानन्दैकमूर्त्तिभाक् ॥ ५१ ॥
महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणाम्।
विद्यानन्दस्य परमां काष्ठां प्राप्यावतिष्ठते ॥ ५२ ॥
मुग्धबुद्धातिबुद्धानां लोके सिद्धा सुखात्मता।
उदाहृतानामन्ये तु दुःखिनो न सुखात्मकाः ॥ ५३ ॥
कुमारादिवदेवायं ब्रह्मानन्दैकतत्परः।
स्त्रीपरिष्वक्तवद् वेद न बाह्यं नापि चान्तरम् ॥ ५४ ॥

तल्पे शायितः स्वकीयादिज्ञानशून्यत्वेन रागादिरहितः सन् सुखमूर्त्तिरेवावतिष्ठते यथा सार्वभौमो राजा अविसंवादबुद्धित्वेऽपि सर्वमानुषानन्दैर्युक्तत्वात् प्रार्थनीयाभावेन रागादिरहित आनन्दमूर्त्तिरेवावभासते यथा महाविप्रो महाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहं कृतकृत्य इत्येवंरूपां विद्यानन्दस्य परमां सीमां जीवन्मुक्ततां प्राप्तः सन् परमानन्दस्वरूप एवावतिष्ठते तथा सुप्तोऽप्यानन्दरूपस्तिष्ठतीति शेषः ॥ ५० ॥ ५१ ॥ ५२ ॥

नन्वेते कुमारादयस्त्रय एव किमिति दृष्टान्तीकृता नान्य इत्याशङ्क्य दृष्टान्तत्रयोदाहरणतात्पर्यमाह मुग्धेति। विवेकशून्यानां मध्येऽतिबालः सुखी विवेकिषु सार्वभौमः अतिविवेकिषु आनन्दसाक्षात्कारवानेव इतरे तु सर्वदा रागादिमत्त्वाद्दुःखिन इति न दृष्टान्तीकृता इत्यर्थः ॥ ५३ ॥

भवन्त्वेते दृष्टान्ताः प्रकृते किमायातमित्याशङ्क्य दार्ष्टान्तिकसुप्तवाक्यस्य तात्पर्यमाह कुमारादीति। कुमारादिवत् कुमारादय इव यथानन्दभाजः एवमयमपि सुप्तो ब्रह्मानन्दैकतत्परः ब्रह्मानन्दैकभागित्यर्थः। ब्रह्मानन्दैकपरत्वे युक्तिप्रदर्शनपरं तद्व यथा प्रियया

बाह्यं रथ्यादिकं वृत्तं गृहकृत्यं यथान्तरम् ।
तथा जागरणं बाह्यं नाडीस्थः स्वप्न आन्तरः ॥ ५५ ॥
पितापि सुप्तावपितेत्यादौ जीवत्ववारणात् ।
सुप्तो ब्रह्मैव नो जीवः संसारित्वासमीक्षणात् ॥ ५६ ॥
पितृत्वाद्यभिमानो यः सुखदुःखाकरः स हि ।
तस्मिन्नपगते तीर्णः सर्वशोकान् भवत्ययम् ॥ ५७ ॥

स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति ज्योतिर्ब्राह्मणगतवाक्यमर्थतोऽनुक्रामति स्त्रीपरिष्वक्त इति । यथा लोके प्रियया स्त्रिया आलिङ्गितः कामी बाह्यान्तरज्ञानशून्यत्वात् सुखमूर्त्तिर्भवति तथा सुषुप्तौ प्राज्ञेन परमात्मनैक्यं गतो जीवो बाह्यादिद्वैतविषयज्ञानाभावात् आनन्दरूप एव भवति इति ॥ ५४ ॥

अथ दृष्टान्तदार्ष्टान्तिकवाक्यस्थयोर्बाह्याभ्यन्तरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति बाह्यमिति ॥ वृत्तं वृत्तान्तं नाडीस्थः जाग्रद्वासनया नाडीमध्ये प्रतीयमानः प्रपञ्चः स्वप्न इत्युच्यते ॥ ५५ ॥

जीवः सुप्तौ ब्रह्मानन्दरूपेणावतिष्ठते इत्यत्र युक्तिप्रदर्शनपराया अत्र पिताऽपिता भवतीत्यादिकायाः श्रुतेस्तात्पर्यमाह पितेति । अत्र सुप्तावाध्यात्मिकानां पितृत्वादिजीवधर्माणां सुषुप्तावेव निवारितत्वात् जीवत्वाप्रतीतौ ब्रह्मत्वेनावशिष्यत इत्यर्थः ॥ ५६ ॥

ननु पितृत्वाद्यभिमानाभावेऽपि दुःखित्वादिसंसारः किं न स्यात् इत्याशङ्क्य संसारस्य देहाद्यभिमानमूलत्वात् तदभावे तदभाव इति सम्यगर्थप्रतिपादकं तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति वचनान्तरं वाक्यं तात्पर्यतो व्याचष्टे पितृत्वादीति ॥ ५७ ॥

सुषुप्तिकाले सकले विलीने तमसावृतः ।
सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥ ५८ ॥
सुखमस्वाप्समत्राहं नैव किञ्चिदवेदिषम् ।
इति द्वे तु सुखाज्ञाने परामृशति चोत्थितः ॥ ५९ ॥
परामर्शोऽनुभूतेऽस्तीत्यासीदनुभवस्तदा ।
चिदात्मत्वात् स्वतो भाति सुखमज्ञानधीस्ततः ॥ ६० ॥

ननूदाहृताभिः श्रुतिभिः सुखप्राप्तिः स्वतोऽभिधीयमाना नोपलभ्यते इत्याशङ्क्य तथा विधानपरं कैवल्यश्रुतिवाक्यमर्थतः पठति सुषुप्तीति । सकले आकाशादिलक्षणे प्रपञ्चे विलीने स्वोपादानभूतायां तमःप्रधानायां प्रकृतौ विलयं गते सति तमसा तया प्रकृत्या आवृत आच्छादितो जीवः सुखरूपं ब्रह्मोपैतीति तस्याः श्रुतेरर्थः ॥ ५८ ॥

न केवलमयं श्रुतिसिद्धोऽर्थः किन्तु सर्वानुभवसिद्धोऽपीत्याह सुखमिति । सुषुप्तेरुत्थितः पुरुषः एतावन्तं कालं सुखमहमस्वाप्सं न किञ्चिदवेदिषमित्येवं निद्राकालीने सुखाज्ञाने परामृशति अतोऽपि सुप्तौ सुखमस्तीत्यवगम्यते ॥ ५९ ॥

ननु परामर्शस्याप्रमाणत्वात् कथं तद्बलात् सुखसिद्धिरित्याशङ्क्य तस्याप्रामाण्येऽपि तस्य पूर्वानुभवबलात् तत्सिद्धिरित्यभिप्रायेणाह परामर्श इति । परामर्शः स्मरणमनुभूत एव विषये भवति नाननुभूतविषये इति तस्माद्धेतोः तदा सुषुप्तौ अनुभव आसीदित्यवगम्यते । ननु सुषुप्तौ मनःप्रभृतीनां ज्ञानकारणानां विलीनत्वात् कथमनुभवसिद्धिरित्याशङ्क्य किं सुखानुभवसाधनं नासीदुच्यते अज्ञानानुभवसाधनं वा नाद्यः स्वप्रकाशचिद्रूपत्वेन सुखस्य करणापेक्षाभावात् न द्वितीयः स्वप्रकाशसुखवदेव तदावरकाज्ञानप्रतीतिसिद्धेरित्यभिप्रायेणाह चिदात्मेति । ततः स्वप्रकाशसुखादज्ञानधीरज्ञानस्य प्रतीतिर्भवतीति ॥ ६० ॥

ब्रह्मविज्ञानमानन्दमिति वाजसनेयिनः ।
पठन्त्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ॥ ६१ ॥
यदज्ञानं तत्र लीनौ तौ विज्ञानमनोमयौ ।
तयोर्हि विलयावस्था निद्राज्ञानञ्च सैव हि ॥ ६२ ॥
विलीनघृतवत् पश्चात् स्याद् विज्ञानमयो घनः ।
विलीनावस्थ आनन्दमयशब्देन कथ्यते ॥ ६३ ॥

ननु सौषुप्तसुखस्य स्वप्रकाशसुखत्वेऽपि ब्रह्मानन्दं स्वयं भवेदित्युक्तं ब्रह्मस्वरूपत्वं न सम्भवति मानाभावादित्याशङ्क्य विज्ञानमानन्दमित्यादिबृहदारण्यकवाक्यस्य सद्भावान्मैवमित्याह ब्रह्मविज्ञानमिति ॥ ६१ ॥

नन्वनुभवकारणयोरेकाधिकरणत्वनियमात् सुखमहमस्वाप्सं न किञ्चिदवेदिषमिति च सौषुप्तानन्दाज्ञानयोर्विज्ञानमयशब्दवाच्येन जीवेन कार्यमाणत्वात् तस्यैव सुखाद्यनुभवितृत्वं वक्तव्यम् इत्याशङ्क्य तदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञाने विलीनत्वात् मैवमित्यभिप्रायेणाह यदज्ञानमिति । न किञ्चिदवेदिषमिति स्मरणस्यान्यथानुपपत्त्या गम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञानमनोमयौ लीनौ विज्ञानत्वाद्याकारं परित्यज्य कारणरूपेणावस्थितौ अतस्तदुपाधिकस्य नानुभवितृत्वमिति भावः । उक्तोपपत्तिमाह तयोरिति । हि यस्मात् तयोर्विज्ञानमनोमययोर्विलीनावस्था निद्रेत्युच्यते विज्ञानविरतिः सुप्तिरित्यभिधानात् तर्हि निद्रायामेव विलीनाविति वक्तव्यमित्याशङ्क्याह अज्ञानमिति । सैव निद्रा विद्वद्भिरज्ञानमिति व्यवह्रियते इत्यर्थः ॥ ६२ ॥

ननु तर्हि सौषुप्तसुखाद्यनुभवकाले कथनो विज्ञानमयस्य प्रबोधे कथं तत्कर्तृत्वमित्याशङ्क्य विलयावस्थायामपि तत्स्वरूपनाशाभावात् विलयावस्थोपाधिमदानन्दमयरूपेणानुभवितृत्वं विज्ञानमय-

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिम्बिता ।
सैव तद्बिम्बसहिता लीनानन्दमयस्ततः ॥ ६४ ॥
अन्तर्मुखोऽयमानन्दमयो ब्रह्मसुखं तदा ।
भुङ्क्ते चिद्बिम्बयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ॥ ६५ ॥
अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृत्तयः ।
इति वेदान्तसिद्धान्तपारगाः प्रवदन्ति हि ॥ ६६ ॥

तद्वाच्यघनीभावोपाधिमत्त्वेन आनन्दत्वं चैकस्य घटते इत्यभिप्रायेणाह विलीनेति । यथाग्निसंयोगादिना विलीनं घृतं पश्चात् शैत्यादिसम्बन्धवशात् घनीभवति एवं जाग्रदादिषु भोगप्रदस्य कर्मणः क्षयवशात् निद्रारूपेण विलीनमन्तःकरणं पुनर्भोगप्रदकर्मवशात् प्रबोधे विज्ञानाकारेण घनीभवति अतस्तदुपाधिक आत्मापि विज्ञानमयो घनः स्यात् स एव पूर्वं विलयावस्थोपाधिकः सन् आनन्दमय उच्यते ॥ ६३ ॥

विलीनावस्थ आनन्दमय इत्युक्तमेवार्थं स्पष्टीकरोति सुप्तीति । सुप्तेः पूर्वक्षणमव्यवहिते क्षणे यान्तर्मुखा बुद्धिवृत्तिः स्वरूपभूतसुखप्रतिबिम्बयुक्ता भवति ततः अनन्तरं तत्प्रतिबिम्बसहिता सैव बुद्धिर्निद्रारूपेण विलीना आनन्दमय इत्यभिधीयते ॥ ६४ ॥

एवमानन्दमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण कर्तृत्वविलये तदानीं सुखानुभवमुपपादयति अन्तर्मुख इति । सुखप्रतिबिम्बसहितान्तर्मुखधीवृत्तिजनितसंस्कारसहिताज्ञानोपाधिकोऽयम् आनन्दमयस्तदा सुप्तौ ब्रह्मसुखं स्वरूपभूतं सुखं चिदाभाससहिताभिरज्ञानादुत्पन्नाभिः सुखादिगोचराभिर्वृत्तिभिः अज्ञानपरिणामविशेषैर्भुङ्क्तेऽनुभवति ॥ ६५ ॥

ननु तर्हि जागरण इव तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशङ्क्य अविद्यावृत्तीनां बुद्धिवृत्तिवत् स्पष्टत्वाभावान्नानु-

माण्डूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटम् ।
आनन्दमयभोक्तृत्वं ब्रह्मानन्दे च भोग्यता ॥ ६७ ॥
एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः ।
आनन्दमय आनन्दभुक् चेतोमयवृत्तिभिः ॥ ६८ ॥
विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना ।
स लयेनैकतां प्राप्तो बहुतण्डुलपिष्टवत् ॥ ६९ ॥

अतः इत्यभिप्रायेणाह अज्ञानेति । इदं कुतोऽवगतमित्यत आह इतीति ॥ ६६ ॥

नन्वानन्दमयो ब्रह्मानन्दं सूक्ष्माभिरविद्यावृत्तिभिर्भुङ्क्ते इत्यत्र किं प्रमाणमित्यत आह माण्डूक्येति । एतच्छब्दार्थमेवाह आनन्देति ॥ ६७ ॥

इदानीं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुख इति माण्डूक्यादिश्रुतिगतं वाक्यमर्थतः पठति एकीभूत इति । सुषुप्तं सुषुप्तिस्थानं तिष्ठतीति सुषुप्तस्थः सुषुप्त्यभिमानीत्यर्थः । आनन्दमय आनन्दप्रचुरः आनन्दभुक् स्वरूपभूतमानन्दं भुङ्क्ते इत्यानन्दभुक् चेतोमयवृत्तिभिश्चैतन्यं तन्मयाः सुखाकारचित्प्रतिबिम्बवाहिता इत्यर्थः ताभिः इत्यन्वयः चेतोमयवृत्तयस्ताभिरानन्दभुगिति योजना ॥ ६८ ॥

तद्वाक्यगतमेकीभूत इति पदस्यार्थमाह विज्ञानेति । य आत्मा पुरा जागरणावस्थायां विज्ञानमयमुख्यैः स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमय इत्यादिश्रुत्युक्तैः रूपैराकारविशेषैर्युक्तोऽभूत् स एवाधुना अनेन विज्ञानमयाद्युपाधिलयेन एकतामेकाकारतां प्राप्तो गतो भवति । तत्र दृष्टान्तमाह बह्विति । बहुतण्डुलजनितपिष्टवदित्यर्थः ॥ ६९ ॥

प्रज्ञानानि पुरा बुद्धिवृत्तयोऽथ घनोऽभवत् ।
घनत्वं हिमबिन्दूनामुदग्देशे यथा तथा ॥ ७० ॥
तद्घनत्वं साक्षिभावं दुःखाभावं प्रचक्षते ।
लौकिकास्तार्किका यावद्दुःखवृत्तिविलोपनात् ॥ ७१ ॥
अज्ञानबिम्बिता चित् स्यान्मुखमानन्दभोजने ।
भुक्तं ब्रह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मणा ॥ ७२ ॥

अथ प्रज्ञानघनशब्दार्थमाह प्रज्ञानानीति । पुरा पूर्वं जाग्रदादौ प्रज्ञानशब्दवाच्या घटादिगोचरा या बुद्धिवृत्तयोऽभवन् ता अथ सुषुप्तिकाले घटादिविषयाभावे सति घनोऽभवत् चिद्रूपेणैकरूपोऽभवत् । तत्र दृष्टान्तमाह घनत्वमिति ॥ ७० ॥

इदानीं प्रज्ञानघनशब्दार्थनिरूपणप्रसङ्गादागतं किञ्चिदाह तद्घनत्वमिति । यदिदं वेदान्तेषु साक्षित्वेनाभिधीयमानं प्रज्ञानघनत्वमस्ति तदेव लौकिकाः शास्त्रसंस्काररहितास्तार्किका वैशेषिकादयः साक्षिभावं दुःखाभावं प्रचक्षते दुःखाभाव इत्याहुः । कुत इत्यत आह यावद् दुःखेति । यावन्तो दुःखवृत्तयस्तासां सर्वासां विलयादित्यर्थः ॥ ७१ ॥

पूर्वोदाहृतश्रुतिवाक्यगतचेतोमुखशब्दार्थमाह अज्ञानेति । आनन्दभोजने सौषुप्तब्रह्मानन्दास्वादने मुखं साधनमज्ञानबिम्बिता चित् स्यात् अज्ञानवृत्तौ प्रतिबिम्बितं चैतन्यमेव भवेत् । ननु सुषुप्तावानन्दमयरूपेण जीवेन ब्रह्मसुखं चेत् भुज्यते तर्हि तत् परित्यज्याथ बहिः कुतो जागरणं दुःखाश्रयमागच्छेत् इत्यत आह भुक्तमिति । पुण्यापुण्यकर्मपाशबद्धत्वात् तेन प्रेरितो जीवः साक्षाद्भुक्तमपि ब्रह्मानन्दं परित्यज्याथ बहिर्याति जागरणादिकं गच्छतीत्यर्थः ॥ ७२ ॥

कर्म जन्मान्तरेऽभूद् यत् तद्योगाद् बुध्यते पुनः ।
इति कैवल्यशाखायां कर्मजो बोध ईरितः ॥ ७३ ॥

कञ्चित् कालं प्रबुद्धस्य ब्रह्मानन्दस्य वासना ।
अनुगच्छेद् यतस्तूष्णीमास्ते निर्विषयः सुखी ॥ ७४ ॥

कर्मभिः प्रेरितः पश्चान्नाना दुःखानि भावयन् ।
शनैर्विस्मरति ब्रह्मानन्दमेषोऽखिलो जनः ॥ ७५ ॥

प्रागूर्ध्वमपि निद्रायाः पक्षपातो दिने दिने ।
ब्रह्मानन्दे नृणां तेन प्राज्ञोऽस्मिन् विवदेत कः ॥ ७६ ॥

एतत् कुतोऽवगम्यते इत्याशङ्क्य पुनश्च जन्मान्तरकर्मयोगात् स एव जीवः स्वपिति प्रबुद्ध इति कैवल्यश्रुतिवाक्यादिति मत्वा तद्वाक्यमर्थतः पठन् तदभिप्रायमाह कर्मेति ॥ ७२ ॥

सुषुप्तौ ब्रह्मानन्दोऽनुभूत इत्यत्र लिङ्गान्तरमप्याह कञ्चिदिति । प्रबुद्धस्य जागरणं प्राप्तस्यापि कञ्चित् कालं स्वल्पकालपर्य्यन्तं सुषुप्तावनुभूतस्य ब्रह्मानन्दस्य वासना संस्कारोऽनुगच्छेदनुवर्त्तते । कुत एतदवगम्यत इत्यत आह यत इति । यतः कारणात् प्रबोधादौ निर्विषयं विषयानुभवरहितोऽपि सुखी तूष्णीमास्ते अतोऽवगम्यते इत्यर्थः ॥ ७४ ॥

तर्हि तथैव तूष्णीं कुतो नावतिष्ठत इत्यत आह कर्मभिरिति । कर्मभिः पूर्वोक्तैश्चोदितः सर्वोऽपि प्राणी पश्चात् नानाविधानि दुःखानि अनुसन्दधानः शनैर्ब्रह्मानन्दं विस्मरति ॥ ७५ ॥

इतोऽपि ब्रह्मानन्दे न विप्रतिपत्तिः कार्य्येत्याह प्रागूर्ध्वमिति । प्रत्यहं मनुष्याणां निद्रायाः प्रागूर्ध्वमपि निद्रारम्भे निद्रावसाने च ब्रह्मानन्दे पक्षपातः स्नेहोऽस्ति यतो निद्रादौ शय्यादि सम्पादयन्ति तदवसाने च तं परित्यक्तुमशक्तास्तूष्णीमासते तेन कारणेन निजानन्दे को बुद्धिमान् विवदेत न कोऽपीत्यर्थः ॥ ७६ ॥

ननु तूष्णीं स्थितौ ब्रह्मानन्दश्चेद्भाति लौकिकाः ।
अलसाश्चरितार्थाः स्युः शास्त्रेण गुरुणात्र किम् ॥ ७७ ॥
बाढं ब्रह्मेति विद्युश्चेत् कृतार्थास्तावतैव ते ।
गुरुशास्त्रे विनात्यन्तं गम्भीरं ब्रह्म वेत्ति कः ॥ ७८ ॥
जानाम्यहं त्वदुक्त्याद्य कुतो मे न कृतार्थता ।
शृण्वत्र त्वादृशं वृत्तं प्राज्ञम्मन्यस्य कस्यचित् ॥ ७९ ॥
चतुर्वेदविदे देयमिति शृण्वन्नवोचत ।
वेदाश्चत्वार इत्येवं वेद्मि मे दीयतां धनम् ॥ ८० ॥
सङ्ख्यामेवैष जानाति न तु वेदानशेषतः ।

चोदयति नन्विति । गुरुशुश्रूषादिलभ्यस्य ब्रह्मानन्दानुभवस्य तूष्णीं स्थितिमात्रलभ्यत्वे गुरुशुश्रूषादिपूर्वकं श्रवणादिकं वृथा स्यादित्यर्थः ॥ ७७ ॥

अयं ब्रह्मानन्द इति ज्ञाने सति कृतार्थता भवत्येव तदेव गुरुशुश्रूषादिकमन्तरेण न सम्भवतीत्याह बाढमिति । अत्यन्तगम्भीरं दुरवगाहम् अवाङ्मनसगम्यं सर्वगं सर्वान्तरं सर्वात्मरूपं ब्रह्म गुरुशास्त्रे विहायान्येन केनाप्युपायेन को जानीयात् न कोऽपीत्यर्थः ॥ ७८ ॥

ननु महावाक्यादेव ब्रह्मानन्दं जानतोऽपि मम न कृतार्थतोपलभ्यते इत्याशङ्कानुवादपूर्वकं सोपहासमुत्तरमाह जानामीति ॥ ७९ ॥

तमेव वृत्तान्तं दर्शयति चतुर्वेदेति । कश्चित् चतुर्वेदविदे कस्मैचिदिदं बहु धनं दातव्यमित्येवंविधं वाक्यं श्रुत्वा वेदाश्चत्वार इत्यस्मादेव वाक्यादहं वेद्मि अतो मे दीयतामिति वक्ति तद्वद्भवानपीत्यर्थः ॥ ८० ॥

यदि तर्हि त्वमप्येवं नाशेषं ब्रह्म वेत्सि हि ॥ ८१ ॥
अखण्डैकरसानन्दे मायातत्कार्य्यवर्जिते ।
अशेषत्वसशेषत्ववार्त्तावसर एव कः ॥ ८२ ॥
शब्दानेव पठस्याहो तेषामर्थञ्च पश्यसि ।
शब्दपाठेऽर्थबोधस्ते सम्पाद्यत्वेन शिष्यते ॥ ८३ ॥
अर्थे व्याकरणाद् बुद्धे साक्षात्कारोऽवशिष्यते ।
स्यात् कृतार्थत्वधीर्यावत् तावद् गुरुमुपास्व भोः ॥ ८४ ॥

ननु वेदाश्चत्वार इति यो वेद स वेदगतां संख्यामेव वेत्ति न तु वेदानां स्वरूपमिति । साम्येन समाधत्ते तर्हीति । एवं चतुर्वेदाभिज्ञस्येव त्वमप्यशेषं सम्पूर्णं यथा भवति तथा ब्रह्म न वेत्सि नैव जानासि ॥ ८१ ॥

ननु संख्यातिरिक्तवेदस्वरूपभेद इव सजातीयादिभेदशून्ये आनन्दैकरूपे ब्रह्मणि ज्ञायमानस्यांशस्याभावात् असम्पूर्णज्ञानित्वोपलम्भो न घटते इति चोदयति अखण्डेति ॥ ८२ ॥

ब्रह्मज्ञानेऽप्यशेषत्वादिकं दर्शयितुं ब्रह्म जानामीति वदन्तं विकल्प्य पृच्छति शब्दानिति । किमखण्डैकरसमद्वयं सच्चिदानन्दस्वरूपमित्यादिशब्दानेव पठसि अहो अथवा तेषां शब्दानामर्थं सजातीयादिभेदशून्यत्वादिकं पश्यसि जानासीति विकल्पार्थः । आद्ये पक्षे सावशेषत्वं दर्शयति शब्दपाठ इति ॥ ८३ ॥

द्वितीयेऽपि तद् दर्शयति अर्थे इति । व्याकरणादित्युपलक्षणं निगमादेः व्याकरणादिना परोक्षज्ञाने सम्पादितेऽपि संशयादिनिरासेनापरोक्षीकरणमवशिष्यते । तर्हि कदा सम्पूर्णत्वं ज्ञानस्येत्याशङ्क्य तदवधिं दर्शयति स्यादिति । यदा कृतार्थत्वबुद्धिरुत्पद्यते तदा ज्ञानस्य सम्पूर्णता भवत्येव इत्यर्थः ॥ ८४ ॥

आस्तामेतत् यत्र यत्र सुखं स्यात् विषयैर्विना ।
तत्र सर्वत्र विद्ध्येतां ब्रह्मानन्दस्य वासनाम् ॥ ८५ ॥
विषयेष्वपि लब्धेषु तदिच्छोपरमे सति ।
अन्तर्मुखमनोवृत्तावानन्दः प्रतिबिम्बति ॥ ८६ ॥
ब्रह्मानन्दो वासना च प्रतिबिम्ब इति त्रयम् ।

एवं प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति आस्तामिति । यत्र यत्र यस्मिन् यस्मिन् काले तूष्णींभावादौ विषयानुभवमन्तरेण सुखं भवति तत्र तत्र सुखस्य विषयजन्यत्वाभावात् सामान्याहङ्काराहतत्वाच्च ब्रह्मानन्दत्वमवगन्तव्यमित्यर्थः ॥ ८५ ॥

एवं ब्रह्मानन्दवासनानन्दौ दर्शयित्वा इदानीमानन्दत्रैविध्यनियमनाय आत्माभिमुखधीवृत्तावभिव्यक्तमेव विषयानन्दं पुनरनुवदति विषयेष्विति । यदा यदा स्रगादिविषयलाभात् तत्तदिच्छोपरमो भवति तदा तदा मनस्यन्तर्मुखे सति तस्मिन् यः स्वात्मानन्दः प्रतिबिम्बितो भवति अयं विषयानन्द इत्यर्थः ॥ ८६ ॥

फलितमाह ब्रह्मानन्द इति । उक्तप्रकारेण स्वप्रकाशतया सुप्तौ प्रतिभासमानो यो ब्रह्मानन्दो यश्च तूष्णीं स्थितौ विषयानुभवमन्तरेण प्रतीयमानो वासनानन्दो योऽप्यभीष्टविषयलाभादन्तर्मुखे मनसि प्रतिबिम्बितो विषयानन्द एतत्त्रितयव्यतिरेकेणास्मिन् जगति न कश्चिदानन्दोऽस्ति ननु ह्यानन्दस्त्रिविधो ब्रह्मानन्दो विद्यासुखं तथा । विषयानन्द इत्यनेन प्रकारेणानन्दत्रैविध्यमुक्तम् इदानीन्तु ब्रह्मानन्दो वासना च प्रतिबिम्ब इति त्रयमिति तद्विलक्षणमानन्दस्य त्रैविध्यमुच्यते अतः पूर्वोत्तरविरोधः, किञ्च यावद् यावदहङ्कारो विस्मृतोऽभ्यासयोगतः, तावत् तावत् सूक्ष्मदृष्टेर्निजानन्दोऽनुमीयते इति तत्र सुखादुदासीनत्वेऽप्यानन्दवासनाम्, उपेक्ष्य सुखमानन्दं भावयन्नेव तत्पर इति चोक्तप्रकारद्वयाति-

अन्तरेण जगत्यस्मिन्नानन्दो नास्ति कश्चन ॥ ८७ ॥

रिक्तौ निजानन्दमुख्यानन्दावभिधीयेते तथा द्वितीयाध्याये मन्दप्रज्ञन्तु जिज्ञासुमात्मानन्देन बोधयेदिति आत्मानन्दस्ततोऽन्यो विधीयते एवं तृतीयाध्याये योगानन्दः पुरोक्त इत्यत्र योगानन्दोऽपि कश्चिदवभासते ब्रह्मानन्दाभिधे ग्रन्थे तृतीयाध्याय ईरितः अद्वैतानन्द एव स्यादित्यत्राद्वैतानन्दश्चान्योऽवगम्यते अतः अन्तरेण जगत्यस्मिन्नानन्दो नास्ति कश्चनेत्युक्तिर्विरुध्येत इति चेत् नैवं विद्यानन्दस्य विषयानन्दवदन्तःकरणवृत्तिविशेषत्वेन विषयानन्दे चान्तर्भावस्य विषयानन्दवत् विद्यानन्दो धीवृत्तिरूपक इत्यत्र धीवृत्तिरूपत्वाभिधानेन विवक्षितत्वात् निजानन्दमुख्यानन्दात्मानन्दयोगानन्दाद्वैतानन्दानान्तु ब्रह्मानन्दानतिरिक्तत्वाच्च । तथा हि यावद्यावदहङ्कारेत्याद्युदाहृते श्लोके योगलक्षणोपायगम्यतया योगानन्दत्वेन विवक्षितस्य निजानन्दस्यैव न द्वैतं भासते नापि निद्रा तत्रास्ति यत् सुखम् स ब्रह्मानन्द इत्याह भगवानर्जुनं प्रतीत्यत्रिपुटीलोप एव ब्रह्मानन्दत्वाभिधानात् निजानन्दो ब्रह्मानन्दात् न भिद्यते तथा मुख्यानन्दोऽपि ब्रह्मानन्द एव तथा च विषयानन्दो वासनानन्द इत्यत्र आनन्दो जनयत्यस्ते ब्रह्मानन्दः स्वयं प्रभ इत्यत्र जन्यत्वेनाभ्युपगतयोर्विषयानन्दवासनानन्दयोर्जनकत्वेनाभिहितस्य ब्रह्मानन्दस्यैव तादृक् पुमानुदासीनकालेऽपीत्युदाहृत एव श्लोके आनन्दवासनाम् उपेक्ष्य मुख्यमानन्दं भावयत्येव तत्पर इति मुख्यानन्दत्वाभिधानात् आत्मानन्दाद्वैतानन्दयोस्तु ब्रह्मानन्दत्वं योगानन्दः पुरोक्तो यः स आत्मानन्द इष्यतामिति तृतीयाध्यायादौ प्रथमाध्याये योगानन्दतया विवक्षितस्य ब्रह्मानन्दस्यैव योगानन्दशब्देनानुवादपूर्वकम् आत्मानन्दतामभिधाय कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेदिति प्रश्नपूर्वकम् आकाशादिस्वदेहान्तमित्यादिना अद्वितीयस्य ब्रह्मत्वप्रतिपादनादद्वयत्वम् । तस्मात् ब्रह्मानन्दो वासना च प्रतिबिम्ब इत्युक्तं त्रैविध्यं

तथा च विषयानन्दो वासनानन्द इत्यमू।
आनन्दौ जनयन्नास्ते ब्रह्मानन्दः स्वयंप्रभः ॥ ८८ ॥
श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाशचिदात्मके।
ब्रह्मानन्दे सुप्तिकाले सिद्धे सत्यन्यदा शृणु ॥ ८९ ॥

मुख्यं तर्हि नन्वेवं वासनानन्दाद् ब्रह्मानन्दादपीतरं वेत्तु योगी निजानन्दमित्यत्र निजानन्दस्य ब्रह्मानन्दवासनानन्दाभ्यां भेदेन निर्देशो न युज्यते इति न शङ्कनीयम् एकस्यैव ब्रह्मानन्दस्य जगत्कारणोपाधिसाहित्यराहित्यभेदेन भेदव्यपदेशोपपत्तेः। तथा हि ब्रह्मानन्दनिरूपणावसरे आनन्दादेव भूतानि जायन्ते इत्यादिना जगत्कारणत्वाभिधानेन ब्रह्मानन्दस्य समायत्वमवगम्यते निर्मायस्य जगत्कारणत्वानुपपत्तेः। निजानन्दनिरूपणकालेऽपि यावद् यावदहङ्कार इत्यादिना सकारणस्याहङ्कारस्य विलयप्रतिपादनात् निजानन्दस्य निर्मायत्वमिति सर्वमनवद्यम् ॥ ८७ ॥

नन्वस्मिन्नध्याये ब्रह्मानन्दविवेचनस्यैव प्रस्तुतत्वात् इतरानन्दद्वयप्रतिपादनं प्रकृतासङ्गतमित्याशङ्क्य तयोर्ब्रह्मानन्दजन्यत्वेन तद्बोधोपयोगित्वान्न प्रकृतासङ्गतमित्यभिप्रायेणाह तथा चेति। तथा च परमानन्दस्यैवंविध्ये सति यः स्वप्रकाश आनन्दो विषयानन्दवासनानन्दौ जनयति स ब्रह्मानन्दो वेदितव्य इत्यर्थः ॥ ८८ ॥

वृत्तानुसंकीर्तनपूर्वकमुत्तरग्रन्थमवतारयति श्रुतीति। श्रुतिभिः सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति इत्यादिभिस्तदाकृताभिर्युक्तिभिः सुखमहमस्वाप्समित्यादिपरामर्शान्यथानुपपत्त्यादिभिः अनुभूत्या चार्थापत्तिकल्पितेन लोकप्रानुभवेन च सुषुप्तिकाले स्वप्रकाशो ब्रह्मानन्दः साधितः परमन्यदा जागरणस्वप्नावस्थयोरपि यो ब्रह्मानन्दप्राप्त्युपायो वक्ष्यते तं शृण्वित्यर्थः ॥ ८९ ॥

स आनन्दमयः सुप्तौ स विज्ञानमयात्मताम् ।
गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः ॥ ९० ॥
नेत्रे जागरणं कण्ठे स्वप्नः सुप्तिर्हृदम्बुजे ।
आपादमस्तकं देहं व्याप्य जागर्त्ति चेतनः ॥ ९१ ॥
देहतादात्म्यमापन्नस्तप्तायःपिण्डवत् ततः ।
अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ॥ ९२ ॥
उदासीनः सुखी दुःखीत्यवस्थात्रयमेत्यसौ ।
सुखदुःखे कर्म्मकार्य्ये त्वौदासीन्यं स्वभावतः ॥ ९३ ॥

प्रतिज्ञातमेव ब्रह्मानन्दावगमोपायं दर्शयितुं तदुपोद्घातत्वेन कर्मनिमित्तां जीवस्यावस्थात्रयप्राप्तिं दर्शयति स आनन्दमय इति । सुप्तौ सुषुप्तिकाले विलीनावस्थ आनन्दमयशब्देन कथ्यते इत्युक्तो य आनन्दमयः स विज्ञानशब्दाभिधेयबुद्ध्युपाधिसम्पर्केण विज्ञानमयतां प्राप्य स्थानभेदतो वक्ष्यमाणस्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेण गच्छति ॥ ९० ॥

इदानीं जाग्रदाद्यवस्थोपयोगीनि स्थानानि दर्शयति नेत्र इति । नेत्रशब्दस्य सर्वदेहोपलक्षणपरतामभिप्रेत्य नेत्रे जागरणमित्यस्यार्थमाह आपादेति । चेतनो जीवः ॥ ९१ ॥

देहं व्याप्य इत्यनेन विवक्षितमर्थं दृष्टान्तप्रदर्शनेन स्पष्टयति देहतादात्म्यमिति । तत्र प्रथमपादमाह अहमिति । यतो मनुष्यत्वादिजातिमता देहेन तादात्म्यं प्राप्तः ततः अहं मनुष्य इत्येवं निश्चित्य संशयादिरहितत्वेन स्थित्यैवावतिष्ठते ॥ ९२ ॥

देहतादात्म्याभिमानोत्पन्नावस्थात्रयमपि दर्शयति उदासीन इति । तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञापनाय विशेषणभूतयोः सुखदुःखयोः कर्मकार्यत्वं दर्शयति सुखेति ॥ ९३ ॥

बाह्यभोगान्मनोराज्यात् सुखदुःखे द्विधा मते ।
सुखदुःखान्तरालेषु भवेत् तूष्णीमवस्थितिः ॥ ९४ ॥
न कापि चिन्ता मेऽस्त्यद्य सुखमास इति ब्रुवन् ।
औदासीन्ये निजानन्दभानं वक्त्यखिलो जनः ॥ ९५ ॥
अहमस्मीत्यहङ्कारसामान्याच्छादितत्वतः ।
निजानन्दो न मुख्योऽयं किन्त्वसौ तस्य वासना ॥ ९६ ॥
नीरपूरितभाण्डस्य बाह्ये शैत्यं न तज्जलम् ।
किन्तु नीरगुणस्तेन नीरसत्तानुमीयते ॥ ९७ ॥

तयोश्च सुखदुःखयोर्निमित्तभेदाद् द्वैविध्यमाह बाह्येति तर्ह्यौदासीन्यं कदा स्यादित्यत आह सुखदुःखेति । अन्तरालभेदविवक्षया बहुवचनम् ॥ ९४ ॥

यदुक्तं आपदाद्युपलक्षणं तदिदानीं दर्शयति न कापीति । सर्वोऽपि जन इदानीं मम कापि चिन्ता स्वेच्छादिविषया नास्ति अतः सुखं यथा भवति तथा तिष्ठामीति वदन् औदासीन्यकाले स्वरूपानन्दस्फूर्तिं ब्रूते अतो आमरपामराणामपि निजानन्दभानमस्तीत्यवगन्तव्यमित्यभिप्रायः ॥ ९५ ॥

नन्वौदासीन्येऽवभासमानस्य निजानन्दत्वे तस्य ब्रह्मानन्दत्वात् पूर्वोक्तवासनानन्दता न स्यादित्याशङ्क्य अहङ्कारसामान्याच्छादितत्वान्न ब्रह्मानन्दता इति परिहरति अहमस्मीति । देवदत्तोऽहमित्यादिविशेषशून्ये नाहमस्मीत्येवं रूपेणाहङ्कारसामान्येनाच्छादितत्वान्नायं मुख्य इत्यर्थः । तर्हि तस्य किंरूपता इत्यत आह किन्त्वसाविति ॥ ९६ ॥

मुख्यानन्दातिरिक्तवासनानन्दसद्भावे दृष्टान्तमाह नीरेति । जलपूर्णकुम्भस्य बहिर्भागस्पर्शेनोपलभ्यमानं यत् शैत्यमस्ति तज्जलं न भवति रूपस्यानुपलब्धात् । किं तर्हि तदित्यत आह किन्त्विति । नीरगुणत्वं कथमवगम्यते इत्यत आह तेनेति । विमतं घटे उपलभ्य-

यावद् यावदहङ्कारो विस्मृतोऽभ्यासयोगतः ।
तावत् तावत् सूक्ष्मदृष्टेर्निजानन्दोऽनुमीयते ॥ ९८ ॥
सर्वात्मना विस्मृतः सन् सूक्ष्मतां परमां व्रजेत् ।
अलीनत्वान्न निद्रैषा ततो देहोऽपि नो पतेत् ॥ ९९ ॥
न द्वैतं भासते नापि निद्रा तत्रास्ति यत् सुखम् ।

मानं शैत्यं जलजन्यं भवितुमर्हति शैत्यत्वात् जले उपलभ्यमान-शैत्यवदिति ॥ ९७ ॥

भवत्वेवं नीरानुमापकत्वं शैत्यस्य प्रकृते किमायातमित्याशङ्क्य तद्वद्वासनानन्दस्यापि मुख्यानन्दानुमापकत्वमायातमित्याह यावदिति । अभ्यासयोगतः प्रागभ्यात्मनि गच्छति नियच्छेत् तद्यच्छेच्छान्त आत्मनीति श्रुत्यभिहितनिरोधसमाध्यभ्यासयोगेन यावद्यावदहङ्कारादिवृत्ति-विस्मरणात् चित्तस्य सूक्ष्मता जायते तावत्तावन्निजानन्दाभिव्यक्ति-र्भवतीत्यनुमीयते अयमत्र प्रयोगः अहङ्कारसङ्कोचविशेषविशिष्टक्षणेषु द्वितीयादिक्षणः पक्षः स पूर्वस्मात् क्षणात् अधिकनिजानन्दाविर्भाववान् अहङ्कारसङ्कोचविशेषसंयुक्तकालत्वात् अहङ्कारसङ्कोचसंयुक्ताद्य-क्षणवदिति ॥ ९८ ॥

बुद्धिलीनत्वस्य कोऽवधिरित्यत आह सर्वेति । तर्हि सा निद्रैव स्यादित्यत आह अलीनेति । सर्वात्मविस्मृतेऽप्यन्तःकरणस्वरूपप्रवि-लयाभावात् नेयं निद्रा बुद्धेः कारणात्मनावस्थानं सुषुप्तिरित्याचार्यैरुक्त-त्वात् इत्यर्थः । अन्तःकरणस्वरूपविलयाभावे लिङ्गमाह तत इति । यत्र सुषुप्त्यादावहङ्कारविस्मरणं तत्र देहपातो दृष्टः इह तु तदभावाद-विलीन इति गम्यते ॥ ९९ ॥

फलितमाह न द्वैतमिति । यस्मिन् काले द्वैतभानं नास्ति निद्रापि नागच्छति तस्मिन् काले उपलभ्यमानं यत् सुखमस्ति स ब्रह्मा-

स ब्रह्मानन्द इत्याह भगवानर्जुनं प्रति ॥ १०० ॥
शनैः शनैरुपरमेत् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ १०१ ॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ १०२ ॥
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ १०३ ॥

नन्द इत्यर्थः । अयं ब्रह्मानन्द इति कुतोऽवगतमित्याशङ्क्य श्रीकृष्णवाक्यादित्याह इत्याहेति । गीतायां षष्ठाध्याये इति शेषः ॥ १०० ॥

तत्र कैः श्लोकैरुक्तवान् इत्याशङ्क्य तान् श्लोकान् पठत्यर्थक्रमानुसारेण शनैरिति । अयमर्थः धृतिगृहीतया धैर्ययुक्तया बुद्ध्या साधनभूतया शनैः शनैः न सहसा उपरमेत् मन उपरतं कुर्यात् । किंपर्यन्तमित्यत आह आत्मेति । मन आत्मसंस्थम् आत्मनि संस्था सम्यक् स्थितिरात्मैव इदं सर्वं न ततोऽन्यत् किञ्चिदस्तीत्येवंरूपा यस्य तदात्मसंस्थं तथाविधं कृत्वा न किञ्चिदपि चिन्तयेत्, एष योगस्य परमोऽवधिः ॥ १०१ ॥

एतदभ्यासेन प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत आह यतो यत इति । चञ्चलं मनः स्वभावदोषादत एवास्थिरम् एकत्र विषये अनियतम् एवंविधं मनो यदा यदा यतो यतो यस्माद् यस्माच्छब्दादेर्निमित्तात् निश्चरति निर्गच्छति तदा तदा तस्मात् तस्मात् शब्दादेः सकाशान्नियम्य तेषां शब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभ्यासेन योगाभ्यासेन वैराग्यभावनापूर्वकं निगृह्य तत्तेन आत्मन्येव वशं नयेत् आत्मवशतामापादयेत् ॥ १०२ ॥

एवं योगमभ्यस्यतोऽस्याभ्यासवशादात्मन्येव मनः प्रशाम्यति मनःप्रशान्तौ किं भवति इत्यत आह प्रशान्तेति । शान्तरजसं प्रक्षीणमोहादिक्लेश-

यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ १०४ ॥
सुखमात्यन्तिकं यत् तद् बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥ १०५ ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते ॥१०६ ॥

रजसम् अत एव प्रशान्तमनसं प्रकर्षेणात्यर्थं शान्तं विक्षेपशून्यं मनो यस्य त ब्रह्मभूत ब्रह्मैव इदं सर्वमिति निश्चयवत्तया जीवन्मुक्तम् अकल्मषम् अधर्मादिवर्जितम् एवं योगिनमुत्तमं सातिशयत्वादिदोषरहितं सुखमुपैति उपगच्छतीति ॥ १०२ ॥

संप्रज्ञातार्थप्रपञ्चनपरान् मदीयानेव श्लोकान् पठति यत्रेति । चित्तं यत्र यस्मिन् काले योगसेवया योगानुष्ठानेन सर्वस्मात् विषयात् निवारितं यदुपरमते उपरमं गच्छतीति । किञ्च यत्र यस्मिन् काले आत्मना समाधिपरिशुद्धेनान्तःकरणेनात्मानं परं ज्योतिःस्वरूपं पश्यन् उपलभ्यमानः आत्मन्येव तुष्यति तुष्टिं भजते न विषयेष्वित्यर्थः ॥१०४॥

किञ्च यत्र यस्मिन् काले आत्मनि स्थितोऽयं योगी आत्यन्तिकम् अत्यन्तमेव भवतीति आत्यन्तिकम् अनन्तं बुद्धिग्राह्यम् इन्द्रियनिरपेक्षया बुद्ध्या ग्रहणार्हम् अतीन्द्रियम् इन्द्रियगोचरातीतम् अविषयजनितं यत् यदीदृशं सुखं वेत्ति अनुभवति किञ्चात्मनि स्थितोऽयं तत्त्वतस्तस्मात् आत्मस्वरूपात् चलति न प्रच्यवते ॥ १०५ ॥

किञ्च यमात्मानं लब्ध्वा प्राप्य अपरं लाभं लाभान्तरं ततोऽधिकं न मन्यते आत्मलाभान्न परं विद्यते इति स्मृतेः किञ्च यस्मिन्नात्मतत्त्वे स्थितो गुरुणा महतापि दुःखेन शस्त्राभिघातादिलक्षणेन प्रह्लाद इव न विचाल्यते ॥ १०६ ॥

तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसा ॥ १०७ ॥
युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ १०८ ॥
उत्सेक उदधेर्यद्वत् कुशाग्रेणैकबिन्दुना ।
मनसो निग्रहस्तद्वत् भवेदपरिखेदतः ॥ १०९ ॥

इदानीमुपपादितं योगं निगमयति तं विद्यादिति । शनैः शनैरित्यादिना यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशेषो योग उक्तस्तं दुःखसंयोगवियोगं दुःखैः संयोगस्तेन वियोगस्तं विपरीतलक्षणया योगसंज्ञितं योग इत्येवं संज्ञितं विद्याज्जानीयात् । एवंविधयोगानुष्ठाने किञ्चित् कर्त्तव्यताविशेषमाह स निश्चयेनेति । स पूर्वोक्तो योगो निश्चयेनाध्यवसायेन अनिर्विण्णचेतसा निर्वेदरहितेन चित्तेन योक्तव्योऽनुष्ठेयः ॥ १०७ ॥

इदानीमुक्तमर्थमुपसंहरति युञ्जन्निति । विगतकल्मषो योगान्तरायवर्जितो योगी सदा आत्मानमेवं यथोक्तेन प्रकारेण युञ्जन्ननुसन्दधानः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य तद् ब्रह्मसुखं ब्रह्मस्वरूपभूतमिति यावत् । अत्यन्तमविनश्वरं निरतिशय सुखमश्नुते प्राप्नोतीत्यर्थः ॥ १०८ ॥

अनिर्वेदेन क्रियमाणो योगाभ्यासः फलपर्यन्तो भवतीत्येतत् सदृष्टान्तमाह उत्सेक इति । कुशाग्रेणोद्धृतेनैकेन बिन्दुना क्रियमाण उदधेरुत्सेक उद्धृत्य बहिःसेचनं परिखेदाभावे सति यद्वत् कालान्तरे भवेदेव तद्वदेव मनसो निग्रहोऽपि अनवरताभ्यासेन क्रियमाणः कालान्तरे सिध्येत् इदञ्च टिट्टिभोपाख्यानं मनसि निधायोक्तम् ॥ १०९ ॥

बृहद्रथस्य राजर्षेः शाकायन्यो मुनिः सुखम् ।
प्राह मैत्राख्यशाखायां समाध्युक्तिपुरःसरम् ॥ ११० ॥
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति ।
तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥ १११ ॥
स्वयोनावुपशान्तस्य मनसः सत्यकामिनः ।
इन्द्रियार्थविमूढस्यानृताः कर्मवशानुगाः ॥ ११२ ॥
चित्तमेव हि संसारस्तत् प्रयत्नेन शोधयेत् ।
यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत् सनातनम् ॥ ११३ ॥

न केवलमयमर्थो गीतायामभिहितः किन्तु मैत्रायणीयशाखायामपीत्याह बृहदिति । मैत्रायणीयनामके यजुःशाखाभेदे शाकायन्यनामा कश्चिदृषिः शिष्यत्वेनोपपन्नस्य बृहद्रथाख्यस्य राजर्षेः सुखं समाध्यभिधानपूर्वकं यथा भवति तथोक्तवान् ॥ ११० ॥

येन प्रकारेणोक्तवानित्याशङ्क्य तत्प्रतिपादकान् तदीयान् मन्त्रान् पठति यथेति । निरिन्धनो दग्धकाष्ठो वह्निः स्वयोनौ स्वकारणे तेजोमात्रे उपशाम्यति ज्वालादिरूपं विशेषाकारं परित्यज्य तेजोमात्ररूपेण यथावतिष्ठते तथा तेन प्रकारेण चित्तमन्तःकरणमपि वृत्तिक्षयाद्विरोधसमाध्यभ्यासेन राजसादिसकलवृत्तिनाशात् स्वकारणे सन्मात्रे उपशाम्यति स्वरूपमात्रावशेषं भवतीत्यर्थः ॥ १११ ॥

ततः किमित्यत आह स्वयोनाविति । स्वस्मिन्नात्मनि निर्विषये कामोऽस्म्यस्मीति सत्यकामी तस्मात एव स्वयोनावुपशान्तस्य उपशान्तत्वादेव इन्द्रियार्थविमूढस्येन्द्रियार्थेषु विषयेषु शब्दादिषु विमूढस्य विवशस्य प्रागनुभूतस्य मनसः कर्मवशमनुगच्छन्तीति कर्मवशानुगाः सुखादयः अनृतान्यविकल्पनामेव मिथ्याभूताः स्युरित्यर्थः ॥ ११२ ॥

ननु चित्तोपशान्तौ कथमियता भवत्वेतदस्तुत्वं तदुपादानत्वा-

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते ॥ ११४ ॥

भावात् तस्येत्याशङ्क्याह चित्तमिति । यद्यपि स्वरूपेण चित्तोपादानकं जगन्न भवति तथापि तस्य भोग्यत्वं चित्तकारणकमेव हि शब्देनात्र सर्वानुभवं प्रमाणयति सुषुप्त्यादौ चित्तविलये भोगादर्शनादिति भावः । यतश्चित्तात्मकः संसारः अतस्तच्चित्तमेव प्रयत्नेनाभ्यासवैराग्यादिलक्षणेन शोधयेत् रजस्तमोमलराहित्येनैकाग्र्यं कुर्यात् । नन्वात्मनो विमुक्तये आत्मैव शोधनीयो न चित्तमित्याशङ्क्याह यच्चित्तमिति । मर्त्यं इत्युपलक्षणं देहिमात्रस्य यो देही यच्चित्तो यस्मिन् पुत्रदारादौ विषये चित्तवान् भवति स तन्मयः तदात्मक एव तस्यात्मचित्तयोरैकात्म्येन समारोपणात् एतत् सनातनमिदमनादिसिद्धं गुह्यं रहस्यम् । एतदुक्तं भवति स्वभावतः शुद्धस्यात्मनो यतश्चित्तसम्पर्कादेव संसारित्वं ध्यायतीव लेलायतीवेति श्रुतेः अतश्चित्तस्य शोधनेनात्मनः संसारनिवृत्तिरिति ॥ ११३ ॥

नन्वनादिभवपरम्परोपार्जितसुखदुःखप्रदपुण्यपापकर्मणोः सतोश्चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्यतीत्याशङ्क्य चित्तप्रसादोपलक्षितब्रह्मानुसन्धानेन सकलकर्मक्षयोपपत्तेर्मैवमिति परिहरति चित्तस्येति । हिशब्देन तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते उपपातकेषु सर्वेषु पातकेषु महत्सु च, प्रविश्य रजनीपादं ब्रह्मध्यानं समाचरेदित्यादिश्रुतिस्मृतिप्रसिद्धिं द्योतयति । ततः किमित्यत आह प्रसन्नेति । प्रसन्न आत्मा चेतो यस्य स तथोक्तः आत्मनि स्वस्वरूपभूतेऽद्वितीयानन्दलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन दृश्यजातं परिहृत्य चिन्मात्ररूपेणावस्थाय अक्षयमविनाशि यत् सुखं स्वरूपभूतं तदश्नुते ॥ ११४ ॥

समासक्तं यथा चित्तं जन्तोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात् तत् को न मुच्येत बन्धनात् ॥ ११५ ॥

मनो हि द्विविधं प्रोक्तं शुद्धञ्चाशुद्धमेव च ।
अशुद्धं कामसम्पर्कात् शुद्धं कामविवर्जितम् ॥ ११६ ॥

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ ११७ ॥

समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत् सुखं भवेत् ।
न शक्यते वर्णयितुं गिरा तदा
स्वयं तदन्तःकरणेन गृह्यते ॥ ११८ ॥

प्रत्यगात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टान्तोक्तिपुरःसरं द्रढयति समासक्तमिति । प्राणिनश्चित्तं विषय एव गोचर इन्द्रियप्रचारभूमिस्तस्मिन् यथा स्वभावतः सम्यगासक्तं भवति तद्वेव चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं स्यात् तर्हि कः संसारात् न मुच्येत सर्वोऽपि मुच्यत एवेत्यर्थः ॥ ११५ ॥

उक्तार्थदार्ढ्याय मनसोऽवान्तरभेदमाह मन इति । तत्र कारणमाह अशुद्धमिति । काम इत्युपलक्षणं क्रोधादेरपि ॥ ११६ ॥

द्विविधस्यैव तस्य क्रमेण संसारमोक्षयोर्हेतुतां दर्शयति मन एवेति ॥ ११७ ॥

प्रत्यगात्मनि स्थित्वा सुखमक्षयमश्नुते इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपञ्चयति समाधीति । आत्मनि प्रत्यक्स्वरूपे निवेशितस्य समाधिनिर्धूतमलस्य समाधिना प्रत्यग्ब्रह्मणोरैक्यगोचर-प्रमया इत्था निर्धूतमलस्य निःशेषेण निवारितरजस्तमोमलस्य चेतसः

यद्यप्यसौ चिरं कालं समाधिर्दुर्लभो नृणाम् ।
तथापि क्षणिको ब्रह्मानन्दं निश्चाययत्यसौ ॥ ११९ ॥
श्रद्धालुर्व्यसनी योऽत्र निश्चिनोत्येव सर्वथा ।
निश्चिते तु सकृत् तस्मिन् विश्वसित्यन्यदाप्ययम् ॥ १२० ॥
तादृक् पुमानुदासीनकालेऽप्यानन्दवासनाम् ।
उपेक्ष्य मुख्यमानन्दं भावयत्येव तत्परः ॥ १२१ ॥

तस्मिन् समाधौ यत् सुखमुत्पद्यते तदा समाधावुत्पन्नं तत् सुखं गिरा वाचा वर्णयितुं न शक्यते अलौकिकत्वात् इत्यर्थः, किन्तु स्वयं तत्-स्वरूपभूतं सुखमन्तःकरणेनैव गृह्यते ॥ ११८ ॥

नन्वस्यैव समाधेर्दुर्लभत्वात् कथमनेन ब्रह्मानन्दनिश्चयसम्भव इत्याशङ्क्याह यद्यपीति । अस्य समाधेः सन्ततस्यासम्भवेऽपि क्षणिकस्य तस्य सम्भवमात्रेणैव ब्रह्मानन्दो निश्चेतुं शक्यत इत्यर्थः ॥ ११९ ॥

नन्वात्मदर्शनाय श्रवणादौ प्रवृत्ता अपि केचिदानन्दत्वनिश्चयमकृत्वा बहिर्मुखा वर्त्तन्ते इत्याशङ्क्य श्रद्धादिरहितानां तथात्वेऽपि श्रद्धादिमतां तन्निश्चयो भवत्येव इत्याह श्रद्धालुरिति । व्यसनं सर्वथा सम्पादयिष्यामीत्याग्रहः तद्वान् व्यसनी । अत्र समाधौ । सर्वथा अवश्यम् । ततः किमित्यत आह निश्चित इति । तस्मिन् ब्रह्मानन्दे सकृदेकदा क्षणिकसमाधौ निश्चिते सति अयं ब्रह्मनिश्चयवानन्यदापि इतरस्मिन्नपि काले विश्वसिति आनन्दोऽस्तीति विश्वासं करोति ॥ १२० ॥

ततोऽपि किमित्यत आह तादृगिति । तादृक् पुमान् श्रद्धादि-पुरःसरं ब्रह्मनिश्चयवान् पुरुष औदासीन्यदशायामपि उपलभ्यमानां पूर्वोक्तामानन्दवासनामुपेक्ष्य तत्परो ब्रह्मानन्दे तात्पर्यवान् भूत्वा तमेव भावयति ॥ १२१ ॥

परव्यसनिनी नारी व्यग्रापि गृहकर्म्मणि ।
तदेवास्वादयत्यन्तः परसङ्गरसायनम् ॥ १२२ ॥
एवं तत्त्वे परे शुद्धे धीरो विश्रान्तिमागतः ।
तदेवास्वादयत्यन्तर्बहिर्व्यवहरन्नपि ॥ १२३ ॥
धीरत्वमक्षप्राबल्येऽप्यानन्दास्वादवाञ्छया
तिरस्कृत्याखिलाक्षाणि तच्चिन्तायां प्रवर्त्तनम् ॥ १२४ ॥
भारवाही शिरोभारं मुक्त्वास्ते विश्रमं गतः ।
संसारव्यापृतित्यागे तादृग्बुद्धिस्तु विश्रमः ॥ १२५ ॥
विश्रान्तिं परमां प्राप्तस्त्वौदासीन्ये यथा तथा ।
सुखदुःखदशायाञ्च तदानन्दैकतत्परः ॥ १२६ ॥

एवं व्यवहारकालेऽपि नित्यानन्दं भावयति इत्यत्र दृष्टान्तमाह परेति ॥ १२२ ॥

दार्ष्टान्तिके योजयति एवमिति ॥ १२१ ॥

धीरपदस्यार्थमाह धीरत्वमिति । इन्द्रियाणां विषयाभिमुख्येन दुष्प्राकर्षणसामर्थ्येऽपि स्वस्वरूपसुखानुसन्धानेच्छया सर्वाणीन्द्रियाणि तिरस्कृत्यानन्दानुसन्धान एव प्रवर्त्तमानत्वं धीरत्वमित्यर्थः ॥ १२४ ॥

विश्रान्तिपदस्य विवक्षितमर्थं सदृष्टान्तमाह भारवाहीति । यथा लोके भारं वहन् पुरुषः श्रमहेतुं शिरसि स्थितं भारं परित्यज्य श्रमरहितो वर्त्तते तथा संसारव्यापारत्यागे सति श्रमरहित आत्मनि त आवनाना या बुद्धिः सा विश्रमपदेनोच्यते इत्यर्थः ॥ १२५ ॥

इदानीं फलितमर्थमाह विश्रान्तिमिति । परमां निरतिशयां विश्रान्तिम् उत्कृष्टां प्राप्तः पुरुषः स्वस्य औदासीन्यदशायां यथा परमानन्दास्वादने तात्पर्यवान् भवति एवं सुखदुःखदशाप्राप्तिकालेऽपि

अग्निप्रवेशहेतौ धीः शृङ्गारे यादृशी तथा ।
धीरस्योदेति विषयेऽनुसन्धानविरोधिनि ॥ १२७ ॥
अविरोधिसुखे बुद्धिः स्वानन्दे च गमागमौ ।
कुर्वन्त्यास्ते क्रमादेषा काकाक्षिवदितस्ततः ॥ १२८ ॥
एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः ।
यात्यायात्येवमानन्दद्वये तत्त्वविदो मतिः ॥ १२९ ॥
भुञ्जानो विषयानन्दं ब्रह्मानन्दं च तत्त्ववित् ।

तदनुसन्धानं परित्यज्य निजानन्दास्वादन एव तात्पर्यवान् भवतीत्यर्थः ॥ १२६ ॥

ननु दुःखस्य प्रतिकूलत्वेन तदनुसन्धानेच्छाभावेऽपि वैषयिकसुखस्यानुकूलत्वेन पुरुषैरर्थ्यमानत्वात् तदनुसन्धानेच्छा कुतो न भवेदित्याशङ्क्य तस्य विषयसम्पादनादिद्वारा अतीव बहिर्मुखत्वापादनेन निजानन्दानुसन्धानविरोधित्वात् तदिच्छापि विवेकिनो न जायते इति दृष्टान्तप्रदर्शनपूर्वकमाह अग्नीति । यौग्यं देहविमोचनेच्छायां दृढतरायां सत्यां तद्विघ्नकारणे अलङ्कारादौ यथाग्निप्रवेष्टुर्वैराग्यबुद्धिरुत्पद्यते एवं वैराग्यादिसाधनसम्पन्नस्य विवेकिनो ब्रह्मानुसन्धानविरोधिनि विषयसुखेऽपीत्यर्थः ॥ १२७ ॥

मा भूद् विरोधिनि विषयसुखे इच्छा अप्रयत्नसौलभ्यादबहिर्मुखत्वहेतौ विषये किं न भवतीत्यत आह अविरोधीति ॥ १२८ ॥

दृष्टान्तं विवृणोति एकैव दृष्टिरिति । यथा काकस्य दृष्टिर्दृश्यते अनयेति दर्शनसाधनं चक्षुरिन्द्रियमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेण गमनागमने करोति एवं विवेकिनो बुद्धिरुभयानन्दद्वये इत्यर्थः ॥ १२९ ॥

द्विभाषाभिज्ञवद् विद्यादुभौ लौकिकवैदिकौ ॥ १३० ॥
दुःखप्राप्तौ च नोद्वेगो यथा पूर्वं यतो द्विदृक् ।
गङ्गामग्नार्द्धकायस्य पुंसः शीतोष्णधीर्यथा ॥ १३१ ॥
इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा ।
भाति तद्वासनाजन्ये स्वप्ने तत् भासते तथा ॥ १३२ ॥
अविद्यावासनाप्यस्तीत्यतस्तद्वासनोत्थिते ।
स्वप्ने मूर्खवदेवैष सुखं दुःखञ्च वीक्षते ॥ १३३ ॥

दार्ष्टान्तिकं प्रपञ्चयति भुञ्जान इति । तत्त्वविद्विषयान् भुञ्जानस्तज्जन्यं विषयानन्दमुपनिषद्वाक्यादवगतं ब्रह्मानन्दञ्च लौकिकवैदिकावुभौ विषयानन्दब्रह्मानन्दौ भाषाद्वयवेदिवज्जानीयादित्यर्थः ॥ १३० ॥

ननु दुःखानुभवदशायामुद्वेगे सति कथं निजानन्दानुभव इत्याशङ्क्याह दुःखेति । यतो यस्मात् कारणात् विवेकी द्विदृक् लौकिकवैदिकव्यवहारयोरपि वेत्ता अतो दुःखप्राप्तावपि पूर्ववज्ज्ञानदशायामिव न तस्योद्वेगः विवेकेन तदा बाध्यमानत्वात् अतो दुःखानुभवकालेऽपि निजानन्दानुभवसन्धानं न विरुध्यते इत्यर्थः । युगपदुभयानुसन्धाने दृष्टान्तमाह गङ्गेति ॥ १३१ ॥

फलितमाह इत्थमिति । सदा सुखदुःखानुभवदशायां तूष्णीं स्थितौ चेत्यर्थः । न केवलं जागरण एव तद्भानं किन्तु स्वप्नावस्थायामपीत्याह तद्वासनेति । हेतुगर्भितं विशेषणं जाग्रद्वासनाजन्यत्वात् स्वप्नस्य तत्रापि तद्ब्रह्मसुखं तथा जाग्रदवस्थायामिव भासते इत्यर्थः ॥ १३२ ॥

ननु स्वप्नस्यानन्दानुभववासनाजन्यत्वे सति आनन्द एव भासेत इत्याशङ्क्याह अविद्येति । न केवलमानन्दवासनावशादेव स्वप्नो जायते

ब्रह्मानन्दाभिधे ग्रन्थे ब्रह्मानन्दप्रकाशकम् ।
योगिप्रत्यक्षमध्याये प्रथमेऽस्मिन्नुदीरितम् ॥ १२४ ॥

इति ब्रह्मानन्दे योगानन्दः समाप्तः ।

द्वादशपरिच्छेदः ।

ब्रह्मानन्दे आत्मानन्दः ।

नन्वेवं वासनानन्दाद् ब्रह्मानन्दादपीतरम ।
वेत्तु योगी निजानन्दं मूढस्यात्रास्ति का गतिः ॥ १ ॥

किन्तु सर्वविद्यावासनाबलादपि आत्मवासनाऽनन्यत्वात् तन्मात्रस्यैव सुखाद्यनुभवो भवतीत्यर्थः ॥ १२३ ॥

एतावता ग्रन्थसन्दर्भेण उक्तमर्थं निगमयति ब्रह्मानन्देति ब्रह्मानन्दनामके अध्यायपञ्चकात्मके ग्रन्थेऽस्मिन् प्रथमाध्याये सुषुप्त्यवस्थायामौदासीन्यकालेऽपि, समाध्यवस्थायां सुखदुःखदशायाञ्च स्वप्रकाशचिद्रूपब्रह्मानन्दस्य प्रकाशकं योग्यनुभवरूपं प्रत्यक्षमुक्तमित्यर्थः। इदञ्चोपलक्षणम् आत्मभावादीनां तेषामप्यत्र प्रदर्शितत्वात् ॥ १२४ ॥

इति ब्रह्मानन्दे योगानन्दव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
ब्रह्मानन्दाभिधे ग्रन्थे आत्मानन्दो विविच्यते ॥

तदेवं प्रथमाध्याये विवेकिनो योगेन निजानन्दानुभवप्रकारं

धर्माधर्मवशादेष जायतां म्रियतामपि।
पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद ॥ २ ॥
अस्ति वोऽनुजिघृक्षुत्वाद् दाक्षिण्येन प्रयोजनम्।
तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः ॥ ३ ॥
उपास्तिं कर्म वा ब्रूयाद् विमुखाय यथोचितम्।
मन्दप्रज्ञन्तु जिज्ञासुमात्मानन्देन बोधयेत् ॥ ४ ॥

प्रदर्श्य मूढस्य जिज्ञासोरात्मामन्दशब्दवाच्यत्वं पदार्थविवेचनमुखेन ब्रह्मानन्दानुभवप्रकारप्रदर्शनाय शिष्यप्रश्नमवतारयति नन्वेवमिति ॥ १ ॥

शिष्येणैवं पृष्टो गुरुरतिमूढस्य विद्याधिकार एव नास्तीत्याह धर्मेति। योऽतिमूढोऽनादौ संसारेऽतीतेषु जन्मसु अनुष्ठितसुकृत-दुष्कृतवशान्नानाविधदेहस्वीकारेण पुनः पुनर्जायतां म्रियताञ्चेत्यर्थः ॥२॥

सर्वानुग्राहकत्वादाचार्यैस्तस्यापि काचन गतिर्वक्तव्येति शिष्य आह अस्तीति। वो युष्माकम् अनुजिघृक्षुत्वादनुग्रहीतुमिच्छवोऽनुजि-घृक्षवस्तेषां भावस्तत्त्वं तस्मात् शिष्योद्धरणेच्छायुक्तत्वाद् दाक्षिण्येन तदुद्धरणप्रयोजनमस्तीत्यर्थः। एवं शिष्यवचनमाकर्ण्य गुरुस्तं विकल्प्य पृच्छति तर्हीति। यदि मूढस्यापि काचन गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वेति वद ॥ २ ॥

रागी चेत्तद्रागानुसारेण कर्मोपासनं वा वक्तव्यमिति प्रथमे परि-हारमाह उपास्तिमिति। विमुखाय तत्त्वज्ञानविमुखाय बहिर्मुखाय इत्यर्थः, यथोचितं यथायोग्यं ब्रह्मलोकादिकामायोपास्तिं ब्रूयात् स्वर्गादिकामायैव कर्म ब्रूयादित्यर्थः। जिज्ञासुत्वेऽपि सोऽतिविवेकी मन्दप्रज्ञो वेति विकल्प्य अतिविवेकिनः पूर्वाध्यायोक्तप्रकारेण योगेन ब्रह्मसाक्षात्कारमभिप्रेत्य मन्दप्रज्ञस्यैतदर्थमुपायमाह मन्दप्रज्ञमिति। यो मन्दप्रज्ञः मन्दा अल्पा प्रज्ञा बुद्धिर्यस्य स मन्दप्रज्ञस्तं जिज्ञासुं चात्मजिज्ञासुमात्मानन्देन आत्मानन्दविवेचनमुखेन बोधयेत् ॥४॥

बोधयामास मैत्रेयीं याज्ञवल्क्यो निजप्रियाम् ।
न वा अरे पत्युरर्थे पतिः प्रिय इतीरयन् ॥ ५ ॥
पतिर्जाया पुत्रवित्ते पशुब्राह्मणबाहुजाः ।
लोका देवा वेदभूते सर्वञ्चात्मार्थतः प्रियम् ॥ ६ ॥
पत्याविच्छा यदा पत्न्यास्तदा प्रीतिं करोति सा ।
क्षुदनुष्ठानरोगाद्यैस्तदा नेच्छति तत् पतिः ॥ ७ ॥
न पत्युरर्थे सा प्रीतिः स्वार्थ एव करोति ताम् ।

एवं केन का बोधिता इत्यत आह बोधयामासेति । याज्ञवल्क्यनामको यजुःशाखाविशेषप्रवर्त्तकः कश्चिदृषिर्मैत्रेयीमेतन्नामिकां निजप्रियां स्वभार्यां न वा अरे पत्युरर्थे पतिः प्रिय इति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिप्रकारेण ईरयन् ब्रुवन् बोधयामास बोधितवानित्यर्थः ॥ ५ ॥

उक्तस्य परप्रेमास्पदत्वेन परमानन्दरूपतामिति वाक्येन परप्रेमास्पदत्वेन हेतुना आत्मनः परमानन्दरूपतां सिषाधयिषुरादौ परप्रेमास्पदत्वहेतुसमर्थनाय तावदुदाहृतवाक्यस्योपलक्षणपरतामभिप्रेत्य तत्प्रकरणस्थसकलपर्यायवाक्यतात्पर्यमाह पतिरिति । पतिजायादिकं भोग्यजातं भोक्तृशेषत्वात् भोक्तृसम्बन्धेनैव प्रियं न स्वरूपेणेत्यभिप्रायः ॥ ६ ॥

इदानीं पूर्वोदाहृतस्य न वा अरे पत्युः कामाय पतिः प्रियो भवति इति आत्मनस्तु कामाय पतिः प्रियो भवति इत्यस्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति पत्याविच्छेति । यदा यस्मिन् काले पत्न्या जायायाः पत्यौ भर्त्तरि विषये इच्छा कामो भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं करोति तदा तत्पतिः क्षुधादिना इच्छाभावहेतुना युक्तो भवति चेत् नेच्छति न कामयते ॥ ७ ॥

पतिश्चात्मन एवार्थे न जायार्थं कदाचन ।
अन्योऽन्यप्रेरणेऽप्येवं स्वेच्छयैव प्रवर्त्तनम् ॥ ८ ॥
श्मश्रुकण्टकवेधेन बाले रुदति तत्पिता ।
चुम्बत्येव न सा प्रीतिर्बालार्थे स्वार्थ एव सा ॥ ९ ॥
निरिच्छमपि रत्नादि वित्तं यत्नेन पालयन् ।
प्रीतिं करोति सा स्वार्थे वित्तार्थत्वं न शङ्कितम् ॥१०॥
अनिच्छति बलीवर्दे विवाहयिषते बलात् ।

एवञ्च सति किं फलितमित्यत आह न पत्युरिति । जायया क्रियमाणा या प्रीतिः सा न पत्युः प्रयोजनाय किन्तु जाया वा पत्यै प्रीतिं स्वार्थं एव स्वप्रयोजनायैव करोति । न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवतीत्यादि न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति इत्यन्तानां वाक्याना तात्पर्य्यं क्रमेण विभज्य दर्शयति पतिश्चेत्यादिना । पतिश्च भर्त्ता स्वप्रयोजनायैव जायायां प्रीतिं करोति न जायाप्रीतये इत्यर्थः । नन्वेकैककामनया प्रवृत्तौ प्रीतिः स्वार्था भवतु युगपदुभयेच्छाप्रवृत्तौ तु प्रीतेरुभयार्थता स्यादित्याशङ्क्याह अन्योऽन्येति । एवमुक्तेन प्रकारेण स्वेच्छयैव स्वकामनापूरणेच्छयैव प्रवर्त्तनमुभयोरपीति शेषः ॥ ८ ॥

स्वेच्छया प्रवर्त्तनत्वमेव दर्शयति श्मश्रुकण्टकेति । पित्रा क्रियमाणं पुत्रस्य चुम्बनं न पुत्रप्रीत्यर्थं तस्य श्मश्रुकण्टकवेधेन रोदनकर्तृत्वात् अतस्तत्पितुः स्वतुष्ट्यर्थमेवेत्यवगन्तव्यमित्यर्थः ॥ ९ ॥

चेतनेषु पतिजायापुत्रेषु क्रियमाणायाः प्रीतेः स्वार्थत्वपरार्थत्वसन्देहसंभवादचेतनत्वेनेच्छाया असंभावितस्य वित्तविषयस्य तच्छङ्कैव नास्तीत्यभिप्रेत्य न वा अरे वित्तस्य कामायेत्यादिवाक्यस्य तात्पर्य्यमाह निरिच्छमपीति ॥ १० ॥

प्रीतिः सा वणिगर्थैव बलीवर्दार्थता कुतः ॥ ११ ॥
ब्राह्मण्यं मेऽस्ति पूज्योऽहमिति तुष्यति पूजया ।
अचेतनाया जातेर्नो सन्तुष्टिः पुंस एव सा ॥ १२ ॥
क्षत्रियोऽहं तेन राज्यं करोमीत्यत्र राजता ।
न जातेर्वैश्यजात्यादौ योजनाम्बेदमीरितम् ॥ १३ ॥
स्वर्गलोकब्रह्मलोकौ स्तां ममेत्यभिवाञ्छनम् ।
लोकयोर्नोपकाराय स्वभोगायैव केवलम् ॥ १४ ॥
ईशविष्ण्वादयो देवाः पूज्यन्ते पापनष्टये ।
न तन्निष्पापदेवार्थं स्वार्थं तत्तूपयुज्यते ॥ १५ ॥

चेतनत्वेऽपि वाहनादौपकारहितपशुविषयस्य न वा अरे पशूना-मित्यस्य वाक्यस्य तात्पर्यमाह वणिक्त्वमीति । बलीवर्देऽनडुहि वणि-जति भारं बोढुमिच्छामकुर्वत्यपि बलात् निवाहयिषते वाहयितुं कामयते तत्र वहनादिविषयायाः प्रीतेः वणिगर्थतैव न बलीवर्दार्थता इत्यर्थः ॥ ११ ॥

न वा अरे ब्राह्मणः कामाय इति वाक्यस्य तात्पर्यमाह ब्राह्मण्य-मिति । ब्राह्मण्यनिमित्तया पूजया ब्राह्मणोऽहमस्मीति अभिमानवानेव तुष्यति न जडजातिरित्यर्थः ॥ १२ ॥

न वा अरे क्षत्रस्य इत्यादिवाक्यस्य तात्पर्यमाह क्षत्रियोऽहमिति । राज्योपभोगनिमित्तं सुखं क्षत्रियत्वजातिमत एव न क्षत्रियजातेरित्यर्थः । इदं क्षत्रियोदाहरणं वैश्याद्युपलक्षणार्थमित्याह वैश्येति ॥ १३ ॥

न वा अरे लोकानां कामायेत्यादिवाक्यस्य तात्पर्यमाह स्वर्गेति । लोकद्वयोपादानं कर्मोपासनारूपसाधनद्वयसाध्यसकललोकोपलक्ष-णार्थम् ॥ १४ ॥

किञ्च ईशेति, पापनष्टये पापनिवृत्तये इत्यर्थः । तत् पूजनं न

ऋगादयो ह्यधीयन्ते दुर्ब्राह्मण्यानवाप्तये ।
न तत् प्रसक्तं वेदेषु मनुष्येषु प्रसज्यते ॥ १६ ॥
भूम्यादिपञ्चभूतानि स्थानतृट्पाकशोषणैः ।
हेतुभिश्चावकाशेन वाञ्छन्त्येषां न हेतवे ॥ १७ ॥
स्वामिभृत्यादिकं सर्वं स्वोपकाराय वाञ्छति ।
तत्तत्कृतोपकारस्तु तस्य तस्य न विद्यते ॥ १८ ॥
सर्वव्यवहृतिष्वेवमनुसन्धातुमीदृशम् ।
उदाहरणबाहुल्यं तेन स्वां वासयेन्मतिम् ॥ १९ ॥

निष्पापदेवार्थं स्वतः पापरहितानां देवानां न प्रयोजनाय किन्तु स्वार्थं पूजाकर्तुः प्रयोजनाय ॥ १५ ॥

किञ्च ऋगादय इति । दुर्ब्राह्मण्यं ब्रात्यत्वं तच्च दुर्ब्राह्मण्यं मनुष्यस्यावान्तरजातिरूपं तद्रहितेषु वेदेषु न प्रसज्यत इत्यर्थः ॥ १६ ॥

किञ्च भूम्यादीति । सर्वे प्राणिनः अवस्थानप्रदानतृड्निवारणपाककरणार्द्रशोषणावकाशप्रदानाख्यैर्हेतुभिर्निमित्तैः पृथिव्यादीनि पञ्च भूतानि वाञ्छन्ति अपेक्षन्ते एषां पृथिव्यादीनान्तु हेतवे अवस्थानवाञ्छनादीनि निमित्तानि न सन्ति अतो न स्वयमाकाङ्क्षन्त इत्यर्थः ॥ १७ ॥

इदानीं न वा अरे सर्वस्य कामायेत्यस्य वाक्यस्य तात्पर्यमाह स्वामिभृत्यादीति । भृत्यादि सर्वो जनः स्वाम्यादिकं सर्वं स्वोपकाराय वाञ्छति एवं स्वाम्यादिरपि ॥ १८ ॥

ननु श्रुतावेवं बहूदाहरणदर्शनं किमर्थं कृतमित्याशङ्क्याह स॰ इति । इच्छापूर्वकेषु सर्वेष्वपि भोजनादिव्यवहारेषु एवम् आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युक्तेन प्रकारेणानुसन्धानाय ईदृशं पतिजायादिषु प्रीतिदर्शनरूपम् उदाहरणबाहुल्यमुक्तमिति शेषः, तेन

अथ केयं भवेत् प्रीतिः श्रूयते या निजात्मनि ।
रागो बन्ध्वादिविषये श्रद्धा यागादिकर्मणि ।
भक्तिः स्यात् गुरुदेवादाविच्छा त्वप्राप्तवस्तुनि ॥ २० ॥
तर्ह्यस्तु सात्विकी वृत्तिः सुखमात्रानुवर्त्तिनी ।
प्राप्ते नष्टेऽपि सद्भावादिच्छातो व्यतिरिच्यते ॥ २१ ॥

कारणेन स्वां स्वसम्बन्धिनीं मतिं बुद्धिं वासयेत् सर्वस्यापि स्वशेषत्वावगमेन स्वात्मनः प्रियतमत्वानुसन्धानवतीं कुर्य्यादित्यर्थः ॥ १९ ॥

नन्वात्मशेषत्वेन सर्वस्य प्रियत्वस्योक्तेरात्मनः प्रियतमत्वमुक्तमनुपपन्नं विकल्पे क्रियमाणे प्रीतेरेव दुर्निरूपत्वादित्यभिप्रायेण प्रीतिस्वरूपं पृच्छति अथ केयमिति । अथशब्दः प्रश्नार्थः । या निजात्मनि प्रीतिः श्रूयते इतीयं प्रीतिः का किं रागरूपा किंवा श्रद्धारूपा भक्तिरूपा वेच्छारूपेति विकल्पार्थः । चतुर्ष्वपि पक्षेषु प्रीतेः सर्वविषयत्वं न सम्भवतीत्याह राग इति । रागश्चेद् बन्ध्वादिष्वेव स्यात् न यागादिषु श्रद्धा चेत् यागादिष्वेव स्यात् न बन्ध्वादिषु भक्तिश्चेत् गुर्वादिष्वेव स्यात् नेतरेषु इच्छा चेत् अप्राप्तवस्तुविषयैव स्यात् नेतरविषया अतो न सर्वविषयत्वं प्रीतेरित्यर्थः ॥ २० ॥

तत्र रागादिचतुष्टयातिरिक्तं स्वभावमादाय उत्तरमाह तर्हीति । प्रीतिः रागादिचतुष्टयासम्भवे सति सुखमात्रानुवर्त्तिनी सुखमेव सुखमात्रमनुसृत्य वर्त्तत इति सुखमात्रानुवर्त्तिनी सुखैकगोचरा इत्यर्थः सात्त्विकी सत्त्वगुणपरिणामरूपा वृत्तिरन्तःकरणवृत्तिः प्रीतिरस्तु । ननु तर्हि सा प्रीतिरिच्छैव इत्याशङ्क्याह प्राप्त इति । इच्छा तावदप्राप्तवस्त्वादिविषया इयन्तु सर्वविषया प्राप्ते बद्धे सुखादौ नष्टेऽपि तस्मिन् विनष्टे वर्त्तमानत्वात् इच्छातः इच्छाया व्यतिरिच्यते भिद्यते ॥ २१ ॥

सुखसाधनतोपाधेरन्नपानादयः प्रियाः ।
आत्मानुकूल्यादन्नादिसमश्चेदमुनात्र कः ।
अनुकूलयितव्यः स्यान्नैकस्मिन् कर्मकर्तृता ॥ २२ ॥
सुखे वैषयिके प्रीतिमात्रमात्मा त्वतिप्रियः ।
सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी ॥ २३ ॥

इदानीं सुखसाधनभूतेषु अन्नादिष्विव आत्मन्यपि प्रीतिदर्शनात् आत्मनोऽप्यन्नादिवत् सुखसाधनता स्यात् इति शङ्कते सुखेति। अन्नपानादयः सुखसाधनत्वोपाधिना यथा प्रियाः दृष्टाः आत्मापि आनुकूल्यात् प्रियत्वात् अन्नादिसमः अन्नपानादिवत् सुखसाधनं स्यादित्यर्थः। तत्रेदमनुमानं सूचितं विमत आत्मा सुखसाधनं भवितुमर्हति प्रियत्वात् अन्नादिवत् इति। अन्नादिषु भोग्यत्वमुपाधिरित्यभिप्रायेण परिहरति अमुनेति। अत्र लोके अमुना सुखसाधनतया अनुकूलेन अनुकूलयितव्यः कः स्यात् न कोऽपि स्यात् आत्मातिरिक्तस्य भोक्तुरभावादित्यर्थः। ननु स्वयमेवानुकूलयितव्यः स्यात् इत्यत आह नैकस्मिन्निति। एकस्यैवात्मनो युगपदुपकार्यत्वमुपकारकत्वञ्चेति धर्मद्वयं विरुद्धमित्यर्थः॥२२॥

ननु अन्नादिवत् सुखसाधनत्वाभावेऽपि सुखवत् भोक्तृशेषतापि स्यात् इत्याशङ्क्य आत्मनो निरतिशयप्रेमास्पदत्वात् नैवमिति परिहरति सुखेति। वैषयिके विषयजन्ये सुखे प्रीतिमात्रं प्रीतिरेव न निरतिशया आत्मा तु अतिप्रियः निरतिशयप्रेमविषयः अतो न विषयजन्यसुखवदित्यर्थः। तयोरुभयोरुपपत्तिमाह सुखे व्यभिचरतीति। सुखे वैषयिके सुखे जायमाना एषा प्रीतिर्व्यभिचरति कदाचित् सुखान्तरं गच्छति न तस्मिन्नेव नियतावतिष्ठते आत्मनि तु विद्यमाना प्रीतिर्न व्यभिचारिणी विषयान्तरगामिनी न भवति अतो निरतिशया वा इत्यर्थः॥२३॥

एकं त्यक्त्वान्यदादत्ते सुखं वैषयिकं सदा ।
नात्मा त्याज्यो न चादेयस्तस्मिन् व्यभिचरेत् कथम् ॥२४॥
हानादानविहीनेऽस्मिन्नुपेक्षा चेत् तृणादिवत् ।
उपेक्षितुः स्वरूपत्वान्नोपेक्ष्यत्वं निजात्मनः ॥ २५ ॥
रागक्रोधाभिभूतानां मुमूर्षा वीक्ष्यते क्वचित् ।
ततो द्वेषाद्भवेत्त्याज्य आत्मेति यदि तन्न हि ।
त्यक्तुं योग्यस्य देहस्य नात्मता त्यक्तुरेव सा ।
न त्यक्तर्यस्ति स द्वेषस्त्याज्ये द्वेषे तु का क्षतिः ॥२६॥

सुखगोचरायाः प्रीतेर्व्यभिचारं दर्शयति एकमिति । आत्मनि तदभावं दर्शयति नात्मेति । अयोग्यत्वादित्यर्थः । फलितमाह तस्मिन्निति ॥ २४ ॥

हानादिविषयत्वाभावेऽप्यात्मनः तृणादिवत् उपेक्षाविषयत्वं स्यादिति शङ्कते हानेति । हानं परित्यागः । आदानं स्वीकारः । उपेक्षा औदासीन्यम् । आत्मनो हानाद्यविषयत्ववत् उपेक्षाविषयत्वमपि न सम्भवति अयोग्यत्वादित्यभिप्रायेण परिहरति उपेक्षितुरिति । उपेक्षितुः उपेक्षाकर्तुर्यो निजात्मा अविनाशिस्वरूपोऽस्ति तस्य स्वरूपत्वात् स्वस्वरूपत्व इव स्वव्यतिरिक्ततृणादिवत् नोपेक्ष्यत्वम् उपेक्षाविषयत्वं न विद्यत इति शेषः ॥ २५ ॥

ननु हानविषयत्वमात्मनो नास्तीत्युक्तमनुपपन्नं द्वेषात्त्याज्यत्वदर्शनादिति शङ्कते रागेति । यतो मुमूर्षा दृश्यते अत आत्मनि द्वेषसम्भवात् वृश्चिकादिवदात्मापि त्याज्य इति यद्युच्यते इति शेषः । तत्त्यागस्यात्मव्यतिरिक्तदेहविषयत्वान्नैवमिति परिहरति तन्नेति । त्यक्तुमुद्युक्तेन योग्यस्योचितस्य देहस्यात्मता नास्ति । कस्य तर्हि सा इत्यत आह त्यक्तुरिति । त्यक्तुर्देहत्यागकारिणो देहातिरिक्तस्य जीवस्य सात्मता

आत्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः ।
यथा पितुः पुत्रमित्रात् पुत्रः प्रियतरस्तथा ॥ २७ ॥
मा न भूवमहं किन्तु भूयासं सर्वदेत्यसौ ।
आशीः सर्वस्य दृष्टेति प्रत्यक्षा प्रीतिरात्मनि ॥ २८ ॥
इत्यादिभिस्त्रिभिः प्रीतौ सिद्धायामेवमात्मनि ।
पुत्रभार्य्यादिशेषत्वमात्मनः कैश्चिदीरितम् ॥ २९ ॥

इत्यर्थः । भवतु त्यक्तुरात्मत्वं प्रकृते किमायातमित्यत आह न त्यक्तेति । अतो नात्मनस्त्याज्यत्वमित्यभिप्रायः । मा भूदात्मनि द्वेषो देहे तूपलभ्यत एव इत्याशङ्क्याह त्याज्य इति । त्याज्ये देहगोचरे द्वेषे सत्यपि का क्षतिरात्मनस्त्यागाभाववादिनो ममेति शेषः ॥ २६ ॥

तदेवं स वा अरे पत्युः कामायेत्यारभ्य आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यन्तायाः श्रुतेस्तात्पर्य्यपर्य्यालोचनया आत्मनः प्रियतमत्वं प्रदर्श्य युक्तितोऽपि तद्दर्शयति आत्मेति । सर्वस्य सुखसहिततत्साधन-जातस्य पुत्रजायादेरात्मार्थत्वेन स्वस्योपकारकत्वेन प्रीतेश्च प्रियत्वादपि आत्मा उपकार्य्यः स्वयमतिशयेन प्रियः सिद्धो हीत्यर्थः । तदेव दृष्टान्त-प्रदर्शनेन स्पष्टयति यथेति । लोके यथा पुत्रमित्रात् पुत्रस्य मित्रभूतात् पुत्रद्वारा प्रीतिविषययज्ञदत्तादेः सकाशात् पुत्रो देवदत्तादिरव्यवधानेन प्रीतिविषयत्वात् अतिशयेन प्रियो भवति पितुर्विष्णुमित्रादेस्तथा तद्वत् स्वसम्बन्धित्वेन प्रीतिविषयात् सर्वस्मात् स्वयमतिशयेन प्रिय इत्यर्थः ॥ २७ ॥

एवमात्मनि श्रुतियुक्तिभ्याम् उपपादितां निरतिशयां प्रीतिमनुभव-प्रदर्शनेन द्रढयति मा न भूवमिति । अहं मा न भूवमिति न कापि ममा-सत्त्वमस्तु किन्तु सर्वदैव भूयासं सदा मम सत्त्वमस्तु इत्येवंरूपा आशीः प्रार्थना सर्वस्य प्राणिजातस्य सम्बन्धिनी दृष्टा । सर्वोऽप्येवमेव प्रार्थयते इत्यर्थः । फलितमाह प्रत्यक्षेति । यतः एवं सर्वैः प्रार्थ्यते अत आत्मनि निरतिशया प्रीतिः प्रत्यक्षसिद्धा इत्यर्थः ॥ २८ ॥

एतद् विवक्षया पुत्रे मुख्यात्मत्वं श्रुतीरितम् ।
आत्मा वै पुत्रनामेति तच्चोपनिषदि स्फुटम् ॥ ३० ॥
सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते ।
अथास्येतर आत्मायं कृतकृत्यः प्रमीयते ॥ ३१ ॥
सत्यप्यात्मनि लोकोऽस्ति नापुत्रस्यात एव हि ।
अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः ॥ ३२ ॥

वृत्तानुकीर्त्तनपुरःसरं मतान्तरं दूषयितुमनुभाषते इत्यादिभिरिति । इतिशब्देनानुभवः परामृश्यते आदिशब्देन युक्तिश्रुती इत्यादिभिरनुभवश्रुतियुक्तिलक्षणैस्त्रिभिः प्रमाणैरेवमुक्तेन प्रकारेणात्मनि प्रीतौ सिद्धायामपि केचित् श्रुत्यादितात्पर्य्यानभिज्ञा आत्मनः पुत्रभार्य्यादिशेषत्वं पुत्रादीन् प्रति शेषोपसर्जनत्वमीरितमभिहितम् ॥ २९ ॥

इदं कुतोऽवगतमित्यत आह एतदिति । एतद्विवक्षया केचिदीर्यन्ते इत्येतदभिव्यक्तीकरणाभिप्रायेण आत्मा वै पुत्रनामासीत्यादिकया श्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः । किञ्च तत् पुत्रस्य मुख्यात्मत्वमुपनिषदि ऐतरेयोपनिषदादौ स्फुटं व्यक्तम् अभिहितमिति शेषः ॥ ३० ॥

येन वाक्येन इत्याकाङ्क्षायां तद्वाक्यमर्थतः पठति । सोऽस्येति । अस्य पितुः पुरुषे ह वा अयमादितो गर्भो भवतीति प्रकरणादौ पुरुषे देहे गर्भत्वेनोक्तः अयं सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति इत्यात्यतिशयेन भावनीयत्वोक्तः पुत्ररूप आत्मा पुण्येभ्यः कर्मभ्यः पुण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः । अथानन्तरमस्य पितुरयं प्रत्यक्षेण परिदृश्यमान इतरः पुत्रादन्यो जरया ग्रस्तः पितृरूप आत्मा अयं कृतकृत्यः अनुष्ठितकर्त्तव्यः सन् प्रमीयते म्रियत इत्यर्थः ॥ ३१ ॥

उक्तस्यार्थस्य दृढीकरणाय पुत्ररहितस्य परलोकाभावप्रदर्शनपरस्य

मनुष्यलोको जय्यः स्यात् पुत्रेणैवेतरेण नो ।
मुमूर्षुर्मन्त्रयेत् पुत्रं त्वं ब्रह्मेत्यादिमन्त्रकैः ॥ २३ ॥
इत्यादिश्रुतयः प्राहुः पुत्रभार्यादिशेषिताम् ।
लौकिका अपि पुत्रस्य प्राधान्यमनुमन्वते ॥ २४ ॥
स्वस्मिन् मृतेऽपि पुत्रादिर्जीवेद् वित्तादिना यथा ।
तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः ॥ २५ ॥

नापुत्रस्य लोकोऽस्तीति वाक्यस्यार्थमाह सत्यपीति । यतः पुत्रस्य मुख्यात्मत्वमस्ति अत एवात्मनि स्वस्मिन् सत्यपि स्थितेऽपि अपुत्रस्य पुत्ररहितस्य पितुर्लोकः परलोको नास्ति हि इदं पुराणादिषु प्रसिद्धमित्यर्थः । अतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकस्य अनुशिष्टं लोक्यमाहुरिति वाक्यस्यार्थमाह अनुशिष्टमिति । मनीषिणः शास्त्राभिज्ञा अनुशिष्टं शब्दमार्थस्यं ब्रह्मेत्यादिभिर्मन्त्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाधनमाहुरित्यर्थः ॥ २२ ॥

इदानीम् ऐहिकफलस्यापि पुत्रैकसाध्यत्वप्रतिपादनपरं सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति मनुष्येति । मनुष्यलोकरूपं पुत्रेणैव जय्यं स्यात् वश्यायत्तं स्यात् इतरेण कर्मादिना साधनान्तरेण नो नैव भवति पुत्रजन्मनः पूर्वं साधनमपि धनादिकं निर्वेदजनकं भवतीति भावः । अनुशिष्टं पुत्रमेव लोक्यमित्यत्र पुत्रानुशासनप्रकारम् इदानीं तदवसरं तन्मन्त्रांश्च दर्शयति मुमूर्षुरिति । आदिशब्देन त्वं यज्ञस्त्वं लोक इति मन्त्रौ गृह्येते एभिस्त्वं ब्रह्मेत्यादिभिस्त्रिभिर्मन्त्रैर्मुमूर्षुः पिता मरणावसरे पुत्रं मन्त्रयेत् पुत्रानुशासनं कुर्यादित्यर्थः ॥ २३ ॥

उक्तमर्थं निगमयति इत्यादीति । न केवलमयं श्रुतिसिद्धोऽर्थः किन्तु लोकप्रसिद्धोऽपीत्याह लौकिका इति ॥ २४ ॥

तदेवोपपादयति स्वस्मिन्निति । स्वस्मिन् पित्रादौ । एकेनादिशब्देन

वाङ्मेतावता नाम्ना शेषो भवति कस्य चित् ।
गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा ॥ २६ ॥
देवदत्तस्तु सिंहोऽयमित्यैक्यं गौणमेतयोः ।
भेदस्य भासमानत्वात् पुत्रादेरात्मता तथा ॥ २७ ॥
भेदोऽस्ति पञ्चकोशेषु साक्षिणो न तु भात्यसौ ।
मिथ्यात्मतातः कोशानां स्थाणोश्चौरात्मता यथा ॥२८॥

आत्मादयो गृह्यन्ते । द्वितीयेन स्नेहादयः । फलितमाह मुख्या इति । तस्मात् अपवादं मोढाऽपि पुत्रादिजीवनोपायं सम्पादयति ततस्तस्मात् पुत्रादयो मुख्याः प्रधानभूता इत्यर्थः ॥ २५ ॥

एवं वेदलोकप्रसिद्धिभ्यां दर्शितं पुत्रादिप्राधान्यमङ्गीकरोति वाङ्मिति । तर्ह्यात्मनः शेषित्वोपपादनं व्यर्थमित्याशङ्क्याह एतावतेति । एतावता कस्यचित् पुत्रादेः प्राधान्यमङ्गीकृतमेतावता । न हि प्रतिपाद्यात्मनोऽर्थविहितिरित्याशङ्क्य यत्र यत्र व्यवहारे यस्य प्रधानत्वं विवक्ष्यते तस्य तस्यात्मत्वम् तत्र प्राधान्यदर्शनार्थमुपोद्घातत्वेनात्मनस्त्रैविध्यमाह गौणेति । गौणात्मा मिथ्यात्मा मुख्यात्मा च त्रिविधा भवति ॥ २६ ॥

तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति । अयं देवदत्तः सिंह इति यद्देवदत्तसिंहयोरैक्यं तद्गौणमौपचारिकम् । तत्र हेतुमाह एतयोरिति । दार्ष्टान्तिके योजयति पुत्रादेरिति ॥ २७ ॥

अनन्तरं मिथ्यात्मानं दर्शयति भेदोऽस्तीति । पञ्चकोशे आनन्दमयान्तेषु पञ्च कोशेषु साक्षिणः सकाशात् विद्यमानोऽपि भेदो नावभासते अतः कोशानां मिथ्यात्मत्वमित्यर्थः । मिथ्यात्मनि दृष्टान्तमाह स्थाणोरिति । अज्ञानदोषाद्भ्रमवशात् स्थाणोश्चौरत्वं यथा मिथ्या तद्वदित्यर्थः ॥ २८ ॥

न भाति भेदो नाप्यस्ति साक्षिणोऽप्रतियोगिनः ।
सर्वान्तरत्वात् तस्यैव मुख्यमात्मत्वमिष्यते ॥ ३९ ॥
सत्येवं व्यवहारेषु येषु यस्यात्मतोचिता ।
तेषु तस्यैव शेषित्वं सर्वस्यान्यस्य शेषता ॥ ४० ॥
मुमूर्षोर्गृहरक्षादौ गौणात्मैवोपयुज्यते ।
न मुख्यात्मा न मिथ्यात्मा पुत्रः शेषीभवत्यतः ॥ ४१ ॥

एवं गौणमिथ्यात्मानावुपपाद्य तदानीं साक्षिणो मुख्यात्मत्वमुपपादयति न भातीति । साक्षिणः साक्षिरूपस्यात्मनो गौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति मिथ्यात्मनो देहादेरिव भेदो नाप्यस्ति । तत्रोभयत्र हेतुरप्रतियोगिन इति । हेतुगर्भितं विशेषणमप्रतियोगित्वात् यथा पुत्रादेर्देहादेरपि स्वस्य प्रतियोगी विद्यते नैवं स्वस्य वस्तुनो वस्तुभूतः कश्चित् प्रतियोग्यस्ति देहादेः सर्वस्यारोपितत्वादिति भावः । ननु भेदाभावेन साक्षिणो गौणात्मत्वे मा भूतां मुख्यात्मत्वं कुत इत्यत आह सर्वान्तरेति । सर्वस्माद्देहपुत्रादेरान्तरत्वात् सर्वसाक्षिणः प्रतीचः सर्वान्तरत्वेन प्रतीयमानत्वात् तस्यैव साक्षिण एवात्मत्वं मुख्यमनौपचारिकमिष्यते अभ्युपगम्यत इत्यर्थः । अत्रेदमनुमानं विमतः साक्षी मुख्य आत्मा भवितुमर्हति सर्वान्तरत्वात् यो मुख्य आत्मा न भवति स सर्वान्तरोऽपि न भवति यथाऽहङ्कारादिरिति केवलव्यतिरेकी ॥ ३९ ॥

भवतु आत्मत्रैविध्यं प्रकृतः शेषित्वाभिधाने किमायातमित्यत आह सत्येवमिति । एवमात्मत्रैविध्ये सति येषु लौकिकवैदिकव्यवहारेषु पालनपोषणमुक्त्याद्यात्मव्यवहारादिषु व्यवहारविशेषेषु यस्य पुत्रादेर्देहादेः साक्षिणो वा तात्म्यमुचितं भवति तेषु तस्य पुत्रादेर्देहादेः साक्षिणो वा शेषित्वं प्रधानत्वम् अन्यस्य तद्व्यतिरिक्तस्य सर्वस्य शेषता अप्रधानत्वं भवतीति शेषः ॥ ४० ॥

एतदेव प्रपञ्चयति मुमूर्षोरित्यादिना श्लोकपञ्चकेन । मुमूर्षोर्गृ-

अध्येता वह्निरित्यत्र सन्नप्यग्निर्न गृह्यते ।
अयोग्यत्वेन योग्यत्वात् वटुरेवात्र गृह्यते ॥ ४२ ॥
कृशोऽहं पुष्टिमाप्स्यामीत्यादौ देहात्मतोचिता ।
न पुत्रं विनियुङ्क्तेऽत्र पुष्टिहेत्वन्नभक्षणे ॥ ४३ ॥
तपसा स्वर्गमेष्यामीत्यादौ कर्त्रात्मतोचिता ।
अनपेक्ष्य वपुर्भोगं चरेत् कृच्छ्रादिकं ततः ॥ ४४ ॥

इत्यादौ कर्मविशेषे गौणात्मैव पुत्रभार्यादिरूप एवोपयुज्यते उपयुक्तो भवति उत्सवस्य जिजीविषुत्वात् इत्यर्थः । मुख्यात्मा साक्षी नोपयुज्यते अविकारित्वात् नापि मिथ्यात्मा तस्य मरणोन्मुखत्वादित्यर्थः । फलित-माह पुत्र इति । स्पष्टम् ॥ ४१ ॥

उक्तो व्यवहारादिव्यवहारे सत्यपि स्वस्मिन् पुत्रादिस्वीकारे दृष्टान्त-माह अध्येता इति । अयम् अध्येता वह्निरित्यस्मिन् प्रयोगे स्वरूपेण विद्यमानोऽप्यग्निर्नाग्निपदार्थत्वेन गृह्यते तस्याध्येतृत्वायोगात् किन्तु अध्येतृत्वयोग्यो वटुर्माणवक एवास्मिन् प्रयोगे अग्निपदार्थत्वेन गृह्यते योग्यत्वादित्यर्थः ॥ ४२ ॥

एवं गौणात्मप्राधान्यव्यवहारमुदाहृत्य मिथ्यात्मप्राधान्यव्यवहारमुदाहरति कृशोऽहमिति । अहं कृशो जातः अन्नभक्षणादिना पुष्टिः प्राप्स्यामीत्यादिलौकिकव्यवहारे अन्नभक्षणयोग्यस्य देहस्यैवात्मत्वं स्वीकर्तुमुचितम् । तदर्थं लोकव्यवहारप्रदर्शनेन दृढयति न पुत्र-मिति ॥ ४३ ॥

किञ्च तपसेति । यदा तु तपः कृत्वा स्वर्गं गमिष्यामीत्यादि-व्यवहारं करोति तदा कर्तृत्वाद्यभिमानवतो जीवस्यैवात्मत्वमुचितं न देहादेरित्यर्थः । एतदेवोपपादयति अनपेक्ष्येति । अतो न देहस्यात्म-

मोक्ष्येऽहमित्यत्र युक्तं चिदात्मत्वं तदा पुमान् ।
तद्वेत्ति गुरुशास्त्राभ्यां न तु किञ्चित् चिकीर्षति ॥४५॥
विप्रक्षत्रादयो यद्वद् बृहस्पतिसवादिषु ।
व्यवस्थितास्तथा गौणमिथ्यामुख्या यथोचितम् ॥ ४६ ॥
तत्र तत्रोचिते प्रीतिरात्मन्येवातिशायिनी ।
अनात्मनि तु तच्छेषे प्रीतिरन्यत्र नोभयम् ॥ ४७ ॥

व्यमुचितं ततो देहभोगपरित्यागपूर्वकं कष्टरूपकारकं कृच्छ्रचान्द्रायणादिकं चरतीत्यर्थः ॥ ४४ ॥

किञ्च मोक्ष्येऽहमिति । यदा पुमान् शमादीन् सम्पाद्य मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्याम् आचार्योपदेशवाक्यार्थविचारजन्यापरोक्षज्ञानेन नाहं कर्त्ता आत्मा सच्चिदानन्दरूपब्रह्माऽहमस्मीति चिदात्मानमवगच्छति तस्य चिदात्मत्वमेवोचितं न तु तत्र मर्त्याद्यात्मत्वमित्यर्थः ॥ ४५ ॥

उदाहृतानां त्रिविधानामात्मनां व्यवहारविशेषेषु व्यवस्थया प्राधान्ये दृष्टान्तमाह विप्रेति । यथा ब्राह्मणो बृहस्पतिसवेन यजेत इत्यत्र ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः राजा राजसूयेन यजेत इत्यत्र राज्ञ एवाधिकारो न ब्राह्मणवैश्ययोः वैश्यो वैश्यस्तोमेन यजेत इत्यत्र वैश्यस्याधिकारो नेतरयोः एवं गौणमिथ्यामुख्यभेदानाम् आत्मनां यथायोग्यं स्वोचितव्यवहारेषु प्राधान्यमिति भावः ॥ ४६ ॥

फलितमाह तत्र इति । यस्मिन् यस्मिन् व्यवहारे यो य आत्मा उचितो भवति तस्मिन् तस्मिन् व्यवहारे उचिते उपयोगितया प्रधानभूते आत्मन्येव प्रीतिरतिशायिनी अतिशयवती तच्छेषे तस्यात्मनः शेषे गौणभूतेऽनात्मनि आत्मव्यतिरिक्ते वस्तुनि प्रीतिमात्रं न निरतिशयं प्रेम इत्यर्थः । अन्यत्र आत्मतच्छेषाभ्यामन्यस्मिन् वस्तुनि नोभयम् उभयविधमपि प्रेम नास्तीत्यर्थः ॥ ४७ ॥

उपेक्ष्यं द्वेष्यमित्यन्यत् द्वेधा मार्गतृणादिकम् ।
उपेक्ष्यं व्याघ्रसर्पादि द्वेष्यमेवं चतुर्विधम् ॥ ४८ ॥
आत्मा प्रेष्ठ उपेक्ष्यश्च द्वेष्यश्चेति चतुर्ष्वपि ।
न व्यक्तिनियमः किन्तु तत्तत्कार्य्यात् तथा तथा॥४९॥
स्याद् व्याघ्रः संमुखो द्वेष्यो ह्युपेक्ष्यस्तु पराङ्मुखः ।
लालनादनुकूलश्चेद् विनोदायेति प्रेष्ठताम् ॥ ५० ॥
व्यक्तीनां नियमो मा भूल्लक्षणात्तु व्यवस्थितिः ।

अन्यत् नोभयमित्यत्राभिहितस्यान्यस्यावान्तरभेदमाह उपेक्ष्यमिति । अन्यदित्युक्तमानं वस्तु उपेक्ष्यम् उपेक्षाविषयः द्वेष्यं द्वेषविषयश्चेति द्विधा द्विप्रकारं भवति । तदुभयमुदाहरति मार्गेति । मार्गगत तृणलोष्टादिकमुपेक्ष्यं स्वस्योपद्रवहेतुव्याघ्रादिकं द्वेष्यमित्यर्थः । फलितमाह एवमिति ॥ ४८ ॥

चातुर्विध्यमेव दर्शयति आत्मेति । नन्वात्मादीनां चतुर्णामपि प्रियतमत्वादिकं किं नियतं नेत्याह चतुर्ष्विति । अयमेव प्रियतमः अयमेव प्रियः इदमेव उपेक्ष्यमिदमेव द्वेष्यं नान्यदिति नियमो नास्तीत्यर्थः । किं तर्हीत्यत आह किन्त्विति । तस्मात् तस्मात् कार्यविशेषादुपकारादिरूपात् तथा तथा प्रियाप्रियादिरूपेत्यर्थः ॥ ४९ ॥

एकस्यानियमप्रयोजनाय प्रसिद्धद्वेष्ये व्याघ्रे तदभावं दर्शयति स्यादिति । यदा व्याघ्रः स्वभक्षणाय संमुखमागच्छति तदा द्वेष्यो भवति । स एव पराङ्मुखो गच्छति चेत् उपेक्ष्यो भवति । स एव यदि लालनात् अनुकूलो भवति तदा विनोदायेति विनोदसाधनं भवतीति प्रेष्ठतां स्वोपकारकत्वेन प्रियत्वं भजते इत्यभिप्रायः ॥ ५० ॥

नन्वेकस्यैव वस्तुनः प्रियत्वादिधर्मव्यवस्थाङ्गीकारे व्यवहारव्यवस्था न स्यादित्याशङ्क्याह व्यक्तीनामिति । व्यक्तिनियमाभावेऽपि लक्षणवशात्

आनुकूल्यं प्रातिकूल्यं द्वयाभावश्च लक्षणम् ॥ ५१ ॥

आत्मा प्रेयान् प्रियः शेषो द्वेष्योपेक्ष्ये तदन्ययोः ।
इति व्यवस्थितौ लोके याज्ञवल्क्यमतञ्च तत् ॥ ५२ ॥

अन्यत्रापि श्रुतिः प्राह पुत्राद् वित्तात् तथान्यतः ।
सर्वस्मादान्तरं तत्त्वं तदेतत् प्रेय इष्यताम् ॥ ५३ ॥

श्रौत्या विचारदृष्ट्यायं साक्ष्येवात्मा न चेतरः ।

व्यवस्था भविष्यतीत्यर्थः । किं लक्षणमित्याकाङ्क्षायां तल्लक्षणमाह आनुकूल्यमिति । अनुकूलत्वं प्रियत्वस्य लक्षणं व्यावर्त्तकोऽधर्मः प्रतिकूलत्वं द्वेष्यलक्षणम् उपेक्ष्यस्यानुकूल्यप्रातिकूल्यरूपद्वयाभावश्च लक्षणमित्यर्थः ॥ ५१ ॥

एतावता प्रबन्धसन्दर्भेण उपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य दर्शयति आत्मेति । आत्मा प्रत्यगानन्दः प्रेयानतिशयेन प्रियः शेषः स्वोपसर्जनभूतः पदार्थः प्रियः तदन्ययोस्ताभ्यामात्मतच्छेषाभ्यामन्ययोर्व्याघ्रपर्यायगततृणादिरूपयोर्द्वेष्योपेक्ष्ये यथाक्रमं भवत इत्यर्थः । एवं चातुर्विध्येन लोके व्यवस्थितः व्यवस्थां प्राप्तः उक्तप्रकारचतुष्टयातिरिक्तं न किञ्चिदस्तीत्यभिप्रायः । अत्रैवार्थे श्रुत्यभिमतोऽपीत्याह याज्ञवल्क्येति । आत्मादीनां प्रियतमत्वादिकं यत्तद् याज्ञवल्क्यमतं याज्ञवल्क्यस्यापि सम्मतमित्यर्थः ॥ ५२ ॥

न केवलं मैत्रेयीब्राह्मण एवात्मनः प्रियतमत्वमुक्तं किन्तु पुरुषविधब्राह्मणेऽपीत्यभिप्रायेण तद्वाक्यार्थं संक्षिप्याह अन्यत्रापीति । तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मेति अनेनैव वाक्येन पुत्रवित्तादेः सर्वस्मादान्तरस्यात्मतत्त्वस्य प्रियतमत्वमीरितमित्यर्थः ॥ ५३ ॥

भवत्वेवं श्रुत्याभिधानं ततः किमायातमित्यत आह श्रौत्या

कोषान् पञ्च विविच्यान्तर्वस्तुदृष्टिर्विचारणा ॥ ५४ ॥
जागरस्वप्नसुप्तीनामागमापायभासनम् ।
यतो भवत्यसावात्मा स्वप्रकाशचिदात्मकः ॥ ५५ ॥
शेषाः प्राणादिवित्तान्ता आसन्नास्तारतम्यतः ।
प्रीतिस्तथा तारतम्यात् तेषु सर्वेषु वीक्ष्यते ॥ ५६ ॥
वित्तात् पुत्रः प्रियः पुत्रात् पिण्डः पिण्डात् तथेन्द्रियम् ।
इन्द्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रियः ॥ ५७ ॥

विचारणेति। श्रुत्यर्थपर्यालोचनरूपया विचारदृष्ट्या साक्षिण एव मुख्यात्मत्वं नेतरस्य पुत्रादेरित्यर्थः। विचारदृष्टेत्यभिहितस्य विचारस्य स्वरूपमाह कोषानिति। अन्नमयादीन् पञ्च कोषान् विविच्य तैत्तिरीयश्रुत्युक्तप्रकारेण आत्मनः पृथक् कृत्वान्तःस्थितस्यात्मनोऽनुभवो विचारणेत्यर्थः॥ ५४ ॥

अन्तःस्थितस्य वस्तुनो दर्शनप्रकारमाह जागरेत्यादिना। जाग्रदाद्यवस्थानां मध्ये उत्तरोत्तरावस्थां गतस्य पूर्वपूर्वावस्थानिवृत्तेरवभासनं यतो नित्यचैतन्यरूपात् साक्षिणो भवति स स्वप्रकाशचिद्रूप आत्मेत्यर्थः॥ ५५ ॥

संक्षेपेणोक्तं श्रुत्यर्थं प्रपञ्चयति शेषा इति। साक्षिव्यतिरिक्ताः प्राणादिवित्तान्ता वक्ष्यमाणाः पदार्थाः तारतम्येनात्मन आसन्नाः समीपवर्तिनो भवन्ति। तत्रोपपत्तिमाह प्रीतिरिति। यथा तारतम्येनान्तरत्वं तद्वत् तेषु प्राणादिषु तारतम्यात् प्रीतिर्वीक्ष्यते सर्वैरपीति शेषः॥ ५६ ॥

प्रीतेस्तारतम्येनानुभवमेव विशदयति वित्तादिति। पिण्डोऽन्नमयो देहः। अयं भावः सर्वैः प्राणिभिः पुत्रादिविपत् परिहाराय वित्तव्ययः क्रियते स्वदेहरक्षणाय कदाचित् पुत्रादिरपि दीयते इन्द्रियनाश-

एवं स्थिते विवादोऽत्र प्रतिबुद्धविमूढयोः ।
श्रुत्योदाहारि तत्रात्मा प्रेयानित्येव निर्णयः ॥ ५८ ॥
साक्ष्येव दृश्यादन्यस्मात् प्रेयानित्याह तत्त्ववित् ।
प्रेयान् पुत्रादिरेवेमं भोक्तुं साक्षीति मूढधीः ॥ ५९ ॥
आत्मनोऽन्यं प्रियं ब्रूते शिष्यश्च प्रतिवाद्यपि ।
तस्योत्तरं वचो बोधशापौ कुर्यात् तयोः क्रमात् ॥ ६० ॥
प्रियं त्वां रोत्स्यतीत्येवमुत्तरं वक्ति तत्त्ववित् ।

परिहाराय ताडनादिना देहपीडाप्यङ्गीक्रियते मरणप्रसक्तौ तत्परिहाराय इन्द्रियवैकल्यमप्यङ्गीक्रियते अतएवोत्तरोत्तरमतिशयेन प्रियत्वमवान्तरभेदसिद्धम् आत्मनस्तु निरतिशयप्रेमास्पदत्वं विद्वदनुभवसिद्धमिति ॥ ५७ ॥

एवमात्मनः प्रियतमत्वे प्रमाणसिद्धेऽपि । ज्ञान्यज्ञानिनोर्विप्रतिपत्तिनिरसनाय श्रुत्या तद्विप्रतिपत्तिर्दर्शिता इत्याह एवमिति । तत्र-निर्णयमाह तत्रात्मेति । आत्मनः प्रियतमत्वस्योपपादितत्वात् इत्यर्थः ॥ ५८ ॥

तामेव विप्रतिपत्तिमाह साक्ष्येवेति ॥ ५९ ॥

आत्मातिरिक्तस्य प्रियतमत्ववादिनो विभज्य उत्तराभिधानाय तमेव वादिनं विभज्य कथयति आत्मन इति । उत्तराभिधानप्रकारमेवाह तस्योत्तरमिति । तयोः शिष्यप्रतिवादिनोः यथाक्रमं तस्य वचनस्योत्तरं वचः प्रत्युत्तररूपं वाक्यं क्रमेण बोधशापौ बोधरूपं शापरूपञ्च कुर्यादित्यर्थः ॥ ६० ॥

अनयोः प्रतिवचनप्रदानरूपं य योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियं रोत्स्यतीति एवमनन्तरश्रुतिवाक्यमर्थतः पठति प्रियमिति । तत्त्ववित् शिष्यप्रतिवादिनावुभावपि प्रति हे शिष्य ! हे प्रतिवादिन् ! प्रियं

स्वोक्तप्रियस्य दुष्टत्वं शिष्यो वेत्ति विवेकतः ॥ ६१ ॥
अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरम्।
लब्धोऽपि गर्भपातेन प्रसवेन च बाधते।
जातस्य ग्रहरोगादि कुमारस्य च मूर्खता।
उपनीतेऽप्यविद्यत्वमनुद्वाहश्च पण्डिते।
यूनश्च परदारादि दारिद्र्यञ्च कुटुम्बिनः।
पित्रोर्दुःखस्य नास्त्यन्तो धनी चेन्म्रियते तदा।
एवं विविच्य पुत्रादौ प्रीतिं त्यक्त्वा निजात्मनि।
निश्चित्य परमां प्रीतिं वीक्ष्यते तमहर्निशम्॥६२॥६३॥६४॥६५॥
आग्रहाद् ब्रह्मविद्द्वेषादपि पक्षमनुज्झतः।

त्वदभिप्रेत पुत्रादिरूप स्वनाशेन त्वा शिष्यं प्रतिवादिनं वा रोत्स्यति रोदयिष्यति इत्येवमुक्तेन प्रकारेण उत्तरं प्रतिवचनं वक्ति ब्रवीति। इदमेवंविधं वचनं शिष्यप्रतिवादिनोरुभयोः कथमुत्तरं जातमित्याशङ्क्य शिष्यं प्रत्युत्तरत्वमुपदेशरूपत्वं तावत् द्योतयति स्वोक्तप्रियस्येत्यादिना वीक्ष्यते तमहर्निशम् इत्यन्तेन सार्द्धश्लोकचतुष्टयेन। शिष्यः स्वोक्तप्रियस्य स्वेनाभिहितस्य पुत्रादिरूपस्य प्रीतिविषयस्य विवेकतः वक्ष्यमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति ॥ ६१ ॥

दोषविचारप्रकारं दर्शयति अलभ्येति एवम्। पुत्रगतदोषसंकीर्त्तनं दारादिसर्वविषयदोषोपलक्षणार्थम्। एवं विविच्येति। एवमुक्तेन प्रकारेण पुत्रादौ विषयजाते विवेच्य विद्यमानान् दोषान् विभज्य ज्ञात्वा तेषु प्रीतिं परित्यज्य निजात्मनि प्रत्यग्रूपे साक्षिणि परमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्यगात्मानमहर्निशं सर्वदा वीक्ष्यते अनुसन्धत्ते इत्यर्थः ॥ ६२ । ६३ । ६४ । ६५ ॥

अथ त्वा रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं प्रति शापरूपत्वं

वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ॥ ६६ ॥
ब्रह्मविद् ब्रह्मरूपत्वादीश्वरस्तेन वर्णितम् ।
यद् यत् तत्तत् तथैव स्यात् तच्छिष्यप्रतिवादिनोः ॥ ६७ ॥
यस्तु साक्षिणमात्मानं सेवते प्रियमुत्तमम् ।
तस्य प्रेयानसावात्मा न नश्यति कदाचन ॥ ६८ ॥

प्रकटयति आप्तत्वादिति । आप्तत्वादुक्तं पुत्त्रादिप्रियत्वं सर्व्वथा न त्यजामीत्येवंरूपात् ब्रह्मविदो हेतोः अनेनोक्तं विघटयिष्यामीत्येवंरूपाच्च परं पुत्त्रादीनामेव प्रियत्वाभिधानरूपमपरित्यजतः प्रतिवादिनो नरकप्राप्तिः तथा बहुयोनिषु नरतिर्य्यगादिषु असंख्येषु अनेकेषु जन्मसु दोषः पुत्त्रभार्य्यादिषु इष्टवियोगानिष्टप्राप्तिरूपः प्रोक्तः प्रियं त्वां रोत्स्यतीति वदता ज्ञानिना इति शेषः ॥ ६६ ॥

ननु ज्ञानिनोक्तस्यैकस्यैव वाक्यस्य शिष्यं प्रत्युपदेशरूपत्वं वादिनं प्रति शापरूपत्वञ्चेति विरुद्धं रूपद्वयं कथं घटते इत्याशङ्क्य उत्तरप्रदातुरीश्वररूपत्वात् तस्याभिप्रायानुसारेण उभयं भविष्यतीति मन्वानस्तदुपपादकस्य ईश्वरोऽहं तथैव स्यात् इति समनन्तरवाक्यस्य तात्पर्य्यमाह ब्रह्मविदिति । यतो ब्रह्मविदः स्वस्य ब्रह्मत्वानुभवादीश्वरत्वमस्ति अतस्तेन यं यं शिष्यादिकं प्रति यद्यदिष्टमनिष्टं वाभिधीयते तच्छिष्यप्रतिवादिनोस्तस्य ज्ञानिनो यः शिष्यः यश्च प्रतिवादी तयोः तथैव स्यात् इष्टमनिष्टं वावश्यं भवेदित्यर्थः ॥ ६७ ॥

व्यतिरेकमुखेनोक्तस्यार्थस्यान्वयमुखेन प्रतिपादकम् आत्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनन्तरं वाक्यमर्थतः पठति यस्त्विति । तुशब्द उक्तवैलक्षण्यद्योतनार्थः । अनात्मप्रियवादिनोऽन्यो यः शिष्यः आत्मानमेवोत्तमं प्रियं निरतिशयप्रेमगोचरं सेवते सदानुसन्दधाति तस्य शिष्यादेः प्रेयान्

परप्रेमास्पदत्वेन परमानन्दरूपता ।
सुखवृद्धिः प्रीतिवृद्धौ सार्वभौमादिषु श्रुता ॥ ६९ ॥
चैतन्यवत् सुखं चास्य स्वभावश्चेच्चिदात्मनः ।
धीवृत्तिष्वनुवर्त्तेत सर्व्वास्वपि चितिर्यथा ॥ ७० ॥
मैवमुष्णप्रकाशात्मा दीपस्तस्य प्रभा गृहे ।
व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्त्तनम् ॥ ७१ ॥

प्रियतमत्वेनाभिमतोऽस्यात्मा प्रतिवाद्यभिमतप्रियमिव न कदाचिद् विनश्यति किन्तु सदानन्दरूपः स्वस्वभावत इत्यर्थः ॥ ६८ ॥

इत्थमात्मनः परप्रेमास्पदत्वे हेतुं प्रसाध्य इदानीं फलितमाह परप्रेमास्पदत्वेनेति । अत्रायं प्रयोगः आत्मा परमानन्दरूपः निरतिशयप्रेमविषयत्वात् यः परमानन्दरूपो न भवति स निरतिशयप्रेमविषयोऽपि न भवति यथा घटादिरिति केवलव्यतिरेकी । परप्रेमास्पदहेतोरात्मनः परमानन्दरूपतासाधने सामर्थ्यद्योतनाय प्रीतिवृद्धौ सुखवृद्धिमुदाहरति सुखवृद्धिरिति । यतः सार्वभौमादिहिरण्यगर्भान्तेषु पदविशेषेषु यत्र यत्र प्रीतिर्वर्द्धते तत्र तत्र सुखाभिवृद्धिरस्तीति तैत्तिरीयबृहदारण्यकश्रुत्योरभिहितम् अतः प्रीतेर्निरतिशयत्वे सति आनन्दस्यापि निरतिशयत्वमवगन्तुं शक्यत इति भावः ॥ ६९ ॥

नन्वात्मनः परमानन्दरूपत्वमनुपपन्नं तथात्वे चैतन्यस्येव तत्स्वरूपभूतस्यानन्दस्यापि सर्वासु धीवृत्तिषु अनुवृत्तिः प्रसज्येतेति शङ्कते चैतन्यवदिति ॥ ७० ॥

चिदानन्दयोरुभयोरपि आत्मस्वरूपत्वेऽपि वृत्तिषु चित एवानुवृत्तिर्नानन्दस्येति दृष्टान्तावष्टम्भेन परिहरति मैवमिति । यथोष्णप्रकाशात्मकस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानन्दस्य इत्यर्थः ॥ ७१ ॥

गन्धरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् ।
एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा ॥ ७२ ॥
चिदानन्दौ नैव भिन्नौ गन्धाद्यास्तु विलक्षणाः ।
इति चेत् तदभेदोऽपि साक्षिण्यन्यत्र वा वद ॥ ७३ ॥
आद्ये गन्धादयोऽप्येवमभिन्नाः पुष्पवर्त्तिनः ।
अक्षभेदेन तद्भेदे वृत्तिभेदात् तयोर्भिदा ॥ ७४ ॥
सत्त्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः ।

ननु चिदानन्दयोरभेदे चिदभिव्यञ्जकधीवृत्तावानन्दाभिव्यक्तिरपि स्यादित्याशङ्क्य तथा नियमाभावे दृष्टान्तमाह गन्धेति । यथैकद्रव्यवर्त्तिनां गन्धादीनां चतुर्णां मध्ये घ्राणादिष्वेकेनेन्द्रियेण गन्धादिरेकैक एव गुणो गृह्यते नेतरः तथा चिदानन्दयोर्मध्ये चित एवावभासनमित्यर्थः ॥ ७२ ॥

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं शङ्कते चिदानन्दाविति । विलक्षणा भिन्ना इत्यर्थः । उक्तवैलक्षण्यं परिहर्तुं दार्ष्टान्तिके चिदानन्दयोरभेदः किं स्वाभाविक उत औपाधिक इति विकल्पयति तदभेदोऽपीति । तदभेदस्तयोश्चिदानन्दयोरभेद ऐक्यं साक्षिण्यात्मस्वरूपे वान्यत्र एतदुपाधिभूतायां वृत्ताविति वेत्यर्थः ॥ ७३ ॥

प्रथमे पक्षे दृष्टान्तदार्ष्टान्तिकयोः साम्यमाह आद्य इति । आद्ये चिदानन्दयोः साक्षिणि भेदाभावपक्षे पुष्पवर्त्तिनो गन्धादयोऽप्येवं चिदानन्दवदेवाभिन्नाः परस्परं भेदरहिताः इतरपरिहारेणैकस्यानेव-मग्रहणत्वादिति भावः । द्वितीयेऽपि पक्षे साम्यमाह अक्षेति । अक्षाणां गन्धादिग्राहकाणां घ्राणादीन्द्रियाणां भेदेन तद्भेदे तेषां गन्धादीनां भेदाभ्युपगमे तद्वदेव वृत्तिभेदाच्चिदानन्दाभिव्यञ्जकवृत्तीनां राजसता-मसवृत्तीनां भेदात् तयोश्चिदानन्दयोर्भिदा भेदो भवितुमर्हतीत्यर्थः ॥७४॥

ननु तर्हि चिदानन्दयोरैक्यं कुत्रोपलभ्यते इत्याशङ्क्याह सत्त्वेति ।

रजोवृत्तेस्तु मालिन्यात् सुखांशोऽत्र तिरस्कृतः ॥७५॥

तिन्त्रिडीफलमत्यम्लं लवणेन युतं यदा ।
तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा ॥ ७६ ॥

ननु प्रियतमत्वेन परमानन्दतात्मनि ।
विवेक्तुं शक्यतामेवं विना योगेन किं भवेत् ॥ ७७ ॥

यद्योगेन तदेवेति वदामो ज्ञानसिद्धये ।
योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ॥ ७८ ॥

सत्त्ववृत्तौ शुभकर्मोपस्थापितायां सत्त्वगुणपरिणामरूपायां बुद्धिवृत्तौ चित्सुखैक्यं चिदानन्दैक्यं भासते इति शेषः । तत्रोपपत्तिमाह तद्वदिति । कुतस्तर्हि भेदो भासते इत्यत आह रजोवृत्तेरिति ॥७५॥

विद्यमानस्यापि सुखस्य तिरस्कारे दृष्टान्तमाह तिन्त्रिडीफलमिति । यथा तिन्त्रिडीफले लवणयोगादत्यम्लत्वं तिरोहितं तद्वद्रजोवृत्तावात्मानन्दस्य तिरोभाव इत्यर्थः ॥ ७६ ॥

गूढाभिसन्धिः शङ्कते नन्विति । नन्वनेन प्रकारेणात्मनः परमानन्दरूपत्वं परप्रेमास्पदत्वहेतुना गौणमिथ्यात्मरूपेभ्यः प्रियोपेक्ष्यद्वेष्येभ्यो विवेक्तुं विविच्य ज्ञातुं शक्यतां नाम तथापि नायं विवेको मुक्तिसाधनम् अपरोक्षज्ञानद्वारा मुक्तिहेतोर्योगस्यानभिधानादिति गूढोऽभिसन्धिः ॥ ७७ ॥

गूढाभिसन्धिरेवोत्तरमाह यद्योगेनेति । यथा योगस्यापरोक्षज्ञानहेतुत्वमस्ति एवं विवेकस्यापीत्यस्माकमपि गूढोऽभिसन्धिः । इदानीं चोद्यपरिहारयोरुभयोरभिसन्धिं प्रकटयति ज्ञानेति । यथापरोक्षज्ञानसाधनत्वेन योगोऽभिहितः पूर्वस्मिन्नध्याये तथा एतदध्यायाभिहितेन गौण्याद्यात्मविवेकद्वारा कोषपञ्चविवेकेनापि ज्ञानमुत्पद्यते एवेत्यर्थः ॥७८॥

यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
इति स्मृतं फलैकत्वं योगिनाञ्च विवेकिनाम् ॥ ७९ ॥
असाध्यः कस्यचिद् योगः कस्यचिज्ज्ञाननिश्चयः ।
इत्थं विचार्य्य मार्गौ द्वौ जगाद परमेश्वरः ॥ ८० ॥
योगे कोऽतिशयस्तेऽत्र ज्ञानमुक्तं समं द्वयोः ।
रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः ॥ ८१ ॥
न प्रीतिर्विषयेष्वस्ति प्रेयानात्मेति जानतः ।
कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ॥ ८२ ॥

तत्र किं प्रमाणमित्याशङ्क्याह यत् सांख्यैरिति । सांख्यैरात्मानात्मविवेकिभिर्यत् स्थानं मोक्षरूपं प्राप्यते गम्यते तद्योगैर्योगिभिरपि गम्यते प्राप्यते इति वचनेन योगिनां विवेकिनाञ्च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणफलैकत्वमुक्तमित्यर्थः ॥ ७९ ॥

ननु विवेकयोगयोरेकमेव चेत् फलं तर्ह्यनयोरन्यतरस्यैव युक्तं शास्त्रेषु प्रतिपादनं नोभयोरित्याशङ्क्याधिकारिवैचित्र्यात् युक्तमुभयोः प्रतिपादनमित्यभिप्रायेणाह असाध्य इति ॥ ८० ॥

नन्वसम्प्रज्ञातायामसाध्यस्य योगस्य निरोधावस्थत्वमाहु विवेकादतिशयो वक्तुं शक्य इत्याशङ्क्य कोऽतिशयः किम् अपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वात् अथवा द्वैतानुपलब्धिकारणत्वात् इति विकल्प्य प्रथमे पक्षे फलसाम्यमित्याह योगिकोऽतिशय इति द्वयोर्विवेकयोगयोरुभयोरपि ज्ञानद्वारकं फलं समसुक्तं यत् सांख्यैरित्यादिना अतस्तत्र योगे कोऽतिशयः न कोऽपीत्यर्थः । द्वितीयं प्रत्याह रागद्वेषेति ॥ ८१ ॥

विवेकिनो रागाद्यभावमुपपादयति न प्रीतिरिति । आत्मा प्रियतम इति जानतः पुरुषस्य न तावद् विषयेषु प्रीतिरस्ति अतो न तेषु

देहादेः प्रतिकूलेषु द्वेषस्तुल्योदयोरपि।
द्वेषं कुर्व्वन्नयोगी चेदविवेक्यपि तादृशः ॥ ८३ ॥
द्वैतस्य प्रतिभानन्तु व्यवहारे द्वयोः समम्।
समाधौ नेति चेत् तद्वदद्वैतत्वविवेकिनः ॥ ८४ ॥
विवक्ष्यते तदस्माभिरद्वैतानन्दनामके।
अध्याये हि तृतीये तत् सर्व्वमप्यतिमङ्गलम् ॥ ८५ ॥

रागो जायते रागहेतोरानुकूल्यज्ञानस्याभावात्। नापि द्वेषः तद्धेतोः प्रातिकूल्यज्ञानस्याभावात् इत्यर्थः ॥ ८२ ॥

ननु विवेकिनो व्यवहारदशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यते इत्याशङ्क्य तदा योगिविवेकिनोस्तुल्य इति परिहरति देहादेरिति। प्रतिकूलेषु दुःखकारिषु द्वेषकर्त्तुस्तदा योगित्वमेव नाभ्युपगम्यते चेत् तर्हि तादृशस्य विवेकित्वमपि नाभ्युपगच्छाम इत्याह द्वेषमिति। तादृशो द्वेषकर्त्ता चेदविवेक्यपि विवेकवानपि न भवतीत्यर्थः ॥ ८३ ॥

ननु विवेकिनो द्वैतदर्शनमस्ति योगिनस्तु तन्नास्तीति तृतीये विकल्पे योगिनोऽतिशयो भविष्यतीत्याशङ्क्य विवेकिनस्तु द्वैतदर्शनं किं व्यवहारदशायामुच्यते उतान्यदेति विकल्प्य आद्ये यद् योगिनोऽपि समानमित्याह द्वैतस्येति। द्वितीयमाशङ्कते समाधाविति। योगिनः समाधिकाले द्वैतदर्शनं नास्तीत्युच्यते चेदित्यध्याहारः। तर्हि विवेकिनोऽपि विवेकदशायां द्वैतादर्शनं तुल्यमिति परिहरति तद्वदिति। योगिनः समाधिदशायामिवाद्वैततत्त्वविवेकिनोऽद्वैततत्त्वं श्रुतियुक्तिभ्यां विवेचनं कुर्वतोऽपि तस्मिन् काले द्वैतदर्शनं नास्तीत्यर्थः ॥ ८४ ॥

कथं तदभाव इत्याशङ्क्य उपरितनेऽध्याये तदुपपादयिष्यते इत्याह विवक्ष्यत इति। उक्तमर्थं निगमयति तत् सर्व्वमपीति ॥ ८५ ॥

सदा पश्यन् निजानन्दमपश्यन्नखिलं जगत् ।
अर्थाद् योगीति चेत् तर्हि सन्तुष्टो वर्धतां भवान् ॥८६॥
ब्रह्मानन्दाभिधे ग्रन्थे मन्दानुग्रहसिद्धये ।
द्वितीयेऽध्याय एतस्मिन्नात्मानन्दो विविचितः ॥८७॥

इति ब्रह्मानन्दे आत्मानन्दः समाप्तः ।

त्रयोदशपरिच्छेदः ।

ब्रह्मानन्देऽद्वैतानन्दः ।

योगानन्दः पुरोक्तो यः स आत्मानन्द इष्यताम् ।
कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेत् शृणु ॥ १ ॥

ननु द्वैतादर्शनसहितात्मदर्शनवतो योगित्वमेव भविष्यतीति शङ्कते सदा पश्यन्निति । इष्टापत्त्या परिहरति तर्हीति ॥ ८६ ॥

अध्यायतात्पर्यं संक्षिप्य दर्शयति ब्रह्मानन्देति ॥ ८७ ॥

इति ब्रह्मानन्दे आत्मानन्दव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
ब्रह्मानन्दाभिधे ग्रन्थेऽद्वैतानन्दो विविच्यते ॥

नन्वानन्दस्त्रिविधो ब्रह्मानन्दो विद्यासुखं तथा विषयानन्द इति प्रथमाध्याये आनन्दत्रयमेव प्रतिज्ञाय द्वितीयाध्याये तदतिरिक्तात्मानन्द·

आकाशादि स्वदेहान्तं तैत्तिरीयश्रुतीरितम् ।
जगन्नास्त्यन्यदानन्दादद्वैतब्रह्मता ततः ॥ २ ॥
आनन्दादेव तज्जातं तिष्ठत्यानन्द एव तत् ।
आनन्द एव लीनं चेत्युक्तानन्दात् कथं पृथक् ॥ ३ ॥
कुलालाद् घट उत्पन्नो भिन्नश्चेति न शङ्क्यताम् ।

निरूपणात् तद्विरोधो जायत इत्याशङ्क्याह योगानन्द इति । यथा प्रतिज्ञातस्यैव ब्रह्मानन्दस्य योगजन्यसाक्षात्कारविषयत्वेन योगानन्दत्वं निरुपाधिकत्वेन निजानन्दत्वं चाभिहितं तथा च तस्यैव गौणमिथ्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षया आत्मानन्दत्वमभिहितमिति भावः । ननु सजातीयाद् गौणात्मनः पुत्रभार्यादेर्मिथ्यात्मनो देहादेर्विजातीयादाकाशादेश्च भिन्नस्य सद्वयस्यात्मानन्दस्य प्रथमाध्यायोक्ताऽद्वितीययोगानन्दरूपता न सम्भवतीति शङ्कते कथमिति । सजातीयत्वेनाभिमतस्य गौणात्मनः पुत्रादेर्मिथ्यात्मनो देहादेश्च तैत्तिरीयश्रुत्यभिहितजगदन्तःपातित्वादाकाशादेश्च जगतः आत्मानन्दातिरेकेणासत्त्वाद्वितीयब्रह्मरूपता तस्य घटते इति सबहुमानमुत्तरमाह शृण्विति ॥ १ ॥

आकाशादीति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिकया तैत्तिरीयश्रुत्या अभिहितं जगत् स्वकारणभूतादानन्दात् यतः पृथक् नास्ति अतस्तस्यात्मानन्दस्याद्वितीयत्वमित्यभिप्रायः ॥ २ ॥

नन्दाहृतश्रुतिवाक्येनात्मनः कारणत्वं श्रूयते नानन्दस्येत्याशङ्क्य तत्प्रतिपादकं तदीयमेव आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्यादिवाक्यमर्थतः पठति आनन्दादिति । व्याख्यातम् । फलितमाह इत्युक्तेति । तत्रेदमनुमानं सूचितं विमतं जगदानन्दान्न भिद्यते तत्कार्यत्वात् यद् यत् कार्य्यं तत् ततो न भिद्यते यथा मृत्कार्य्यं घटादि मृदो न भिद्यते इति ॥ ३ ॥

कुलालादुत्पन्नस्य घटस्य ततो भेददर्शनादनैकान्तिकता हेतोरित्या-

मृद्वदेष उपादानं न निमित्तं कुलालवत् ॥ ४ ॥
स्थितिर्लयश्च कुम्भस्य कुलाले स्तो न हि क्वचित्।
दृष्टौ तौ मृदि तद्वत् स्यादुपादानं तयोः श्रुतेः ॥ ५ ॥
उपादानं त्रिधा भिन्नं विवर्त्ति परिणामि च।
आरम्भकञ्च तत्रान्त्यौ न निरंशेऽवकाशिनौ ॥ ६ ॥
आरम्भवादिनोऽन्यस्मादन्यस्योत्पत्तिमूचिरे।

ननु कुलालस्य निमित्तकारणत्वात् इहानन्दस्योपादानत्वसमर्थनाम्नैव-मित्याह कुलालादिति। एष आनन्दो मृद्वत् मृद्घटस्येव उपादानम् उपादानकारणम्। कुलालवत् कुलाल इव न निमित्तं निमित्तकारणं न भवतीति ॥ ४ ॥

ननु कुतो नोपादानत्वं कुलालस्यापि इत्याशङ्क्य स्थितिलयाधारत्व-रूपोपादानलक्षणाभावादित्याह स्थितिरिति। हि यस्मात् कारणात् घटस्य स्थितिलयौ कुलालाधारौ न भवतः अतो नोपादानत्वमिति शेषः। ननु तर्हि तावित्यत आह दृष्टौ ताविति। घटस्य स्थितिलयौ तदुपा-दानभूतायां मृद्येव दृष्टौ प्रत्यक्षेणोपलब्धौ। भवत्वेवं तत्र प्रकृते किमा-यातमित्यत आह तद्वदिति। यद्वत् घटस्य मृदुपादानत्वं तद्वज्जगतोऽ-प्यानन्दोपादानत्वं स्यात्। तत्र हेतुः तयोः श्रुतेरिति। तयोर्जगत्-स्थितिलययोः श्रुतेः आनन्दाद्ध्येवेत्यादिवाक्ये आनन्दहेतुकत्वश्रवणादि-त्यर्थः ॥ ५ ॥

आनन्दस्य स्वाभिमतं जगदुपादानत्वं वक्तुं तदवान्तरभेदमाह उपादानमिति। तत्र विवर्त्तं परिशेषयितुम् इतरौ पक्षौ दूषयति तत्रेति। अन्त्यौ आरम्भपरिणामपक्षौ निरंशे निरवयवे वस्तुनि नाव-काशिनौ अवकाशवन्तौ न भवतः ॥ ६ ॥

तयोरनवकाशित्वमेव दर्शयितुं तावदारम्भवादिमतमनुवदति आर-

तन्तोः पटस्य निष्पत्तेर्भिन्नौ तन्तुपटौ खलु ॥ ७ ॥
अवस्थान्तरतापत्तिरेकस्य परिणामिता ।
स्यात् क्षीरं दधि मृत् कुम्भः सुवर्णं कुण्डलं यथा ॥ ८ ॥
अवस्थान्तरभानन्तु विवर्त्तो रज्जुसर्पवत् ।
निरंशेऽप्यस्त्यसौ व्योम्नि तलमालिन्यकल्पनात् ॥ ९ ॥
ततो निरंश आनन्दे विवर्त्तो जगदिष्यताम् ।

म्भेति । आरम्भवादिनो वैशेषिकादयः अन्यस्मात् कार्य्यापेक्षया अन्यस्मात् कारणादन्यस्य कारणापेक्षया अन्यस्य कार्य्यस्योत्पत्तिमूचिरे उक्तवन्तः । कुत एवं वदन्ति इत्यत आह तन्तोरिति । निष्पत्तेरुत्पत्तेर्दर्शनादिति शेषः । एतावता कथं कार्य्यकारणभेदसिद्धिरित्यत आह भिन्नाविति । विरुद्धपरिमाणाद् विरुद्धार्थक्रियावत्त्वाच्चेति भावः ॥ ७ ॥

इदानीं परिणामस्वरूपमाह अवस्थान्तरेति । एकस्यैव वस्तुनः पूर्वावस्थात्यागपूर्वकमवस्थान्तरप्राप्तिः परिणाम इत्यर्थः । तदुदाहरति स्यात् क्षीरमिति । यथा क्षीरमृत्सुवर्णादीनां क्षीरादिव्यवहारयोग्यतां परित्यज्य दध्यादिव्यवहारयोग्यतापत्तिः ॥ ८ ॥

इदानीं विवर्त्तलक्षणमाह अवस्थान्तरेति । तुशब्दः पूर्वस्मात् पक्षद्वयात् वैलक्षण्यद्योतनार्थः । पूर्वावस्थामपरित्यज्य एव अवस्थान्तरभासनं विवर्त्तः । उदाहरति रज्जुसर्पवदिति । यथा रज्ज्वात्मनावस्थितस्यैव द्रव्यस्य सर्पात्मनाभासनम् । ननु विवर्त्तमानस्य रज्ज्वादेः सांशत्वदर्शनात् निरंशे सोऽपि न घटते इत्याशङ्क्य निरवयवगगनादावपि तद्दर्शनान्नैवमित्याह निरंशेऽपीति । असौ विवर्त्तः व्योम्नि तलत्वमधोमुखेन्द्रनीलकटाहतुल्यत्वं मालिन्यं नीलवर्णता तयोः कल्पनादाकाशस्वरूपानभिज्ञैरारोप्यमाणत्वादित्यर्थः ॥ ९ ॥

फलितमाह तत इति । ततो निरंशेऽपि विवर्त्तसम्भवाज्जगदि-

मायाशक्तिः कल्पिका स्यादैन्द्रजालिकशक्तिवत् ॥१०॥
शक्तिः शक्तात् पृथङ्नास्ति तद्वद् दृष्टेर्नचाभिदा ।
प्रतिबन्धस्य दृष्टत्वात् शक्त्यभावे तु कस्य सः ॥११॥
शक्तेः कार्य्यानुमेयत्वादकार्य्ये प्रतिबन्धनम् ।

द्वंशे आनन्दे विवर्त्तः कल्पितमित्यङ्गीकार्य्यमित्यर्थः । नन्वद्वितीये आनन्दे जगत्कल्पनमनुपपन्नं कल्पनाहेतोरभावादित्याशङ्क्याह मायाशक्तिरिति । शक्तेः कल्पकत्वं क्व दृष्टमित्यत आह ऐन्द्रजालिकेति । यथैन्द्रजालिकनिष्ठाया मणिमन्त्रादिरूपाया मायाशक्तेर्गन्धर्वनगरादिकल्पकत्वं तथेत्यर्थः ॥ १० ॥

नन्वानन्दातिरिक्तमायाया अभ्युपगमे द्वैतापत्तिरित्याशङ्क्यास्या अनिर्वचनीयत्वेनाद्वैततत्त्वं वक्तुम् उत्तरत्र वक्ष्यमाणाया लौकिक्या अग्न्यादिगतशक्तेस्तद्भेदेन वा अभेदेन वा निर्वक्तुमशक्यत्वं दर्शयति शक्तिरिति । शक्तिरग्न्यादिनिष्ठा स्फोटादिजनिका शक्तात् अग्न्यादिस्वरूपात् पृथक् भेदेन नास्ति । कुत इत्यत आह तद्वदिति । तथात्वस्य दृष्टेर्दर्शनादग्न्यादिस्वरूपातिरेकेणानुपलभ्यमानत्वादित्यर्थः । नाप्यग्न्यादिस्वरूपमेव शक्तिरित्याह न चाभिदेति । अभिदा अभेदोऽपि न च नैव । तत्रापि हेतुमाह प्रतिबन्धस्येति । मणिमन्त्रादिभिः शक्तिकार्य्यस्य स्फोटादेः प्रतिबन्धदर्शनात् स्वरूपातिरिक्ता शक्तिरेष्टव्येत्यभिप्रायः । भवतु प्रतिबन्धदर्शनं शक्तेर्भेदोऽपि मा भूत् को दोषस्तत्राह शक्तीति । प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्य प्रतिबन्धासम्भवात् तद्व्यतिरिक्तशक्त्यनभ्युपगमे प्रतिबन्धो निर्विषयः स्यादित्यभिप्रायः ॥ ११ ॥

नन्वतीन्द्रियायाः शक्तेः कथं प्रतिबन्धोऽवगन्तुं शक्यते इत्याशङ्क्याह शक्तेरिति । अतीन्द्रियापि शक्तिर्यतः कार्य्यलिङ्गगम्या अतः अकार्य्ये सत्यपि कारणे कार्य्यानुत्पत्तौ सत्यां प्रतिबन्धनं प्रतिबन्धोऽव-

ज्वलतोऽग्नेरदाहे स्यान्मन्त्रादिप्रतिबन्धता ॥ १२ ॥
देवात्मशक्तिं स्वगुणैर्निगूढां मुनयोऽविदन् ।
परास्य शक्तिर्विविधा क्रियाज्ञानबलात्मिका ॥ १३ ॥
इति वेदवचः प्राह वशिष्ठश्च तथाब्रवीत् ।
सर्वशक्तिपरं ब्रह्म नित्यमापूर्णमद्वयम् ।

गम्यते इति शेषः । उक्तमर्थं दृष्टान्तप्रदर्शनेन स्पष्टयति ज्वलत इति । लोके स्वरूपेण प्रज्वलतोऽग्नेः सकाशाद् दाहादिलक्षणे कार्येऽनुत्पद्यमाने सति मन्त्रादिप्रतिबन्धता मन्त्रादीनाम् अग्निशक्तिप्रतिबन्धकत्वमित्यर्थः ॥ १२ ॥

इत्थं लौकिकशक्तिं स्वरूपतः प्रमाणतश्चोपन्यस्य इदानीं मायाशक्तिसद्भावे ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् इति श्वेताश्वतरोपनिषद्वाक्यमर्थतः पठति देवात्मशक्तिमिति । मुनयः कालस्वभावादिषु कारणवादेषु दोषदर्शनवन्तो जगत्कारणजिज्ञासया ध्यानयोगमास्थिताः सर्वकारिणीं देवात्मशक्तिं देवस्य द्योतमानस्य स्वप्रकाशचिद्रूपस्यात्मनः प्रत्यगभिन्नस्य ब्रह्मणः शक्तिं मायारूपां स्वगुणैः स्वकार्यभूतैः स्थूलसूक्ष्मशरीरैर्निगूढाम् आवृताम् अविदन् साक्षात् कृतवन्त इत्यर्थः । तस्यामेवोपनिषदि स्थितं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति वाक्यान्तरमर्थतः पठति परास्येति । अस्य परा ब्रह्मणः उत्कृष्टा जगत्कारणभूता शक्तिर्विविधा श्रूयते इति वाक्यशेषः । विविधत्वमेवाह क्रियेति । क्रियाज्ञाने प्रसिद्धे बलमिच्छाशक्तिर्ज्ञानक्रियाशक्तिसाहचर्यात् । क्रियादिशक्तयः आत्मा स्वरूपं यस्याः सा क्रियाज्ञानबलात्मिका ॥ १३ ॥

इदं वाक्यद्वयं कुत्रत्यमित्यत आह इतीति । न केवलं मायाशक्तिः श्रुतिसिद्धा किन्तु स्मृतिसिद्धापीत्याह वशिष्ठश्चेति । यथा श्रुति-

यथोल्लसति शक्त्यासौ प्रकाशमधिगच्छति ॥ १४ ॥
चिच्छक्तिर्ब्रह्मणो राम ! शरीरेषूपलभ्यते ।
स्पन्दशक्तिश्च वातेषु दार्ढ्यशक्तिस्तथोपले ।
द्रवशक्तिस्तथाम्भःसु दाहशक्तिस्तथानले ।
शून्यशक्तिस्तथाकाशे नाशशक्तिर्विनाशिनि ॥ १५॥१६ ॥
यथाण्डान्तर्महासर्पो जगदस्ति तथात्मनि ।
फलपत्रलतापुष्पशाखाविटपमूलवान् ।
वृक्षबीजे यथा वृक्षस्तथेदं ब्रह्मणि स्थितम् ॥ १७ ॥
क्वचित् काश्चित् कदाचिच्च तस्मादुद्यन्ति शक्तयः ।

र्विचित्रां मायाशक्तिम् उक्तवती वशिष्ठोऽपि तां तथोक्तवान् वाशिष्ठाभिधान्ये इति शेषः। मायाशक्तिप्रतिपादिकान् वाशिष्ठश्लोकान् पठन्नर्वेति। नित्यमिति ब्रह्मणः पारमार्थिकं रूपमुक्तम्। सर्वशक्तीति तस्यैव सोपाधिकं रूपम्। तत् परं ब्रह्म यदा यदा यथा यथा शक्त्योल्लसति विकसति विवर्त्तते इत्यर्थः तदा तदा असौ शक्तिः प्रकाशमधिगच्छति अभिव्यक्तिं प्राप्नोति ॥ १४ ॥

इदानीं तामेवाभिव्यक्तिं प्रपञ्चयति चिच्छक्तिरिति। शरीरेषु देवतिर्यङ्मनुष्यादिलक्षणेषु चिच्छक्तिः चेतनं व्यवहारहेतुभूतोपलभ्यत इत्यर्थः। स्पन्दशक्तिश्चलनहेतुभूता ॥ १५ ॥ १६ ॥

प्रकाशमधिगच्छतीत्युक्त्याऽनभिव्यक्तदशायामपि ब्रह्मणि जगत्सत्ता दर्शिता अनभिव्यक्तस्यापि सत्त्वे दृष्टान्तमाह यथेति। विचित्रस्यापि तस्य सत्त्वे दृष्टान्तमाह फलेति ॥ १७ ॥

ननु सर्वेषामपि शक्तीनां युगपदेवाभिव्यक्तिः कुतो न स्यादित्याशङ्क्याह क्वचिदिति। क्वचिद्देशविशेषे। कदाचित् कालविशेषे। काश्चित्

देशकालविचित्रत्वात् क्ष्मातलादिव शालयः ॥ १८ ॥
स आत्मा सर्वगो राम ! नित्योदितमहावपुः।
यन्मनाङ्मननीं शक्तिं धत्ते तन्मन उच्यते ॥ १९ ॥
आदौ मनस्तदनु बन्धविमोक्षदृष्टी
पश्चात् प्रपञ्चरचना भुवनाभिधाना।
इत्यादिका स्थितिरियं हि गता प्रतिष्ठा-
माख्यायिका सुभगबालजनोदितेव ॥ २० ॥

शक्तयः। तासामयुगपदभिव्यक्तौ दृष्टान्तमाह देशकाल इत्यादि। यथा भूमिगतानां सर्वेषां बीजानां मध्ये देशविशेषे कालविशेषे च केषाञ्चिदेव बीजानाम् अङ्कुरोत्पत्तिर्नान्येषां तद्वदित्यर्थः ॥ १८ ॥

इदानीं जगतः कल्पनामात्ररूपतां दर्शयितुं तत्कल्पकस्य मनसो रूपं तावद्दर्शयति स आत्मेति। नित्योदितमहावपुर्नित्यं सदा उदितं प्रकाशमानं महद्देशकालादिपरिच्छेदरहितं वपुः शरीरं यस्य स तथा यत् यस्मिन् काले मनाक् ईषन्मननीं स्वपरावबोधनरूपां शक्तिं मायापरिणामरूपां धत्ते धारयति तत् तदा मन इत्युच्यते ॥ १९ ॥

इदानीं कल्पनाप्रकारमाह आदौ मन इति। आदौ प्रथमं मननशक्तियोगेन मनो भवति तदनु तदनन्तरं बन्धमोक्षदृष्टी बन्धमोक्षकल्पने भवतः पश्चादनन्तरं बन्धदृष्टावेव भुवनाभिधाना भुवनमित्यभिधानं यस्याः सा भुवनाभिधाना प्रपञ्चस्य गिरिनदीसरित्समुद्रादिरचना कल्पनं भवति इत्यादिका एवम्प्रकारा इयं जगतः स्थितिः प्रतिष्ठां स्थैर्यं गता प्राप्ता। कल्पितस्यापि वास्तवत्वप्रतीतौ दृष्टान्तमाह आख्यायिकेति। बालजनाय उदिता उक्ता आख्यायिका यथा यथा वास्तवबुद्धिं गता तथेदं जगदपीत्यर्थः ॥ २० ॥

बालस्य हि विनोदाय धात्री वक्ति शुभां कथाम् ।
क्वचित् सन्ति महाबाहो ! राजपुत्रास्त्रयः शुभाः ॥ २१ ॥
द्वौ न जातौ तथैकस्तु गर्भ एव हि न स्थितः ।
वसन्ति ते धर्मयुता अत्यन्तासति पत्तने ॥ २२ ॥
स्वकीयाच्छून्यनगरान्निर्गत्य विमलाशयाः ।
गच्छन्तो गगने वृक्षान् ददृशुः फलशालिनः ॥ २३ ॥
भविष्यन्नगरे तत्र राजपुत्रास्त्रयोऽपि ते ।
सुखमद्य स्थिताः पुत्र ! मृगयाव्यवहारिणः ॥ २४ ॥
धात्र्यैवं कथिता राम ! बालकाख्यायिका शुभा ।
निश्चयं स ययौ बालो निर्विचारणया धिया ॥ २५ ॥
इयं संसाररचना विचारोज्झितचेतसाम् ।
बालकाख्यायिकेवेत्थमवस्थितिमुपागता ॥ २६ ॥
इत्यादिभिरुपाख्यानैर्मायाशक्तेस्तु विस्तरम् ।
वशिष्ठः कथयामास सैव शक्तिर्निरूप्यते ॥ २७ ॥
कार्यादाश्रयतः सैषा भवेच्छक्तिर्विलक्षणा ।
स्फोटाङ्गारौ दृश्यमानौ शक्तिस्तत्रानुमीयते ॥ २८ ॥

तामेव कथां कथयति बालस्येति ॥ २१ ॥ २२ ॥ २१ ॥ ॥ २४ ॥ २५ ॥

दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजयति इयमिति ॥ २६ ॥

वशिष्ठोक्तमुपसंहरति इत्यादिभिरिति । एवं मायाशक्तौ प्रमाणमुपन्यस्य तस्या निर्वचनीयत्वं वक्तुं प्रतिजानीते सैव शक्तिरिति ॥ २७ ॥

कार्यादिति । एषा मायाशक्तिः कार्यात् स्वकार्यभूतात् जगतः आश्रयतः आश्रयात् ब्रह्मणश्च विलक्षणा विपरीतस्वभावा भवेत् ।

पृथुबुध्नोदराकारो घटः कार्य्योऽत्र मृत्तिका।
शब्दादिभिः पञ्चगुणैर्युक्ता शक्तिस्त्वतद्विधा ॥ २९ ॥
न पृथ्वादिर्न शब्दादिः शक्तावस्तु यथा तथा।
अतएव ह्यचिन्त्यैषा न निर्वचनमर्हति ॥ ३० ॥
कार्य्योत्पत्तेः पुरा शक्तिर्निगूढा मृद्यवस्थिता।
कुलालादिसहायेन विकाराकारतां व्रजेत् ॥ ३१ ॥

मायाशक्तेः कार्य्यात् आश्रयो वैलक्षण्यं दृष्टान्तेन स्पष्टयति स्फोटाङ्गारादिति। वह्निगतशक्तेः कार्य्यरूपः स्फोट आश्रयरूपोऽङ्गारश्च प्रत्यक्षगम्यौ शक्तिस्तु कार्य्यानुमेया अतस्ताभ्यां सा विलक्षणेत्यर्थः ॥२८॥

उक्तन्यायं मृच्छक्तावपि योजयति पृथुबुध्न इति। यः पृथुबुध्नोदराकारः पृथुः स्थूलं बुध्नं वर्त्तुलम्, उदरं यस्य, सः पृथुबुध्नोदरः तथाविध आकारो यस्य स तथाविधः तादृग्घटः कार्य्यः शब्दस्पर्शरूपरसगन्धाख्यपञ्चगुणोपेता मृत्तिका आश्रयः शक्तिस्त्वतद्विधा उभयविलक्षणेत्यर्थः ॥ २९ ॥

वैलक्षण्यमेवाह न पृथ्वादिरिति। शक्तौ पृथुत्वादिकार्य्यधर्म्मो नास्ति शब्दादिक आश्रयधर्म्मोऽपि न विद्यते अतो विलक्षणेत्यर्थः। तर्हि कीदृशीत्यत आह अस्त्विति। यथा तथेत्युक्तमेवार्थं विशदयति अतएवेति। यतः कार्य्याश्रयाभ्यां विलक्षणा अतएषा अचिन्त्या चिन्तयितुमशक्या। ननु तर्ह्यचिन्त्यत्वमेतस्याः रूपं स्यादित्याशङ्क्याह न निर्वचनमिति। भेदेनाभेदेन चिन्त्यत्वाचिन्त्यत्वादिना वा केनापि रूपेण निर्वचनं नार्हतीत्यर्थः ॥ ३० ॥

ननु कारणस्वरूपातिरिक्ता शक्तिर्यद्यस्ति तर्हि कारणस्वरूपमिव न सा कुतोऽवभासत इत्याशङ्क्याह कार्य्येति। मृच्छक्तिर्घटादिकार्य्योत्पत्तेः पूर्वं मृदि निगूढावतिष्ठते अतो नावभासते इत्यर्थः। निगूढत्वे उपरदेशादपि न तस्या अभिव्यक्तिः स्यादित्याशङ्क्याभिव्यञ्जकमपि नवनी-

पृथुत्वादि विकारान्तं स्पर्शादिगुणमृत्तिकाम् ।
एकीकृत्य घटं प्राहुर्विचारविकला जनाः ॥ ३२ ॥
कुलालव्यापृतेः पूर्वो यावानंशः स नो घटः ।
पश्चात्तु पृथुबुध्नादिमत्त्वे युक्ता हि कुम्भता ॥ ३३ ॥
स घटो न मृदो भिन्नो वियोगे सत्यनीक्षणात् ।
नाप्यभिन्नः पुरा पिण्डदशायामनवेक्षणात् ॥ ३४ ॥
अतोऽनिर्वचनीयोऽयं शक्तिवत्तेन शक्तिजः ।
अव्यक्तत्वे शक्तिरुक्ता व्यक्तत्वे घटनामभृत् ॥ ३५ ॥

तादेर्मथनादिनेव कुलालादिव्यापारेण तस्याभिव्यक्तिः स्यादित्याह कुला-लादीति । आदिशब्देन दण्डचक्रादयो गृह्यन्ते ॥ ३१ ॥

ननु कारणातिरिक्तस्य शक्तिकार्यत्वस्य सत्त्वे कार्यकारणयोर्भेदो न कुतोऽवभासत इत्याशङ्क्य भेदप्रतीतिहेतोर्विचारस्याभावादित्याह पृथु-त्वादीति । अविवेकिनो जनाः पृथुबुध्नादिरूप कार्यं शब्दस्पर्शादि-गुणरूपा कारणभूता मृत्तिकाम् अविचारेण एकीकृत्य घट इत्या-चक्षते ॥ ३२ ॥

उक्तस्य घटव्यवहारस्याविचारमूलत्वं कुत इत्याशङ्क्याह कुलाल-व्यापृतेरिति । कुलालव्यापारात् पूर्वभाविनो मृदंशस्य घटत्वेनाव्यव-हारादविचारमूलत्वं तस्येति भावः । कस्य तर्हि घटत्वमित्यत आह पश्चादिति । कुलालादिव्यापारानन्तरभाविनः पृथुबुध्नादराकारस्यैव घटशब्दवाच्यत्वमुचित तदुत्पत्त्यनन्तरमेव घटशब्दप्रयोगदर्शनात् इति भावः ॥ ३३ ॥

ननु पारमार्थिकस्य घटस्यानिर्वचनीयशक्तिकार्यत्वमयुक्तमित्याशङ्क्य तदस्यापि पारमार्थिकत्वमसिद्धमित्याह स घट इति । घटो मृदः पृथक्-कृत्य दृष्टुमशक्यत्वान्न मृदो भिद्यते नापि मृदेव पिण्डावस्थायाम-नुपलभ्यमानत्वात् अतः शक्तिवदनिर्वचनीय एव घट. । फलितमाह

ऐन्द्रजालिकनिष्ठापि माया न व्यज्यते पुरा ।
पश्चाद् गन्धर्वसेनादिरूपेण व्यक्तिमाप्नुयात् ॥ १६ ॥
एव मायामयत्वेन विकारस्यानृतात्मताम् ।
विकाराधारमृद्वस्तुसत्यत्वञ्चाब्रवीत् श्रुतिः ॥ १७ ॥
वाङ्निष्पाद्यं नाममात्रं विकारो नास्य सत्यता ।
स्पर्शादिगुणयुक्ता तु सत्या केवलमृत्तिका ॥ १८ ॥
व्यक्ताव्यक्ते तदाधार इति त्रिष्वाद्ययोर्द्वयोः ।
पर्य्यायः कालभेदेन तृतीयस्त्वनुगच्छति ॥ १९ ॥

नेनेति । ननु शक्तिकार्य्ययोरुभयोरपि अनिर्वचनीयत्वे शक्तिः कार्य्य-मिति भेदव्यवहारः कुत इत्यत आह अव्यक्तेति ॥ १४ ॥ १५ ॥

पूर्वमनभिव्यक्ता मायाशक्तिः पश्चादभिव्यज्यते इत्येतच्च प्रसिद्धं मायिन्युपलभ्यत इत्याशयेनाह ऐन्द्रजालिकेति । पुरा मणिमन्त्रादि-प्रयोगात् पूर्वम् ॥ १६ ॥

शक्तिकार्य्यस्य घटादेरनृतत्वं शक्त्याधारस्य मृदादेः सत्यत्वमित्येत-च्छान्दोग्यश्रुतावप्यभिहितमित्याह एवमिति । मायामयत्वेन माया-कार्य्यत्वेन विकारस्य कार्य्यरूपस्य घटादेरनृतात्मतां मिथ्यात्वं विका-राधारा घटादीनामाधारभूताया मृदः सत्यत्वञ्च वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिरब्रवीदित्यर्थः ॥ १७ ॥

इदानीं वाचारम्भणमित्युदाहृतं वाक्यमर्थतः पठति वाङ्नि-ष्पाद्यमिति । विकारो मृत्कार्य्यो घटादिः वाङ्निष्पाद्यं वागिन्द्रियेणो-च्चार्य्यं नाममात्रं नामैव तस्य घटादेर्न सत्यता नामातिरेकेण न पारमार्थिकं रूपमस्ति किन्तु तदाधारभूता मृदेव सत्येत्यर्थः ॥ १८ ॥

शक्तितत्कार्य्ययोरनृतत्वे तदाधारस्य सत्यत्वे च कारणमाह व्यक्तेति । व्यक्तो घटादिरवयवः कार्य्यः अव्यक्ता तत्कारणभूता

निस्तत्त्वं भासमानञ्च व्यक्तमुत्पत्तिनाशभाक्।
तदुत्पत्तौ तस्य नाम वाचा निष्पाद्यते नृभिः॥ ४०॥
व्यक्ते नष्टेऽपि नामैतन्नृवक्त्रेष्वनुवर्त्तते।
तेन नाम्ना निरूप्यत्वात् व्यक्तं तद्रूपमुच्यते॥ ४१॥
निस्तत्त्वत्वाद् विनाशित्वाद् वाचारम्भणनामतः।
व्यक्तस्य न तु तद्रूपं सत्यं किञ्चिन्मृदादिवत्॥ ४२॥

शक्तिं ते व्यक्ताव्यक्ते तदाधारस्तयोराधारभूता मृत्तिका एषु त्रिषु मध्ये आद्ययोः प्रथमोद्दिष्टयोर्द्वयोः कार्य्यशक्त्योः सम्बन्धिनौ यौ कालौ तयोर्मध्य एव भेदस्य विद्यमानत्वात् पर्य्यायः क्रमेण भवनम्। तृतीयस्तदुभयाधारस्तु मृदादिरनुगच्छति उभयमनुवर्त्तते। अयं भावः शक्तिकार्य्ययोः कादाचित्कत्वात् असत्यत्वम् आधारस्य तु कालत्रयानुगामित्वात् सत्यत्वम्॥ ३९॥

इदानीं विकारस्यैवासत्यत्वे हेतुत्रयमाह निस्तत्त्वमिति। व्यक्तशब्दवाच्यं घटादिकं कार्य्यं स्वरूपेणासदेवावभासते तथोत्पत्तिविनाशवदुपलभ्यते उत्पत्त्यनन्तरं वागिन्द्रियजन्यनामात्मकत्वेन व्यवह्रियते च। किञ्च व्यक्ते कार्य्यरूपे नष्टेऽपि एतत् कार्य्याद्भिन्नं नाम नृवक्त्रेषु नराणां शब्दप्रयोक्तॄणां मनुष्याणां वदनेष्वनुवर्त्तते। ततः किं तत्राह तेनेति। व्यक्तं कार्य्यं तेन वाचा व्यवह्रियमाणेन नाम्ना शब्देन निरूप्यत्वात् व्यवह्रियमाणत्वात् तद्रूपं तस्य नाम्नो रूपमेव रूपं यस्य तत् शब्दात्मकमुच्यते इत्यर्थः। अयं भावः विनष्टो घटो घटशब्दात्मको ऽवतिष्ठति घटशब्देन व्यवह्रियमाणत्वात् पटशब्दवत्॥ ४०॥ ४१॥

एवं हेतुत्रयं प्रसाध्येदानीम् अनुमानरचनाप्रकारं दर्शयति निस्तत्त्वत्वादिति। व्यक्तस्य घटादिरूपस्य कार्य्यस्य यत् पृथुबुध्नोदराकारं तद्रूपमस्ति तत् किञ्चित् किमपि सत्यं न भवति विनाशित्वात् निस्तत्त्वं

व्यक्तकाले ततः पूर्वमूर्ध्वमप्येकरूपभाक् ।
सतत्त्वमविनाशं च सत्यं मृद्वस्तु कथ्यते ॥ ४३ ॥
व्यक्तं घटो विकारश्चेत्येतैर्नामभिरीरितः ।
अर्थश्चेदनृतः कस्मान्न मृद्बोधे निवर्त्तते ॥ ४४ ॥
निवृत्त एव यस्मात् ते तत्सत्यत्वमतिर्गता ।
ईदृङ्निवृत्तिरेवात्र बोधजा न त्वभासनम् ॥ ४५ ॥

निर्गतं तत्त्वं वास्तवं रूपं यस्मात् तन्निस्तत्त्वं तस्य भावस्तत्त्वं तस्मात् तथाऽविनाशित्वात् मृदादि सत्यामेव नाशप्रतियोगित्वात् वाचारम्भण-मात्रतः वागिन्द्रियजन्यशब्दमात्रात्मकत्वात् वा । त्रिष्वपि हेतुषु मृद् इति वैधर्म्यदृष्टान्तः । अत्रैवं प्रयोगः घटादिरूपः कार्योऽसत्यो भवितुमर्हति निस्तत्त्वत्वात् यदसत्यं न भवति न तन्निस्तत्त्वं यथा घटाद्युपादानं मृदिति केवलव्यतिरेकी । एवमितरे हेतुद्वयेऽपि योजनीयम् ॥ ४२ ॥

एवं विकारस्यासत्यत्वमुपपाद्येदानीं तदधिष्ठानभूताया मृदः सत्यत्व-मुपपादयति व्यक्तेति । व्यक्तकाले स्थितिकाले ततः पूर्वं व्यक्तेः प्राक् पूर्वकाले ऊर्ध्वमपि व्यक्तिविनाशोत्तरकालेऽपि एकरूपभाक् एकाकारं सतत्त्वं तत्त्वेन वास्तवरूपेण सह वर्तते इति सतत्त्वम् अविनाशं विकारेण सह नाशरहितञ्च यन्मृद्वस्तु तत् सत्यमिति कथ्यते । विमतं मृद्वस्तु सत्यं भवितुमर्हति सतत्त्वत्वात् आत्मवदित्यादि योज्यम् ॥ ४३ ॥

ननु घटादेः कार्यस्यासत्यत्वे तस्यारोपितरजतादेरिवाधिष्ठान-ज्ञाननिवर्त्यता स्यादिति शङ्कते व्यक्तमिति । व्यक्तमित्यादिभिर्नाम-शब्दैरभिधीयमानो योऽर्थः कार्यरूपः तस्य कारणातिरेकेणासत्यत्वे सति कथमयमपि मृद्वस्त्ववधारणे ज्ञाने किं न तन्निवृत्तिः स्यादि-त्यर्थः ॥ ४४ ॥

दृष्टान्तेऽपि परिहरति निवृत्त इति । तत्त्वोपपत्तिमात्र ब्रह्म-

पुमानधोमुखो नीरे भातोऽप्यस्ति न वस्तुतः।
तटस्थमर्त्यवत् तस्मिन् नैवास्था कस्यचित् क्वचित् ॥४६॥
ईदृग्बोधे पुमर्थत्वं मतमद्वैतवादिनाम्।
मृद्रूपस्यापरित्यागात् विवर्त्तत्वं घटे स्थितम् ॥ ४७ ॥
परिणामे पूर्वरूपं त्यजेत् तत् क्षीररूपवत्।
मृत्सुवर्णे निवर्त्तेते घटकुण्डलयोर्न हि ॥ ४८ ॥

दिति। यस्मात् कारणात् तव घटादिविषया सत्यत्वबुद्धिर्नष्टा अतः स निवृत्त एवेत्यर्थः। नन्वारोपितरजतादिस्वरूपस्यैवाप्रतीतिरूपबाध्यते न सत्यत्वबुद्ध्यपगम इत्याशङ्क्य तत्र निरुपाधिकभ्रमत्वादस्तु तथात्वम् इह तु सोपाधिकभ्रमे सत्यत्वबुद्ध्यपगम एव निवृत्तिः स्यादित्यभिप्रायेणाह ईदृशीति। अत्र सोपाधिकभ्रमस्थले ईदृगेव सत्यत्वबुद्ध्यपगमरूपैव बाधना अधिष्ठानयाथात्म्यज्ञानजन्या निवृत्तिरभ्युपेया न त्वभावम न स्वरूपाप्रतीतिरूपेत्यर्थः ॥ ४५ ॥

उक्तार्थे दृष्टान्तमाह पुमानध इति। अधोऽधोमुखत्वेन प्रतिभासमानोऽपि पुमान् परमार्थतो नास्ति। तत्रोपपत्तिमाह तटस्थेति। कस्यचित् विवेकिनोऽविवेकिनो वा तस्मिन्नधोमुखे पुरुषे तीरस्थपुरुष इव सत्यत्वाभिमानः क्वचिद्देशे काले वा नैवास्ति इति ॥ ४६ ॥

भ्रान्तारोपितस्य सत्यत्वज्ञाननाशमात्रेण पुरुषार्थसिद्धिरित्याशङ्क्याह ईदृग्बोध इति। अद्वैतवादे आत्मानन्दातिरिक्तस्य सर्वस्य मिथ्यात्वनिश्चये स्वयमेवात्मानन्दाभिव्यक्तिरूपः पुरुषार्थः सिध्यतीत्यभिप्रायः। ननु घटस्य मृद्विवर्त्तत्वे सिद्धे तज्ज्ञानाद् घटसत्यत्वबुद्धिर्निवर्त्तेत न चैतदिदानीं सिद्धमित्याशङ्क्याह मृद्रूपस्येति ॥ ४७ ॥

घटे मृद्रूपपरित्यागाभावेऽपि मृत्परिणामता घटस्य किं न स्यादित्याशङ्क्याह परिणाम इति। यत्र क्षीरादौ परिणामोऽभ्युपगम्यते

घटे नष्टे न मृद्भावः कपालानामवेक्षणात् ।
नैव चूर्णेऽस्ति मृद्रूपं स्वर्णरूपं त्वतिस्फुटम् ॥ ४९ ॥
क्षीरादौ परिणामोऽस्तु पुनस्तद्भाववर्जनात् ।
एतावता मृदादीनां दृष्टान्तत्वं न हीयते ॥ ५० ॥
आरम्भवादिनः कार्ये मृदो द्वैगुण्यमापतेत् ।
रूपस्पर्शादयः प्रोक्ताः कार्यकारणयोः पृथक् ॥ ५१ ॥

तत्र क्षीरादिभावस्य पूर्वरूपस्य त्याग उपलभ्यते इत्यर्थः । ननु विवर्त्ते पूर्वरूपापरित्यागः क्व दृष्ट इत्याशङ्क्य मृत्सुवर्णयोर्दृश्यते इत्याह मृत्सुवर्णेति । मृत्सुवर्णविवर्त्तयोर्घटकुण्डलयोर्निष्पन्नयोरपि तत्कारणमृत्सुवर्णरूपे न निवर्त्तेते इति हि प्रसिद्धमित्यर्थः ॥ ४८ ॥

ननु घटस्य मृद्विवर्त्तत्वमनुपपन्नं घटनाशे पुनर्मृद्भावादर्शनादित्याशङ्क्य घटे इति । मृद्भावाभावे कारणमाह कपालेति । कपालानामपि नाशे मृद्भावो [illegible] स्यादिति परिहरति नैवेति । सुवर्णे त्वेतच्चोद्यानवकाश एवेत्याह स्वर्णेति ॥ ४९ ॥

ननु परिणामदृष्टान्तत्वेनाभिहितानां क्षीरमृत्सुवर्णानां मध्ये यदि मृत्सुवर्णयोर्विवर्त्तदृष्टान्तत्वमङ्गीक्रियते तर्हि तद्वत् क्षीरस्यापि तथात्वं स्यादित्याशङ्क्याह क्षीरेति । तर्हि क्षीरादेरवस्थान्तरमापद्यमानयोस्तयोर्विवर्त्तदृष्टान्तता न भवेदित्याशङ्क्याह समाधत्ते एतावतेति । एतावता क्षीरादेः परिणामित्वेन मृदादीनां मृत्सुवर्णादीनां दृष्टान्तत्वं विवर्त्तदृष्टान्तभावः न हीयते न नश्यति । अयमभिप्रायः क्षीरस्य पूर्वरूपपरित्यागपुरःसरमवस्थान्तरापत्तिसद्भावात् परिणामित्वमेव मृत्सुवर्णयोस्तु अवस्थान्तरापत्तिसद्भावेऽपि पूर्वरूपपरित्यागाभावाद्विवर्त्ततापीति ॥ ५० ॥

ननु मृत्सुवर्णयोः परिणामविवर्त्तावारम्भकत्वमपि किं नाङ्गी-

मृत्सुवर्णमयश्चेति दृष्टान्तत्रयमारुणिः ।
प्राहातो वासयेत् कार्य्यानृतत्वं सर्ववस्तुषु ।
कारणज्ञानतः कार्य्यविज्ञानञ्चापि सोऽवदत् ॥ ५२ ॥
सत्यज्ञानेऽनृतज्ञानं कथमत्रोपपद्यते ।
समृत्कस्य विकारस्य कार्य्यता लोकदृष्टितः ।
वास्तवोऽत्र मृदंशोऽस्य बोधः कारणबोधतः ॥ ५३ ॥

क्रियते इत्याशङ्क्याह आरम्भवादिन इति । आरम्भवादिनो मते कार्य्ये घटादिरूपे मृदो मृत्तिकादेर्द्रव्यस्य द्वैगुण्यं कार्य्याकारेण कारणाकारेण च द्विगुणत्वमापद्यते तथा च सति गुणत्वात् द्वैगुण्यमापद्येतेति भावः । कुत एतदित्याशङ्क्याह रूपेति । रूपस्पर्शादीनां गुणानां कार्य्यकारणयोर्भेदस्य तैरेवाङ्गीकृतत्वादिति भावः ॥ ५१ ॥

ननु मृत्सुवर्णयोः किं द्वयोरेव विवर्त्ते दृष्टान्तत्वं नेत्याह मृत्सुवर्णेति । श्वेतकेतुः पुत्र उद्दालकाख्यः कश्चिदृषिः यथा सौम्यैकेन मृत्पिण्डेन इत्यारभ्य कार्ष्णायसमित्यन्तेन वाक्यसन्दर्भेण कार्य्यस्यानृतत्वे मृत्सुवर्णयो रूपं दृष्टान्तत्रयमुक्तवानित्यर्थः । किमर्थमेवं दृष्टान्तत्रयमुक्तवानित्याशङ्क्याह अत इति । यत एवं वस्तुषु घटादिषु कार्य्यानृतत्वमुपलब्धमतो भूतभौतिकरूपेषु वस्तुषु कार्य्यानृतत्वं वासित कुर्य्यादित्यर्थः । ननु कार्य्यानृतत्वानुसन्धानमपि किमर्थमुक्तमित्याशङ्क्य कारणज्ञानात् कार्य्यज्ञानसिद्धये इत्यभिप्रायेणाह कारणज्ञानत इति । कारणस्य मृदादेर्ज्ञानात् कार्य्यजातस्य घटादेर्ज्ञानमपि यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादि वाक्यजातेनोक्तवानित्यर्थः ॥ ५२ ॥

ननु मृत्सुवर्णादिरूपस्य पारमार्थिकस्य कारणस्य विज्ञानात् तद्वि-
[illegible] घटशरावादेर्विज्ञानमनुपपन्नमिति शङ्कते सत्येति । कार्य्यस्य

अनृतांशो न बोद्धव्यस्तद्बोधानुपयोगतः ।
तत्त्वज्ञानं पुमर्थं स्यान्नानृतांशावबोधनम् ॥ ५४ ॥
तर्हि कारणविज्ञानात् कार्य्यज्ञानमितीरिते ।
मृद्बोधान्मृत्तिका बुद्धेत्युक्तं स्यात् कोऽत्र विस्मयः ॥ ५५ ॥
सत्यं कार्य्येषु वस्त्वंशः कारणात्मेति जानतः ।
विस्मयो मास्त्विहाज्ञस्य विस्मयः केन वार्य्यते ॥ ५६ ॥

सत्यानृतद्वयरूपत्वात् कारणज्ञानात् कार्य्यगतसत्यांशविज्ञानं भवतीति अभिप्रेत्याह समृत्कस्येति । समृत्कस्याधिष्ठानभूतमृत्सहितस्य विकारस्यारोपितस्य घटादिरूपस्य कार्य्यता कार्य्यशब्दार्थत्वं लोकप्रसिद्धमित्यर्थः । भवत्वेवम् एतावता कारणज्ञानात् कार्य्यज्ञानं न सम्भवतीति चोद्यस्य कः परिहारो जात इत्याशङ्क्य कार्य्यगतानृतांशज्ञानाभावेऽपि तद्गतसत्यांशज्ञानं भवत्येवेति परिहरति वास्तवोऽस्तीति । अत्र कार्य्ये यो वास्तवो मृदंशोऽस्ति अस्य वास्तवांशस्य बोधो ज्ञानं कारणज्ञानाद् भवतीत्यर्थः ॥ ५३ ॥

ननु कारणगतसत्यांशवदनृतांशोऽपि बोद्धव्य इत्याशङ्क्य प्रयोजनाभावान्नेत्याह अनृतांशो न बोद्धव्य इति । प्रयोजनाभावमेव प्रकटयति तत्त्वज्ञानमिति । तत्त्वस्य अबाध्यस्य वस्तुनो ज्ञानं पुमर्थं यो भावः पुरुषस्यार्थः प्रयोजनं यस्मिन् तत् पुमर्थमिति बहुव्रीहिः अनृतांशस्य विकारस्यावबोधनं प्रयोजनवन्न भवतीत्यर्थः ॥ ५४ ॥

ननु कारणज्ञानात् कार्य्यज्ञानं भवतीत्येतदर्थः श्रोतृबुद्धौ चमत्कारहेतुर्भविष्यतीत्यभिप्रायेणोक्तं तदेतन्न सम्भवतीति शङ्कते तर्हीति । कारणस्य मृदादेर्ज्ञानात् कार्य्यगतं मृदादिसत्यांशज्ञानं भवतीत्युक्ते मृज्ज्ञानात् मृदो ज्ञानमित्युक्तं भवति एवं सति कुत एव चमत्कारो नास्तीत्यर्थः ॥ ५५ ॥

आरम्भी परिणामी च लौकिकश्चैककारणे ।
ज्ञाते सर्वमतं श्रुत्वा प्राप्नुवन्त्येव विस्मयम् ॥ ५७ ॥
अद्वैतेऽभिमुखीकर्तुमेवात्रैकस्य बोधतः ।
सर्वबोधः श्रुतौ नैव नानात्वस्य विवक्षया ॥ ५८ ॥
एकमृत्पिण्डविज्ञानात् सर्वमृण्मयधीर्यथा ।
तथैकब्रह्मबोधेन जगद्बुद्धिर्विभाव्यताम् ॥ ५९ ॥

ईदृग्विवेकवतां विस्मयाभावोऽपि तद्रहितानां विस्मयः स्यादेवेति परिहरति सत्यमिति । कार्य्येषु घटादिषु विद्यमानो वास्तवोऽंशः कारणस्वरूपमेवेति ये जानन्ति तेषामाश्चर्य्यं माभूत् इतरेषां तज्ज्ञानशून्यानां जायमानो विस्मयो न निवारयितुं शक्य इत्यर्थः ॥ ५६ ॥

अज्ञस्य विस्मयो भवेदित्युक्तमेवार्थं प्रपञ्चयति आरम्भीति । आरम्भो नाम समवाय्यसमवायिनिमित्ताख्यकारणेभ्यो भिन्नस्य कार्य्यस्योत्पत्तिस्तां यो वक्ति सोऽयमारम्भीत्युच्यते पूर्वरूपपरित्यागेन रूपान्तरप्राप्तिलक्षणं परिणामं यो वक्ति स परिणामीत्युच्यते प्रक्रियाद्वयमजानन् व्यवहारमात्रपरः लौकिक इत्युच्यते एतेषां त्रयाणामपि कारणस्यैकस्य ज्ञानादनेकेषां कार्य्याणां विज्ञानं भवतीति वाक्यश्रवणात् विस्मयो भवेदित्यर्थः ॥ ५७ ॥

ननु यथाश्रुतमर्थं परित्यज्य इत्थं व्याख्याने किं कारणमित्याशङ्क्य श्रुतेस्तत्र तात्पर्य्याभावादित्याह अद्वैतेति । अद्वैतविज्ञानाभिमुख्यमभिमुखीकर्तुमेव छान्दोग्यश्रुतावेकस्य कारणस्य विज्ञानात् सर्वेषां कार्य्याणां विज्ञानमुक्तं न तु कार्य्याणामनेकेषां विज्ञानविवक्षयेत्यभिप्रायः ॥ ५८ ॥

इदानीमेकविज्ञानेन सर्वविज्ञानदृष्टान्तप्रदर्शनपरस्य यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति वाक्यस्यार्थं निरूपयन् दार्ष्टं

सच्चित्सुखात्मकं ब्रह्म नामरूपात्मकं जगत्।
तापनीये श्रुतं ब्रह्म सच्चिदानन्दलक्षणम् ॥ ६० ॥
सद्रूपमारुणिः प्राह प्रज्ञानं ब्रह्म बह्वृचाः।
सनत्कुमार आनन्दमेवमन्यत्र गम्यताम् ॥ ६१ ॥

दार्ष्टान्तिकप्रदर्शनपरस्य उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमिति वाक्यस्यार्थं प्रदर्शयन् प्रकृते फलितमाह एकमृत्पिण्डेति। यथा घटशरावाद्युपादानस्यैकस्य मृत्पिण्डस्य बोधात् तद्विकाराणां सर्वेषां घटादीनां बोधो भवति एवं सर्वोपादानभूतस्य एकस्य ब्रह्मणो बोधात् कार्यस्य कृत्स्नस्य जगतो बोधो भवतीत्यवगन्तव्यमित्यर्थः ॥५८॥

ननु ब्रह्मजगतोः स्वरूपापरिज्ञाने ब्रह्मज्ञानात् जगतो ज्ञानं भवतीत्येवं नावगन्तुं शक्यते इत्याशङ्क्य तदवगमनाय तदुभयस्वरूपं दर्शयति सच्चिदिति। ब्रह्मणः सच्चिदानन्दरूपत्वे किं प्रमाणमित्याशङ्क्य तापनीयादिश्रुतयः प्रमाणमित्यभिप्रायेणाह तापनीय इति। उत्तरतापनीये आथर्वणिके तावत् ब्रह्मैवेदं सर्वं सच्चिदानन्दमात्रम् इत्यादिप्रदेशेषु ब्रह्मणः सच्चिदानन्दरूपत्वमुक्तमित्यर्थः ॥ ६० ॥

आदिशब्देन विवक्षितानि श्रुत्यक्षराणि दर्शयति सद्रूपेति। श्वेतकेतवोद्दालकेन छान्दोग्यश्रुतौ सदेव सोम्येदमग्र आसीदित्यादिना सद्रूपं ब्रह्म निरूपितम्। तथा च बह्वृचाः ऋक्शाखाध्यायिनः ऐतरेयोपनिषदि प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्मेति प्रज्ञानरूपत्वं ब्रह्मणो दर्शयन्ति एवं पूर्वोदाहृतायां छान्दोग्यश्रुतावेव सनत्कुमाराख्यो गुरुः नारदाख्याय शिष्याय सुखं त्वेव विजिज्ञासितव्यमित्युपक्रम्य यो वै भूमा तत्सुखमिति भूमशब्दाभिधेयस्य ब्रह्मण आनन्दरूपत्वमुक्तवानित्यर्थः। उक्तन्यायमन्यत्राप्यतिदिशति एवमन्यत्रेति। अन्यत्र तैत्तिरीयकादिश्रुतिषु आनन्दो ब्रह्मेति व्यजानादित्यादिवाक्यैरानन्दरूपत्वादिकमुक्तमिति द्रष्टव्यमिति भावः ॥ ६१ ॥

विचिन्त्य सर्वरूपाणि कृत्वा नामानि तिष्ठति ।
अहं व्याकरवाणीमे नामरूपे इति श्रुतिः ॥ ६२ ॥
अव्याकृतं पुरा सृष्टेरूर्ध्वं व्याक्रियते द्विधा ।
अचिन्त्यशक्तिर्मायैषा ब्रह्मण्यव्याकृताभिधा ॥ ६३ ॥
अविक्रियब्रह्मनिष्ठा विकारं यात्यनेकधा ।
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ॥ ६४ ॥

सच्चिदानन्देष्विव नामरूपयोरपि श्रुतिं दर्शयति विचिन्त्येति । सर्वाणि रूपाणि विचिन्त्य । धीरो नामानि कृत्वा अभिवदन् यदास्ते इति अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणीति च सृष्ट्वा जगन्निष्ठे नामरूपे श्रुत्या दर्शिते इत्यर्थः ॥ ६२ ॥

तत्रैव श्रुत्यन्तरमुदाहरति अव्याकृतमिति । बृहदारण्यकश्रुतौ तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदं रूपमिति सृष्टस्य जगतो नामरूपात्मकत्वं दर्शितमित्यर्थः । सृष्टेः पूर्वमिदं जगदव्याकृतम् अव्यक्तनामरूपात्मकम् अभूत् । ऊर्ध्वं सृष्ट्यवसरे द्विधा वाच्यवाचकभावेन व्याक्रियते व्यक्तीकृतमित्यर्थः । इदानीं तद्धेदं तर्ह्यव्याकृतमासीदित्यत्र अव्याकृतशब्दस्यार्थमाह अचिन्त्यशक्तिरिति । येयं ब्रह्मणि अचिन्त्यशक्तिर्मायास्ति एषा व्याकृताभिधा अस्मिन् वाक्ये अव्याकृतशब्देनाभिधीयते इत्यर्थः ॥ ६२ ॥

तन्नामरूपाभ्यामेव व्याक्रियत इत्यस्यार्थमाह अविक्रियेति । अविकारिणि ब्रह्मणि वर्तमाना सा अनेकधा भूतभौतिकप्रपञ्चरूपेण बहुधा विकारं परिणामं प्राप्नोति । माया ब्रह्मणि वर्तते इत्यत्र प्रमाणमाह मायामिति । मायां पूर्वोक्तां प्रकृतिं प्रक्रियते अनयेति प्रकृतिरुपादानकारणं विद्याज्जानीयात् । मायिनं तदाश्रयत्वेन तद्वन्तं महेश्वरं मायानियामकं विद्यादित्यनुवर्तते । उभयत्र तुशब्दः परस्परैक्यद्योतनार्थः ॥ ६४ ॥

आद्यो विकार आकाशः सोऽस्ति भात्यपि च प्रियः ।
अवकाशस्तस्य रूपं तन्मिथ्या न तु तत्त्रयम् ॥ ६५ ॥
न व्यक्तेः पूर्वमस्त्येवं न पश्चाच्च विनाशतः ।
आदावन्ते च यन्नास्ति वर्त्तमानेऽपि तत् तथा ॥ ६६ ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येवेत्याह कृष्णोऽर्जुनं प्रति ॥ ६७ ॥
मृद्वत् ते सच्चिदानन्दा अनुगच्छन्ति सर्वदा ।
निराकाशे सदादीनामनुभूतिर्निजात्मनि ॥ ६८ ॥
अवकाशे विस्मृतेऽथ तत्र किं भाति ते वद ।

इदानीं मायोपहितस्य तस्य ब्रह्मणः प्रथमं कार्यमाह आद्य इति । तस्य कारणादागतं रूपत्रयमाह सोऽस्तीति । सच्चिदानन्दरूपवानित्यर्थः । तस्य प्रातीतिकं रूपमाह अवकाश इति । तस्य पूर्वोक्तात् रूपत्रयाद् वैलक्षण्यमाह तन्मिथ्येति । सदादिरूपत्रयं वास्तवमित्यर्थः ॥ ६५ ॥

तस्य चतुर्थरूपस्य मिथ्यात्वे हेतुमाह न व्यक्तेरिति । ननूत्पत्तिविनाशयोर्मध्ये प्रतीयमानस्यावकाशस्य कथमसत्त्वमित्याशङ्क्याह आदावन्त इति ॥ ६६ ॥

उक्तेऽर्थे श्रीकृष्णवाक्यं प्रमाणयति अव्यक्तेति ॥ ६७ ॥

सदादिरूपत्रयस्याकाशे सत्त्वे किं प्रमाणमित्याशङ्क्यानुभूतिरेव प्रमाणमित्याह मृद्वदिति । मृद्वदिति दृष्टान्तप्रदर्शनार्थं घटादिषु यथा कालत्रयेऽपि मृदनुवर्त्तते तथा सदादिरूपत्रयं सर्वदानुगतमित्यर्थः । नन्वाकाशं विहाय सदादिरूपत्रयं कथमनुभूतमित्याशङ्क्याह निराकाश इति ॥ ६८ ॥

तदेवोपपादयति अवकाशे इति । पूर्वमादितबोध्यमनुवदति स्मृत्य-

शून्यमेवेति चेदस्तु नाम तादृग्विभाति हि ॥ ६९ ॥
तादृक्त्वादेव तत्सत्त्वमौदासीन्येन तत् सुखम् ।
आनुकूल्यप्रातिकूल्यहीनं यत् तन्निजं सुखम् ॥ ७० ॥
आनुकूल्ये हर्षधीः स्यात् प्रातिकूल्ये तु दुःखधीः ।
द्वयाभावे निजानन्दो निजं दुःखन्तु न क्वचित् ॥ ७१ ॥
निजानन्दे स्थिते हर्षशोकयोर्व्यत्ययः क्षणात् ।
मनसः क्षणिकत्वेन तयोर्मानसतेष्यताम् ॥ ७२ ॥
आकाशेऽप्येवमानन्दः सत्ताभाने तु संमते ।
वाय्वादिदेहपर्यन्तवस्तुष्वेव विभाव्यताम् ॥ ७३ ॥

मिति । अङ्गीकृत्य परिहारमाह अस्तु नामेति । यद्यतः शून्यमस्तु अर्थतत्त्वशङ्काभावविशेषणस्य विशेष्यत्वेन प्रतीयमानं किञ्चिदस्ति इत्यभ्युपगन्तव्यमित्याह तादृगिति । हिशब्दो लोकप्रसिद्धिद्योतनार्थः ॥ ६९ ॥

एवत्वे च प्रकृते किमायातमित्याशङ्क्य विशेष्यत्वेन प्रतीयमानस्य सद्रूपमभ्युपेयमित्याह तादृक्त्वादेवेति । अस्य सुखस्वरूपत्वमाह औदासीन्येनेति । औदासीन्यरूपत्वाद् तस्य सुखस्वरूपत्वमित्यर्थः । ननु अनुकूलत्वरहितस्य कथं सुखस्वरूपत्वमित्याशङ्क्याह आनुकूल्येति ॥ ७० ॥

तदेवोपपादयति आनुकूल्ये हर्षधी इति । ननु निजानन्दवत् निजदुःखमपि किं न स्यादित्याशङ्क्य दुःखे निजस्वरूपत्वप्रमाणाभावमित्याह निजं दुःखन्त्विति ॥ ७१ ॥

ननु निजानन्दस्य सदानन्दत्वात् सर्वदा हर्ष एव स्यात् न तु शोक इत्याशङ्क्य तस्य निजत्वेऽपि तदुपाधिभूतो मनसः क्षणिकत्वेन मानसयोरपि व्यत्ययत्वमित्याह निजानन्द इति ॥ ७२ ॥

दृष्टान्ते विवृतं दार्ष्टान्तिके योजयति आकाशेऽपीति । एव

गतिस्पर्शौ वायुरूपं वह्नेर्दाहप्रकाशने ।
जलस्य द्रवता भूमेः काठिन्यं चेति निर्णयः ।
असाधारण आकाशे ओषध्यन्नवपुष्वपि ।
एवं विभाव्य मनसा तत्तद्रूपं यथोचितम् ॥ ७४॥७५ ॥
अनेकधा विभिन्नेषु नामरूपेषु चैकधा ।
तिष्ठन्ति सच्चिदानन्दा विसंवादो न कस्यचित् ॥७६॥
निस्तत्त्वे नामरूपे द्वे जन्मनाशयुते च ते ।
बुद्धा ब्रह्मणि वीचस्व समुद्रे बुद्बुदादिवत् ॥ ७७ ॥
सच्चिदानन्दरूपेऽस्मिन् पूर्णे ब्रह्मणि वीचिते ।
स्वयमेवावजानाति नामरूपे शनैः शनैः ॥ ७८ ॥
यावद् यावदवज्ञा स्यात् तावत् तावत् तदीक्षणम् ।
यावद् यावद् वीक्ष्यते तत् तावत् तावदुभे त्यजेत् ॥७९॥

निजाश्रयस्य प्रकारेण इत्यर्थः । सत्ताभाने तु भवताभ्युपगम्यते अतो नोपपादनीये इत्यर्थः । आकाशे प्रतिपादितमर्थं वाय्वादिशरीरान्तेष्वप्युपगन्तव्यमित्याह वाय्वादीति ॥ ७३ ॥

अथ वाय्वादीनामसाधारणधर्मान् दर्शयति गतिस्पर्शाविति द्वाभ्याम् ॥ ७४ ॥ ७५ ॥

फलितमाह अनेकधेति ॥ ७६ ॥

तर्हि प्रतीयमानयोर्नामरूपयोः का गतिरित्याशङ्क्य कल्पितत्वम् एव इत्याह निस्तत्त्वे इति । कल्पितत्वे हेतुः जन्मेति ॥ ७७ ॥

ततः किम् इत्यत आह सच्चिदानन्देति ॥ ७८ ॥

ब्रह्मध्यानदार्ढ्यस्य द्वैतावज्ञापूर्वकत्वात् अध्यासादिवत् द्वैतावज्ञापि कर्तव्येत्याह यावदिति ॥ ७९ ॥

तदभ्यासेन विद्यायां सुस्थितायामयं पुमान् ।
जीवन्नेव भवेन्मुक्तो वपुरस्तु यथा तथा ॥ ८० ॥
तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वञ्च तदभ्यासं विदुर्बुधाः ॥ ८१ ॥
वासनानेककालीना दीर्घकालं निरन्तरम् ।
सादरञ्चाभ्यस्यमाने सर्वथैव निवर्त्तते ॥ ८२ ॥
मृच्छक्तिवद् ब्रह्मशक्तिरनेकाननृतान् सृजेत् ।
यद् वा जीवगता निद्रा स्वप्नश्चात्र निदर्शनम् ॥ ८३ ॥
निद्राशक्तिर्यथा जीवे दुर्घटस्वप्नकारिणी ।
ब्रह्मण्येषा तथा माया सृष्टिस्थित्यन्तकारिणी ॥ ८४ ॥
स्वप्ने वियद्गति पश्येत् स्वमूर्द्धच्छेदनं तथा ।
मुहूर्त्ते वत्सरौघञ्च मृतं पुत्रादिकं पुनः ॥ ८५ ॥

एवमभ्यासफलमाह तदभ्यासेनेति ॥ ८० ॥

इदानीं ब्रह्माभ्यासस्य स्वरूपमाह तच्चिन्तनमिति ॥ ८१ ॥

अनादिकालमारभ्य प्रतिभासमानस्य द्वैतस्य कादाचित्केन ज्ञानाभ्यासेन कथं निवृत्तिरित्याशङ्क्य दैर्घ्यकालनैरन्तर्यसत्कारसेवितेनाभ्यासेन निवर्त्तते एवेत्याह वासनेति ॥ ८२ ॥

ननु ब्रह्मण एकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्याशङ्क्य मायाशक्तस्य तस्य तदुपपद्यत इत्याह मृच्छक्तीति । अनृतान् कार्याणीत्यर्थः । ननु मृच्छक्तेः सत्यत्वादनेकहेतुत्वात् विषमो दृष्टान्त इत्याशङ्क्य पक्षान्तरमाह यद् वा जीवेति ॥ ८३ ॥

तत्र दृष्टान्तं विशदयति निद्राशक्तिरिति । दार्ष्टान्तिकमाह ब्रह्मणीति ॥ ८४ ॥

दुर्घटकारित्वमेव दर्शयति स्वप्न इति ॥ ८५ ॥

इदं युक्तमिदं नेति व्यवस्था तत्र दुर्लभा।
यथा यथेक्ष्यते यद्यत् तत्तद्युक्तं तथा तथा ॥ ८६ ॥
ईदृशो महिमा दृष्टो निद्राशक्तेर्यदा तदा।
मायाशक्तेरचिन्त्योऽयं महिमेति किमद्भुतम् ॥ ८७ ॥
शयाने पुरुषे निद्रा स्वप्नं बहुविधं सृजेत्।
ब्रह्मण्येवं निर्विकारे विकारान् कल्पयत्यसौ ॥ ८८ ॥
खानिलाग्निजलोर्व्यण्डलोकप्राणिशिलादिकाः।
विकाराः प्राणिधीष्वन्तश्चिच्छाया प्रतिबिम्बति ॥ ८९ ॥
चेतनाचेतनेष्वेषु सच्चिदानन्दलक्षणम्।
समानं ब्रह्म भिद्येते नामरूपे पृथक् पृथक् ॥ ९० ॥
ब्रह्मण्येते नामरूपे पटे चित्रमिव स्थिते।
उपेक्ष्य नामरूपे द्वे सच्चिदानन्दधीर्भवेत् ॥ ९१ ॥

स्वप्नस्य दुर्घटत्वे हेतुमाह इदमिति ॥ ८६ ॥

उक्तमर्थं कैमुतिकन्यायेन स्पष्टयति ईदृश इति ॥ ८७ ॥

अप्रयतमानब्रह्मनिष्ठाया मायाया जगद्धेतुत्वे दृष्टान्तमाह शयाने इति ॥ ८८ ॥

मायया सृष्टान् पदार्थान् दर्शयति खानिलाग्नीति। ननु पाञ्चभौतिकत्वेन साम्येऽपि केषाञ्चित् चेतनत्वं केषाञ्चिज्जड़त्वं कुत इत्याशङ्क्याह प्राणीति। प्राणिशरीरेष्वन्तःकरणेषु चैतन्यप्रतिबिम्बितत्वात् चेतनत्वम् इतरेषां तदभावाज्जड़त्वमित्यर्थः ॥ ८९ ॥

ननु चेतनाचेतनविभागवद् ब्रह्मणि तत एव किं न स्यादित्याशङ्क्य ब्रह्मणः सर्वोपादानत्वेन सर्वत्र समत्वान्नैवमित्याह चेतनेति ॥ ९० ॥

ब्रह्मण्यचिज्जड़साधनत्वे हेतुमाह ब्रह्मणीति। ब्रह्मणः सर्व-

जलस्थेऽधोमुखे स्वस्य देहे दृष्टेऽप्युपेक्ष्य तम् ।
तीरस्थ एव देहे स्वे तात्पर्यं स्याद् यथा तथा ॥ ८२ ॥
सहस्रशो मनोराज्ये वर्त्तमाने सदैव तत् ।
सर्वैरुपेक्ष्यते यद्वदुपेक्षा नामरूपयोः ॥ ८३ ॥
क्षणे क्षणे मनोराज्यं भवत्येवान्यथान्यथा ।
गतं गतं पुनर्नास्ति व्यवहारो बहिस्तथा ॥ ८४ ॥
न बाल्यं यौवने लभ्यं यौवनं स्थविरे तथा ।
मृतः पिता पुनर्नास्ति नायात्येव गतं दिनम् ॥ ८५ ॥
मनोराज्यात् विशेषः कः क्षणध्वंसिनि लौकिके ।
अतोऽस्मिन् भासमानेऽपि तत्सत्यत्वधियं त्यजेत् ॥ ८६ ॥
उपेक्षिते लौकिके धीर्निर्विघ्ना ब्रह्मचिन्तने ।

कल्पनाधारत्वात् सर्वगतत्वमित्यर्थः । एतत् कथमवगन्तव्यमित्याकाङ्क्षायां कल्पितनामरूपत्यागेऽधिष्ठानं ब्रह्मावगन्तव्यमित्याह उपेक्ष्येति ॥ ८१ ॥

उक्तार्थे दृष्टान्तमाह जलस्थ इति । नीरेऽधोमुखे स्वस्य देहे परिदृश्यमानेऽपि तस्मादरं परित्यज्य तीरस्थे स्वदेहे तद्विपरीते यथा बुद्धि- संवेत्यर्थः ॥ ८२ ॥

इदानीं सर्वजनप्रसिद्धं दृष्टान्तान्तरमाह सहस्रश इति । उपेक्षा कर्त्तव्येति शेषः ॥ ८३ ॥

प्रपञ्चवैचित्र्ये दृष्टान्तमाह क्षण इति । दार्ष्टान्तिकमाह गत इति ॥ ८४ ॥

तदेव विवृणोति न बाल्यमिति ॥ ८५ ॥

द्वैतस्य चित्तकल्पितत्वमुपसंहरति मनोराज्यादिति । क्षणिकत्वसाधने प्रयोजनमाह अतोऽस्मिन्निति ॥ ८६ ॥

नटवत् कृत्रिमास्थायां निर्वहत्येव लौकिकम् ॥ ९७ ॥
प्रवहत्यपि नीरेऽधः स्थिरा प्रौढा शिला यथा।
नामरूपान्यथात्वेऽपि कूटस्थं ब्रह्म नान्यथा ॥ ९८ ॥
निश्छिद्रे दर्पणे भाति वस्तुगर्भं बृहद्वियत्।
सच्चिद्घने तथा नानाजगद्गर्भमिदं वियत् ॥ ९९ ॥
अदृष्ट्वा दर्पणं नैव तदन्तःस्थेक्षणं यथा।
अमत्वा सच्चिदानन्दं नामरूपमतिः कुतः ॥ १०० ॥
प्रथमं सच्चिदानन्दे भासमानेऽथ तावता।
बुद्धिं नियम्य नैवोर्ध्वं धारयेन्नामरूपयोः ॥ १०१ ॥

ननु लौकिकोपेक्षायां को लाभ इत्याशङ्क्य ब्रह्मणि धीः स्थिरा भवतीत्याह उपेक्षित इति। तर्हि ज्ञानिनो व्यवहारः कथमित्याशङ्क्याह नटवदिति ॥ ९७ ॥

ननु ज्ञानिनो व्यवहाराभ्युपगमे विकारित्वं प्रसज्येत इत्याशङ्क्य बुद्धौ व्यवहरन्त्यामपि तत्साक्षी आत्मा निर्विकार इति दृष्टान्तमाह प्रवहत्यपीति। उदके उपरि प्रवहत्यपि अधः स्थिता प्रौढा शिला यथा न चलति तथैव बुद्धौ सञ्चरन्त्यामपि न ज्ञानी सञ्चरतीत्यर्थः ॥ ९८ ॥

नन्वखण्डे ब्रह्मणि तद्विलक्षणस्य जगतः कथमवभासनमित्याशङ्क्य निश्छिद्रे दर्पणे सावकाशवस्तुनो यथा भासनं तद्वदित्याह निश्छिद्र इति ॥ ९९ ॥

नन्वदृष्टे ब्रह्मणि कथं जगत्प्रतीतिरित्याशङ्क्य सच्चिदानन्दप्रतीतिपुरःसरमेव जगत्प्रतीतिरिति दृष्टान्तमाह अदृष्ट्वेति ॥ १०० ॥

ननु नामरूपयोरपि भासमानत्वात् कथं निर्विषयब्रह्मप्रतीतिरित्याशङ्क्य तद्बुद्ध्युपायमाह प्रथममिति ॥ १०१ ॥

एवञ्च निर्जगद्ब्रह्म सच्चिदानन्दलक्षणम् ।
अद्वैतानन्द एतस्मिन् विश्राम्यन्तु जनाश्चिरम् ॥ १०२ ॥
ब्रह्मानन्दाभिधे ग्रन्थे तृतीयेऽध्याय ईरितः ।
अद्वैतानन्द एव स्याज्जगन्मिथ्यात्वचिन्तया ॥ १०३ ॥

इति ब्रह्मानन्देऽद्वैतानन्दः समाप्तः ।

चतुर्दशपरिच्छेदः ।

ब्रह्मानन्दे विद्यानन्दः ।

योगेनात्मविवेकेन द्वैतमिथ्यात्वचिन्तया ।
ब्रह्मानन्दं पश्यतोऽथ विद्यानन्दो निरूप्यते ॥ १ ॥

सच्चिदानन्दे ब्रह्मणि कल्पितनामरूपात्मके प्रपञ्चे सच्चिदानन्दमात्रं, बुद्ध्या गृहीत्वा नामरूपयोर्बुद्धिं न धारयेत् एवञ्च सति निर्जगद्ब्रह्म सच्चिदानन्दलक्षणं भवतीत्यर्थः ॥ १०२ ॥

इदानीमध्यायार्थमुपसंहरति ब्रह्मानन्देति ॥ १०३ ॥

इति ब्रह्मानन्देऽद्वैतानन्दव्याख्या समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
ब्रह्मानन्दाभिधे ग्रन्थे विद्यानन्दो विविच्यते ॥

इदानीं वृत्तवर्त्तिष्यमाणयोरध्याययोः सम्बन्धमाह योगेनेति ॥ १ ॥

विषयानन्दवद् विद्यानन्दोधीवृत्तिरूपकः।
दुःखाभावादिरूपेण प्रोक्त एष चतुर्विधः॥ २॥
दुःखाभावश्च कामाप्तिः कृतकृत्योऽहमित्यसौ।
प्राप्तप्राप्योऽहमित्येवं चातुर्विध्यमुदाहृतम्॥ ३॥
ऐहिकञ्चामुष्मिकञ्चेत्येवं दुःखं द्विधेरितम्।
निवृत्तिमैहिकस्याह बृहदारण्यकं वचः॥ ४॥
आत्मानञ्चेद् विजानीयादयमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥ ५॥
जीवात्मा परमात्मा चेत्यात्मा द्विविध ईरितः।
चित्तादात्म्यात् त्रिभिर्देहैर्जीवः सन् भोक्तृतां व्रजेत्॥ ६॥
परात्मा सच्चिदानन्दस्तादात्म्यं नामरूपयोः।
गत्वा भोग्यत्वमापन्नस्तद्विवेके तु नोभयम्॥ ७॥

विद्यानन्दस्वरूपमाह विषयेति। तस्यावान्तरभेदमाह दुःखेति॥ २॥

चातुर्विध्यमेव दर्शयति दुःखाभावश्चेति॥ ३॥

निवर्त्तनीयं दुःखं विभजते ऐहिकमिति। ऐहिकस्य दुःखस्य निवृत्तिर्बृहदारण्यकवाक्येनोच्यते इत्याह निवृत्तिमिति॥ ४॥

तत्श्रुतिवाक्यं पठति आत्मानञ्चेदिति॥ ५॥

आत्मनि शोकसम्बन्धं दर्शयितुं तद्भेदमाह जीवात्मेति। आत्मनो जीवत्वे निमित्तमाह चित्तादात्म्यादिति। चैतन्यस्य स्थूलसूक्ष्मकारणरूपैस्त्रिभिः शरीरैस्तादात्म्यभ्रमे सति चितो भोक्तृत्वं भवति स भोक्ता जीव इत्युच्यते॥ ६॥

इदानीं परात्मनः स्वरूपमाह परात्मेति। तस्य भोग्यरूपतापत्तिप्रकारमाह तादात्म्यमिति। नामरूपकल्पनाधिष्ठानत्वेन तत्तादात्म्यं

भोग्यमिच्छन् भोक्तुरर्थे शरीरमनुसंज्वरेत् ।
ज्वरास्त्रिषु शरीरेषु स्थिता न त्वात्मनो ज्वराः ॥ ८ ॥
व्याधयो धातुवैषम्ये स्थूलदेहे स्थिता ज्वराः ।
कामक्रोधादयः सूक्ष्मे द्वयोर्बीजन्तु कारणे ॥ ९ ॥
अद्वैतानन्दमार्गेण परात्मनि विवेचिते ।
अपश्यन् वास्तवं भोग्यं किन्नामेच्छेत् परात्मवित् ॥ १० ॥
आत्मानन्दोक्तरीत्यास्मिन् जीवात्मन्यवधारिते ।
भोक्ता नैवास्ति कोऽप्यत्र शरीरानुज्वरः कुतः ॥ ११ ॥
पुण्यपापद्वये चिन्ता दुःखमामुष्मिकं भवेत् ।

प्राप्य भोग्यमित्युच्यते इत्यर्थः । भोगकर्तृत्वाद्यभावे कारणमाह तद्विवेके तु न इति । ताभ्यां शरीरत्रयजगद्भ्यां विवेके भेदे ज्ञाते सति उभयं भोगकर्तृभोग्यरूपं नास्तीत्यर्थः ॥ ७ ॥

उक्तमर्थं विवृणोति भोग्यमिच्छन्निति ॥ ८ ॥

कस्मिन् शरीरे को ज्वर इत्याशङ्क्य स्थूलदेहे विद्यमानान् ज्वरान् दर्शयति व्याधय इति । लिङ्गदेहगतान् ज्वरानाह कामेति ॥ ९ ॥

इदानीमुदाहृतश्रुतितात्पर्य्यकथनव्याजेन पूर्वोक्तमेवार्थं विशदयन् अद्वैतानन्देति । तृतीयाध्यायोक्तप्रकारेण मायाकार्य्यनामरूपाभ्यां सच्चिदानन्दपरमात्मनि विवेचिते भेदेन ज्ञाते सति सर्वं प्रपञ्चं मिथ्येति जानन् किं नाम भोग्यमिच्छति ॥ १० ॥

ततः पूर्वाध्यायोक्तरीत्या जीवात्मस्वरूपे असङ्गकूटस्थचैतन्यरूपे निश्चिते सति कामयितुरभावाज्ज्वरादिसम्बन्धो नास्तीत्याह आत्मानन्द इति ॥ ११ ॥

इदानीमामुष्मिकं ज्वरं दर्शयति पुण्यपापेति । तत्राभाव· प्रथ

प्रथमाध्याय एवोक्तं चिन्ता नेमं तपेदिति ॥ १२ ॥
यथा पुष्करपर्णेऽस्मिन्नपामश्लेषणं तथा ।
वेदनादूर्ध्वमागामिकर्मणोऽश्लेषणं बुधे ॥ १३ ॥
इषीकाद्यणतूलस्य वह्निदाहः क्षणाद् यथा ।
तथा सञ्चितकर्मास्य दग्धं भवति वेदनात् ॥ १४ ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥ १५ ॥
यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान् न हन्ति न निबध्यते ॥१६॥
मातापित्रोर्वधः स्तेयं भ्रूणहत्यान्यदीदृशम् ।
न मुक्तिं नाशयेत् पापं मुखकान्तिर्न नश्यति ॥ १७ ॥

माध्याये निरूपितः इत्याह प्रथमेति । कस्मिन् श्लोके इत्याह चि-न्तेति ॥ १२ ॥

ननु ज्ञानिनः प्रारब्धकर्मविषया चिन्ता मा भूत् आगामिकर्मविषया चिन्ता भवत्येव इत्याशङ्क्य यथा पुष्करपलाश इत्यादिश्रुत्या ज्ञानिन आगामिकर्मसम्बन्धनिराकरणात् तद्विषयापि चिन्ता नास्ति इत्याह यथेति ॥ १३ ॥

तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदू-यन्ते इति श्रुत्यन्तरावष्टम्भेन सञ्चितकर्मविषयापि चिन्ता ज्ञानिनो नास्तीत्याह इषीकेति ॥ १४ ॥

उक्तार्थे भगवद्वाक्यमपि प्रमाणयति यथैधांसीति ॥ १५ ॥ १६ ॥

अस्मिन्नेवार्थे न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं न च कृतं मुखं नीलं वेति कौषीतकिश्रुतिवाक्यमर्थतः पठति मातापित्रोरिति । न चेत्येक पदं नीलमिति कान्तिभ्रंशः ॥ १७ ॥

दुःखाभाववदेवास्य सर्वकामाप्तिरीरिता ।
सर्वान् कामानसावाप्य ह्यमृतो भवदित्यत: ॥ १८ ॥
जक्षत् क्रीड़न् रतिं प्राप्त: स्त्रीभिर्यानैस्तथेतरै: ।
शरीरं न स्मरेत् प्राणं कर्मणा जीवयेदमुम् ॥ १९ ॥
सर्वान् कामान् सहाप्नोति नान्यवज्जन्मकर्मभि: ।
वर्त्तन्ते श्रोत्रिये भोगा युगपत् क्रमवर्ज्जिता: ॥ २० ॥
युवा रूपी च विद्यावान् नीरोगो दृढ़चित्तवान् ।
सैन्योपेत: सर्वपृथ्वीं वित्तपूर्णां प्रपालयन् ।
सर्वैर्मानुष्यकैर्भोगै: सम्पन्नस्तृप्तभूमिप: ।
यमानन्दमवाप्नोति ब्रह्मविच्च तमश्नुते ॥ २१ ॥ २२ ॥

उक्तचातुर्विध्यमध्ये द्वितीयप्रकारमाह दुःखेति । ईरिता श्रुत्येति शेष: । अस्मिन्नर्थे ऐतरेयश्रुतिवाक्यमर्थत: पठति सर्वान् कामानिति ॥ १८ ॥

जक्षत् क्रीड़न् रममाण: स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरमिति छान्दोग्यश्रुतिवाक्यमर्थत: पठति जक्षदिति ॥ १९ ॥

तत्र तैत्तिरीयश्रुतिवाक्यमर्थत: पठति सर्वान् कामानिति । ननु कर्मफलभोगाङ्गीकारे अत्रापि प्रसज्येत इत्याशङ्क्याह नान्यवदिति । ज्ञानेन सञ्चितकर्मणां दग्धत्वात् अन्यवज्जन्म नास्तीत्यर्थ: ॥ २० ॥

इदानीं तैत्तिरीयकबृहदारण्यकवाक्यं सङ्क्षिप्यार्थत: पठति युवेति । ननु सार्वभौमादिहिरण्यगर्भान्तानां जीवनिष्ठानाम् आनन्दानां कथं ज्ञानिनि प्राप्तिः इत्याशङ्क्य सर्वेषामानन्दानां ज्ञानिनोऽवगतब्रह्मांशत्वात् प्राप्तिः इत्याह सर्वैरिति ॥ २१ ॥ २२ ॥

मर्त्त्यभोगे द्वयोर्नास्ति कामस्तृप्तिरतः समा ।
भोगान्निष्कामतैकस्य परस्यापि विवेकतः ॥ २३ ॥
श्रोत्रियत्वाद् वेदशास्त्रैर्भोग्यदोषानवेक्षते ।
राजा बृहद्रथो दोषांस्तान् गाथाभिरुदाहरत् ।
देहदोषाश्चित्तदोषा भोग्यदोषा अनेकशः ।
शुना वान्ते पायसे नो कामस्तद्वद्विवेकिनः ॥ २४ ॥ २५
निष्कामत्वे समेऽप्यत्र राज्ञः साधनसञ्चये ।
दुःखमासीद्भाविनाशादतिभीरनुवर्त्तते ।
नाभयं श्रोत्रियस्यातस्तदानन्दोऽधिकोऽन्यतः ।
गन्धर्वानन्द आशास्ति राज्ञो नास्ति विवेकिनः ॥२६॥२७
अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः ।
गन्धर्वत्वं समापन्नो मर्त्त्यो गन्धर्व उच्यते ॥ २८ ॥

ननु सार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात् कथमानन्दसाम्यमित्याशङ्क्य नैरपेक्ष्यसाम्यात् तृप्तिसाम्यमित्याह मर्त्त्येति। तृप्तिसाम्ये हेतुमाह भोगादिति ॥ २३ ॥

विवेकत इत्युक्तमर्थं विवृणोति श्रोत्रियेति। विषयदोषाः कस्यां शाखायां केनोक्ता इत्याशङ्क्य बृहद्रथेन मैत्रायणीयाख्यशाखायां गाथाभिरुक्ता इत्याह राजा बृहद्रथ इति। विवेकिनः कामानुदये दृष्टान्तमाह शुनेति ॥ २४ ॥ २५ ॥

सार्वभौमात् श्रोत्रियस्याधिक्यमाह निष्कामत्व इति। सार्वभौमस्य साधनसाध्यं यदास्ति तन्नाशभीतिश्चेति दोषद्वयस्मात् श्रोत्रिये तु तदुभयाभावादाधिक्यमित्यर्थः। श्रोत्रियस्याधिक्यान्तरमाह गन्धर्वेति ॥ २६ ॥ २७ ॥

पूर्वकल्पे कृतात् पुण्यात् कल्पादावेव चेद् भवेत् ।
गन्धर्वत्वं तादृशोऽत्र देवगन्धर्व उच्यते ॥ २९ ॥
अग्निष्वात्तादयो लोके पितरश्चिरवासिनः ।
कल्पादावेव देवत्वं गता आजानदेवताः ॥ ३० ॥
अस्मिन् कल्पेऽश्वमेधादि कर्म कृत्वा महत् पदम् ।
अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः ॥ ३१ ॥
यमाग्निमुख्या देवाः स्युर्ज्ञाताविन्द्रबृहस्पती ।
प्रजापतिर्विराट् प्रोक्तो ब्रह्मा सूत्रात्मनामकः ॥ ३२ ॥
सार्वभौमादिसूत्रान्ता उत्तरोत्तरकामिनः ।
अवाङ्मनसगम्योऽयमात्मानन्दस्ततः परः ॥ ३३ ॥
तैस्तैः काम्येषु सर्वेषु सुखेषु श्रोत्रियो यतः ।
निस्पृहस्तेन सर्वेषामानन्दाः सन्ति तस्य ते ॥ ३४ ॥

इदानीं गन्धर्वानन्दद्वैविध्यं दर्शयितुं श्लोकद्वयेन गन्धर्वभेदमाह पूर्वेति ॥ २८ ॥ २९ ॥

चिरलोकपित्रानन्दप्रदर्शनाय चिरलोकपितॄनाह अग्निष्वात्तेति । देवानन्दत्रैविध्यभेदप्रदर्शनाय देवभेदमाह कल्पेति ॥ ३० ॥ ३१ ॥

इन्द्रबृहस्पती प्रसिद्धावित्यर्थः ॥ ३२ ॥

सार्वभौमादिसूत्रान्तानां श्रोत्रियानन्दस्य तत्तल्लोककामनावत्त्वात् सार्वभौमादीति । एवं सर्वेभ्योऽधिकमानन्दमाह अवाङ्मनसेति । यतोऽयमानन्दः अवाङ्मनसगम्यः अत एषः सर्वेभ्योऽधिक इत्यर्थः ॥ ३३ ॥

इदानीमेतेषां सर्वेषामानन्दाः ये ते श्रोत्रिये विद्यन्ते यतः तेषु निःस्पृहत्वात् इत्याह तैस्तैरिति ॥ ३४ ॥

सर्वकामाप्तिरेषोक्ता यद्वा साक्षिचिदात्मता ।
स्वदेहवत् सर्वदेहेष्वपि भोगानवेक्षते ॥ ३५ ॥
अज्ञस्याप्येतदस्त्येव न तु तृप्तिरबोधतः ।
यो वेद सोऽश्नुते सर्वान् कामानित्यब्रवीत् श्रुतिः ॥ ३६ ॥
यद्वा सर्वात्मता स्वस्य साम्ना गायति सर्वदा ।
अहमन्नं तथान्नादश्चेति सामस्वधीयते ॥ ३७ ॥
दुःखाभावश्च कामाप्तिरुभे ह्येवं निरूपिते ।
कृतकृत्यत्वमन्यच्च प्राप्तप्राप्यत्वमीक्ष्यताम् ॥ ३८ ॥
उभयं तृप्तिदीपे हि सम्यगस्माभिरीरितम् ।
त एवात्रानुसन्धेयाः श्लोका बुद्धिविशुद्धये ॥ ३९ ॥

उपपादितमर्थमुपसंहरति सर्वकामेति । इदानीं पक्षान्तरमाह यद्वा इति । यथा स्वदेहे आनन्दाकारबुद्धिसाक्षित्वेनानन्दित्वम् इतरेष्वपि देहेषु तद्वदित्यर्थः ॥ ३५ ॥

ननूक्तप्रकारेणाज्ञस्यापि सर्वानन्दप्राप्तिरस्तु इत्याशङ्क्य सत्यं बुद्धि-साध्यत्वमिति ज्ञानाभावान्नैवमित्याह अज्ञस्येति । उक्तार्थे तैत्तिरीयश्रुतिं प्रमाणयति यो वेद इति । गुहायां निहितं ब्रह्म यो वेद सोऽश्नुते इति योजना ॥ ३६ ॥

इदानीं तृतीयप्रकारमाह यद्वेति । इमान् लोकान् कामान्नी-कामरूप्यनुसञ्चरन् इत्यादिनेत्यर्थः ॥ ३७ ॥

अतीतग्रन्थेन सिद्धमर्थं संक्षिप्य दर्शयति दुःखेति ॥ ३८ ॥

अवशिष्टं कृतकृत्यत्वं प्राप्तप्राप्यत्वमित्युभयं तृप्तिदीपे ईदृशा-दुःखमातेत्यादौ द्रष्टव्यमित्याह उभयमिति ॥ ३९ ॥

ब्रह्मानन्दाभिधे ग्रन्थे चतुर्थोऽध्याय ईरितः ।
विद्यानन्दस्तदुत्पत्तिपर्यन्तोऽभ्यास इष्यताम् ॥ ४० ॥

इति ब्रह्मानन्दे विद्यानन्दः
समाप्तः ।

पञ्चदशपरिच्छेदः ।

ब्रह्मानन्दे विषयानन्दः ।

अथात्र विषयानन्दो ब्रह्मानन्दांशरूपभाक् ।
निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ ॥ १ ॥

एतदध्यायार्थमुपसंहरति ब्रह्मानन्देति ॥ ४० ॥

इति ब्रह्मानन्दे विद्यानन्दव्याख्या
समाप्ता ।

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
तन्यते विषयानन्दो ब्रह्मानन्दे तु पञ्चमः ॥

पञ्चमाध्याये प्रतिपाद्यमर्थमाह अथेति । ननु विषयानन्दस्य लौकिकत्वात् मोक्षशास्त्रे निरूपणमनुपपन्नमित्याशङ्क्य तस्य लोकप्रसिद्धत्वेऽपि ब्रह्मानन्दैकदेशत्वेन ब्रह्मज्ञानोपयोगित्वात् तन्निरूपणं युक्तमित्याह द्वारभूत इति । ब्रह्मानन्दांशत्वे किं प्रमाणमित्याशङ्क्याह तदंशत्वमिति ॥ १ ॥

एषोऽस्य परमानन्दो योऽखण्डैकरसात्मकः ।
अन्यानि भूतान्येतस्य मात्रामेवोपभुञ्जते ॥ २ ॥
शान्ता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा ।
वैराग्यं क्षान्तिरौदार्यमित्याद्याः शान्तवृत्तयः ॥ ३ ॥
तृष्णा स्नेहो रागलोभावित्याद्या घोरवृत्तयः ।
संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ॥ ४ ॥
वृत्तिष्वेतासु सर्वासु ब्रह्मणश्चित्स्वभावता ।
प्रतिबिम्बति शान्तासु सुखञ्च प्रतिबिम्बति ॥ ५ ॥
रूपं रूपं बभूवासौ प्रतिरूप इति श्रुतिः ।
उपमा सूर्यकेत्यादि सूत्रयामास सूत्रकृत् ॥ ६ ॥
एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ ७ ॥

तामेव श्रुतिमर्थतः पठति एष इति ॥ २ ॥

इदानीं विषयानन्दस्य ब्रह्मानन्दांशत्वप्रदर्शनाय तदुपाधिभूतान्तःकरणवृत्तीर्विभजते शान्ता इति । शान्ताः सात्त्विक्यो वृत्तयः । घोरा राजस्यः । मूढास्तामस्यः । ता एव शान्तादिवृत्तीर्दर्शयति वैराग्यमित्यादिना ॥ ३ ॥ ४ ॥

उदाहृतासु त्रिविधास्वपि वृत्तिषु ब्रह्मचिद्रूपत्वं प्रतिभातीत्याह वृत्तिष्विति । शान्तासु विशेषमाह शान्तेति । चशब्द उक्तद्वयसमुच्चयार्थः ॥ ५ ॥

उक्तार्थे श्रुतिवाक्यमर्थतः पठति रूपमिति । तत्रैव व्याससूत्रस्यैकदेशं पठति उपमेति । अत एव चेति सूत्रस्य पूर्वभागः ॥ ६ ॥

स्वरूपेणैकस्योपाधिसम्बन्धात् नानात्वे श्रुतिं पठति एक एवेति ।

जले प्रविष्टश्चन्द्रोऽयमस्पष्टः कलुषे जले ।
विस्पष्टो निर्मले तद्वद् द्वेधा ब्रह्मापि वृत्तिषु ॥ ८ ॥
घोरमूढासु मालिन्यात् सुखांशस्य तिरस्कृतिः ।
ईषन्नैर्मल्यतस्तत्र चिदंशप्रतिबिम्बनम् ॥ ९ ॥
यद्वापि निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः ।
न प्रकाशस्य तद्वत् स्याच्चिन्मात्रोद्भूतिरत्र च ॥ १० ॥
काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भव गच्छतो यथा ।
शान्तासु सुखचैतन्ये तथैवोद्भूतिमाप्नुतः ॥ ११ ॥
वस्तुस्वरूपमाश्रित्य व्यवस्था तूभयोः समा ।
अनुभूत्यनुसारेण कल्प्यते हि नियामकम् ॥ १२ ॥

ननु निरवयवस्य ब्रह्मणः क्वचित् चिन्मात्रभानम् इतरत्र शान्तवृत्तौ चिदानन्दभानमित्येवं विभागकरणमनुपपन्नमित्याशङ्क्य चन्द्रदृष्टान्तेन परिहरति जलचन्द्रवदिति ॥ ७ ॥

दृष्टान्तं विवृणोति जले प्रविष्ट इति । उक्तमर्थं दार्ष्टान्तिके योजयति तद्वदिति ॥ ८ ॥

तदेवोपपादयति घोरमूढास्विति ॥ ९ ॥

ननु चन्द्रोपाधेरुदकस्य द्वैविध्यादंशभानमुपपन्नं प्रकृते तु उपाधिभूतस्यान्तःकरणस्य एकत्वादंशभानमनुपपन्नमित्याशङ्क्य दृष्टान्तान्तरमाह यद्वेति ॥ १० ॥

इदानीं शान्तासु वृत्तिषु चिदानन्दयोः प्रतीतौ दृष्टान्तान्तरमाह काष्ठ इति ॥ ११ ॥

नन्वेवं व्यवस्था कुतः इत्याशङ्क्याह वस्तुस्वरूपमिति । तत्र किं नियामकमित्याशङ्क्याह अनुभूत्यनुसारेणेति ॥ १२ ॥

न घोरासु न मूढासु सुखानुभव ईक्ष्यते ।
शान्तास्वपि क्वचित् कश्चित् सुखातिशय इष्यताम् ॥१३॥
गृहक्षेत्रादिविषये यदा कामो भवेत्तदा ।
राजसस्यास्य कामस्य घोरत्वात् तत्र नो सुखम् ॥ १४ ॥
सिद्धो न वेत्यस्ति दुःखमसिद्धौ तद्विवर्द्धते ।
प्रतिबन्धे भवेत् क्रोधो द्वेषो वा प्रतिबन्धकः ॥ १५ ॥
अशक्यश्चेत् प्रतीकारो विषादः स्यात् स तामसः ।
क्रोधादिषु महादुःखं सुखशङ्कापि दूरतः ॥ १६ ॥
काम्यलाभे हर्षवृत्तिः शान्ता तत्र महत् सुखम् ।
भोगे महत्तरं लाभप्रसक्तावीषदेव हि ॥ १७ ॥
महत्तमं विरक्तौ तु विद्यानन्दे तदीरितम् ।
एवं क्षान्तौ तथौदार्य्ये क्रोधलोभनिवारणात् ॥ १८ ॥
यद् यत् सुखं भवेत् तत् तद्ब्रह्मैव प्रतिबिम्बनात् ।
वृत्तिष्वन्तर्मुखास्वस्य निर्विघ्नं प्रतिबिम्बनम् ॥ १९ ॥

अनुभूतिमेव दर्शयति न घोरेति । शान्तास्वप्यानन्दःकाम्यकोऽस्ति कोऽपि क्वचित् कश्चित् सुखातिशयो भवतीत्याह शान्तेति ॥ १२ ॥

पूर्वोक्तघोरमूढवृत्तिषु सुखाभावमेवाभिनीय दर्शयति गृहेति । सुखासिद्धौ दुःखं वर्द्धते सुखस्य प्रतिबन्धे तु क्रोधो भवति । इच्छाभावे कारणान्तरमाह द्वेष इति ॥ १४ ॥ १५ ॥

परिहारस्याशक्यत्वे विषादो भवति तस्यापि तामसत्वात् अस्य दुःखमित्याह अशक्य इति । क्रोधादिष्वित्यादयः स्पष्टार्थाः ॥ १६ ॥ १७ ॥ १८ ॥

एवं शान्त्यादीनां किं रूपमित्याह वृत्तिष्विति ॥ १९ ॥

सत्ता चितिः सुखञ्चेति स्वभावा ब्रह्मणस्त्रयः।
मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्वयम् ॥ २० ॥
सत्ता चितिर्द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः।
शान्तवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरितम् ॥ २१ ॥
अमिश्रं ज्ञानयोगाभ्यां तौ च पूर्वमुदीरितौ।
आद्येऽध्याये योगचिन्ता ज्ञानमध्याययोर्द्वयोः ॥ २२ ॥
असत्ता जाड्यदुःखे द्वे मायारूपं त्रयं त्विदम्।
असत्ता नरशृङ्गादौ जाड्यं काष्ठशिलादिषु ॥ २३ ॥
घोरमूढधियोर्दुःखमेवं माया विजृम्भिता।
शान्तासु जड़बुद्ध्यैक्यान्मिश्रं ब्रह्मेति कीर्त्तितम् ॥ २४ ॥

इदानीं सर्वत्र ब्रह्मस्वरूपानुभूतिप्रदर्शनाय तत्स्वरूपं स्मारयति सत्तेति। मृच्छिलादिषु सन्मात्रमित्यर्थः। घोरमूढयोः द्वयोः सत्ताचिती द्वे शान्तवृत्तौ सच्चिदानन्दास्त्रयोऽपि व्यक्ताः। एवं सप्रपञ्चं ब्रह्माभिहितमित्याह मिश्रमिति ॥ २० ॥ २१ ॥

अमिश्रं कुतो ज्ञायते इत्याशङ्क्याह अमिश्रमिति। तौ ज्ञानयोगौ पूर्वमेवोक्तावित्यर्थः। कुत्रोक्तावित्याशङ्क्य योगः प्रथमाध्याये उक्त इत्याह आद्ये इति। समनन्तराध्याययोर्ज्ञानमुक्तमित्याह ज्ञानमिति ॥ २२ ॥

ननु सच्चिदानन्दानां ब्रह्मस्वरूपत्वे मायायाः किं स्वरूपमित्याशङ्क्याह असत्तेति। नरशृङ्गादावसत्त्वं मृच्छिलादिषु जाड्यमिति विवेकः ॥ २३ ॥

दुःखं कुत्रेत्याशङ्क्याह घोरेति। एवं सर्वत्र माया प्रतिभासते इत्याह एवमिति। शान्तादिषु वृत्तिषु ब्रह्मणो मिश्रत्वे किं कारणमित्यत आह शान्तेति ॥ २४ ॥

एवं स्थितेऽत्र यो ब्रह्म ध्यातुमिच्छेत् पुमानसौ ।
नृशृङ्गादिमुपेक्षेत शिष्टं ध्यायेद् यथायथम् ॥ २५ ॥
शिलादौ नामरूपे द्वे त्यक्त्वा सन्मात्रचिन्तनम् ।
त्यक्त्वा दुःखं घोरमूढधियोः सच्चिद् विवेचनम् ॥ २६ ॥
शान्तासु सच्चिदानन्दांस्त्रीनप्येवं विचिन्तयेत् ।
कनिष्ठमध्यमोत्कृष्टास्तिस्रश्चिन्ताः क्रमादिमाः ॥२७॥
मन्दस्य व्यवहारेऽपि मिश्रब्रह्मणि चिन्तनम् ।
उत्कृष्टं वक्तुमेवात्र विषयानन्द ईरितः ॥ २८ ॥
औदासीन्ये तु धीवृत्तेः शैथिल्यादुत्तमोत्तमम् ।
चिन्तनं वासनानन्दो ध्यानमुक्तं चतुर्विधम् ॥ २९ ॥

एतदभिधानं किमर्थमित्याशङ्क्य ब्रह्मध्यानार्थमित्याह एवं स्थिते इति । नृशृङ्गादिमुपेक्ष्यान्यत्र ब्रह्मध्यानं कर्त्तव्यमित्याह नृशृङ्गादि-मिति ॥ २५ ॥

अन्यत्रेत्युक्तं कुत्र कथं ध्येयमित्यत आह शिलादाविति । घोर-मूढबुद्धिवृत्तिषु दुःखं परित्यज्य सच्चिद्रूपयोश्चिन्तनं कर्त्तव्यमित्याह त्यक्त्वेति ॥ २६ ॥

सात्त्विकवृत्तिषु सच्चिदानन्दास्त्रयोऽपि ध्येया इत्याह शान्तेति । एषां ध्यानानां किं साम्यं नेत्याह कनिष्ठेति ॥ २७ ॥

इदानीं निर्गुणध्यानेऽनधिकारिणोऽनुग्रहाय मिश्रब्रह्मध्यानेऽधि-कार उक्त इत्यभिप्रायेणाह मन्दस्येति ॥ २८ ॥

एवं सवृत्तिकं ध्यानत्रयमुक्त्वा अवृत्तिकं ध्यानमाह औदासीन्ये इति । उत्तमोत्तममिति एभ्यो ध्यानेभ्योऽधिकमित्यर्थः । उक्तं निगमयति ध्यानमुक्तमिति ॥ २९ ॥

न ध्यानं ध्यानयोगाभ्यां ब्रह्मविद्यैव सा खलु।
ध्यानेनैकाग्रमापन्ने चित्ते विद्या स्थिरीभवेत् ॥ ३० ॥
विद्यायां सच्चिदानन्दा अखण्डैकरसात्मताम्।
प्राप्य भान्ति न भेदेन भेदकोपाधिवर्जनात् ॥ ३१ ॥
भ्रान्ता घोराः शिलाद्याश्च भेदकोपाधयो मताः।
योगाद् विवेकतस्त्वेषामुपाधीनामपाकृतिः ॥ ३२ ॥
निरुपाधि ब्रह्मतत्त्वे भासमाने स्वयं प्रभे।
अद्वैते त्रिपुटी नास्ति भूमानन्दोऽयमुच्यते ॥ ३३ ॥
ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमाध्याय ईरितः।
विषयानन्द एतेन द्वारेणान्तः प्रविश्यताम् ॥ ३४ ॥
प्रीयाद्धरिर्हरोऽनेन ब्रह्मानन्देन सर्वदा।

अयं ध्यानावान्तरभेदः किं नेत्याह न ध्यानमिति। तर्हि किमेतदित्याशङ्क्याह ब्रह्मविद्येति। इयं ब्रह्मविद्या कथमुत्पन्नेत्याशङ्क्याह ध्यानेनेति ॥ ३० ॥

अस्या विद्यात्वे हेतुमाह विद्यायामिति ॥ ३१ ॥

भेदकोपाधिवर्ज्जनादित्युक्तं तानेव भेदकोपाधीनाह भ्रान्ता घोरा इति। एतेषां परिहारः केनोपायेन इत्याशङ्क्याह योगाद्विवेक इति ॥ ३२ ॥

फलितमाह निरुपाधीति। त्रिपुटीभानाभावात् भूमानन्दोऽयमुच्यते इत्यर्थः ॥ ३३ ॥

ग्रन्थमुपसंहरति ब्रह्मानन्देति ॥ ३४ ॥

पायाच्च प्राणिनः सर्व्वान् स्वाश्रितान् शुद्धमानसान् ॥ ३५

इति ब्रह्मानन्दे विषयानन्दः समाप्तः ।

इति श्रीभारतीतीर्थविद्यारण्यमुनीश्वरविरचित पञ्चदश-प्रकरणात्मकपञ्चदशीग्रन्थः समाप्तः ।

निर्विघ्नग्रन्थसमाप्तिद्योतनार्थं देवतानामोच्चारणपूर्वकमिष्टाशी-र्वादसूचकं श्लोकमाह प्रीयादिति ॥ ३५ ॥

इति ब्रह्मानन्दे विषयानन्दव्याख्या समाप्ता ।

इति श्रीपरमहंसपरिव्राजकाचार्य्य श्रीभारतीतीर्थविद्यारण्य-मुनिवर्य्यशिष्येण श्रीरामकृष्णविदुषा विरचिता पञ्च-दशप्रकरणात्मकपञ्चदश्याख्यग्रन्थस्य टीका समाप्ता ।

প্রিন্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়।
২০ নং বানাপুকুর লেন।